Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 228 OLD 187

FOLIO 320

TITLE

न्यायरत्न : न्यायरत्न :

Nyayaratna

॥अथन्यायरत्नप्रारंभः॥

श्रीगणेशायनमः॥ श्रीमदुपास्यदेवतायैनमः॥नित्येछाकृतिचित्सौख्यंपरमाणुकलेवरं॥अध्यात्मादिजगद्धेतुंनमामिपरमेश्वरं॥१॥इत्थंनिष्पाद्यतस्मिन्गुणगणमदधत्कर्मजातिविशेषान्संबंधं चाप्यभावंसुरगृहनिरयौबंधमोक्षावकार्षीत्॥एकोपिब्रह्मविष्ण्वीश्वरविविधपदैर्गीयतेधर्मभेदात्तंसर्वज्ञंदयालुंदुरितगिरिपविंमंगलायाश्रयामः॥२॥कृष्णंभट्टादिसंदर्भमिंधुसायासमंथनैः॥न्यायरत्नंसमुद्धृत्यप्रकटीकरवाण्यहं॥३॥मीमांसान्यायपंचास्यराघवाचार्यसूरिणां॥शिष्यस्यैषाकृतिर्भूयाद्रघुनाथस्यसन्मुदे॥४॥इहखल्वान्वीक्षिकीसांख्ययोगवेदांताइतिचतस्रोविद्या निःश्रेणिकाभूताःपरमपुरुषार्थस्यसाधनं॥तथाहि॥पामरोहिजनोजडमस्थिमांसमयंदेहमात्मानंमन्यते॥नचनत्थास्ति॥सर्वास्तिकमतविरोधाद्विवेकिजनानुभवविरोधाच्चानोदेहात्मतानिरसनायप्रवर्तितासर्वमोक्षविद्यासुप्रथमाआन्वीक्षिकीतर्कविद्यापरमकारुणिकेनमहर्षिणागोतमेन॥तल्लिंगात्तत्पदार्थतत्त्वज्ञानान्निःश्रेयसाधिगमइतिपदार्थतत्त्वज्ञानंचमोक्षहेतुर्देहादिभिन्नत्वेनात्मज्ञानायोपयुज्यते॥तच्चप्रत्यक्षानुमानोपमानशब्दरूपप्रमाणचतुष्टयाधीनं॥तेष्वप्यसन्निकृष्टार्थसाधकत्वेनस्वस्वेतरसर्वप्रमाणप्रामाण्यसाधकत्वेनचमूर्द्धन्यत्वादनुमानमेवबहुप्रपंचंनिरूपयामःचिंतामणिः॥तंचव्याचख्युःशिरोमणिः॥शिरोमणिव्याख्याःसंति

बद्ध स्तामांसंप्रतिगदाधर्येवप्रबला॥तस्यांमवाध्ययनाध्यापनयोर्बङ्गशःप्रचारदर्शनात्॥गदाधर्यामपिसामान्यनिरुक्तिलक्षणा-
च्चतुर्दशलक्षणीसिद्धांतलक्षणावयवपक्षतारथ्यापंचवादामुख्याः॥तदध्ययनाध्यापनयोस्तत्रत्यविषयेष्ववसभायामूहापोहकर्तृत्ववा
रस्यचप्रायशोदर्शनात्गदाधरभट्टाचार्यस्तेष्ववबङ्गप्रपंचितत्वाच्च॥पंचवादेषुहिमंतिदुर्बोधविचारणीयान्यूहापोहाहाणिबङ्गस्थाना
निवाक्यानिचतानिचक्लंभट्टैरनिविस्तरतःप्रकाशितानीतरेष्वकचित्कचित्॥तत्रतत्रस्थितानामूहापोहानांव्यस्तत्वेनदुरवबोधत्वेनचा
लोचनालसानांपंचवादेपूहापोहकौशल्येच्छावतांकृतेकृष्णभट्टादिविवरणवाक्यान्यालोच्यतदुदितान्कचित्स्वकल्पितांश्चपूर्वपक्ष
समाधानसिद्धांतानसंगृह्यसमारभ्यते॥सामान्यनिरुक्त्यादिक्रमेणन्यायरत्नाभिधेयमभिनवाटिप्पणी॥एतांचाधिकोक्षेपेणनन्यूनपूर
णेनचशोधयंतुदयालवोविद्वांसोभूयंतुनः॥ ॥अथहेत्वाभासास्तत्वनिर्णयविजयप्रयोजकत्वान्निरूप्यंत इतिमूले॥अ-
थशब्दस्यध्वंसाधिकरणकालवृत्तित्वरूपमानंतर्यमर्थस्तदेकदेशध्वंसेआनंतर्यावधितयाऽर्थतोलब्धसङ्गतिनिरूपणस्यानुयोगितया
ऽन्वयः॥अथशब्दस्यैवसङ्गतिनिरूपणानंतर्यमर्थइतिवा॥व्याप्तिपक्षधर्मताप्रकारकभ्रमविशेष्याः हेत्वाभासपदार्थः॥हेतुवदवभासंत

इति व्युत्पत्तावाभासपदंभ्रमार्थकं॥आख्यातार्थविशेष्यता॥तद्वदित्यस्यतत्सादृश्येनेत्यर्थः॥सादृश्यंचव्याप्तिविशिष्टपक्षधर्मतारूपंतृतीयार्थः प्रकारत्वंतस्याभासपदार्थेन्वयः॥ज्ञानजन्यजिज्ञासाधीनत्वंपंचम्यर्थस्तदेकदेशेज्ञानेप्रकारतयाप्रकृत्यर्थान्वयः॥आनंतर्यपंचम्यर्थयोर्लक्षगादिप्रकारकज्ञानानुकूलव्यापाररूपेनिपूर्वकरूपधात्वर्थेनिरूपणेन्वयः॥कर्माख्यातवशाच्चभवेत्यध्याहार्यं॥तत्रकृतिस्तृतीयार्थस्त्यांप्रकृत्यर्थस्यग्रंथकर्तुराधेयतयान्वयः॥तस्याजन्यतासंबंधेनधात्वर्थनिरूपणेऽन्वयः॥कृत्यन्वयिवर्तमानत्वंहेत्वाभासपदार्थान्वयिविषयत्वंचकर्माख्यातार्थस्तथाचग्रंथकृत्समवेतवर्तमानकृतिजन्यमद्धेतुनिरूपणानंतरतत्वनिर्णयविजयप्रयोजकत्वप्रकारकज्ञानजन्यजिज्ञासाधीननिरुक्तनिरूपणविषयीभूताव्याप्तिपक्षधर्मताप्रकारकत्वमविशेष्याइत्यर्थकेपंचम्यर्थस्यज्ञानजन्यजिज्ञासाधीनत्वस्यनिरूपणेऽन्वयादेवसंगतिप्रदर्शनसिद्धौतत्संगादितिपूरणमनुचितमित्याशंकांनिरस्यति॥हेत्वाभासनिरूपणेति॥सद्धेतुनिरूपणानंतरमितिशेषः॥जिज्ञासाजनकज्ञानविषयत्वंसंगतित्वपदार्थः॥विशेषणवाचकानामितिन्यायात्॥तदेकदेशप्रयोजकत्वेहेत्वाभासनिरूपणरूपप्रकृत्यर्थान्वितसप्तम्यर्थनिरूपितत्वान्वयः॥सद्धेतुनिरूपणानंतर्यस्यहेत्वाभासनिरूपणेन्वयः॥तथाचसद्धेतुनिरूपणानंतरहेत्वाभास

निरूपणप्रयोजकजिज्ञासाजनकज्ञानविषयत्वंसंभवतीतिवाक्यार्थः॥ यद्वादानेकर्णसमइतिवत्हेत्वाभासनिरूपणेत्यत्राभेदःसप्तम्यर्थः॥ अभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वंसंगतित्वपदार्थस्तदेकदेशाभिधानेसप्तम्यर्थान्वयः॥ शेषंपूर्ववदेव॥ प्रसंगस्यापि॥ उपोद्घातादिपंचकभिन्नस्यापीत्यर्थः॥ नतूपोद्घातादिपंचकभिन्नत्वविशिष्टानंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्यापीत्यर्थस्तथासतिनिरुक्तप्रसंगदृष्टिसंगतित्वमितिबोधस्यनीलघटवतिघटइतिवदप्रामाणिकत्वप्रसंगात्॥ व्याप्तिपक्षधर्मताविरहरूपंप्रसंगंनस्यनिरुक्तसंगतित्वंचदर्शयति॥ व्याप्तिपक्षधर्मतेत्यादिना॥ एकसंबंधिज्ञानस्येवापरसंबंधिस्मारकत्वान्निरूपणेसतीत्यनेनसद्धेतुरूपएकसंबंधिज्ञानलाभः॥ व्याप्तिपक्षधर्मताविरोधीति॥ एतच्चतद्विरहवतइत्यत्रोभयत्रावच्छिन्नाभाववतोलाभाय॥ केचित्तुविरोधीतितदसमानाधिकरणेत्यर्थः॥ विरोधिपदंव्याप्तिपक्षधर्मताभावस्यस्वदृत्तिधर्मविरोधिधर्मविधयास्मारकत्वलाभायेत्याहुः॥ यद्यपिअसंकीर्णबाधितादेःस्मृतत्वंनसंभवतिनत्रव्याप्तिपक्षधर्मत्वोभयस्यैवमत्वात्॥ तथापिनिरूप्यतावच्छेदकसमानाधिकरण्येनसंगतेस्तदवच्छेदेननिरूपणप्रयोजकत्वान्नासंगतिः॥ तदप्रदर्शनेनेति॥ प्रसंगस्यसंगतित्वाप्रदर्शनेनेत्यर्थः॥ तन्निरूपणप्रयोजकत्वमिति॥ हेत्वाभासनिरूपण

प्रयोजकजिज्ञासाजनकज्ञानविषयत्वमित्यर्थः॥बोधितावेनावेति॥एतावता॥अवयवांतग्रंथेनेत्यर्थः॥निरूप्येत्यत्रनिरूपणान्वयिअभेदस्तृतीयार्थः धान्येनधनवानितिवत्॥सपरिकरं॥व्याप्तिपक्षधर्मताविशिष्टं॥हेतुं॥लिंगं॥विषयत्वद्वितीयार्थः॥निरूप्येत्यत्रप्रतियोग्यनुकूलव्यापाररूपनिरूपणपूर्वकरूपधात्वर्थघटकप्रतियोनिरन्वयः॥आनंतर्यलभ्यबोधः॥तच्चध्वंसाधिकरणकालवृत्तित्वंतद्भासनिरूपणमित्यत्रज्ञानानुकूलव्यापाररूपनिरूपणपूर्वकरूपधात्वर्थनिरूपणेतदन्वयः तादृशनिरूपणएवपंचमीद्वितीयार्थान्वयः॥अन्वयश्चास्यानिरूपणमित्यनेनव्याख्यायांदर्शितएव॥तद्भासेति॥सद्धेतुवृत्तिव्याप्तिपक्षधर्मतावत्त्वरूपतत्सादृश्यप्रकारकभ्रमविशेष्येत्यर्थः॥निरूपणमित्यत्रद्वितीयार्थोविषयत्वं॥प्रतियोग्यनुकूलतेरुत्तरकालीनवृत्तिविषयत्वप्रकारकज्ञानानुकूलव्यापाररूपप्रतिज्ञार्थः॥वर्तमानत्वंवृत्तिश्चार्थः॥निरूपणस्यनिरूपितत्वसंबंधेनद्वितीयार्थविषयतायामन्वयः॥विषयतायाश्चोक्तव्यापाररूपधात्वर्थैकदेशज्ञानेऽन्वयः॥व्यापारस्यजनकतासंबंधेनवृत्तावन्वयः॥वर्तमानत्वस्यापिवृत्तावन्वयः॥वृत्तेश्चाश्रयतयाख्यातेक्ष्मिप्रकर्तरिमणिकारेऽन्वयः॥तथाचावयवांतग्रंथाभिन्नोयोसपरिकरहेतुविषयकज्ञानानुकूलव्यापारस्तदुत्तरकालीनंयत्सपरिकरहेतुनिरूपितप्रसंगसंगतिज्ञानजन्यजिज्ञासाप्रयोज्यंतत्त्वनिर्णयादिरूपतत्कार्यकारित्वज्ञा-

नजन्यजिज्ञासाप्रयोज्यंचनदाभासनिरूपणंअनुमितिकारणीभूतेत्यादिशब्दात्मकंतद्विशेष्यकाव्यवहितोत्तरकालकर्तव्यत्वप्रकारक-
ज्ञानानुकूलव्यापारोऽयेतिशब्दात्मकस्तदनुकूलवर्तमानकृतिमान्मणिकारइतिबोधः॥ननुतत्प्रसंगादित्येवास्तुकिंनिरूप्येत्यंतेनेत्य
तआहनिरूप्येत्यंतमिति॥उक्तक्रमेण॥व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणेसतीत्युक्तक्रमेणेत्यर्थः॥दुष्टहेतोरिति॥अस्यचस्मृतत्वेऽ
न्वयः॥प्रसंगनिर्वाहकस्येति॥उपोद्घातादिपंचकभिन्नत्वविशिष्टानंतराभिधानप्रयोजकजिज्ञासाजनकस्मृतिविषयत्वरूपप्रसंगत्ववि
शिष्टप्रसंगसत्ताप्रयोजकस्येत्यर्थः॥विशिष्टसत्तांप्रतिविशेषणसत्तायाःप्रयोजकत्वात्तु निरूप्येत्यंतेनयकसंबंधिज्ञानरूपापरसंबंधि
ज्ञानसामग्रीसंपादनात्स्मृतत्वघटितनिरूक्तप्रसंगत्वविशिष्टसत्तांप्रतिस्मृतत्वसत्तायाःप्रयोजकत्वंबोध्यं॥केचित्तुदुष्टहेतोरित्यस्यहेत्वा
भासत्वस्येत्यर्थः॥प्रसंगनिर्वाहकस्येत्यस्यप्रसंगस्यसंगतित्वनिर्वाहकस्येत्यर्थस्तथाचानंतराभिधानप्रयोजकजिज्ञासाजनकस्मृतिविषयत्व
रूपसंगतित्वं व्याप्तिपक्षधर्मतोभयाभावरूपप्रसंगस्यहेत्वाभासतात्मनोस्मृतत्वंविनानुपपन्नमिति नाद्यस्मृतत्वस्यतन्निर्वाहकत्वमि
तिवदंति॥ननूपोद्घातादिपंचकभिन्नत्वंसत्यनंतराभिधानप्रयोजकजिज्ञासाजनकस्मरणप्रकारत्वरूपप्रसंगत्वबोधकप्रसंगपदेने-

वताद्दशोभयाभावरूपप्रसंगस्यस्मृतत्वलाभेनिरूप्येतंतव्यर्थमेवेतिचेन्न॥तेनसद्धेतुनिरूपणस्यपूर्वकालीनत्वबोधनात्तादृशस्मरणप्रयोजकैकसंबंधिज्ञानरूपसामग्रीसाकल्यस्यबोधात्स्मरणेकथंनानिष्टत्तेः॥निरूप्येत्यनेनसद्धेतुनिरूपणस्यसिद्धत्वोक्त्याऽवसरसंगतिलाभस्तत्तयोजनमितिकेचित्॥प्रसंगसद्धेतुनिरूपितसंगतित्वघटकस्यसद्धेतुनिरूपणोत्तरकालीनत्वस्यलाभायनिरूप्येत्यंतमित्यपरे॥सपरिकरहेतुनिरूपितेति॥निरूपितत्वंतज्ज्ञानाधीनज्ञानविषयत्वरूपं॥तज्ज्ञानजन्यजिज्ञासाधीनेति॥सपरिकरहेतुनिरूपितस्वनिष्ठव्याप्तिपक्षधर्मतोभयाभावरूपप्रसंगसंगतिज्ञानप्रयोज्यजिज्ञासाप्रयोज्येत्यर्थः॥जिज्ञासायांसपरिकरहेतुनिरूपितप्रसंगसंगतिज्ञानप्रयोज्यत्वंचावयवांतर्ग्रंथेनसपरिकरहेतुनिरूपणानंतरंशिष्यस्यतज्ज्ञानंननोऽतःपरंनिरूपणीयंगुरुस्मृतिविषयंकिंचित्स्यादितिगुरुस्मृतिविषयत्वेनसपरिकरहेतुनिष्ठव्याप्तिपक्षधर्मतोभयाभावरूपप्रसंगसंगतिज्ञानंसामान्यधर्मप्रकारकंननोगुरुस्मृतिविषयावांतरधर्मप्रकारकज्ञानंनदिष्टसाधनमितीष्टसाधनताज्ञानादिकंननस्यादशज्ञानंमंभूयादितीच्छेनिरूपणं॥नचहेत्वाभासनिरूपणेहेत्वाभासत्वावांतरधर्मप्रकारकज्ञानेच्छाएवप्रयोजकत्वात्दर्शितसामान्यधर्मप्रकारकज्ञानेच्छाअनुपयुक्तेतिशंक्यं॥प्रसंगसंगतेर्हेत्वाभासरूपत्वात्तस्यतद्व्याप्यत्वाच्चतज्जिज्ञासायातज्जिज्ञासारूपत्वात्॥नचतस्यै

वत्तद्व्याप्यत्वेनतत्प्रकारकजिज्ञासातःपूर्वंसामान्यधर्मप्रकारकज्ञानविधयातज्ज्ञानस्यावश्यकत्वेनतादृशजिज्ञासाविषयस्यप्राक्सिद्धत्वान्नतज्जिज्ञासोत्पत्तिरितिवाच्यं॥अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वेनव्याप्यत्वस्यगुरुस्मृतिविषयत्वेनव्यापकत्वस्यस्वीकारेणप्रसंगसंगतित्वंपुरस्कृत्यपूर्वंहेत्वाभासत्वप्रकारकज्ञानसत्वेपितादृशयथार्थज्ञानविषयत्वेननत्प्रकारकज्ञानस्यासिद्धतयातथाविधजिज्ञासासंभवात्॥तादृशजिज्ञासायांहेत्वाभासनिरूपणप्रयोजकत्वंचतादृशजिज्ञासानंतरंगुरुंप्रतिशिष्यस्यगुरुस्मृतिविषयवान्कइतिजिज्ञासाबोधकशाब्दरूपःप्रश्नस्तेगुरुस्मृतिविषयव्याप्यत्वोपलक्षितधर्मप्रकारकज्ञानेच्छाविषयविषयकोगुरोःशाब्दबोधःकिंशाब्दस्यसमभिव्याहृतपदार्थतावच्छेदकावांतरधर्मप्रकारकज्ञानेच्छाविषयेशक्तेस्ततोऽनुमितिकारणीभूतेत्यादिशाब्दप्रयोगात्मकहेत्वाभासनिरूपणानुकूलाप्रसंगसंगतिर्व्याप्यप्रकारकज्ञानंशिष्यस्यभवतिगुरोर्बुबोधयिषानदनुकूलंयत्प्रतिपाद्यस्यासिद्धत्वज्ञानंतत्प्रतिपादकीभूतस्यासिद्धत्वव्याप्येच्छाविषयत्वप्रतियोगिकस्यगुरुस्मृतिविषयवान्कइतिप्रश्नवाक्यस्यव्यवहर्तव्यज्ञानविधयानिर्वाहकंयज्ज्ञानंतत्प्रकारकंविषयविधयातदनुकूलाजिज्ञासेतिक्रमेणबोध्यं॥ननुदीधितिरहस्यासंगतिसामान्याप्रदर्शनरहस्यन्यूनतावारणंतत्संगादित्यंशपूरणेनतत्कर्त्तव्यंश

पूरणेनचहेद्धाकृतंतच्चायुक्तंसंगतिप्रदर्शनस्यशिष्यप्रवृत्तिफलकत्वेनतत्स्यचयथाश्रुतमूललभ्यावश्यकेष्टसाधनत्वप्रदर्शनेनैवलाभसंभवा
दित्याशंकतेकथमिति॥तत्रहेत्वाभासनिष्ठयत्तत्त्वनिर्णयविजयप्रयोजकज्ञानविषयत्वमितियोजना॥ननु मूलवाक्याद्धेत्वाभासनिष्ठतत्व
निर्णयादिजनकज्ञानविषयतायाकथंलाभइतिचेदित्थंतादृशमूलेप्रयोजकत्वपदंप्रयोजकज्ञानविषयतापरंपंच म्यर्थःप्रयोज्यत्वंहे
त्वाभासानामितिपूरणीयंतदर्थस्यहेत्वाभासनिष्ठत्वस्यतादृशप्रयोजकज्ञानविषयतायामन्वयस्तादृशविषयत्वस्यप्रयोज्यत्वरूपेपंचम्यर्थः
न्वयस्तस्यचधात्वर्थनिरूपणाख्यातार्थविषयत्वेनस्यहेत्वाभासपदार्थेःन्वयस्तथाचहेत्वाभासनिष्ठायातत्वनिर्णयादिजनकज्ञानविषय
तातत्प्रयोज्यनिरूपणविषयताश्रयीभूताहेत्वाभासाइतिविशिष्टार्थलाभेहेत्वाभासनिष्ठतादृशविषयतालाभः॥हेत्वाभासानामितिपूर-
णाभावेपितत्वनिर्णयादिजनकज्ञानविषयताहेत्वाभासनिष्ठाहेत्वाभासनिरूपणप्रयोजकत्वाद्यद्यन्निरूपणप्रयोजकंतत्तन्निष्ठमितिव्या
ख्यातादृशार्थलाभोबोध्यः॥एवंचहेत्वाभासनिष्ठतादृशविषयताज्ञानेतुल्यवित्तिवेद्यतयाहेत्वाभासविषयकज्ञानेतत्वनिर्णयादिजन
कत्वज्ञानात्तादृशज्ञानस्येष्टसाधनताज्ञानरूपत्वेनतत्वनिर्णयादिमेभवतितिफलेछासहितंतादृशेष्टसाधनताज्ञानाच्छिष्याणांप्रवृत्ति

रति भावः॥ मूलादिष्टसाधनताज्ञानेपिसंगत्यप्रदर्शनेऽसंगतत्वज्ञानेनोन्मत्तप्रलपितत्वशंकयातादृशज्ञानेऽप्रामाण्यनिश्चयोदयेनप्रद-र्शितमपीष्टसाधनत्वंप्रवृत्त्यनुपयोग्येवस्यादितिप्रवृत्त्युपयोगीष्टसाधनताज्ञानेऽप्रामाण्यनिश्चयसंपादकोन्मत्तप्रलपितत्वनिश्च-यसंपादकासंगतत्वज्ञानविघटकतयासंगतिप्रदर्शनस्यावश्यकत्वेत्यभिप्रायेणसमाधत्ते॥ तथापीति॥तन्मात्रपरत्वे ॥ शिष्यप्रवृत्त्युपयोगिहेत्वाभासज्ञानेइष्टसाधनत्वमात्रप्रदर्शनपरत्वे॥मात्रपदेनसंगतिप्रदर्शनव्यवच्छेदः॥ न्यूनता॥ अप्रवर्तक-ता॥ स्यादिति॥मूलस्थनिशेषः॥ एककार्येति॥तत्वनिर्णयादिरूपेतिशेषः॥तथाचासंगतत्वज्ञानविघटनस्येष्टसाधनत्वप्रद-र्शनस्यचावश्यकत्वेतत्कार्यंतंत्रापूरणेइष्टसाधनत्वस्यसंगतिघटकत्वात्संगतिप्रदर्शनेनोभयमपिसंभवतीतितथैवदीधितिरुक्त-ताकृतमित्यभिप्रायः॥ विजयपरिग्रहइति॥पराहंकारखंडनंविजयः॥अहंकारश्चाहमुत्कृष्टइतिज्ञानं॥तत्खंडनं॥तन्निष्ठत्वनुकूल-व्यापारः॥यद्वायमुत्कृष्टइतिमध्यस्थज्ञानानुकूलव्यापारोविजयः॥सुखविशेषइतिवा॥ प्रयोजकत्वंचेति॥यादृशहेतुकेपराम-र्शविषयांशेभ्रमएवनास्तितत्रसाध्यादिविषयतानांकारणतावच्छेदकत्वेगौरवात्॥विषयितयासाध्यनिरूपितव्याप्तिविशिष्टहेतु-

विशिष्टपक्षवज्ज्ञानत्वेनैवकारणत्वाल्लिंगस्यकारणतावच्छेदकत्वंबोध्यमन्यथाभ्रमप्रमासाधारणनिरूप्यनिरूपकभावापन्नलिंगतावच्छेदकावच्छिन्नविषयतायाएवकारणतावच्छेदकत्वाल्लिंगस्यतथात्वाभावादसंगतिः॥ **प्रमितकोटिनिश्चय इति**॥साध्यवत्पक्षविषयतानिरूपितसाध्यविषयताशालिनिश्चय इत्यर्थः॥ **तत्र**॥तादृशविषयताशालिनिश्चये॥ **तर्हि परीतेति**॥साध्याभावरूपेत्यर्थः॥ **हेत्वाभासत्वज्ञानमपि**॥दोषज्ञानमपीत्यर्थः॥ **उपयुज्यत इति**॥पर्वतोवन्हिमान्धूमात्पर्वतोवह्न्यभाववान्जलादितिवादिप्रतिवादिनोर्विवादेजलंपर्वतावृत्तीतिदोषोपन्यासेनजलेपर्वतावृत्तित्वज्ञानेजातेवह्न्यभावव्याप्यजलवान्पर्वत इतिविरोधिपरामर्शविशेषणज्ञानादिघटितसामग्रीसंपत्त्यापर्वतावृत्तिजलनिष्ठप्रकारतानिरूपितपर्वतनिष्ठविशेष्यताशालीदंज्ञानमितितादृशपरामर्शःप्रामाण्यग्रहेजातेअप्रामाण्यज्ञानाभावविशिष्टविरोधिपरामर्शस्यैवप्रतिबंधकतयातदभावरूपकारणसंपादनेनदोषज्ञानस्योपयोगित्वमेतदेवाह॥ **प्रतिबंधकीभूतेति**॥ **अथवेति**॥ **प्रमात्वनिश्चयेति**॥साध्यवन्निष्ठविशेष्यतानिरूपितसाध्यनिष्ठप्रकारताकत्वनिश्चयेत्यर्थः॥ **तत्र**॥तादृशप्रमात्वनिश्चये॥ **सद्धेतुत्वज्ञानमिव**॥धूमादौव्याप्तिपक्षधर्मतावगाहिवन्हिव्याप्यधूमवान्

पर्वत इतिज्ञानमिव॥तादृशज्ञानंपर्वतोवह्निमानित्यनुमितिविशेष्यकवह्निमत्सर्वतविशेष्यतानिरूपितवह्निनिष्ठप्रकारताशालित्वरूपप्रमात्वविधेयकानुमितौतत्प्रयोजकवह्निमत्सर्वतविशेष्यतानिरूपितवह्निनिष्ठप्रकारताशालित्वव्याप्यवह्निव्याप्यधूमवत्सर्वतविशेष्यतानिरूपितवह्निप्रकारताशालित्वदितिपरामर्शेविशेषणज्ञानविधयाप्रयोज्यत्वेनप्रयोजकंवह्निव्याप्यधूमवान्पर्वत इतिज्ञानविषयतयासङ्गृह्यतेधूमादेःप्रयोजकत्वात्तादृशानुमितिप्रयोजकत्वंबोध्यं॥तद्विपरीतसाधकेति॥तादृशप्रमात्वाभावसाधकेत्यर्थः॥हेतोः॥वह्न्यभावव्याप्यजलवत्सर्वतविशेष्यतानिरूपितवह्निप्रकारताशालित्वस्य॥दुष्टत्वज्ञानमपि॥हेतुतावच्छेदकघटकजलादौपर्वतावृत्तित्वरूपासिद्धिज्ञानमपि॥उपयुज्यतइति॥उपयोगमाह॥प्रकृतसाध्यग्रहेति॥प्रकृतसाध्यग्रहे॥पर्वतोवह्निमानितिग्रहे॥योऽप्रामाण्यग्रहः॥निरुक्तप्रमात्वाभावग्रहः॥तद्ग्राहकः॥तद्विधेयकानुमितिजनकज्ञानप्रयोज्योवह्न्यभावव्याप्यजलवत्सर्वतविशेष्यतानिरूपितवह्निप्रकारताशालित्वरूपोहेतुः॥तत्रादुष्टत्वज्ञानं॥तद्विशेष्यकवह्निमत्सर्वतविशेष्यतानिरूपितवह्निप्रकारताशालित्वस्यपक्षवृत्तित्वज्ञानमित्यर्थः॥तद्विघटकत्वात्॥जलादौपर्वतावृत्तित्वरू

रूपदोषज्ञानस्यतदनुत्पत्तिप्रयोजकत्वात्॥तथाचतादृशदोषज्ञानेविषयतयादोषाणांप्रयोजकतयातद्दिशिस्थाप्युपपत्तिरिति बोध्या॥स्व-
ज्ञानाधीनेति॥अर्थज्ञानविषयास्वज्ञानाधीनत्वंबोध्यं॥दोषेति॥दोषव्याप्तिरिति॥दोषहेतूभयविषयकसमूहालंबनज्ञानादायसर्वत्रलक्ष-
णसत्वंबोध्यं॥यद्यपि॥वह्निसाध्यकेवल्यभाववद्ह्रदस्यापिदुष्टहेतुत्वान्नातिव्याप्तिस्तथापिपर्वतपक्षकवह्निसाध्यकस्थलेधूमस्यापिद्र-
व्यत्वादिनादुष्टत्वात्तद्धर्मावच्छिन्नहेतुकभ्रमानुमितिप्रबंधकयार्थज्ञानविषयत्वंतेनरूपेणदुष्टत्वाच्चतथाच वह्निसाध्यकेवल्य
भाववद्ह्रदादिधूमत्वादिनादुष्टत्वानावाद्ध्रवत्वातिव्याप्तिरितिबोध्यं॥बाधादिज्ञानप्रतिबंधकतावच्छेदकहेतुविषयतायाअन
वच्छेदकत्वादिति॥घटत्वमनित्यंघटत्वादित्यादौबाधज्ञानप्रतिबंधकतायांहेतुविषयतायाअवच्छेदकत्वात्तायशइतिहेतुविषयतात्व
सामानाधिकरण्येनतादृशावच्छेदकत्वाभावबोधनाय॥तथाचयत्रहेतुविषयतायाअनवच्छेदकत्वंतत्रबाधितहेतोर्व्यभिरित्यर्थः॥अ
थबाधितस्थलेपक्षेहेतुसत्वेव्यभिचारस्यतदसत्वेऽसिद्धेरावश्यकतयाबाधज्ञानप्रतिबंधकतायांहेतुविषयतायाअनवच्छेदकत्वेपिव्य
भिचारासिध्यन्यतरज्ञानप्रतिबंधकतायांहेतुविषयतायाअवच्छेदकत्वसत्त्वान्नतत्राव्याप्तिः॥अत्रकेचित्॥असंकीर्णबाधितस्थलेतादृ ७

शान्यतरानावश्यकत्वात्लक्षणसमन्वयोनसंभवति॥ नन्वतत्रापि बाधव्याप्यसत्प्रतिपक्षावश्यकत्वेनतज्ज्ञानप्रतिबंधकतायांप्रतिहेतुघटकप्रकृतहेतुविषयतायाअवच्छेदकत्वसंभवान्नतत्राव्याप्तिरितिचेन्न॥सत्प्रतिपक्षशरीरेव्यापकसामानाधिकरण्यरूपायाव्याप्तेर्नप्रवेशःकिंतुसाध्याभावाभाववदवृत्तित्वरूपायाएवेतिमनसिनिधायेवाव्याप्तिनिधानान्नमनेतादृशव्याप्यवच्छिन्नविषयनाकज्ञानप्रतिबंधकतायांप्रतिहेतुविषयतायाअनवच्छेदकत्वात्॥व्यापकसामानाधिकरण्यघटितव्याप्तिधीप्रतिबंधकतायामवच्छेदकत्वावश्यकत्वेप्यवच्छेदकधर्मदर्शनादिप्रतिबंधकतानादायघटादुदासीनातिव्याप्तिवारणायलक्षणघटकप्रतिबंधकतायांविवक्षणीयज्ञानवैशिष्ट्यानवच्छिन्नत्वविशेषणेननादृशप्रतिबंधकतायाव्यावर्तनात्॥तादृशधियःप्रतियोगिवैय्यधिकरण्याघटितव्यापकतावगाहित्वेयथार्थत्वाभावात्॥तद्घटितव्यापकत्वावगाहित्वेःप्रतिबंधकत्वाच्च॥एतेनउत्पत्तिकालीनघटोगंधवान्पृथिवीत्वादित्याद्यसंकीर्णबाधोदाहरणस्थलेगंधव्यापकीभूतंयत्पृथिवीत्वगुणोभयंतदभाववत्ताज्ञानस्यव्यापकाभाववत्ताज्ञानविधयाप्रतिबंधकत्वान्नत्वपृथिवीत्वरूपहेतुविषयतायाअप्यवच्छेदकत्वादव्याप्यनवकाशः॥ननुगंधव्यापकत्वसहिततादृशोभयत्वावच्छिन्नाभाववत्ताज्ञान

स्यापिनज्ञानवैशिष्ट्यानवच्छिन्नाप्रतिबंधकताकिंतुतादृशोभयत्वावच्छिन्नधर्मिकव्यापकताग्रहनविशिष्टतादृशोभयाभाववत्ताज्ञानत्वे
नैवान्यथागंधव्यापकताग्रहकालीनस्यकवलपृथिवीत्वगुणोभयत्वावच्छिन्नाभाववत्ताज्ञानस्यव्यापकत्वसहिततादृशोभयत्वावच्छि
न्नाभावानवगाहितयाःप्रतिबंधकत्वप्रसंगइतिवाच्यं॥पृथिवीत्वगुणोभयंगंधव्यापकमितिग्रहकालीनस्यजलादिवृत्तित्वविशिष्टता
दृशोभयत्वावच्छिन्नाभाववत्ताज्ञानस्य।तबंधकतावारणायव्यापकत्वग्रहधर्मितावच्छेदकांशेप्रतियोगितावच्छेदकतासंबंधावगा-
हितानिवेशस्यावश्यकतयाव्यापकतासहिततादृशोभयत्वावच्छिन्नाभाववत्ताज्ञानस्यतादृशोभयत्वपर्याप्तावच्छेदकतानवगाहि
नोज्ञानद्वयसाधारणदर्शितरूपेणप्रतिबंधकत्वानिर्वाहेणव्यापकत्वसहिततादृशोभयत्वावच्छिन्नाभाववत्ताज्ञानत्वेनैवतथात्वे
तिबंधकतायाःकल्पनीयत्वात्॥ननुसाध्यव्यापकाभाववत्सक्षोप्यदोषात्मावारणीयएवेतितज्ज्ञानीयप्रतिबंधकतापिविशेषणकरणे
नवारणीयेतिनतामादायलक्षणसमन्वयइतिवाच्यं॥साध्यसामानाधिकरण्यधर्मवत्सक्षादेरिवव्यापकाभाववत्सक्षस्यापिबाधरूप
तायाबाधग्रंथेंऽगीकृतत्वादितिनिरस्तं॥व्यापकाभाववत्ताज्ञानस्यप्रतियोगिवैयधिकरण्यावच्छेदकावगाहित्वेभ्रमत्वमेव- ८

नद्वटितव्यापकतावगाद्वित्वेः प्रतिबंधकत्वमेवान्यथादृक्षादौकपिसंयोगसाध्यकेकपिसंयोगव्यापककपिविभागाभाववद्दृक्षादेर्बाधत्वप्रसंगादित्याहुः॥ यद्यपि अनुमितिपदस्यसमूहालंबनपरत्वस्येदानींशिरोमणिनाभिधानाद्यथाश्रुतार्थाश्रयणेनह्रदोवह्निमानित्यादिबाधितएवाग्न्यभिरभिप्रेता॥असिद्ध्यभिचारज्ञानयोःपरामर्शमात्रविरोधिनोरनुमित्यविरोधित्वादितिकेश्चित्समाधीयते॥तदपिन॥ह्रदोवह्निव्याप्यधूमवानित्यनुमितिंप्रत्यसिद्ध्यभिचारज्ञानयोःप्रतिबंधकतयातदभावेनहेत्वादिविषयतामादायधूमेलक्षणावश्यकत्वात्॥नहिह्रदोवह्निमानित्येवानुमितिर्ननुह्रदोवह्निव्याप्यधूमवानितीतिप्राज्ञसंमतं॥व्याप्यवत्वानुमितिर्नपुरःस्फूर्तिकेनचेत्किमयंव्याप्यवत्वानुमितेर्दोषः॥नत्वंधःस्थाणुंनपश्यतीतिस्थाणुरेवविस्तरेणत्याहुः॥ अन्येत्वाहुरर्वाचीनाः॥बाधितहेतावव्याप्तिरित्यरंह्रदोवह्निमान्धूमादित्यादिस्थलेधूमरूपहेतुर्बाधेनदुष्टइतिव्यवहारानुपपत्तिरित्यर्थः॥अस्मिन्व्यवहारेबाधेनेतितृतीयार्थोऽनुमितिप्रतिबंधकतावच्छेदकविषयतारूपदुषधात्वर्थघटकप्रतिबंधकतान्वयिविषयितावच्छिन्नत्वमेवनतुधान्येनधनवानित्यादाविवाभेदः॥दुषधात्वर्थेतदन्वयबाधात्॥नापिएकज्ञानविषयत्वादिरूपवैशिष्ट्यंहेत्वन्वयितृतीयार्थः॥घटेनदुष्टइतिव्यवहारापत्तेः॥एवंचतृतीयांतार्थबाधविषयितावच्छि

न्नत्वान्वितप्रतिबंधकतावच्छेदकविषयताश्रयत्वस्यधूमेबाधात्बाधेनधूमोदुष्टइतिव्यवहारानुपपत्तिरावश्यकीति॥ **एवंत्वन्यथैव-समाद्धति**॥हृदोवह्निमान्धूमादित्यादिस्थलीयबाधितधूमरूपहेतौस्वरूपासिद्ध्येकदेशेयथारीत्यालक्षणसमन्वयश्चिकीर्व्यतेतथैव रीत्यासर्वत्रदोषैकदेशेऽतिव्याप्तिःस्यात्सावघटाद्युदासीनातिव्याप्तिरिवारणीयैव॥**तथाचदोषाणामेवलक्षणयोगितयायत्रदोषाना** त्मकस्यैवधूमादेर्हेतुतानत्राव्याप्तिर्भवत्येव॥द्वितीयलक्षणस्यतावदेकदेशातिव्याप्तिवारकानतिरिक्तवृत्तित्वरूपतृतीयार्थावच्छेदकत्वघटि तनतयायथाश्रुतस्यैवदोषभिन्नहेतावव्याप्तिः॥प्रथमलक्षणेतुशब्दार्थोल्लंघनंविनानाव्याप्तिसंभवइत्यर्थस्यस्फुटरामितिपदेनगदाध रेणैवसूचितत्वात्॥ **यथाश्रुतमिदमिति**॥दीधितावितिशब्दस्यैकवचनांतत्वेनैकलक्षणपरामर्शकत्वादाह॥**इदंलक्षणत्रयमि ति**॥वक्ष्यमाणरीत्यादुष्टलक्षणत्वसंभवाद्यथाश्रुतेति॥**आकांक्षितं**॥जिज्ञासितमित्यर्थः॥अपिकारेणस्वरूपादीनामाकांक्षाविषयत्वं सूचितं॥**लक्षणमेषामाकांक्षितमितिपाठे**॥प्रथमतोलक्षणमेवाकांक्षितमित्यर्थः॥ **अन्यविधव्युत्पत्त्येति**॥हेत्वाभासंतइति व्युत्पत्त्येत्यर्थः॥**नचेत्यादिनेति**॥**तेचसव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताःपंचेत्यनेनेत्यर्थः**॥**तदसंगतेरिति**॥यद्यपि

वच्छिन्ननिरूपणस्य प्रतिज्ञाविषयत्वं तद्रूपावच्छिन्नस्यैव लक्षणविभागादिनानिरूपणविषयत्वमिति नियमादिति भावः॥ ननु विभागवाक्ये सव्यभिचारादिपदानांभावप्रधानतयासव्यभिचारत्वादिपरत्वान्नासंगतिरित्यत आह॥ एवमिति॥ अप्रकृतत्वे॥ प्रतिज्ञाविषयत्वाभावे॥ विभागानर्हतयेति॥ लक्षणादिनादोषप्रतिपादनस्यैवप्रतिज्ञातत्वादितिभावः॥ संकरेण॥ ऐक्येन॥ अनवतारादिति॥ तिचेत्यादिग्रंथस्यदोषविभागपरत्वेविरुद्धस्यव्यभिचार्यधिनतिरिक्तत्वेनहेतूनांपंचत्वकथनासंगतिरित्याशंकायाअनुदयादित्यर्थः॥ उपाध्यसंकरेणेति॥ व्यभिचारविरोधरूपाणांदोषाणांपरस्परंभिन्नत्वेनेत्यर्थः॥ स्फुटमिति॥ स्फुटत्वंचतद्विषयकजिज्ञासानधीनप्रतिपत्तिविषयत्वं॥ नोक्तानुपपत्तिरिति॥ दोषलक्षणस्यापिदुष्टप्रतिपत्त्यनुकूलत्वेननाप्रतिज्ञातत्वमित्यर्थः॥ अनुमितिसामान्यपरत्वेति॥ अनुमितित्वरूपजात्याश्रयपरत्वेत्यर्थः॥ ननुयावदनुमितिपरत्वेत्यर्थस्तथासतियावत्तन्निरूपितप्रतिबंधकत्वाप्रसिध्याऽसंभवादिति प्रसंगाभावान्नकथनासंगतेश्च॥ अतिप्रसंगादिति॥ पर्वतोवह्निमान्धूमादित्यादौहदोवह्निमानित्यनुमितिप्रतिबंधकज्ञानविषयवन्ह्यभाववद्ह्रदादाविति शेषः॥ प्रकृतपक्षसाध्यहेतुकेति॥ पर्वतोवह्निमानित्यादौहदोवह्निमानित्यनुमितिमादाय वन्ह्य

भावत्वङ्ह्रदादावनित्यत्वाभिवारणायप्रकृतपक्षकत्वनिवेशः॥तच्चैवपर्वतोजलत्ववानित्यादनुमितिमादायजलत्वाभाववत्पर्वतादावति
प्रसंगवारणायप्रकृतसाध्यकत्वनिवेशः॥प्रकृतहेतुकत्वनिवेशस्तुपक्षतावच्छेदकावच्छिन्नानुमितिकारणज्ञानमात्रपरस्तेनतादृशपदेनप्रकृ
तहेतुकानुमितिलाभार्थः॥अन्यथापर्वतोवह्निमान्धूमादित्यादौप्रमेयादिहेतुकानुमितिमादायतत्करणपरामर्शविरोधिनिवह्निव्यभि
चारिप्रमेयादावतिव्याप्तेः॥प्रकृतहेतुकत्वानिवेशेव्यभिचारज्ञानान्यसंग्रहानुपपत्त्यातादृशज्ञानसामान्यविवक्षायाअसंभवादितिके
चित्॥परेतु॥पर्वतोवह्निमान्धूमादित्यादौपर्वतोवह्निमान्द्रव्यत्वंवह्निव्याप्यमेत्यनुमितिप्रतिबंधकज्ञानविषयवह्निव्यभिचारि
द्रव्यत्वादावतिप्रसंगइतिनहेतुकत्वनिवेशनं॥नचैवंतत्रहेतुकत्वनिवेशोपिनिरुक्तानुमितेरपिधूमहेतुकत्वानपायात्तद्विशेषण-
मकिंचित्करमितिवाच्यं॥तद्धेतुकत्वपदेनप्रकृतसाध्यव्यापकपक्षधर्मतावच्छिन्नविषयतानाशालिनिरूपितावच्छिन्नजननिष्ठज
नकतानिरूपितायाअनुमितित्वावच्छिन्नजन्यतानच्छून्यत्वस्यविवक्षितत्वेनदर्शितसमूहालंबनानुमितिव्यावृत्तेः॥जन्यतायांजननिष्ठत्व
निवेशाद्दनुमितिसामान्यएवतादृशसिध्यभावादिनिष्ठजनकतानिरूपितजन्यत्वसत्त्वात्तादृशजन्यताशून्यानुमित्यप्रसिद्ध्यापनक्षतिः॥ १०

नियमेपिज्ञानेच्छास्थलेनायंनियम[illegible]पूर्वकालवृत्तितयाहेतुतायाअनुभवानुरोधेनस्वीकारात्॥**तथाच**परामर्शतृतीयक्षणे एकदेवानुमितिपरामर्शयोःसाक्षात्कारस्ततोऽनुमितिःपरामर्शकार्येतिसाक्षात्कारइत्यभिप्रायकल्पनान्नदोषः॥कल्पांतरमाह **अत्रेति**॥**अत्रकेचित्**॥संबंधसाक्षात्कारसंबंधिद्वयसाक्षात्कारयोर्नतावत्संबंधसाक्षात्कारत्वसंबंधिद्वयसाक्षात्कारत्वाभ्यांकार्यकारणभावः॥घटभूतलसाक्षात्कारात्कुड्यकुसूलसंयोगसाक्षात्कारापत्तेर्घटभूतलयोरपिसंबंधित्वात्॥**नापि**ततसंबंधसाक्षात्कारत्वेनकार्यतातत्संबंधप्रतियोग्यनुयोगिसाक्षात्कारत्वेनकारणत्वमिति॥यत्रपरस्परासंयुक्तयोर्गवाश्वव्यक्त्योर्गोत्वाश्वत्वाभ्यांस्मरणंसाक्षात्कारोवा ततःपरस्परसंयुक्तगवाश्वव्यक्त्योर्गोत्वाश्वत्वव्यंजकसन्निकर्षविरहाद्द्व्यत्वेनैवसाक्षात्कारस्तत्रगवाश्वयोःसंयोगइतिसाक्षात्कारप्रसंगात्॥**नापि**ततसंबंधप्रतियोगितावच्छेदकादिप्रकारतानिरूपिततत्संबंधप्रतियोग्यादिनिष्ठविषयताकसाक्षात्कारत्वेनकारणत्वं॥अतिप्रसक्तगोत्वादेरिवद्रव्यत्वस्यापितत्संबंधप्रतियोगितावच्छेदकतायादुरुपङ्कत्वादुक्तदोषावारणात्॥**किंतु**तत्तद्धर्मावच्छिन्नप्रतियोग्यनुयोगिविशेषितसंबंधसाक्षात्कारत्वावच्छिन्नंप्रतितत्तद्धर्मप्रकारकतत्तत्प्रतियोग्यनुयोगिसाक्षात्कारत्वेनकारणत्वमित्येववक्तव्यं॥**एवंच**प्रकृतेप्रकृ

तानुमितिः प्रकृतपरामर्शकार्यत्वाकारकसाक्षात्कारीयकार्यत्वविषयितावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतायाविषयतातदाश्रयविषयितावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयताश्रयत्वंदोषसामान्यलक्षणंसुवचं॥अनुमितिपरामर्शोभयविषयतानिरूपितजन्यत्वविषयित्वयोरभेदात्॥संबंधिद्वयसाक्षात्कारजन्यताद्वयावच्छेदकत्वंजन्यत्वविषयितायानानुपपन्नं॥विषयिताविशेषितपरामर्शादिसाक्षात्कारहेतुत्वेसाक्षात्कारीयविशेषणविशेष्यविषयितानांसर्वासामेवविनिगमनाविरहेणकारणतावच्छेदकतयापरामर्शीयविषयितानांसाक्षात्कारेप्रकारतयाभासमानानांसाक्षात्कारकारणतावच्छेदकविषयताश्रयत्वमस्तीतिनपरामर्शीविरोधिदोषासंग्रहः॥**नन्व**परामर्शीयविषयितायाइवपरामर्शविषयस्यापिविषयिताविशेषणतयासाक्षात्कारेभानात्परामर्शविषयोपिसाक्षात्कारजनकतावच्छेदकविषयताश्रयोभवतीतियत्रघटाभाववद्भूतलादिज्ञानप्रतिबध्यतावच्छेदकघटादिविषयितासाध्यतावच्छेदकघटकतयापरामर्शविषयस्तत्रदोघटीयविषयितासमानकालीनवह्निमान्धूमादित्यादौघटाभाववद्भूतलादेरपिदोषताप्रसंगइति**वाच्यं**॥परामर्शसाक्षात्कारेपरामर्शविषयाणांपरामर्शोपनीतानामेवभानंनतुलौकिकंलौकिकसन्निकर्षविरहात्परामर्शीयव्या-

एवं जन्यतायामनुमितित्वावच्छिन्नत्वनिवेशात्तादृशविशेषणज्ञानादिनिरूपितजन्यत्वस्यानुमितिसामान्येसत्वेपिनक्षतिः॥ एतेन तद्धेतुकत्वनिवेशेपिपर्वतोवह्निमान्धूमादित्यादौपर्वतोवह्निमान्घटाभाववद्भूतलमितिसमूहालंबनानुमितिमादायघटवद्भूतलादिरूपोदासीनेतिव्याप्तिवारणायतादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतायालक्षणेनिवेशावश्यकत्वेनप्रकृतहेतुकत्वानिवेशेपिपर्वतोवह्निमान्धूमादित्यादौपर्वतोवह्निमान्द्रव्यत्ववह्निव्याप्यमित्यनुमितिमादायवह्निव्यभिचारिद्रव्यत्वादावतिव्याप्तिविरहान्नतद्धेतुकत्वंव्यर्थमितिनिरस्तं॥ समूहालंबनानुमितेर्निरुक्ततद्धेतुकत्वविरहेणानुमितित्वव्यापकप्रतिबध्यतानिवेशानावश्यकत्वात्॥ ननुवंतद्धेतुकत्वनिवेशेतत्सक्षकत्वतत्साध्यकत्वयोर्वैय्यर्थ्यमितिवाच्यं॥ पर्वतोवह्निमान्धूमादित्यादौपर्वतादौमहानसीयवह्निभिन्नवह्न्यभावविषयकबाधज्ञानेअनुमितेर्महानसीयवह्निविषयकत्वेलाघवमितिलाघवज्ञानकालेवावह्निव्याप्यधूमवत्तापरामर्शात्पर्वतोमहानसीयवह्निर्नित्यनुमित्युत्पत्त्यातादृशानुमितेर्निरुक्ततद्धेतुकत्वेनतादृशानुमितिप्रतिबंधकज्ञानविषयमहानसीयवह्न्यभाववत्पर्वतादावतिव्याप्तिवारणायप्रकृतसाध्यनावच्छेदकावच्छिन्नसाध्यकत्वनिवेशोवश्यकः॥ एवंतत्रैवसुंदरपर्वतविषयकत्वेलाघवमितिलाघवज्ञानस

हकारणजायमाननिरुक्तनद्देतुकलाक्रांतसुंदरपर्वतोवह्निमानित्यनुमितिप्रतिबंधकज्ञानविषयवह्यभाववत्सुंदरपर्वतेतिव्याप्तिवारणा
यप्रकृतपक्षतावच्छेदकपर्याप्तावच्छेदकताकोद्देश्यताकत्वरूपतत्तत्कृत्यनिवेशोप्यावश्यक इत्याशयेनाह साक्षात्कारेति॥अनुमि
तिनिष्ठकार्यतासाक्षात्कारेत्यर्थः॥अनुमितिःपरामर्शकार्यत्वनुमितिनिष्ठकार्यतासाक्षात्कारेप्रत्यनुमितिसाक्षात्कारःपरामर्शसाक्षात्कारश्चेत्युक्तं किंचित्प्रति
योगिककिंचिदनुयोगिकसंबंधसाक्षात्कारेसंबंधिद्वयसाक्षात्कारस्यहेतुत्वात्सर्वसिद्धत्वात्॥संयोगादेवत्कार्यतायाअपितथात्वात्॥यद्व
ह्निपरामर्शानुमितिसाक्षात्कारयोःकार्यतासाक्षात्कारेहेतुत्वंसंभवतिक्रमेणजायमानयोस्तयोरेकदाक्रमेणवासाक्षात्कारासंभवात्॥अ
नुमितिर्द्वितीयक्षणेपरामर्शरूपविषयस्यैवाभावात्अनुमित्युपरागेणकार्यतासाक्षात्कारकालेअनुमितेरपिनाशात्तथाच्यपेक्षाबुध्या
त्मकपरामर्शानुमित्योःसाक्षात्कारेबाधकाभावः॥ननुयोग्यविभुविशेषगुणनाशेस्वोत्पत्तिविशेषगुणस्यहेतुत्वात्तत्रापिरूपअपेक्षाबुद्धेर्नती
यक्षण एवानुमित्युत्पत्तिःस्वीकार्यातथाचोक्तानुपपत्तिर्दुर्वारैवेतिवाच्यं॥अनुभवानुरोधेनज्ञानादीनांतत्तत्क्षणसंबंधस्यैवनाशकत्वंस्वी
कृत्यापेक्षाबुध्युत्तरंविशेषगुणोत्पादस्यपक्षतायांथेगदाधरैरेवस्वीकारात्॥यद्वा घटादिसाक्षात्कारेविषयस्यकार्यानुत्पत्तितयाहेतुत्व

त्यादि विषयितायास्तु मनः संयुक्तसमवेतदि[illegible]न्निकर्षबलाल्लौकिकमेवभानं **तथाच** प्रकृतलक्षणेप्रकृतसाक्षात्कारजनकतावच्छेदक लौकिक विषयताश्रयविषयितावच्छिन्नप्रतिबध्यतेत्यादिरीत्याविवक्षणान्नदोषः॥ **वस्तुतस्तु**॥साक्षात्कारजनकतावच्छेदकविषयतायांनि रूपितत्वसंबंधावच्छिन्नप्रकारतान्यत्वंदेयंपरामर्शसाक्षात्कारेतद्विषयस्यविषयितांशेनिरूपितत्वसंबंधेनैवविशेषणतयाभाननियमान्न परामर्शविषयनिष्ठदर्शितविषयतायादर्शितविशेषणाक्रांतत्वमितिनघटाभाववद्भूतलादावतिव्याप्तिः॥प्रकृतानुमितिपरामर्शोभिय विषयतानिरूपितजन्यत्वविषयतानालिंगसाक्षात्कारत्वावच्छिन्नजन्यतेत्यत्रजन्यत्वविशेषणमवच्छिन्नत्वंव्यापकत्वरूपंतादृशजन्यत्ववि षयितासामान्यावच्छिन्नत्वरूपंवाग्राह्यं॥ **तेन** पर्वतोवह्निमान्धूमादित्यत्रजलवत्पर्वतपक्षकवह्निसाध्यकानुमितिस्तादृशपक्षकवह्निसाध्यक धूमहेतुकपरामर्शकार्येतिसाक्षात्कारजनकसाक्षात्कारविषयजलवत्पर्वतपक्षकवह्निसाध्यकानुमितिविरोधिज्ञानविषयजलाभाववत्प र्वतेनातिव्याप्तिः॥साक्षात्कारजनकतावच्छेदकविषयताश्रयविषयितावच्छिन्नप्रतिबध्यतेत्यत्रविषयताश्रयविषयितावच्छिन्नेत्यस्य तादृशविषयताश्रयविषयिताशून्यज्ञाननिष्ठेत्यर्थो **विवक्षितस्तेन** पर्वतोवह्निमान्धूमादित्यत्रवह्निव्याप्यधूमवत्पर्वतवान्घट इति

परामर्शीयायापर्वतविषयितातस्याःप्रकृतसाक्षात्कारजनकतावच्छेदकविषयताश्रयीभूतायापर्वताभाववान्घटादिरित्यादिज्ञानप्रतिबध्यतावच्छेदकतावच्छिन्नाभाववद्वृत्तेरितिव्याप्तिरितिदूषणानवकाशः॥विशेषणनिष्ठप्रकारतायाविशेषणतावच्छेदकादिनिष्ठप्रकारतानिरूपितविशेष्यत्वाभिन्नत्वोपगमान्नासंभवस्तस्यास्तादृशविशेष्यताभेदेतुतादृशजनकतावच्छेदकविषयतानाश्रयेतिविवक्षणीयं॥अथसंबंधसाक्षात्कारंप्रतिसंबंधिद्वयसाक्षात्कारस्यहेतुत्वपक्षेएवंगीत्यासामंजस्येपितद्धेतुत्वंविचारासहं॥तथाहिसंबंधसाक्षात्कारस्यसंबंधिद्वयविषयकतनियमात्॥संबंधसाक्षात्कारेसंबंधिद्वयसाक्षात्कारजनकसामग्याअपेक्षितत्वेनेवानतिप्रसंगात्॥संबंधिविषयकसंबंधसाक्षात्कारेअनुमितिपरामर्शरूपसंबंधिनोर्विषयविधयाकारणत्वावश्यकत्वाल्लक्षणसामंजस्यंतुनाशंकनीयं॥तयोर्विषयविधयातादृशसाक्षात्कारकारणत्वेपितादृशकारणत्वंनप्रकृतानुमितित्वप्रकृतपरामर्शत्वावच्छिन्नंकिंतुतत्तद्व्यक्तित्वावच्छिन्नमित्यस्यानुमितिग्रंथेदीधितिकृतैवावेदितत्वाल्लक्षणासामंजस्यंदुर्वारमेव॥किंचकार्यतायानियतोत्तरवृत्तित्वंव्यंग्यपदार्थांतरत्वपक्षेकार्यतायाःसाक्षात्कारसंभवेपितस्याः

नियतोत्तरवृत्तितारूपत्वपक्षेऽतींद्रियक्षणादिघटितत्वेनातींद्रियत्वान्नसाक्षात्कारसंभवइतिनैतत्पक्षेलक्षणसामंजस्यमितिचेन्न॥प्रकृतानुमितिविशेष्यकप्रकृतपरामर्शत्वविशिष्टजन्यत्ववैशिष्ट्यावगाहिज्ञानत्वव्यापककार्यतानिरूपितकारणतावच्छेदकविषयताश्रयीभूतविषयित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतेत्यादिरीत्यालक्षणपरिष्कारसंभवात्॥दर्शितविशिष्टवैशिष्ट्यावगाहिज्ञानेप्रकृतानुमितित्वप्रकारकज्ञानस्यविशेष्यतावच्छेदकप्रकारकज्ञानविधयापरामर्शत्वप्रकारकज्ञानस्यचविशेषणतावच्छेदकप्रकारकज्ञानविधयाहेतुत्वाद्भवतिपूर्ववदेवलक्षणसमन्वयइतिसर्वमनाकूलं॥तस्मादनुमितिपदस्यकार्यतानिरूपकत्वेनानुमितिपरामर्शोभयपरत्वपक्षेबहुगौरवादेतंपक्षंपरित्यज्यलघुप्रकारांतरंदर्शितंशिरोमणिनेत्येवसारमितिवदंति॥दोषताप्रसंगइति॥दोषताव्यवहारप्रसंगइत्यर्थः॥ननुअनुमितिपदस्यानुमितितत्कारणान्यतरपरत्वंसमूहालंबनानुमितिपरत्वंचायुक्तमनुमितिप्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबंधकत्वविवक्षयाव्यभिचारादिसंग्रहसंभवादितिचेन्न॥तथासतिव्यभिचारज्ञानाभावद्वाराऽपाधिज्ञानाभावस्यापिप्रयोजकतयाऽपाधावतिव्याप्तेः॥कारणतत्कारणमात्रवृत्तिप्रयोजकत्वविशेषेमानाभावात्॥पर्यवसितार्थइति॥नन्वेवमपिह्रदोवह्निमान्धूमादित्या

दौवह्निव्याप्याभाववद्ध्रदेतिव्याप्तिस्तस्यहेतुमत्वग्रहाविरोधित्वेनस्वरूपासिध्यनात्मकत्वादितिचेन्न॥मथुरानाथैस्तस्यासिद्धिग्रंथेव्याप्य
त्वासिद्धित्वोक्तेर्लक्ष्यत्वात्॥दलद्वयेपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनिवेशप्रयोजनमाह॥**बाधसत्प्रतिपक्षस्वरूपासिध्या**
श्रयासिद्धिरिति॥**अतेजस्वीति**॥तेजःसामान्याविशिष्टेत्यर्थः॥तेजस्वीपर्वतस्यपक्षत्वेसामानाधिकरण्येनवह्न्यभावस्यानुमित्यवि
रोधितयानदोषतासंभवः॥अवच्छेदकावच्छेदेनचतस्याप्रसिद्धत्वात्तन्नोक्तं॥**बाधस्येति**॥स्वरूपासिद्धेरुपलक्षणंव्यापकाभाव
वतिव्याप्याभावावश्यकत्वात्॥**कांचनमय इति**॥**ननु**अतेजस्वीपर्वतपक्षकस्थलएवपक्षासिद्धिसंभवेस्थलांतरमुदाहरण्यर्थमि
तिचेन्न॥तत्रपर्वतत्वसामानाधिकरण्येनतेजःसामान्याभावस्यपक्षतावच्छेदकतेऽसिध्यसंभवएव॥पर्वतत्वावच्छेदेनतस्यतथात्वे
तत्संभवेपिवह्न्यभावविशिष्टस्यपर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधेनतेजःसामान्याभावविशिष्टपक्षस्याप्रसिध्याबाधासंभवः॥य
दिचतत्रशुद्धस्वरूपसंबंधेनतेजःसामान्याभावविशिष्टस्यवह्न्यभाववत्पक्षादेर्बाधत्वमित्युच्यतेतदास्फुटतराश्रयासिद्धिप्रतिपत्त्यर्थंस्थ-
लांतरानुसरणंबोध्यं॥**एवमग्रेपिबोध्यमिति**॥साध्यावच्छेदकहेतुतावच्छेदकचावच्छेदकत्वंतत्सर्वाधिकरणस्वरूपंबोध्यं-

इत्यर्थः॥तत्रतथाविवक्षणात्पर्वतोमहानसीयवह्निमानित्यादौमहानसीयवह्न्यभाववत्पर्वतरूपबाधस्यसाध्यतावच्छेदकैकदेशावह्नित्वावच्छिन्नग्रहा
विरोधित्वेपिकांचनमयधूमादिहेतुकेकांचनमयत्वाभाववद्धूमरूपसाधनाप्रसिद्धेर्हेतुतावच्छेदकैकदेशाधूमत्वावच्छिन्नप्रकारकग्रहाविरोधित्वेपि
नतदसंग्रहः॥**स्वरूपासिद्धावव्याप्तिरतःपक्षांशइति**॥यद्यपिपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनिवेशाव्यावृत्तिःपूर्वमुक्तैव॥**तथापितद्विशेषणेन**
इत्यत्वादिनाह्रदावगात्यनुमितिमादायदोषवारणेपितद्विशेषणाक्रांतह्रदोघटवान्धूमवांश्चपर्वतइत्यनुमितिमादायदोषावारणाद्धेतुतावच्छेदकावच्छि
न्नप्रकारतापक्षतावच्छेदकावच्छेदकावच्छिन्नविशेष्यतयोर्निरूप्यनिरूपकभावनिवेशोऽवश्यकस्तन्निवेशाव्यावृत्तिरधुनापक्षांशइत्यनेनोच्यतइति
नपौनरुक्त्यमितिध्येयं॥ज्ञानत्वनिवेशेत्वाहआहार्येति॥पक्षतावच्छेदकताव्यापकावच्छेदकताकविशेष्यताकत्वरूपपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनि
वेशाभिप्रायेणह्रदोवह्न्यभाववानित्याहार्यप्रमास्वीकाराभिप्रायेणवेदंबोध्यं॥**समूहा**इति॥समूहालंबनाभिप्रायकत्वेचकारोऽपेक्षितःअंतोज्ञायतेविशिष्टवैशिष्ट्या
वगाहिपरत्वमितिभावः॥**अप्रामाणिकत्वादिति**॥धर्मितावच्छेदकैकदेशाव्यापकत्वावच्छिन्नसंसर्गताभ्युपगमेनीलभूतलंघटाभाववदितिज्ञानोत्तरंपीतभूतलं
घटवदितिज्ञानानुदयप्रसंगइतिबाधकमप्युन्नेयं॥लिंगानुपधानमतेतथाविधपरामर्शोत्तरंतद्व्याप्यज्ञानदशायांसामानाधिकरण्येनानुमितेरिष्टत्वात्तथाविधपरि

ध्यनुधावनं॥तथाविधेत्यस्यसामानाधिकरण्येत्यर्थः॥एतावताआपाद्यव्यतिरेकःसिद्धः॥**अनुमित्यापत्तेरिति**॥पर्वतत्तमात्रव्यापकत्वानवगाहितयाव्यापकत्वभाननिबंधनाधिकविषयकतयाचोक्तानुमितोबाधसिध्योरप्रतिबंधकत्वादिति**भावः**॥**यथाश्रुतार्थपरतेति**॥वाच्यार्थपरतेत्यर्थः॥**यद्यपि**अनुमितिपदस्यानुमितित्वावच्छिन्नएवशक्तिर्नतुतादृशाकारकानुमितित्वावच्छिन्नइतिनतस्ययथाश्रुतार्थपरत्वंसंभवति॥**तथापि**धेनुपदादोधानकर्मत्वस्यमहिष्यादावतिप्रसक्तयागोत्वंप्रयोगोपाधिरितिवदनुमितिपदस्यतादृशाकारकत्वावच्छिन्नएवशक्तिः॥अनुमितित्वंतुप्रयोगोपाधिरितिमताश्रयणान्नदोषः॥**प्रयोगोपाधित्वंचशक्यतानवच्छेदकत्वेसतितज्जन्यबोधविषयत्वं**॥**नन्वेकत्रेति**मूलादेकहेतौव्यभिचारज्ञानेप्यन्यहेतौव्याप्तिज्ञानादनुमितिर्जायतइतिलभ्यतेतच्चासंगतमेकत्रैवहेतावेकरूपेणव्यभिचारग्रहेव्यन्यरूपेणव्याप्तिग्रहाद्व्यभिचारस्यैकत्रैवसंभवादतएकपदस्यैकधर्मावच्छिन्नमर्थः॥अन्यपदस्यान्यधर्मावच्छिन्नमर्थइत्याशयेनाह॥**वक्ष्यित्वाद्येकधर्मावच्छिन्न इति**॥ननुतद्धर्मावच्छिन्नेशब्दव्यभिचारज्ञानसत्वेपिलौकिकसन्निकर्षजन्यतद्धर्मावच्छिन्नेव्याप्तिपक्षधर्मताज्ञानसंभवाद्व्यभिचारसंभवात्तदकथनेनन्यूनतेत्यतःसानास्तीत्याह॥**यत्रयद्धर्मावच्छिन्नेति**॥**व्याप्त्यादिज्ञानविशिष्टत्वेपी** १५

ति॥अंकुरविशेषसाध्यके बाधज्ञानसत्वात्परामर्शाद्वितीयक्षणेनानुमितिः किंतु तृतीयक्षणएवेतितत्रानुमितेःकार्यतावच्छेदकानाक्रांतत्वा
यानत्रत्यव्यभिचारासंग्रहइतितत्संग्रहायक्षणद्वयसाधारणाव्यवहितोत्तरत्वमेवनिवेश्यंतथाच धूमव्याप्यस्यशाब्दपरामर्शस्थलेऽनुमि
ते व्याप्यादिज्ञानविशिष्टत्वनिर्वाहः॥व्यभिचारज्ञानोत्तरक्षणेद्वितीयपरामर्शस्थापनेक्षणद्वयसाधारणाव्यवहितोत्तरत्वनिवेशेपिनानु
मितेस्तद्धर्मावच्छिन्नधर्मिकव्याप्तिज्ञानविशिष्टत्वमितिसमूहालंबनानुधावनं॥प्रथमतोलौकिकव्याप्तिग्रहानंतरंलौकिकव्यभिचा
रग्रहासंभवात्प्रथमतःशाब्दपरामर्शानुधावनं॥भिन्नेंद्रियजन्यपरामर्शस्याप्युपलक्षणमेतत्॥शाब्दपरामर्शानंतरमलौकिकव्य
भिचारज्ञानासंभवाल्लौकिकव्यभिचारग्रहानुधावनं॥नचशाब्दपरामर्शाद्वितीयक्षणेऽनुमित्यापत्तिरिष्टापत्तौव्यभिचारज्ञानाभावस्यानु
मितिहेतुत्वेव्यभिचाराभावइतिवाच्यं॥शाब्दपरामर्शपूर्वक्षणेयत्रसिद्धिस्तत्रद्वितीयक्षणेऽनुमित्यनुदयात्तत्रव्यभिचारस्यदुर्वारता
॥प्रागेवनिराकृतेति॥यत्रव्याप्तिज्ञानंनास्तिव्यभिचारज्ञानाभावश्चवर्ततेतत्रानुमित्यापत्तिरतोनव्याप्तिज्ञानस्यव्यभिचारज्ञानाभावे
नान्यथासिद्धत्वमिति॥तत्प्रकारकत्वघटितेति॥ननुतदभाववन्निष्ठविषयतानिरूपिततन्निष्ठविषयताकत्वमेवभ्रमत्वंवाच्यमि

तिचेन्न॥रक्तदंडवानितिज्ञानस्यदंडाभाववइक्तत्वनिष्ठविषयतानिरूपितदंडनिष्ठविषयताकत्वेनभ्रमत्वापत्तेः॥नच विशेष्यता-कारता
निवेशेपिरक्तत्वप्रकारतानिरूपितरक्तनिष्ठविशेष्यतायाःदंडनिष्ठायापुरुषनिष्ठविशेष्यतानिरूपितप्रकारत्वाभिन्नविशेष्यतात्वनिरूपितविशेष्य-
त्वाभिन्नत्वमतेभ्रमत्वंतादृशज्ञानस्यदुर्वारमेवेतिवाच्यं॥तन्मतेतदभाववन्निष्ठविशेष्यतात्वावच्छिन्ननिरूपकताकनिरूपितत्वावच्छे
दकतन्निष्ठप्रकारतानिरूपितत्वावच्छिन्ननिरूपकताकत्वस्यैवविवक्षणात्॥विषयतात्वेनविषयतात्वेनचनिरूप्यनिरूपकभावासिध्यातन्निवेशासं
भवादधिकमन्यत्रद्रष्टव्यं॥लाघवादिति॥प्रतियोगितानिरूपकज्ञानस्यहेतुत्वेप्रतियोगित्वनिष्ठप्रकारतावच्छेदकसंबंधविषयतायाः
कारणतावच्छेदकत्वेगौरवंप्रतियोगित्वसंसर्गकज्ञानस्यकारणत्वेसंसर्गसंसर्गभानस्यविशिष्टबुद्धावनभ्युपगमेनप्रतियोगित्वसंसर्ग
विषयतायाःकारणतावच्छेदककुक्षावप्रवेशेनलाघवंबोध्यं॥स्वावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताक
त्वसंबंधेनसाध्यतावच्छेदकत्वमेवाभावस्यसाध्याभाववदवृत्तित्वरूपव्याप्तिघटकमिति॥अत्रेयमनुपपत्तिःप्रतिभा
ति॥विशारदलक्षणेस्वावच्छिन्नप्रतियोगितात्वसंबंधेनसाध्यतावच्छेदकविशेषितात्वनिवेशनिराकरणप्रसंगेवक्ष्यतेननास्तीत्यत्र

त्वयात्मतियोगिविशेष्यतापन्नएवप्रतियोगितावच्छेदकंभासतइतिनियमोगदाधरेणदर्शितः॥ शिरोमणिनातुव्यधिकरणधर्मावच्छिन्नाभावखंडनावसरेप्रतियोगिविशेषणतापन्नस्यैवधर्मस्यप्रतियोगितावच्छेदकत्वंभासतइतिनियमोदर्शितः॥ इहतुदर्शितनियमद्वयमुल्लंघ्यस्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यतावच्छेदकत्वमेवाभिवक्तव्यमितिघटकमित्यभिधानंकथंसंगच्छते॥ **यत्तु** व्याप्त्यादिबुद्ध्यवभावांशेप्रतियोगितासंबंधेनविशेषणीभूयसाध्यमपिभासतांभासतांचसाध्यविशेषणतापन्नमेवसाध्यतावच्छेदकंस्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशेतथापिसाध्यविषयतानानुमितिकारणतावच्छेदकगर्भेनिवेश्यतेकिंतुस्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नासाध्यतावच्छेदकविषयतैवावश्यकत्वादित्यभिप्रायः॥ **तथाहि**॥ सामान्यतः प्रतियोगितासंबंधावच्छिन्नसाध्यप्रकारतानिरूपितभावत्वावच्छिन्नविशेष्यतेतिक्रमेणानुमितिकरणतावच्छेदकनिर्वचनेद्रव्यत्वावच्छिन्नसाध्यकस्थलेद्रव्यत्वमाहानसीयवह्नित्वादिनावह्न्यवगाहिव्याप्तिज्ञानवारणमशक्यं॥ **नच** प्रतियोगितासंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितभावविषयतेतिक्रमेणनिवेश्यतद्वारणंसुकरमितिवाच्यं॥ एवंसतिबाधज्ञानस्यापिधर्मि

णिग्राह्याभावावगाहिनःसामान्यतःप्रतियोगितासंबंधावच्छिन्नग्राह्यतावच्छेदकावच्छिन्नविषयतानिरूपितभावविषयतानिरूपितधर्मिविषयताशालिज्ञानत्वेनैवप्रतिबंधकत्वकल्पनसंभवेनप्रतियोगितायाःप्रतियोगिविशेषणधर्मावच्छिन्नत्वस्यनिर्युक्तिकतापाता त्॥स्पष्टंचेदमभिहितंगदाधरेणैवव्यधिकरणधर्मावच्छिन्नाभावखंडनादौतस्माद्वह्नितदभावविरोधप्रयोजकवह्नित्वावच्छिन्नप्रतियोगिताकत्वावगाहित्वंनिवेश्यैवबाधज्ञानप्रतिबंधकत्वंव्याप्तिज्ञानादेश्चकारणत्वंवक्तव्यं॥तन्नयुक्तमभेतदः॥वह्नित्वावच्छिन्नप्रतियोगिताकत्वंवह्नेरेवसंबंधइत्येकःपक्षः॥वह्नेस्तुकेवलप्रतियोगित्वमेववह्नित्वस्यत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावविशेषणत्वादभावांतरव्यावृत्तिसंभवान्नप्रतियोगितायाविशेषरूपणसंसर्गत्वेपरःपक्षः॥तत्रवह्नित्वावच्छिन्नत्वविशेषितप्रयोगित्तासंसर्गेणवह्नेरेवविशेषणत्वादभावांतरव्यावृत्तिरित्याद्यपक्षेवह्नित्वस्यद्वेधानिवेश्यतयागौरवं॥द्वितीयपक्षेवह्नित्वस्यैवावच्छिन्नप्रतियोगिताकत्वसंबंधेनविशेषणतयानवह्नित्वस्यद्वेधाप्रवेशइतिलाघवं॥तथाचगौरवदूषिताद्यपक्षेमेयत्वाभाववद्वृत्तित्वज्ञानस्यभ्रमत्वासंभवेपिद्वितीयपक्षेतज्ज्ञानस्यमेयत्वत्वांशेभ्रमत्वंनिराबाधमेवेति॥तन्नसम्यक्॥वह्नित्वावच्छिन्नप्र-

तियोगितासंबंधेनवह्नेरेवविशेषणत्वमितिपक्षेपिवह्नित्वावच्छिन्नप्रकारतायाःनवह्निवृत्तित्वेनवह्नित्वावच्छिन्नत्वेनवानिवेशोगौरवाद्व्यर्थत्वाच्च॥ परंतुवह्नित्वावच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रकारतायानैवनिवेशोलाघवादावश्यकत्वाच्च॥ तथाचनैतत्पक्षेपिवह्नित्वस्यानुमितिकरणतावच्छेदककोटौद्वेधाप्रवेशइतिसाध्यतावच्छेदकत्वमेवाभावस्यव्याप्यघटकंलाघवादित्युक्तासंगतेर्दुर्वारत्वात्॥ अथसाध्यतावच्छेदकावच्छिन्नप्रतियोगितासंबंधेनसाध्यस्याभावविशेषणतापक्षेऽनुमितिकरणतावच्छेदकधर्मशरीरगुरुत्वाभावेप्यनुमितिकारणज्ञानविषयविशिष्टपदार्थशरीरगौरवंदुर्वारमेववह्नित्वस्यद्वेधाप्रवेशादितिचेन्न॥ दर्शितद्वितीयपक्षेपिवह्निविशेष्यतापन्नएववह्नित्वस्यभानाद्वह्नित्वस्यदर्शितविशिष्टशरीरेद्वेधाप्रवेशस्यावश्यकत्वात्॥ कारणतावच्छेदकगौरवाप्रयोजकस्योक्तविशिष्टपदार्थशरीरगौरवस्यदोषत्वासंभवाच्च॥ एतेनविशारदलक्षणाद्युक्तनियमभंगएतन्मतेदूषणमेवाङ्कुरित्यनेनध्वनितं॥ तथाचसाध्यांशस्यकारणतावच्छेदकशरीरइवदर्शितविशिष्टपदार्थशरीरेपिनिवेशाभावोलाघवंस्फुटमेवेतिनिरस्तं॥ कारणतावच्छेदकगौरवस्यप्रागुक्तदिशाऽनवकाशाद्दर्शितविशिष्टपदार्थशरीरगौरवस्याकिंचित्करत्वादिति॥ अत्रेदं

समाधानं॥साध्यतावच्छेदकावच्छिन्नत्वविशिष्टप्रतियोगितायासाध्यीयसंसर्गतादूषणेनैतद्ग्रंथतात्पर्यं॥परंतुप्रतियोगिविशेषि
ताभावबुद्धौप्रतियोगिविशेषणतापन्नधर्मोपिधर्मि[illegible]स्तत्संबंधेनस्वावच्छिन्नप्रतियोगिताक[illegible]संबंधेनाभावांशेविशेषणीभूयभासतइति
पक्षमवलंब्याभिधेयत्वंमेयत्वाभाववदवृत्तीतिज्ञानस्यभ्रमत्वोपपादनएवतात्पर्यं॥अस्मिन्पक्षेस्वावच्छिन्नप्रतियोगिताकत्वसंबंधा
वच्छिन्नसाध्यतावच्छेदकविषयतैवानुमितिजनकतावच्छेदककोटौनिवेश्यतेआवश्यकत्वान्नतुसाध्यविषयतापिगौरवाद्यर्थात्त्याज्येति
॥यद्यपिसाध्यविषयतायाअनुमितिजनकतावच्छेदकशरीरप्रवेशखंडनंनभ्रमत्वोपपादनउपयुज्यते॥तथापिशिष्यव्युत्पादनायैवेहत
त्खंडनमितिबोध्यं॥घटत्वादेःप्रसिद्धेनेति॥निरूपितत्वषष्ठ्यर्थःस्वरूपसंबंधावच्छिन्नप्रतियोगिताकघटाभावादाविति शेषः॥घटत्वादौ
त्स्वनिष्ठत्वंषष्ठ्यर्थस्तथाचस्वरूपसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभावाभावस्यघटत्वरूपतयाघटत्वनिष्ठप्रसिद्धेघटत्वाभावत्वादेस्ता
दृशप्रतियोगिताकत्वेनेत्यर्थइतिकेचित्॥व्याख्यांतरमाह॥प्रथमेति॥स्वव्यधिकरणधर्मावच्छिन्नेति॥ननुस्वव्यधिकरणत्वं
यदिस्वानधिकरणवृत्तित्वंतदाह्रदोवह्न्यभाववानितिबुद्धेःप्रमात्वानुपपत्तिरतःस्वाधिकरणावृत्तित्वमेवतद्वाच्यंह्रदावृत्तित्वस्यवह्न्य-

भावेऽसत्वान्नोक्तबुद्धेः प्रमात्वानुपपत्तिः॥स्वाधिकरणावृत्तित्वमित्यत्रावृत्तित्वंप्रकारतावच्छेदकसंबंधेनवाच्यमन्यथापर्वतेपिकालिकसं
बंधेनवह्न्यभावसत्वात्स्वरूपसंबंधेनवह्न्यभाववानितिबुद्धेर्भ्रमत्वानुपपत्तिस्तथाचजानितिर्जानिमत्तीत्यादिबुद्धेः प्रमात्वापत्तिर्भ्रमत्वानु
पपत्तिश्च॥ननुजातिनिष्ठाविषयतानिरूपितप्रकारतावच्छेदकसंबंधःसमवायस्तेनसंबंधेनस्वाधिकरणनिरूपितवृत्तित्वाप्रसिद्धेरितिचेन्न॥स्वा
धिकरणसंबंधावच्छिन्नस्वावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपितस्वावच्छेदकसंबंधावच्छिन्नस्वाव
च्छेदकावच्छिन्नवत्तायाहविरोधितानियामकसंबंधावच्छिन्ननिरवच्छिन्नाधिकरणतावृत्तित्वस्वावच्छेदकावच्छिन्नाभाववृत्ति
त्वेनदन्यतरस्वनिरूपितत्वेनदुभयसंबंधेनप्रकारताविशिष्टविषयतानिरूपकत्वस्यविवक्षितत्वात्॥विशेषरूपेणसंसर्गताभ्युपगमेतुप्रकारता
वच्छेदकसंबंधावच्छिन्नाधेयत्वायस्वरूपसंबंधेनस्वाधिकरणावृत्तित्वमेवस्वव्यधिकरणत्वं॥ननुप्रकारतावच्छेदकसंबंधावच्छिन्न
यदधिकरणतासामान्येस्वाधिकरणानुयोगिकत्वाभावस्यस्वरूपसंबंधेनदेहेतन्न॥तथासतिसंयोगेनरूपवान्घटइतिज्ञानस्यापिप्रमात्वा
नुपपत्तिःसंयोगेनरूपाधिकरणतायाअप्रसिद्धत्वात्॥केचित्तु॥प्रकारतावच्छेदकसंबंधसामान्येस्वाधिकरणानुयोगिकत्वयद्धर्मावच्छिन्नप्रति

योगिकत्वोभयाभावस्तद्धर्मत्वंस्ववैय्यधिक[illegible]दार्थः॥ [illegible]भूतलंसंयोगसमवायोभयसंबंधे[illegible]देतिज्ञानस्यप्रमात्वापनिर्व्यास्यवृत्तिधर्मावच्छिन्नानुयोगिताकतदाश्रयवृत्तिप्रतियोगिताकाभावानभ्युपगमेसंसर्ग[illegible]देतोभयत्वावच्छिन्नेऽभयाभावासत्वादितिवाच्यं॥प्रकारतावच्छेदकसंसर्गतावच्छेदकसामान्येस्वाधि[illegible]स्यानुयोगितानिरूपकतावच्छेदकत्वयद्धर्मावच्छिन्नप्रतियोगितानिरूपकतावच्छेदकत्वोभयाभावस्तद्धत्वस्यविवक्षितत्वादित्याहुरन्ये॥संयो[illegible]देतसंयोगसमवायोभयसंसर्गकस्यघटप्रकारकभूतलविशेष्यकज्ञानस्यप्रमात्वापत्तेर्दुर्वारत्वात्संयोगत्वादेतादृशोभय[illegible]त्॥ईश्वरीय[illegible]त्तेविषयिताशून्यत्वंसर्वांशेप्रमात्वमित्यपिकेचित्॥दीधितौतुयथार्थेनिव्यर्थमिति॥अत्रेदंबोध्यं॥वह्न्यभाववद्धूमादिविषयकत्वस्यप्रतिबंधकताभूत्येसंशयेआहार्यंचवर्तमानतयानप्रतिबंधकतानतिरिक्तवृत्तित्वमितिसंशायान्यानाहार्यादिज्ञाननिष्ठत्वविशेषणंविषयितायांद्वितीयलक्षणेवक्ष्यते॥इदंतुयावद्भ्रमभिन्नत्वरूपयाथार्थ्यनिवेशेनैवसंशायाहार्ययोर्व्युदासंभवान्नसंशायान्यत्वानाहार्यत्वयोर्निवेशइतियाथार्थ्यविशेषणंवैय्यर्थ्यंकथंसगच्छते॥अन्नुदृक्षःसंयोगीनवेतिसंशायस्यात्रमत्वान्नयाथार्थ्यनिवेशात्तद्वारणंतदवारणेचकपिसंयोगिभेदस्यसाध्यत्वं[illegible]

पिसंयोगतदभावकोटिकसंशयांतर्भावेणातिरिक्तत्वानिश्चयः कपिसंयोगवदृक्षाद्देशांतरेऽनुपपत्तिरितितन्न॥कोट्यंशेभ्रमत्वसंभवेपिकोटिद्वयविरोधांशेभ्रमत्वसंभवात्॥समुच्चयवैलक्षण्यायसंशयेविरोधभानस्यावश्यकत्वात्॥यदपिवह्निमान्ह्रदोवह्न्यभाववानित्याद्याहार्यस्ययथार्थत्वविशेषणेनवारणेपिह्रदोवह्निमानितिबाधज्ञानकालीनेच्छाजन्यह्रदोवह्न्यभाववानित्याकारकाहार्यप्रमायानवारणसंभवइतितदपिन॥तत्रापिवह्निमान्ह्रदोवह्न्यभाववानित्याकारकस्याहार्यस्याभ्युपगमात्सामग्रीबलेनवह्नेर्वह्न्यभावधर्मितावच्छेदकतयाभानेबाधकाभावात्॥अतएवद्वितीयलक्षणेवक्ष्यतेआहार्यसमानाकारकानाहार्यज्ञानाप्रसिद्धेरिति॥ननैवमव्याप्यवृत्तित्वाग्रहकालीनस्यकपिसंयोगाभाववान्वृक्षःकपिसंयोगीत्याहार्यस्यनवारणसंभवइतिवाच्यं॥संशयेवनादृशाहार्यस्यापिकपिसंयोगतदभावयोर्विरोधांशेभ्रमत्वसंभवात्॥ह्रदोनिर्वह्निरित्याकारकानाहार्यज्ञानेआहार्यज्ञानेच्छाकार्यतावच्छेदकस्यासत्वोपपत्तयेइच्छाकार्यतावच्छेदककोटौवह्निधर्मितावच्छेदककत्वस्येवाव्याप्यवृत्तित्वग्रहकालीनेवह्निमान्ह्रदोनिर्वह्निरित्याकारकज्ञानेव्यभिचारवारणायविरोधावगाहित्वस्यापिनिवेश्यतयाविरोधिधर्मितावच्छेदकानात्मकस्यैवविरोधान

वगाहिनोप्याहार्यस्यानभ्युपगमात्॥व्याप्यवृत्तित्वावगाहित्वेनबाधज्ञानस्यप्रतिबंधकतापक्षेप्रतिबंधकानाहार्यज्ञानेव्याप्यवृत्तित्वभास-
काव्याप्यवृत्तित्वज्ञानाभावबलादेवाहार्यज्ञानेपिविशेष्यभानसंभवइतियथार्थत्वविशेषणेनाहार्यवारणंनानुपपन्नं॥[illegible]
मभिन्नत्वंनत्रभ्रमत्वस्यानुगतस्यदुर्वचत्वेनभेदकूटनिवेशावश्यकत्वेसंशयाहार्यरूपकतिपयभ्रमभेदनिवेशासार्थक्येपितदितरभ्र
मान्यत्वविशेषणवैयर्थ्यंदुर्वारंलक्षणेदोषइतितदसत्॥उदासीनपदार्थांशेयोभ्रमस्तदन्यत्वविशेषणस्ययादृशविशिष्टबाधज्ञानं
प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तीतिविवक्षातःप्रागपिनिवेशप्रयोजनाभावेननथाविधकतिपयभ्रमान्यत्वविशेषणवैयर्थ्यस्य
दर्शितविवक्षानिबंधनत्वाभावाद्दीधितिस्वरसभंगात्॥ईश्वरीयज्ञानावृत्तिविषयितासंबंधावच्छिन्नत्वंग्रंथेगदाधरोक्तरूपस्यवाऽनुगतभ्र
मत्वस्यवक्तुंशक्यत्वादितिदिक्॥मिश्रव्याख्यामुपन्यस्यतिकेचित्तिति॥तज्ज्ञायमानेति॥इतरभेनेतादृशबाधज्ञानप्रकारकयथा
र्थज्ञानविषयत्वमादायलक्षणसमन्वयेपिदुर्वचत्वात्तव्याप्यापत्तेस्तन्मनाश्रयणमेवोचितमितिभावः॥यथार्थपदवैयर्थ्यमाशंकते॥य
द्यपीति॥समाधत्तेतथापीति॥वक्ष्यमाणसंबंधावच्छिन्नेति॥एकज्ञानविषयतासंबंधावच्छिन्नेत्यर्थः॥अन्वयश्चास्यबाधज्ञानस्य

नेन॥ तथाव्यवहारः स्यादिति॥तादृशव्यवहारस्यप्रामाण्यापत्तेरित्यर्थः॥ तथासतीति॥व्यभिचारादेःसाक्षादनुमितिप्रतिबंधकत्वं स्वीकृत्यदुषधात्वर्थघटकानुमितौतद्धेतुकत्वाप्रवेशेइत्यर्थः॥ तल्लाभानुरोधेनेति॥अयंभावस्तद्धेतुकत्वाप्रवेशेरासभलिंगकानुमितेरप्यनुमितिसामान्यांतर्गततयाधूमाभाववद्वृत्तित्वादिरूपव्यभिचारादेस्तादृशानुमितिसामान्यप्रतिबंधकत्वाभावादसंभवः स्यादितिप्रकृतहेतुप्रकारकज्ञानजन्यत्वरूपप्रकृतहेतुकत्वादेर्दुषधात्वर्थघटकानुमितौनिवेशआवश्यस्तद्घटकहेतौहेतुतावच्छेदकवैशिष्ट्यप्रवेशोप्यावश्यकोऽन्यथाइत्यादिलिंगकानुमितेरपिसामान्यांतर्गततयाऽसंभवानुत्थापत्तिनिवेशेचहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितज्ञानजन्यत्वलाभान्नासंभवइति॥ननुपर्वतेधूमसाधनेवह्नित्वेनायंदुष्टइत्यादौदुषधात्वर्थेयदिवह्नित्वावच्छिन्नहेतुकानुमितिप्रतिबंधकोऽर्थस्तदापर्वतइत्यत्रसप्तम्यर्थोविशेष्यत्वं तत्रप्रकृत्यर्थस्यपर्वतादेर्निरूपितत्वसंबंधेनान्वयः धर्मिपारतंत्र्येणावच्छिन्नत्वसंबंधेनपर्वतत्वादेश्चान्वयइतिपर्वतत्वावच्छिन्नविशेष्यतालाभस्तस्या निरूपकतासंबंधेनाभेदेन धूमपदार्थधूमप्रकारत्वावच्छिन्नान्वितसाधनपदार्थानुगितान्वयः॥धूमप्रकारकत्वविशिष्टएवतादृशविशेष्यतायाअन्वयाद्विशिष्टवैशि

स्यबुद्धौ धर्मितावच्छेदकावच्छिन्नत्वस्यविधेयेभाननियमेन धूम[illegible]त्वावच्छिन्नतादृशविशेष्यताकलाभस्तादृशविशेष्यताकलान्विनानुमितेःसप्तम्यर्थेऽभेदेऽन्वयस्तस्यदुषधात्वर्थघटकानुमितौस्वरूपसंबंधेनान्वयोविधेयांशेऽधिकावगाहिबोधस्यनव्यसंमतत्वात्॥वह्निलेनेत्यत्रतृतीयार्थवैशिष्ट्यस्येदंपदार्थेधर्मिण्यन्वयः॥दुष्टइत्यत्रक्तप्रत्ययार्थःसंबंधी॥तथाचधूमत्वावच्छिन्नप्रकारकत्वावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यकत्वविशिष्टानुमितिखभिन्नानुमितिप्रतिबंधकताश्रयसंबंधीवह्नित्वविशिष्टइतिबोधःफलितः॥सचनसंभवतिसप्तम्याअभेदार्थकत्वाभावात्॥तथात्वेपिदुषधात्वर्थैकदेशेतदन्वयोव्युत्पत्तिविरुद्धः॥पदार्थैकदेशेऽभेदान्वयेदण्डीस्वराजमानंगइतिप्रयोगापत्तेश्चभेदसंसर्गकान्वयबोधस्यव्युत्पत्यसिद्धत्वंस्वीकारेपिधात्वर्थेऽनुमित्यंतर्भावोव्यर्थस्तेनविनापिनादृशार्थलाभात्॥विधेयांशेऽधिकावगाहिबोधस्यसर्वानुमानलाभवेनसप्तम्यर्थेनान्वयप्रसंगाच्चेत्यतआह॥अथवेति॥अनन्वयप्रसंगादिति॥इदंचनवीनमताभिप्रायेण॥प्राचांमतेचधात्वर्थेऽनुमित्यंतर्भावोव्यर्थइत्येवदूषणं॥वह्निनाधूमसाधनइति॥नन्वत्रापितृतीयार्थेवैशिष्ट्यमेवतस्यरासभेबाधान्नापत्तिरितिचेन्न॥नथासतिवह्निनाधूमसाधनेवह्निर्दुष्टइतिव्यवहारप्रामाण्यापत्तिः॥वह्नौ २१

वह्निवैशिष्ट्यबाधात्॥अभेदकालिकादिरूपवैशिष्ट्यमादायतदुपपत्तौवह्निनाधूमसाधनेइदंदुष्टंरासभोदुष्टइतिव्यवहारापत्तिः॥-
प्रथमांतार्थतृतीयार्थाभेदान्वयविलक्षणाकांक्षायानियामकत्वंस्वीकृत्यतादृशाकांक्षायाःप्रथमांतपदार्थतावच्छेदकावच्छेदेनैवतृ
तीयार्थाभेदान्वयबोधकत्वांगीकारेउक्तदोषाभावादाह॥**अथवेति**॥पर्वतेवह्निनाधूमसाधनेवह्निर्दुष्टइतिव्यवहारविषयत्वाव-
च्छिन्नेपक्षेतादृशव्यवहारविषयत्वावच्छिन्नेतरभेदस्यपर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुका
नुमितिप्रतिबंधकप्रकारकयथार्थज्ञानविषयत्वहेतुनासाधनेहेतौयथार्थत्वानुपादानेसद्धेतौभ्रमात्मकज्ञानमादायव्यभिचारइतितद्वा
रणायतदुपादानमितिभावः॥**अग्रेपीति**॥द्वितीयतृतीयलक्षणयोरपीत्यर्थः॥**यद्रूपावच्छिन्नविषयतासामान्यमिति**॥इदंचज्ञा
नभेदेनविषयताभेदमतेननेननपाषाणमयत्वविशिष्टपर्वतमादायपर्वतोवह्निमान्धूमादित्यादौदुष्टताप्रसंगइतिध्येयं॥ छ ॥
इतिपर्वतेइत्युपनामकरघुनाथकृतगदाधरीसामान्यनिरुक्तिटिप्पण्यांन्यायरत्नाभिधायांप्रथमलक्षणंसमाप्तं॥ छ ॥
यद्विषयकत्वेनलिंगज्ञानस्यानुमितिप्रतिबंधित्वमितिमूलेज्ञानस्येत्यत्रषष्ठ्यर्थोवृत्तिर्लभ्यतस्ययद्विषयकत्वेऽन्वयः॥ननुयद्विषयकत्वे-

नेतिवाक्येस्वरसतःषष्ठ्यंतज्ञानपदार्थस्यज्ञाननिष्ठत्वस्यविरोधित्वेऽन्वयःप्रतीयते॥अपेक्षितश्चतत्रैव॥अन्यथाप्रच्छतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतायाःकामिनीप्रत्यक्षविषयकेच्छायांसत्वेनकामिनीप्रत्यक्षविषयकत्वस्यतदवच्छेदकताङ्गीकारेवह्निमान्धूमादित्यादौकामिनीप्रत्यक्षेऽतिव्याप्तेः॥ज्ञानवृत्तित्वस्यविरोधित्वेऽन्वयेचज्ञानवृत्तित्वविशिष्टविरोधितायाःकामिनीप्रत्यक्षेच्छायामसत्वेनातिव्याप्तिविरहादितिचेन्न॥एकदेशेऽतिव्याप्तिवारणायानतिरिक्तवृत्तित्वरूपस्यैवावच्छेदकत्वंविवक्षणीयत्वेनदोषविषयितायाःसंस्कारेसत्वेनतत्रचप्रतिबंधकतायाअसत्वेनानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यकस्यामपिदोषविषयितायामसत्वेनासंभवापत्तेस्तद्वारणायज्ञानवृत्तित्वविशिष्टत्वस्यविषयितायामवश्यंविवक्षणीयत्वेनतत्रैवषष्ठ्यंतज्ञानपदार्थान्वयोयुक्तः॥एवंसतिपूर्वोक्तातिप्रसंगोपिनास्ति॥अनतिरिक्तवृत्तित्वरूपस्यैवावच्छेदकत्वस्योक्तयुक्त्याविवक्षणीयतयाकामिनीप्रत्यक्षविषयितायाःकामिनीमनुभवामीत्याकारकानुव्यवसायेसत्वेनतत्रचप्रतिबंधकत्वस्यासत्वेनकामिनीप्रत्यक्षत्वावच्छिन्नविषयितायाअनतिरिक्तवृत्तित्वरूपावच्छेदकत्वविरहात्॥ननुतथापिस्वरसभंगोदुर्वारइतिचेन्न॥उद्देश्यतावच्छेदकपदस्यपूर्व

निपातनियमेनयद्विषयकरे नेतिवाक्येऽद्देश्यवाचकस्यविरोधित्वपदस्यपरत्वसत्वेनानाकांक्षावारणायतद्विषयकयोजनायाआवश्यकत्वाज्ज्ञानस्येत्यस्यापियद्विषयकत्वेनेतिपदात्मकयोजनायाःकर्तुशक्यत्वात्॥तथाचानुमितिविरोधित्वंलिंगज्ञानस्ययद्विषयकत्वेनतत्वमितियोजनायांसारस्यभंगः॥भावार्थस्तुलिंगपदस्यखंडाभावघटकतयायथाकथंचित्सार्थक्येव्याप्तिव्याप्यवारकतयासार्थक्यासंभवेनतदविवक्षेत्यभिप्रायेणगदाधर्यामनतिप्रयोजनकतयेति॥नन्वनाहार्यसंशयाद्यात्मकज्ञानमादायासंभववारणायज्ञानेऽनाहार्यत्वसंशयान्यत्वादिकंनिवेशनीयमितिगौरवमतोलिंगज्ञानमितिपंचमीतत्पुरुषाश्रयणेनलिंगजन्यंज्ञानमनुमित्यात्मकंलक्ष्यते॥एवंचानुमितिवृत्तित्वविशिष्टयद्विषयितेत्यादिरीत्याविवक्षणीयंतत्तद्विषयकानुमितिमादायेवलक्षणसंगतिः॥आहार्यसंशयाद्यात्मकानुमितेरस्वीकारेणानाहार्यादिज्ञानमादायदोषइतिलिंगपदसार्थक्यसंभवेतद्वैय्यर्थ्यकथनमसंगतमितिचेदत्राप्याह्वः॥एवंसतियादृशस्थलेदोषविषयकानुमितिःकस्यापिनजातातत्राव्याप्तिः॥एवंआहार्यादिज्ञानमादायदोषप्रकारणायविषयितायामनुमितिवृत्तित्वंनिवेशनीयमुतशाब्दबोधवृत्तित्वंनिवेशनीयमित्यत्रविनिगमकाभा

वेनोभयस्यापिदोषपदप्रवृत्तिनिमित्तत्वापत्तिरनउभयमप्युपेक्ष्यानाहार्यत्वादिविशिष्टज्ञानवृत्तित्वमेवविवक्षणीयमित्यभिप्रायेण
लिंगपदवैयर्थ्यकथनमितिवदंति॥ननुच॥ननुरुषाश्रयणेपिलिंगप्रत्यक्षसाधारणस्यलिंगज्ञानपदस्यानुमितितात्पर्यकत्वस्वी
कारेनस्यजन्यत्वप्रत्यक्षान्यज्ञानपरत्वमपिसंभवति॥तथाचजन्यप्रत्यक्षान्यज्ञानवृत्तित्वविशिष्टयद्विषयितेत्यादिरीत्याविवक्षणीयं
एवंचप्रत्यक्षान्यज्ञानेआहार्यत्वसंशयत्वादेरसत्वान्नाहार्यादिज्ञानमादायासंभवः॥इदानींयत्रदोषानुमितिरप्रसिद्धातत्राव्याप्तिःज्ञा-
नंनुमितित्वंनिवेशनीयमुतशाब्दत्वंनिवेशनीयमित्यत्राविनिगमनाविरहेणप्रवृत्तिनिमित्तद्वयापत्तिरित्यादिदूषणासत्वं॥यत्रानुमित्य
प्रसिद्धिस्तत्रापिशाब्दज्ञानमादायलक्षणगमनात्॥नचयत्रानुमितिःशाब्दंचेत्युभयमप्यप्रसिद्धंतत्राव्याप्तिरितिवाच्यं॥यत्रदोषत्व
व्यवहारस्तत्रैवलक्षणस्तत्वापेक्षणेनयत्रचव्यवहारस्तत्रनियमेनशाब्दात्मकज्ञानमत्वेनतमादायलक्षणसंगमना॥॥अथवाजन्य
प्रत्यक्षान्यज्ञानत्वस्येश्वरज्ञानसाधारण्येनईश्वरज्ञानमादायैवलक्षणसमन्वयःसंभवति॥ननेश्वरज्ञानस्यप्रतिबंधकत्वेमानाभावेनत
त्तजन्यप्रत्यक्षान्यज्ञानत्वविशिष्टविषयितासत्वेनासंभवइतिवाच्यं॥बाधकाभावस्यैवप्रमाणत्वात्॥नचाव्यापकविषयिताशून्यत्वस्यनि

वेशनीयत्वात्तस्यचेश्वरज्ञानेऽसत्वेनोक्तस्थलेऽव्याप्तिर्दुर्वारैवेतिवाच्यं॥जन्यज्ञानवृत्तित्वविशिष्टाभा'कावेषयिताशून्यत्वस्यैवनिवेशनीयत्वात्॥ननूक्तपक्षेप्यप्रामाण्यज्ञानानास्कंदितत्वस्यनिवेशनीयतयासाम्यमितिवाच्यं॥तथापिसंक्षेपाद्वाघनिवेशेनलाघवान्यायादितिचेन्न॥स्वावच्छेदकाभावप्रतियोग्यनुपहितत्वसंबंधेनप्रतिबंधकताविशिष्टत्वमेवत्वन्नाहार्याप्रामाण्यज्ञानानास्कंदितसंशयान्यत्वादिविशिष्टत्वं॥प्रतियोग्युपहितत्वंचैकक्षणावच्छिन्नैकात्मवृत्तित्वसंबंधेनतत्संबंधावच्छिन्नप्रतियोगिताकाभाववत्वमेवानुपहितत्वं॥उक्तानुगमेनानाहार्यत्वादीनांनिवेशएतन्मतएवलाघवेनलिंगपदवैय्यर्थ्यात्॥ननुमन्मतेप्रत्यक्षान्यत्वरूपंलघुविशेषणंभवन्मतेचतादृशसंबंधेनप्रतिबंधकताविशिष्टत्वरूपंसंसर्गांशेगुरुभूतमितिवाच्यं॥त्वन्मतेप्यप्रामाण्यज्ञानास्कंदितप्रत्यक्षान्यज्ञानमादायासंभववारणायाप्रामाण्यज्ञानाभावविशिष्टत्वंनिवेशनीयंतत्रचाप्रामाण्यस्याननुगतत्वेनोक्तानुगमस्यावश्यकतयाविपरीतमेवप्रत्यक्षान्यत्वनिवेशनप्रयुक्तगौरवमितिसूक्ष्मदर्शिभिर्विचारणीयं॥अथेदंबोध्यंप्रयोजनांतरेणलिंगपदस्यवैय्यर्थ्यसंभवेनतद्वैय्यर्थ्यकथनमसंगतं॥किंतत्प्रयोजनमितिचेच्छृणु॥लिंगस्यज्ञानंलिंगज्ञानमितिषष्ठीतत्पुरुषाश्रयणेनलिंगवि

षयकज्ञानेलभ्यंतइतिन्वयेदोषविषयितायामन्वयेदोषविषयकत्वमपिज्ञानेतुल्यविनिवेद्यतयालभ्यते॥एवंचैकज्ञा
नविषयत्वसंबंधेनदोषवत्वरूपंदुष्टलक्षणंलभ्यतइतिमूलेदुष्टनिरूपणंप्रतिज्ञायतल्लक्षणाकथनप्रयुक्तन्यूनतापरिहरणेनलिंग
पदस्यसार्थक्यं॥नन्चदुष्टलक्षणबोधकतयातत्सार्थक्येपितस्यलक्षणेनिवेशेउपयोगाभावेनाविवक्षणमितिवाच्यं॥लक्षणनिवे
शप्रयोजनाभावेपिदुष्टलक्षणबोधनायलिंगपदमित्यनुक्तातस्यवैय्यर्थ्यकथनमग्रेदुष्टलक्षणाकथनप्रयुक्तमूलीयन्यूनत्वशं
कानिरासायतस्यस्फुटत्वादुपेक्षणमितिव्याख्यानमत्यंतासामंजस्यविलसितं॥नन्वेवंलिंगपदसार्थक्यकल्पनेप्रथमलक्षणए
वानुद्धानंयुक्तंतस्यापिदुष्टलक्षणत्वादितिचेन्न॥प्रथमतृतीयलक्षणापेक्षयाद्वितीयलक्षणस्यग्रंथकल्पिभरात्॥यद्विषयकत्वेने
तिमूलस्थयत्पदस्यसर्वनामतयातस्यबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नेशक्तत्वाद्दोषत्व[illegible]
इदादिरर्थः॥तत्रचवत्त्वभावादेर्ह्रदांशउपलक्षणत्वविवक्षायांगुणाद्यन्यत्वोपलक्षितसत्तयाद्रव्यादिनोगुणादेरिवद्रव्यत्वह्रदत्वा-
दिनावत्त्वभाव[illegible]गाहिज्ञानीयविषयितायावत्त्वभावोपलक्षितेनह्रदात्मकेनयत्पदार्थेननिरूपितत्वसंबंधेनविशेषणीभव

ताव्याद्दत्तिर्नसंभवति ह्रदेवह्न्यभावस्यविषयितायांचह्रदस्यनिरूपितत्वसंबंधेनप्रकारीभूयभासमानस्याबाधादितिमूलस्थयत्सदा-
र्थतावच्छेदकवह्न्यभावादेर्नोपलक्षणत्वंकिंतुविशेषणत्वमेवेतिज्ञापनायेवयादृशविशिष्टविषयकत्वेनेतिदीधितिरुक्तांव्याख्यानं॥एवं
[illegible]न्यत्वविशिष्टसत्तयागुणादेरिवह्न्यभावादिविशिष्टेनह्रदे[illegible]ह्न्यत्वह्रदत्वादिप्रकारकज्ञानीयविषयितायाव्याद्दत्तिः[illegible]
यतोवह्न्यभाववद्ध्रदविषयितेत्यत्रह्रदांशेवह्न्यभावादेरुपलक्षणत्वविवक्षायांनिरूपितत्वमेवविषयितांशेवह्न्यभ[illegible]सर्गः॥वह्न्य
भावादिश्चनसावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपितत्वसंबंधेनविषयितायांप्रकारः॥किंतुस्वरूपसंबंधेनह्रदांशएव॥क्वचिन्नस्थले
ह्रदांशेवह्न्यभावादेर्विशेषणत्वविवक्षायांतुवह्न्यभावश्चावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपितत्वेननिरूपितत्वस्यवह्न्यभाववद्ध्रदसं
सर्गता॥अथवावह्न्यभावादेरवस्तावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपितत्वसंबंधेनविषयितांशेधर्[illegible]धर्मिण
स्तुशुद्धनिरूपितत्वसंबंधेनैवविषयितांशेप्रकारत्वमितिमतभेदः॥तत्रविशिष्टप्रतियोगिकत्वेननिरू[illegible]ज्ञाविशि
ष्टप्रतियोगिकत्वविशिष्टनिरूपितत्वसंबंधेनयादृशविशिष्टविशेषितविषयिताप्रकृतानुमितिप्रतिबंधकज्ञाननिरूक्तवृत्तिस्तादृशत्वंदा

षत्वमिति निष्ठशब्दार्थेयथाश्रुतदीधितिसंगतावपिविशिष्टवैशिष्ट्यबुद्धौविशेषणतावच्छेदकस्यधर्मिपारतंत्र्येणपरंपरासंबंधेनविशेषणीभूय व्यावर्तकत्वमिति द्वितीयपक्षेशुद्धनिरूपितत्वसंबंधेनविशेषणीभूयवत्त्वभावबुद्धेस्यद्रव्यत्वादिनावत्त्व [illegible] ॥ हेज्ञानीयविषयिता व्यावर्तकतासंभवात्तादृशविषयितायाअपिलक्षणघटकत्वंस्यात्तस्यांचानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वासंभवइतिविशेषणता वच्छेदकवत्त्वभावादेरपिस्वावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपितत्वसंबंधेनधर्मिपारतंत्र्येणविषयितांशेविशेषणत्वमितिमूला भिप्रायंस्फुटयितुंयद्रूपावच्छिन्नविषयताकत्वेनेत्यर्थेगदाधरैः कृतः॥यद्विषयकत्वेनेत्यत्रयत्तदर्थतावच्छेदकस्यवत्त्वभावादेरुपलक्ष णत्वंविहायविशेषणत्वविवक्षायाःप्रयोजनंदर्शयति॥**यद्विषयकत्वेनेत्यत्रतृतीयार्थइति॥केचित्तुयादृशविशिष्टविषयकत्वेने**तिदीधितिवाक्याद्विशिष्टस्याधेयतयाविषयतायामन्वयेविशेषणस्यधर्मिपारतंत्र्येणावच्छिन्नत्वसंबंधेनान्वयेचयद्रूपावच्छिन्नयन्नि ष्ठविषयताकत्वंलभ्यतेतत्रचलक्षणेयन्निष्ठत्वांशनिवेशोव्यर्थइत्यतस्तदंशपरित्यागेनविवक्षितार्थमाह**यद्रूपावच्छिन्नविषयता कत्वेनेति॥ननुतर्हियन्निष्ठत्वस्यैवसाक्षाल्लाभेतन्निवेशएवोचितोयद्रूपावच्छिन्नत्वस्यैवपरित्यागोस्ततस्तन्निवेशस्यप्रयोजनंदर्शय**

ति **यद्विषयकत्वेनेत्यत्रतृतीयार्थइति**॥तथाचयन्निष्ठतांशःप्रयोजनाभावान्ननिवेश्यइतिभाव इत्या॰॥**अथैकमपि**प्रमेयत्वाभा
वत्वादिनावत्त्वभावावगाहिप्रमेयवानभाववान्वाऽद्इतिज्ञानीयविषयितायाव्यावृत्तिर्नसंभवतितादृशविषयितायाअपिवत्त्वभावत्वाद्यु
पलक्षितवत्त्वभावाद्यवच्छिन्ननिरूपकताकत्वानपायात्॥विशेषणतावच्छेदकस्यवत्त्वभावत्वादेर्विशेषणत्वविवक्षयायादृशविशिष्ट-
विषयकत्वेनेत्यस्ययद्रूपविशिष्टावच्छिन्ननिरूपकताकविषयित्वेनेत्यर्थस्वीकारेनिर्विशेषणकपदार्थघटितदोषासंग्रहइतिचेन्न
॥यादृशविशिष्टेनविशेषिताविषयिताऽनुमितिप्रतिबंधकतानतिरिक्तवृत्तिस्तादृशविशिष्टत्वंदोषत्वंतत्रविशिष्टविशेषितत्वस्यविशेष
णविशेषणतावच्छेदकविशेषितत्वगर्भस्यैवोपादेयत्वात्॥**यद्याचवत्त्वभावविशिष्टह्रदविषयितेत्यत्र**विषयितांशेकेवलनिरूपित
त्वसंबंधेनवत्त्वभाववद्ह्रदस्यसमवायसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताकनिरूपकताकत्वसंबंधेनवत्त्वभावधर्मिनावच्छेदकता
पन्नस्यह्रदत्वस्यस्वरूपसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताकनिरूपकताकत्वसंबंधेनह्रदत्वावच्छिन्नविशेषणतापन्नवत्त्वभा-
वस्यस्वरूपसंबंधावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपकतावच्छेदकताकनिरूपकताकत्वसंबंधेनवह्निविशेषणतावच्छेदकतापन्न

त्याभावलक्षणप्रतियोगितासंबंधादच्छिन्नस्वनिष्ठावच्छेदकतापटितपरंपरासंबंधेनाभावत्वावच्छिन्नविशेषणतापन्नस्य
वह्नेःसमवायसंबंधावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नावच्छेदकतापटितपरंपरासंबंधेनवह्नित्व
स्यविशेषणतंपर्यवसितं॥विशिष्टवैशिष्ट्यबोधेसर्वत्रेदशाभाननियमस्यविशिष्टवैशिष्ट्यस्यविशेषणादिवैशिष्ट्यघटितत्वांगीकार
कर्तृसंमतत्वात्॥ईदृशीचवह्न्यभाववद्भूदरूपविशिष्टविशेषितविषयिताकृदोवह्न्यभाववानित्याकारकज्ञानीयैवनतुवृक्षइत्यभाव-
वान्वह्न्यभाववानितिवायज्ञानंतदीयानाप्येकत्रह्रदेभयप्रकारकंवह्न्यभावंधर्मितावच्छेदकी[illegible]
[illegible]वायज्ञानंतदीयादर्शितविशिष्टवैशिष्ट्यशरीरेविशेषणधर्मितावच्छेदकभावापन्नयोरेववह्न्यभावह्रदत्वयोर्घटकत्वान्नतुस्व
तंत्रयोः॥कथमन्यथाएकत्रह्रदेयमितिरीत्यावह्न्यभावह्रदत्वोभयावगाहिज्ञानादिविषयितायांवह्न्यभाववद्भूदरूपावैशिष्ट्यवैशिष्ट्यबु
द्धेरप्रमात्वंनिर्वहेत्॥ननुविशेषणधर्मितावच्छेदकभावापन्नयोरेवतयोर्घटकत्वमि[illegible]र्थः॥न[illegible]धर्मिता[illegible]भावोविशि
ष्टवैशिष्ट्यशरीरेऽन्तर्भवतीतिशक्यतेवक्तुं॥विशेषणधर्मितावच्छेदकभावस्यविशिष्टवैशिष्ट्यावगाहिज्ञानीयविषयतायांविशेषरूपतयावह

ज्ञानविषयांतर्भावासंभवात्॥ परंतु वह्न्यभाववद्भूदविषयितेत्याकारकविशिष्टवैशिष्ट्यज्ञानेविषयितांशेयाधर्मिपारतंत्र्येणवह्न्यभाववद्भूदत्वयोःप्रकारतासेवविशेषणधर्मितावच्छेदकभावापन्नयोस्तादृशप्रकारतायाविशेषणधर्मितावच्छेदकभावावच्छिन्नत्वस्यैकत्वद्वयमित्यादिज्ञानादितोवैलक्षण्यनिर्वाहान्यथानुपपत्त्यास्वीकारात्॥ नन्वदर्शितविशिष्टवैशिष्ट्यज्ञानाविषयस्यविशेषणधर्मितावच्छेदकभावस्यविषयतारूपप्रकारतायांविषयवानात्मकमवच्छेदकत्वंनसंभवतिप्रकारांशेविशेषणीभूयभासमानस्यैवप्रकारतावच्छेदकत्वानुभवादितिचाच्यं॥अन्यथानुपपत्तेःसर्वतोबलीयस्त्वात्तज्ज्ञानांतरवैलक्षण्यानुपपत्त्याऽविषयस्यापिविशेषणधर्मितावच्छेदकभावस्यप्रकारतावच्छेदकत्वोपगमादेतएवरक्तदंडवान्पुरुषइतिज्ञानीयरक्तत्वप्रकारतानिरूपितविशेष्यतायाःपुरुषनिष्ठविशेष्यतानिरूपितप्रकारतायाश्चावच्छेद्यावच्छेदकभावस्तादृशज्ञानस्यरक्तोदंडःदंडवान्पुरुषइतिसमूहालंबनवैलक्षण्यायस्वीकर्तव्यःग्रंथकृद्भिरितिचेदिहापिप्रकारांशेविशेषणीभूयाभासमानस्यापिविशेषणधर्मितावच्छेदकभावस्यवह्न्यभाववद्भूदत्वरूपप्रकारनिष्ठायांविषयितासंबंधितायामवच्छेदकत्वमस्तुपूर्वोपदर्शितानुभवानुपपत्तेर्जागरूकत्वात्॥ अनयैववचसरण्याघटपटोनस्त इतिप्रतीतिसिद्धप्रतियोगितायांघटत्वस्यप्रतियोगिविशे

षणतापन्नस्यैवावच्छेदकत्वंघटत्वेनघटपटोनस्तइतिप्रतीतिसिद्धप्रतियोगितायांतुस्वानंच्येणापीतिभेदइतिव्यधिकरणधर्मावच्छिन्न
भावग्रंथीयगदाधराणामुक्तिःसंगमनीया॥प्रकारनिष्ठसंबंधितावैचित्र्येहिप्रकारतावैचित्र्यमेवनियामकमितिप्रकारतायायेनरूपेणयेन
संबंधेनावच्छेदःसंबंधितायाअपिताभ्यामवच्छेदइतिस्थितेकचित्प्रकारतायास्तटस्थेनविशेषणधर्मितावच्छेदकभावेनावच्छेदेनाद
शप्रकारतानियम्यसंबंधितायाअपितटस्थेनविशेषणधर्मितावच्छेदकभावेनावच्छेदोयुक्तएव॥किंचविशेषणधर्मितावच्छेदकभाव
स्यसंबंधितावच्छेदकत्वमुपगम्यैवसंबंधितावैचित्र्यमुपपादनीयमित्यत्रनाग्रहः॥किंतुपूर्वोक्तप्रमात्वान्यथानुपपत्त्याकेनापिप्रका
रेणसंबंधितावैचित्र्यमुपपाद्यमित्येव॥एवंचसंबंधितावैचित्र्यंविशेषणधर्मितावच्छेदकभावावच्छिन्नमन्यादृशंवास्तूभयथापिवह्य
भाववद्ध्रदरूपविशिष्टवैशिष्ट्यशरीरेतस्यघटत्वेत्वद्वयमितिरीत्यावह्यभाववद्ध्रदत्वोभयप्रकारकज्ञानीयविषयितान्याप्तिनिर्भ्र
त्यूहैव॥एतेनयथान्यत्रपदेनकिंधर्मवत्तेनतावह्न्यभाववद्ध्रदत्वोभयादिकं॥एकत्वद्वयमितिरीत्यावह्न्यभाववद्ध्रदत्वोभयप्रकारकज्ञा
नस्यवह्न्यभावविशिष्टध्रदत्वावगाहिज्ञानस्यचतदुभयावच्छिन्नविषयताकतयातस्यचप्रकृतानुमित्यप्रतिबंधकतयाबाधाद्यसंग्रहप्र-

संगः॥ नापि सामानाधिकरण्यसंबंधेन द्रव्यत्वविशिष्टवत्त्वभावादिकं द्रव्यत्वविशिष्टवत्त्वभावाद्यवगाहनेऽदृश्यतावच्छेदकीभूतधर्मस्यपरतंत्रद्रव्यत्वादेः सामानाधिकरण्यसंबंधेनविधेयीभूतवत्त्वभावादौ विशेषणतायाः प्रामाणिकत्वेऽप्युक्तसंबंधेन द्रव्यत्वादिविशिष्टवत्त्वभावत्वानिरूपितधर्मितावच्छेदकज्ञानस्य तादृशरूपावच्छिन्नविषयताकस्यभ्रमतानुमित्यप्रतिबंधकतयाऽनुक्तदोषस्यदुर्वारता॥ नापि वत्त्वभावधर्मितावच्छेदकतापन्नद्रव्यत्वंतादृशद्रव्यत्वस्यशुद्धद्रव्यत्वानतिरिक्ततयाद्रव्यइतिज्ञानाव्यावृत्तेः॥ नच यद्रूपावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकत्वावच्छिन्नयद्रूपनिष्ठनिरूपकताकविषयिताअनुमितिप्रतिबंधकतावच्छेदिकातद्रूपावच्छिन्नवत्तद्रूपावच्छिन्नोदोषइतिविवक्षणान्नदोषइतिवाच्यं॥ घटःपृथिवीभिन्नोमेयत्वादित्यादौस्वरूपतःपृथिवीत्वविशिष्टघटादावव्याप्तिप्रसंगात्॥ यन्निष्ठप्रकारतानिरूपितधर्मितावच्छेदकत्वावच्छिन्नयद्रूपनिष्ठनिरूपकताकविषयिताऽनुमितिविरोधितावच्छेदिकेतुक्तोवृत्तिमान्हेतुरितिज्ञानस्यापितादृशविषयितायालिंगतयाऽनुमित्यविरोधितयाचव्यभिचारेऽव्याप्तेः॥ एवंप्रथमयद्रूपपदेनवत्त्वभावत्वोनयपरित्यक्तदोषभावत्वविशिष्टवत्त्वीयवानितिज्ञानव्यावृत्तिर्दुर्वारा॥ किंच नीलत्वधर्मितावच्छेदकतापन्नपर्वतत्वविशिष्टवत्त्व

भावसाधनेवह्निमन्नीलपर्वतादिरूपबाधाव्याप्तिः॥तत्रद्वितीयपक्षपदेननीलत्वपर्वतत्वोभयपरिग्रहेपिपर्वतत्वधर्मितावच्छेदकतापन्न
नीलत्वविशिष्टवह्यवगाहिज्ञानाव्याप्तेः॥नीलत्वधर्मितावच्छेदकतापन्नपर्वतत्वपरिग्रहेपिविशिष्टभुद्वयोरैक्येनोक्तदोषोदुर्वारः॥केव
लपर्वतत्वविशिष्टवह्यवगाहिज्ञानाव्याप्तेश्च॥यद्यावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकत्वावच्छिन्नातादृशधर्मितावच्छेद
कत्वावच्छिन्नयद्रूपनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकत्वावच्छिन्नाचयायद्रूपनिष्ठनिरूपकतानादृशनिरूपकताकविषयिताप्र
कृतानुमितिविरोधितावच्छेदिकेत्यादिरीत्याविवक्षणेपिपर्वतोवह्न्यभाववानित्यादिस्थलीयवह्निमत्पर्वतादिरूपबाधासंग्रहप्रसंगस्त
त्रधर्मितावच्छेदकद्वयाभावात्॥ननुतत्राभेदेनपर्वतवानुपर्वतोवह्निमानितिज्ञानमादायलक्षणसमन्वयःपर्वतत्वधर्मितावच्छेद-
कतापन्नपर्वतत्वादेरेववह्निधर्मितावच्छेदकत्वादिनिवाच्यं॥तादृशज्ञानस्यवह्निमत्पर्वतत्वावच्छिन्नविषयकत्वाव्यापकपर्वत
त्वधर्मितावच्छेदकतापन्नपर्वतत्वावच्छिन्नविषयिताशून्यत्वाभावात्॥जातिधर्मितावच्छेदकतापन्नजात्यवच्छिन्नविषयिताया:जाति
मद्वृत्त्वावच्छिन्नविषयकत्वाव्यापकत्वोपपादनस्यजातिमान्जातिमानितिज्ञानवारणानुरोधेनावश्यकत्वात्॥एवंधर्मितावच्छेदकाभिन्न

दोषदूषणमुन्नेयं॥ वस्तुपक्षसाध्यादिभेदेनलक्षणभेदाद्यथापक्षतावच्छेदकाभिहृद्धिस्तत्समसंख्याकधर्मितावच्छेदकनिवेश्यलक्षणंपरिष्कर्तव्यमिति**नदस्तु**॥ ह्रदोवह्निमान्जलवत्त्वेसतीवालवह्नित्वादित्यादौ एकधर्मितावच्छेदकनिवेशजलवच्छैवालवह्नेरुपसाधनाप्रसिद्धावुक्तदिशाऽव्याप्तिःधर्मितावच्छेदकद्वयोपादानेवह्न्यभाववद्ह्रदरूपबाधासंग्रहः॥ एवंयद्रूपावच्छिन्नप्रकारतेत्यत्रापियद्रूपपदेनकिंधर्म्यमितिविकल्प्यदूषणमुन्नेयं॥ **अत्रकेचित्** पक्षतानुमितीयद्धर्मावच्छिन्नेयद्धर्मावच्छिन्नविशेष्यावगाहित्वंनिविष्टंतद्धर्मावच्छिन्नाभावनिष्ठप्रकारतानद्धर्मावच्छिन्नाभावव्याप्यत्वावच्छिन्नप्रकारतायतद्न्यतरनिरूपिततद्धर्मावच्छिन्नविशेष्यताभिन्नायायातादृशान्यतरप्रकारतानिरूपितविशेष्यतातत्त्वनिरूपकत्वाभावकूटज्ञानविशेषणंतेन पूर्वोक्तप्रतिबंधकज्ञाननिरासः॥ तादृशप्रकारतानिरूपितद्धर्मावच्छिन्नविशेष्यतानिरूपकत्वस्यज्ञानविशेषणत्वेह्रदत्वविशिष्टेऽभावत्वमात्रप्रकारणवह्न्यभावमेकत्रहृदयमितिर्रीत्याह्रदत्ववह्न्यभावोभयंचावगाहमानस्यसमूहालंबनस्यवारणमशक्यमतोभेदद्वयगर्भता॥ तत्त्वनिरुक्तज्ञानवारणायतद्धर्मावच्छिन्नाभावत्वावच्छिन्नप्रकारतेवनिवेश्तेतिवाच्यं॥ उभयत्रतादृशप्रकारतानिवेशेघटोद्रव्यभि

न्नोमेयत्वादित्यादावेकत्रद्रव्यमितिरीत्याद्रव्यत्वघटितोभयावगाहिज्ञानाव्या[illegible]रूपतोद्रव्यत्वघटितबाधाव्याप्तेः॥ प्रथमतएवतन्निवेशेनत्रैवघटोद्रव्यमितिप्रतिबंधकज्ञानासंग्रहात्॥ भेदानुयोगिविशेष्यतायांनिरूपितत्वांतानुपादानेद्रदोवत्व्यभाववानितिज्ञानासंग्रहः॥ धर्मितावच्छेदकतायाःप्रकारतान्यत्वमतेतज्ज्ञानीयद्रदत्वनिष्ठप्रकारतानिरूपितविशेष्यतायास्तादृशप्रकारतानिरूपितविशेष्यताभिन्नायास्तत्रसत्वात्॥ भेदानुयोगिविशेष्यतायांतादृशप्रकारतानिरूपितविशेष्यतानवच्छेदकत्वमपिदेयंतेनद्रदोजात्यभाववानित्यादौद्रदोजातिमानितिज्ञानेउक्तविशेषणाक्रांतद्रदत्वनिष्ठप्रकारतानिरूपितविशेष्यतानिरूपकत्वसत्वेपिनतदसंग्रहः॥ [illegible]वंभेदानुयोगिविशेष्यतायामुक्तनिरूपितत्वांतोपादानप्रयोजनासंभवःधर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायास्तादृशप्रकारतानिरूपितविशेष्यतावच्छेदकत्वेनेवद्रदोवत्व्यभाववानितिज्ञानसंग्रहादितिशंक्यं॥ तदसंभवेपिसंयोगःसंयोगाभाववानित्यादौनिरुक्तविशेष्यतानिरूपकत्वस्यस्वतंत्रसंयोगइतिज्ञानेऽसत्वेनवक्ष्यमाणस्वभिन्नेत्याद्यव्याप्यवृत्तिविषयिताशून्यसंयोगःसंयोगवानितिज्ञानमादायसंयोगत्वावच्छिन्नेऽतिव्याप्तिवारणायेवभेदानुयोगिविशेष्यतायानिरूपितांतोपादानात्॥ तथासतिसंयोगत्वावच्छिन्नविषयकत्वस्यतादृशविशेष्य

ताशून्यसंयोगइत्यप्रतिबंधकज्ञानसाधारण्येनतदवच्छिन्नेऽतिप्रसंगानकाशात्॥ननुयोगिविशेष्यतायांमुख्यत्वमपिदेयंतेनवह्न्यभाववत्त्वमानकालीनह्रदोवह्निमानित्यादौविशिष्टपक्षेवह्न्यभाववानितिदोषज्ञानेतादृशविशेष्यताभिन्नवह्न्यभावनिष्ठप्रकारतानिरूपितकालविशेषणतापन्नवह्न्यभाववन्निष्ठविशेष्यतासत्वेपिनतदसंग्रहः॥अतएववह्न्यभाववज्जलादिमद्ह्रदत्वेनजलवद्ह्रदविषयकज्ञानेतादृशविशेष्यताभिन्नवह्न्यभावनिष्ठप्रकारतानिरूपितह्रदत्वविशेषणतापन्नजलादिमन्निष्ठविशेष्यतासत्वेपितस्याःमुख्यत्वाभावेननविशिष्टहृयाघटितत्वनिवेशोवैय्यर्थ्यं॥नचैवंनिवेशोऽप्येकत्रहृयमितिरीत्यावह्न्यभाववज्जलादिमद्ह्रदत्वेनजलह्रदत्वोभयावगाहिज्ञानस्यापिसंग्रहात्तत्रचानुमितिप्रतिबंधकत्वविरहेणविशिष्टहृयाघटितत्ववैय्यर्थ्यंदुर्वारमेवेतिवाच्यं॥ह्रदोवह्निमान्जलाभाववद्ह्रदादित्यादौपक्षतावच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यत्वेउक्तज्ञानविषयविशिष्टेऽतिव्याप्तिवारणायतदावश्यकत्वात्॥ह्रदत्वसामानाधिकरण्येनजलाभावस्यहेतुतावच्छेदकघटकत्वान्नविशिष्टांतराघटितत्वेनतद्वारणं॥तद्धर्मावच्छिन्नाभावतद्व्याप्योभयनिवेशनंचबाधसत्प्रतिपक्षयोःसंग्रहाय॥घटोनद्रव्यमित्यादौघटत्वविशिष्टघटत्वेनद्रव्यत्वावगाहिज्ञानवारणंतुयद्रूपावच्छिन्नं

विषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंयद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपकताकत्वविशिष्टयद्रूपावच्छिन्नविषयितात्वंतद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपकताकत्वविशिष्टतद्रूपावच्छिन्नविषयिताशून्यत्वरूपाव्यापकविषयिताशून्यत्वनिवेशेनेतिध्येयं॥ एवमप्यसाधारण्याव्याप्तिर्दुर्वारा एकत्रह्रदेयमितिरीत्याहेतुतावच्छेदकसाध्यव्यापकीभूताभावप्रतियोगित्वेनतदुभयावगाहिज्ञानस्योक्तविशेषणेनावारणादितिचेन्न॥ प्रकृतानुमितौयद्धर्मावच्छिन्नांशेयद्धर्मावच्छिन्नावगाहित्वंनिविष्टंतद्धर्मावच्छिन्नाभावादिनिष्ठप्रकारतानिरूपितनतद्धर्मावच्छिन्नविशेष्यताभिन्नायाहेतुतावच्छेदकानवच्छिन्नहेतुनिष्ठमुख्यविशेष्यनातन्निरूपितसाध्यव्यापकीभूताप्रतियोगित्वप्रकारत्वानिरूपकत्वस्यापिज्ञानविशेषणत्वात्॥ वह्निव्यापकीभूताभावप्रतियोगिसमानकालीनह्रदावच्छिन्नवह्निमानित्यादौवह्न्यभावविशिष्टतादृशविशिष्टपक्षविषयकबाधज्ञानसंग्रहायवह्निव्यापकीभूताभावप्रतियोगीवह्निमानित्यादौवह्न्यभावविशिष्टतादृशविशिष्टपक्षरूपबाधज्ञानसंग्रहायचहेतुतावच्छेदकानवच्छिन्नविशेष्यतायांमुख्यत्वभिन्नांतयोर्निवेशः॥ धर्मितावच्छेदकत्वप्रकारत्वयोर्भेदेनतादृशविशेष्यतानवच्छेदकत्वमपिहेतुतावच्छेदकानवच्छिन्नविशेष्यतायांदेयंअन्यथाभिन्नवह्निव्यापकी-

भूताभावप्रतियोगिकालीनह्रदोवह्निमानित्यादौ[illegible]त्व।वैशिष्टेवह्निव्यापकीभूताभावप्रतियोगित्वावगाहिज्ञानमादायैवजलत्व।वैशिष्ट
ताद्दशा प्रतियोगित्वविशिष्टरूपाश्रयसिद्धौ[illegible]न्वयः॥ताद्दशज्ञानेयद्रूपपदग्राह्यजलत्वताद्दशप्रतियोगित्वोभयावच्छिन्नवि
षयकत्वसत्वादुक्तविशेषणांतरमत्वाच्च॥ननु[illegible]वमपिह्रदोवह्निमान्धूमादित्यादौह्रदवृत्तिवह्न्यभावेऽव्याप्तिः॥एकत्रह्रदमितिरीत्याह्र
दवह्न्यभावत्वोभयावगाहिज्ञानस्योक्तविशेषणेनावारणादितिचेन्न॥प्रकृतानुमितौयद्धर्मावच्छिन्नवैशिष्ट्यावगाहिलिंगनिविष्टआधे
यतासंबंधावच्छिन्नप्रकारतानिरूपितत[illegible]द्धर्मावच्छिन्नाभावत्वावच्छिन्नविशेष्यतान्यायेन[illegible]च्छिन्नाभावत्वादिप्रकारतानिरू
पिताआधेयतासंबंधावच्छिन्नप्रकारतानिरूपितत्वमुख्यविशेष्यतातदनिरूपकत्वापिज्ञानविशेषणत्वात्॥वह्न्यभावोवह्निमानि
त्यादौवह्न्यभावोवह्न्यभाववानितिज्ञानीयवह्न्यभावावच्छिन्नविशेष्यतायाआधेयतासंबंधावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारत्वा
निरूपितत्वेनतज्ज्ञानस्यह्रदवह्न्यभावत्वोभयवत्समानकालीनजलंवह्निमदित्यादिस्थलेवह्न्यभावविशिष्टनिरुक्तपक्षरूपबाधज्ञानस्य
चसंग्रहायद्वितीयविशेष्यतायामाधेयतासंबंधावच्छिन्नप्रकारतानिरूपितत्वमुख्यत्वयोर्निवेशः॥गगनवानित्यादावह्नि[illegible]गगनसंग्रहा

[illegible]मेतोधर्मावच्छिन्नवैशिष्ट्यावगाहित्वंनिविष्टं॥अवृत्तित्वनिष्ठप्रकारतानिरूपितधर्मावच्छिन्नविशेष्यतान्यायाअवृत्तित्वनिष्ठप्रकारतानिरूपितविशेष्यतातदनिरूपकत्वमपिज्ञानेविशेषणंदेयं॥पक्षनिष्ठभेदप्रतियोगिसाध्यवदादेरपिसंग्रहउक्तरीत्यावसेयइत्या[illegible]॥एवमपिघटःप्रमेयभिन्नोऽभिधेयत्वादित्यादौप्रमेयत्वविशिष्टघटादावव्याप्तिःप्रमेयभेदस्यासिद्धेःप्रमेयत्वस्यतदवच्छिन्नाभावरूपत्वासंभवेनैकत्वद्वयमितिरीत्याप्रमेयत्वघटत्वोभयावृत्तिधर्मावच्छिन्नविशेष्यतानिरूपकप्रमूहालंबनस्योक्तविशेषणेनावारणात्॥**नन्वयद्धर्मावच्छिन्नविशेष्यतानिरूपितानुयोगितासंबंधावच्छिन्नयद्धर्मविशिष्टावच्छिन्नप्रकारतानिरूपितभेदत्वावच्छिन्नप्रकारताशालित्वंप्रकृतानुमितिवृत्तितद्धर्मावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यतान्यतद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यत्वानिरूपकत्वमपिज्ञानेविशेषणंदेयं॥**तथाचनोक्तव्याप्तिः॥**एवंघटःप्रमेयत्वाभाववानित्यादिस्थलीयबाधाव्याप्तिवारणायद्धर्मविशिष्टावच्छिन्नप्रकारतानिरूपितभेदत्वावच्छिन्नप्रकारतास्थलेयद्धर्मावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्न[illegible]तांनिवेश्योक्तविशेषणांतरमपिदेयमितिनव्याः॥तथापिशैवालवद्भ्रदोवह्निमानित्यादौह्रदत्वविशिष्टेएकत्रद्वयमितिरीत्याशैवालवत्त्वाभावोभयावगाह्यप्रतिबं

धकज्ञानाभावारणात्॥ नचयद्धर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितयद्धर्मावच्छिन्न[illegible]लत्वंप्रकृतानुमितौवर्तते तद्धर्मावच्छिन्नाभावादिनिष्ठप्रकारतानिरूपिततद्धर्मपर्याप्तावच्छेदकताकविशेष्यताभिन्नत्वंविवक्षणीयमतोनोक्तदोषइतिवाच्यं॥ कांचनमयद्रव्योवह्निमान्धूमादित्यादौ [illegible]देनवह्न्यभाववद्रूपबाधाव्याप्तेःप्रसंगात्॥ तत्रबाध बुद्धेर्विशिष्टद्रव्यावच्छिन्नविशेष्यकत्वाभावात्॥ नचप्रकृतानुमितौयद्यद्धर्मावच्छिन्नांशेयद्यद्धर्मावच्छिन्नवैशिष्ट्यावगाहितानिष्ठातत्तद्धर्मावच्छिन्नाभावादिनिष्ठप्रकारतानिरूपिततत्तद्धर्मावच्छिन्नविशेष्यतान्यतत्तद्धर्मावच्छिन्नाभावादिनिष्ठप्रकारतानिरूपितातत्तद्धर्मा[illegible]रतानिरूपिताचयायाविशेष्यताप्रत्येकंतत्तन्निरूपकत्वाभावकूटवत्त्वंनिवेशनीयं॥ एवंचोक्त[illegible]रतानिरूपितशैवालावच्छिन्नविशेष्यतान्योक्ताभावादिप्रकारतानिरूपितायाशैवालनिष्ठप्रकारतानिरूपितविशेष्यतातन्निरूपकत्वान्नतदादायाव्याप्तिः॥ नवाकांचनमयद्रव्योवह्निमानित्यादौशुद्धद्रव्यत्वावच्छेदेनवह्न्यभाववद्द्रव्यरूपबाधाव्याप्तिस्तज्ज्ञानस्यकांचनमयत्वावच्छिन्नोक्तविशेष्यतान्यकांचनमयत्वनिष्ठप्रकारतानिरूपितविशेष्यताशून्यत्वादिति वाच्यं॥ एवमपियत्रकालिकसंबंधेनजलत्वंसमवायेनचज

लंपक्षतावच्छेदकंतत्रजलत्ववान्जलवान्वह्निमानित्यादिस्थलेसंबंधव्यत्ययेनतदुभयधर्मावच्छिन्नविषयकनिश्चयस्यप्रतिबं
धकस्योक्तविशेषणेनावारणात्तत्रत्यबाधाव्याप्तिर्दुर्वारा॥ननुचयद्रूपविशिष्टयद्रूपावच्छिन्नवैशेष्यावगाहित्वंनिविष्टमितिसं
बंधेनयद्रूपावशिष्टयद्रूपावच्छिन्नवैशिष्ट्यावगाहितानिविष्टातत्संबंधावच्छिन्नतद्रूपानष्ठावच्छेदकताकविशेष्यतानिरूपितेत्यादि
कंविवक्षितमितिनैषदोषइतिवाच्यं॥एवमपिजलत्ववान्जलवान्वह्निमान्कालिकसंबंधेनजलवद्वह्निमज्जलादित्यादौकालिक
संबंधेनजलवज्जलंवह्न्यभाववदितिनिश्चयस्यापियद्रूपपदेनोद्देश्यतावच्छेदकतासंबंधेनाभाववज्जलवज्जलत्वावच्छिन्नविषयताकस्योक्तविशे
षणाक्रांतस्यानुमित्यप्रतिबंधकतयाव्याप्तेःसत्वात्॥षत्संबंधावच्छिन्नयद्रूपनिरूपितोद्देश्यतावच्छेदकताकविषयतानिरूपितविषयितात्वंय
द्रूपावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यादिरीत्याऽव्यापकविषयिताशून्यत्वनिर्वचनेनसंबंधव्य
त्ययेनपूर्वोक्तज्ञानवारणेलसंभवापत्तिः॥संबंधांतरेणवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयताकलसमानाधिकरणाभावप्रतियोगिताव
च्छेदकत्वस्यसमवायस्वरूपाभ्यांह्रदत्ववह्न्यभावाभ्यामवच्छिन्नविषयतानिरूपितविषयितात्वसाधारण्यात्॥यद्रूपावच्छिन्नविषय

कत्वसमानाधिकरणेत्यादौ यत्संबंधावच्छिन्नयद्रूपनिष्ठावच्छेदकताकविषयतानिरूपितविषयित्वरूपयद्रूपावच्छिन्नविषयकत्व
विवक्षणेपि यत्संबंधपदेन समवायपरिग्रहेयद्रूपपदेनद्रव्यत्वाभावोभयपरिग्रहे च तत्संबंधावच्छिन्ननदुभयनिष्ठ[illegible]ताक
विषयताशालिज्ञानेस्वरूपसंबंधावच्छिन्नवल्यभावनिष्ठावच्छेदकताकविषयतानिरूपितविषयिताशून्यत्वसत्वेनप्रसिद्धबाधज्ञा
नेनाद्रव्यविषयित्वाभावासत्वेनाव्याप्तेर्दुर्वारत्वाद्देवंयत्संबंधपदेनस्वरूपसंबंधपरिग्रहेदूषणमुन्नेयं॥परेतु एकद्रव्यमतिरीत्य
धर्मिनावच्छेदकव्यत्ययेनसंबंधव्यत्ययेनचज्ञानान्यादायनिरुक्तसकलदोषवारणाययद्रूपावच्छिन्नविषयतानिरूपितविषयि
तायांप्रकृतानुमितिप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वमेवविशेषणंदेयं॥नचैवमव्यापकविषयिताशून्यत्वनिवे
शानर्थक्यंवल्यभावज्ञानिमत्वावच्छिन्नविषयितायाःप्रकृतानुमितिप्रतिबंधकतानवच्छेदकत्वादेवजातिमान्वल्यभाववानित्या
दिज्ञानमादायदोषानद्काशादिनिवार्यं॥कपालंद्रव्यसामान्याभाववदित्यादौजातिमद्वच्छेदेनद्रव्यवत्तानिश्चयविशिष्ट
स्यकपालंजातिमद्वदितिनिश्चयस्यानुमितिविरोधितयातद्वच्छेदकजातिमद्विशिष्टकपाल[illegible]वच्छिन्नविषयितामा-

दोषवारणायैवाव्यापकविषयितानिवृत्यवश्यकत्वात्॥ अत एवनैकदेशानिष्यापिरेवंचाननिरुक्तवृत्तित्वरूपावच्छेदकत्वनिवे
शानंप्रयोजनं यत्वविशिष्टवह्नेर्नित्याग्निवारणायैवसार्थकमितिनवीनमतमपि॥ व्यभिचारघटितपदार्थांतरेऽनित्याग्निस्तद्वि
शेषकत्वस्यापिप्रतिबंधकतानिरुक्तवृत्तित्वादित्यग्रिमग्रंथविरोधात्॥ व्यभिचारविशिष्टमेयत्वविषयितायांस्वरूपसंबंधरू
पप्रतिबंधकतावच्छेदकत्वविरहात्॥ नच प्रमेयत्वंधूमवह्नेरित्यादावाधेयतयाधूमाभाववद्वृत्तिवह्निमानूधूमाभाववानितिनिश्च
यविशिष्टस्याधेयतयाधूमाभाववद्वृत्तेर्वह्निमत्प्रमेयत्वमितिज्ञानस्यापिप्रमेयत्वधर्मिकधूमानुमितिविरोधितयातादृश्यांधूमाभाववद्
वृत्तिवह्निरूपव्यभिचारविशिष्टप्रमेयत्वविषयितायाअप्यनुमितिप्रतिबंधकतावच्छेदकतयाग्रिमग्रंथविरोधइतिवाच्यं॥ तथापिवि
शिष्टदोषघटकतदेकदेशविषयितायांस्वरूपसंबंधरूपावच्छेदकत्वसत्वेपिविशिष्टविषयितासामान्यस्यतादृशावच्छे
दकत्वविवक्षयाऽनिष्प्रसंगवारणसंभवान्नदेवकथंननिवेशितमितिग्रंथविरोधोदुष्परिहारः॥ यद्रूपावच्छिन्नविषयतानिरू
पितविषयितायांस्वरूपसंबंधरूपावच्छेदकत्वविवक्षणेतादृशविषयितासामान्येस्वरूपसंबंधरूपरूपावच्छेदकत्वावश्यकत्वादित्य

दिपूर्वपक्षसमाधानतत्खंडनकोलाहलोनिरवकाशएव॥यच्चैवंसतिजातित्वादिनाद्रव्यत्वावगाहिज्ञानस्याप्युक्तरीत्यावयवभा
ववद्द्रव्यरूपविशिष्टविशेषितविषयिताकत्वविरहेणैवासंग्रहादथेत्यादिनातादृशज्ञानस्यविशिष्टद्रव्यविषयकस्यानुमित्यप्रतिबंधक
तयाऽसंभवमाशंक्यज्ञानेऽव्यापकविषयिताशून्यत्वनिवेशपरग्रंथोऽसंगतएवेतिशंकासंभवति॥तथाहितादृशग्रंथःप्रमादेनकेन-
चिल्लिखितइतिकल्पनान्नदोषःस्पष्टंचैतत्प्रकृतपक्षकादौ॥[redacted]द्रव्यत्वादिनावयवभावविशिष्टद्रव्यादिविषयकज्ञानेवयव्य
भावविशिष्टद्रव्यत्वावच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्वेनेतिग्रंथःसंग[redacted]लक्षण्यस्यनि[redacted]वावच्छि
त्वादितिदिक्॥यत्संबंधावच्छिन्नेति॥अथधूमत्ववान्पर्वतोवह्निमान्धूमादित्याद्यौस्वरूपसंबंधावच्छिन्नधूमत्वाभावनिष्ठप्रक
रतानिरूपकत्वेनधूमत्वाभाववान्पर्वतइतिज्ञानस्यानुमितिप्रतिबंधकतयास्वरूपसंबंधेनधूमत्वाभाववत्यधूमेऽसत्वेननोक्तरूपस्यदुष्ट
ताव्यवहारनियामकत्वंसंभवति॥नचधूमत्ववान्पर्वतइतिज्ञानंप्रतिधूमत्वेसमवायावच्छिन्नपर्वतनिरूपिताधेयत्वाभाव[redacted]
स्यप्रतिबंधकतयास्वरूपसंबंधेनतादृशाधेयत्वाभावमादायैवदर्शितस्थलेधूमेदुष्टत्वव्यवहारउपपादनीयइतिवाच्यं॥एवमपि

रूपत्ववान्पर्वतोवह्निमान्रूपादिसाधवगतेः॥रूपेस्वरूपसंबंधेनरूपत्वाभाववत्त्वस्यपर्वतनिरूपितसमवायावच्छिन्नाधेयत्वाभावस्यचा
सत्वादितिचेन्न॥योयत्रहेत्वाभावस्तद्व्याप्यःपक्षवृत्तिरितिज्ञानस्याप्यनुमितिप्रतिबंधकतयारूपत्वाभावादिव्याप्यःपर्वतादि वृत्तिरि
तिज्ञानविषयपर्वतादिवृत्तित्वमादायेवदुष्टत्वव्यवहारस्योपपादनीयत्वात्॥यद्यप्येवंवह्न्यभावव्याप्यःपर्वतवृत्तिरितिपक्षविशेषणक
त्रमादायाप्यतिव्याप्तिःसंभवति॥तथापितादृशबाधत्रमादायातिव्याप्तिर्नसंभवतीत्यणुरपिविशेषइतिन्यायेनविशेषसंभवाय
पक्षविशेष्यकेत्युक्तिरितिज्ञेयं॥पर्वतमहानसान्यतरत्वादिरूपेति॥यत्सर्वतेवह्निरस्तितत्सर्वतमहानसान्यतरत्वादिरूपेत्य-
र्थस्तेनसकलपर्वतेषुवह्न्यसत्वेपिनक्षतिः॥नन्वपर्वतत्वमात्रस्यपक्षतावच्छेदकत्वेप्रकृतहेतोरदुष्टत्वनिर्वाहायतावच्छेदक
सामानाधिकरण्येनसाध्यसिद्धेरुद्देश्यतावाच्या एवंचानुमितिविरोधिनोबाधनिश्चयस्यपक्षतावच्छेदकव्यापकाधिकरणतानिरूपि
ताधेयतासंबंधावगाहित्वनियमान्तेनसंबंधेनपर्वतस्यतत्सर्वतमहानसान्यतरत्वादौसत्वंदुर्घटमितिवाच्यं॥यत्सर्वतस्यहेतुशरीरेनि
वेशस्तस्यैवविशिष्यपक्षत्वानुसरणात्॥सद्धेताविति॥अत्रसत्प्रतिपक्षशंकाव्युदासाय॥असद्धेतौप्रत्येकंसाध्याभावादौदोषव्यव

हारविरहेपिहेतोर्दुष्टत्वव्यवहारस्येष्टत्वात्॥ **भ्रमपदंनिश्चयसामान्यपरमिति**॥यद्यपिबाधितपक्षकदुष्टहेतावप्यनुमितिप्रतिबंधक-
साध्याभावत्वेनगगनाभाववत्ताभ्रमविषयगगनाभाववत्वमादायदुष्टत्वव्यवहारोपपत्तौभ्रमपदस्यनिश्चयसामान्यपरत्वाभावेपिनक्षं
निस्तथापिसर्वत्रदुष्टहेतौसाध्याभाववत्तानिश्चयस्यनियमेनभ्रमत्वमित्यत्रप्रमाणाभावादसंगतिवारणायोक्तविवक्षाआवश्यकी॥य
दिच्चपक्षविशेष्यकभ्रमविषयसाध्याभावादावितिपाठस्तदायथाश्रुतमेवसाधु॥आदिपदेनैवभ्रमाविषयसाध्याभावसंग्रहसंभवात
॥ननुचतर्हितादृशज्ञानविषयइत्येववक्तुमुचितमितिभ्रमपदंव्यर्थमितिवाच्यं॥यत्सदस्यतादृशविशिष्टपरत्वेपिसद्धेतौबाधादिनिश्चय
विषयीभूतविशिष्टमादायानिव्याप्तिनिरासइतिशंकानिरासार्थंभ्रमत्वेनतदुपादानात्॥ **तथाचविशिष्टविषयकज्ञानस्यभ्रमत्वकथने**
नविशिष्टाप्रसिद्धिज्ञापनाच्छंकानिरासः॥ **अयमेवानिष्प्रसंगोदुर्वारइति**॥ननुस्वरूपसंबंधरूपावच्छेदकत्वनिवेशकल्पेप्रमेय
त्वविशिष्टव्यभिचारविषयितायाअपिव्यभिचारविषयितात्वेनतादृशावच्छेदकत्ववत्वेनतद्विशिष्टवत्त्वभावोवक्ष्यमाणोदो
षवत्त्वभाववद्वृत्त्यभाववद्वृत्त्यभावेचानिव्याप्तिवारकतयाविशिष्टांतराघटितत्वविशेषणस्यावश्यकतयानातिरिक्तवृत्ति

त्वरूपावच्छेदकत्वनिवेशकल्पेतादृशविशेषणनिरसनीयातिप्रसंगव्यवच्छेदकत्वमेवकारस्यसंभवतीतिचेन्न॥एवकारस्यदुर्वारपदो
त्तरंयोजनीयत्वान्नथाचायमतिप्रसंगोदुर्वारएवेत्यर्थइतिनदोषः॥तादृशातिप्रसंगवारणाइति॥यद्यपिसाक्षात्प्रतिबंधकविशेष
णंप्रतिबंधकतावच्छेदकंतद्विशेषणंतुप्रतिबंधकतावच्छेदकतावच्छेदकमितिमतेनिश्चयत्वानाहार्यत्ववह्न्यभावादिविषयकत्व
घटितसमुदायस्यापिप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणतयानेतावताऽतिप्रसंगोवारयितुंशक्यतेऽसंभवश्चदुर्घटः॥विशिष्ट
विषयिताघटितसमुदायस्यापितथात्वात्॥तथाप्यवच्छेदकके।टप्रविष्टंसर्वमपिविशेषणविशेष्यभावापन्नंप्रतिबंधकतावच्छेद
कमितिमतमाश्रित्यवह्नावच्छिन्नविषयकत्वसंशयान्यत्वानाहार्यत्वाप्रामाण्यज्ञानानास्कंदितत्वघटितस्तोमत्वंप्रतिबंधकताऽ
वच्छेदकतापर्याप्तावच्छेदकमितिविवक्षयानवह्न्यभावादावतिप्रसंगः॥नन्वसंभवासंभवः॥वह्नित्वावच्छिन्नवह्निनिष्ठविषयतानिरू-
पितात्वावच्छिन्नाभावनिष्ठविषयतानिरूपितह्रदत्वावच्छिन्नह्रदनिष्ठविषयतानिरूपितविषयितारूपवह्न्यभावविशिष्टह्रदादिरूप
दोषविषयकत्वस्यप्रतिबंधकतावच्छेदककोट्यप्रविष्टनिष्ठत्वघटिततयानदूटितनिरुक्तस्तोमत्वस्यप्रतिबंधकतावच्छेदकतापर्याप्त्य

नवच्छेदकत्वात्॥तदेवोपपादयति **वह्न्यभावत्वादिना** यटादीति॥विशेषणतयावह्न्यादिनिष्ठत्वस्यावच्छेदककोटावप्रवेशे-
हेतुत्वात्साधारण्येनेति॥**अनाहार्याप्रामाण्यज्ञानानारूढदितनिश्चयपरमिति**॥अत्रचानाहार्यत्वमव्यवहितोत्तरक्षणावच्छिन्न
सामानाधिकरण्यसंबंधेनेच्छावदन्यत्वं॥यादृशदोषविषयकनिश्चयत्वावच्छिन्नज्ञानाधिकरणेच्छाव्यवहितोत्तरवृत्तिर्यादृशदोष-
स्यप्रामाणिकत्वेजन्यतासंबंधेनेच्छावदन्यत्वमेवतत्॥आहार्यज्ञानेइच्छायाहेतुत्वोपगमान्नतस्यतथात्वंसिद्धिकालीनानुमितावि-
च्छायानहेतुत्वंकिंतुसिद्धिप्रतिबंधकतायामुत्तेजकत्वमेव॥**अप्रामाण्यज्ञानानारूढदितत्वंच** विषयत्वसामानाधिकरण्यकालिके
नत्रितयसंबंधेनज्ञानविशिष्टान्यत्वं॥**नचैवंसति**सर्वज्ञानंगुणभिन्नंमेयत्वादित्यादौगुणभिन्नसर्वज्ञानत्वावच्छिन्नात्मकबाधाद्या
वद्व्याप्तिस्तत्रबाधादिज्ञानमात्रस्योक्तत्रितयसंबंधेनस्वात्मकज्ञानविशिष्टत्वात्॥संबंधकोटौस्वभिन्नत्वस्यापिनिवेशःप्रामाण्यग्र
हात्मकाप्रामाण्यज्ञानानारूढदितदोषज्ञानाद्यावृत्तेरितिचान्यं॥सर्वज्ञानत्वेनस्वभिन्नज्ञानमात्रावगाहिताद्दशबाधनिश्चयमादायैवल्ल
क्षणसमन्वयसंभवात्॥अव्यापकविषयिताशून्यत्वविशेषणेनाप्रामाण्यग्रहात्मकनिरुक्तबाधयहवारणसंभवात्स्वभिन्नत्वस्यसंबंधके

योनिवेशोपिक्षतिविरहाच्च॥ **केचित्तु** अप्रामाण्यंभ्र[illegible]त्वाभावरूपमीश्वरज्ञानावृत्तिभिन्नत्वेनानुगमय्यविषयत्वसामानाधिकरण्योभयसंबंधेनतादृशानुगताप्रामाण्यप्रकारकज्ञानविशिष्टान्यत्वमेवाप्रामाण्यज्ञानानास्कंदितत्वं॥ **नचैवं** सर्वजन्यज्ञानमीश्वरज्ञानवृत्तीत्यादौसर्वंतदीश्वरज्ञानवृत्तिभिन्नमितिधीविषयबाधादव्याप्तिस्तादृशबाध[illegible]क्योभयसंबंधेनस्वात्मकतादृशज्ञानविशिष्टत्वादितिवाच्यं॥ सर्वजन्यज्ञानत्वेनस्वविषयकबाधधीमादायैवलक्षणसमन्वयसंभवादितिवदंति॥ **निश्चयत्वंच** प्रकारीभूतावच्छिन्नप्रकारिताशून्यत्वं॥ सप्रतिपक्षग्रंथेसंशयीयप्रतियोगितदभावप्रकारितयोरवच्छेद्यावच्छेदकभावस्वीकारात्॥ **नचैव** मपिकोटिद्वयविशेष्यकसंशयव्यावृत्तिरशक्येतिशंक्यं॥ कोटिद्वयप्रकारितयोरिवकोटिद्वयविशेषितयोरपितुल्यतयावच्छेद्यावच्छेदकभावस्वीकाराद्विशेषितावच्छिन्नविशेषितशून्यत्वस्यापिनिवेशात्॥ पक्षतात्रंथोक्तत्रितयसंबंधेनविषयितविशिष्टविषयितशून्यत्वंवानिश्चयत्वं॥ **तेन** हृदेवह्निर्नास्तिहृदोवह्निमानितिसंशयस्यसामान्याभावव्यवस्थापनादावुक्तलेपि **नक्षतिः**॥ **वस्तुतस्तु** कोटितात्यविलक्षणविषयिताशून्यत्वमेवनिश्चयत्वं॥ कोटितायांवैलक्षण्यंचाखंडोपाधिरूपमेव॥ **नव्यास्तु** स्वावच्छेदकाभावप्रतियोग्यनुपहित

त्वमेवाप्रामाण्यज्ञानाभावादिविशिष्टत्वं॥ स्वं अनुमितिप्रतिबंधकता॥उपहितत्वंचैकक्षणावच्छिन्नैकात्मवृत्तित्वसंबंधेननादृशसंबंधावच्छिन्न
प्रतियोगिताकनादृशप्रतियोग्यभाववत्त्वमेवानुपहितत्वं॥ नन्वेवंस्वरूपसंबंधरूपावच्छेदकत्वनिवेशोवक्ष्यमाणअन्योन्याश्रयतादिरनाहार्यत्वस्य
निरुक्तरूपेणनिवेशेउभयमतेसाम्यादितिवाच्यं॥स्वरूपसंबंधरूपावच्छेदकत्वनिवेशइच्छाजन्यान्यत्वरूपमेवानाहार्यत्वंनिवेश्यतेनतूक्तगुरु
संबंधघटितमित्यभिप्रायेणशंकासंगतेः॥ननुनच्छून्यावृत्तित्वमिति॥अस्मिन्पक्षेअभाववदृत्तित्वमभावश्चतृतीयार्थः॥तत्रप्रथमेऽभावेऽनुयो
गितासंबंधेनप्रतिबंधकत्वान्वयः॥द्वितीयेतदभाववदृत्तित्वस्यान्वयस्तस्यप्रकृत्यर्थेऽन्वयः॥प्रत्ययार्थप्राधान्यप्रथमांतमुख्यविशेष्यकत्वयोरनुभवसिद्ध
त्वेनूक्तरीत्यालब्धेप्रतिबंधकताशून्यावृत्तित्वरूपतृतीयार्थेप्रकृत्यर्थस्याधेयतयाऽन्वयः॥प्रकृत्यर्थान्वितनृतीयार्थस्यनिरूपकतासंबंधेनप्रतिबंधकतायांतस्य
दृधान्वयस्यचुप्रतिसिद्धत्वात्॥स्वव्यापकतत्कत्वरूपानतिरिक्तवृत्तितापक्षेसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमभावश्चतृतीयार्थस्तत्रसामानाधिक
रण्यप्रकृत्यर्थस्यनिरूपितत्वसंबंधेनान्वयःप्रकृत्यर्थान्वितसामानाधिकरण्यघटितोक्तप्रतियोगितावच्छेदकत्वस्यानुयोगितयाभावेनादृशाभावस्याश्रयतयाप्रति
बंधकतायामन्वयः॥ नन्वेवमनतिरिक्तवृत्तितायान्तृतीयार्थत्वाभावादसंगतिरितिवाच्यं॥अवच्छेदकतायाअनतिरिक्तवृत्तिनारूप्यत्वकथनेऽवच्छेद्यतायां

व्यापकत्वरूपलाभेननस्याएवतृतीयार्थत्वेनासर्यात्सामानाधिकरण्यांशस्यतृतीयाबोध्यत्वकल्पनेगौरवात्॥**यदिचा**नतिरिक्तवृत्तित्वस्यतृतीयार्थत्वेआ
श्रयतासंबंधनप्रकृत्यर्थत्वंस्वीक्रियतेतदुपपादनीयमन्यदुक्तदिशावधेयं॥**दुर्घटत्वादि**निविशेष्यवृत्तेर्विशिष्टानुयोगिकाभावा
नभ्युपगमादितिभावः॥यद्रूपावच्छिन्नाधिकरण्यतानिरूपकतासंबंधनिरूपितनिष्ठप्रतियोगित

द्यतामाभाव्येत्युक्तौ चगौरवं॥ **अविरोधितयेति**॥निरवच्छिन्नह्रदत्वनिष्ठावच्छेदकताकविशेष्यताकवह्न्यादिमत्ताज्ञानंप्रतिनिरवच्छिन्नह्रदत्वनिष्ठावच्छेदकताकविशेष्यताकवह्न्याद्यभाववत्तानिश्चयस्यैवप्रतिबंधकत्वादितिभावः॥ **ननु**निरवच्छिन्नपक्षतावच्छेदककुण्डलीयदोषलक्षणएवपक्षतावच्छेदकांशेऽन्याप्रकारकत्वंज्ञानविशेषणंदेयमत**आहाविशेषितेति**॥ **असंग्रहेणेति**॥ह्रदोवह्निमान्ह्रदत्वादित्यादिस्थलीयवह्न्यभाववद्ह्रदनिष्ठह्रदत्वादिरूपदोषासंग्रहेणेत्यर्थः॥ **तद्घटकाप्रसिद्ध्येति**॥व्यासज्यवृत्तिधर्मनिरूपकबोधेतदाश्रययावद्धर्मिभाननियमात्स्वविषयकप्रतीतिवृत्तितादृग्बाधादिविषयिताकपदार्थाप्रसिद्धिरितिभावः॥ **अतएव**प्रमेयंगगनवदितिस्थलपरित्यागः॥तत्रप्रमेयत्वेनयत्किंचित्प्रमेयावगाहिबाधनिश्चयस्यघटाद्यधिकरणसंभवाद्घटकाप्रसिद्धेरभावात्॥ **यद्यपि**ह्रदोवह्निमान्धूमादित्यादौयत्किंचिद्ह्रदावगाहिनोबाधनिश्चयस्यान्यह्रदविषयकस्यसंभवात्तद्घटकतयातद्विषयकदोषज्ञानाप्रसिद्ध्याऽव्याप्तिःसंभवति॥ **तथापि**वह्न्यभाववद्ह्रदत्वादिनावह्न्यभावमात्रावगाहिभ्रमसत्वेनमादायेवलक्षणसमन्वयःसंभवति॥ **यद्वा**स्वविषयकप्रतीतिवृत्तियद्रूपावच्छिन्नयद्रूपव्यापकविषयतानिरूपितविषयिताकत्वरूपाघट

कत्वनिवेशेनतत्तद्घटादीनामघटकत्वमित्यभिप्रायेणसानोक्ता॥एतेनध्वंसज्यद्वत्तीत्यादिपूर्वोक्तनियमानभ्युपगमेसर्वत्वेनयत्किं
चित्पदार्थावगाहिबाधनिश्चयस्यघटाद्यविषयकत्वसंभवेऽपिस्थलेऽघटकाप्रसिद्धिरितिशंकानवकाशः॥तादृशप्रतीतिसं
भवेपिसर्वत्रव्यापकविषयताकत्वस्यतादृशप्रतीतित्वाभावेनाघटकाप्रसिद्धेःसत्वात्॥नचैवमपितत्तद्घटीनांनिरुक्ताघटक
त्वसत्त्वात्तत्तदविषयकस्यबाधनिश्चयस्याप्रसिध्याद्घटोवह्निमानित्यादौबाधाव्याप्तेर्दुर्वारतेतिवाच्यं॥स्वपर्याप्तस्वच्छेदकधर्मविशि
ष्टाधिकरणंयत्स्वनिरूपितप्रकारतानिरूपितविशेष्यतासमानाधिकरणंतन्निष्ठाभावप्रतियोगित्वस्वनिरूपितत्वेनद्वयसंबंधेनाव
च्छेदकताविशिष्टविषयत्वानिरूपकत्वस्यस्वाविषयकप्रतीतौनिवेशनीयत्वाद्घटत्वंतरविषयकप्रतीतौनादृश्याःवह्नित्वनिष्ठावच्छे
दकताविशिष्टवह्न्यंतरनिष्ठविषयतायाःसत्वेनस्वपदेनतत्तद्घटैरुपादानायोगेननत्तद्घटैरघटकत्वासंभवात्॥भूतलंघटाभाववदि
त्यादौघटत्वावच्छिन्नप्रकारतायास्तादृशविशेष्यतासमानाधिकरणपटनिष्ठाभावप्रतियोगित्वस्वनिरूपितत्वोभयसंबंधेनघटत्वनि
ष्ठावच्छेदकताविशिष्टनयातादृशप्रकारत्वानिरूपकदोषविषयकप्रतीतेरप्रसिध्याःघटकाप्रसिध्याघटवद्भूतलादिरूपबाधाव्याप्तिर

तो प्रथमसंबंधेऽधिकरणांतं॥ घटवद्भूतलमिति प्रतीतिस्तादृशभूतलाद्वृत्तिघटनिष्ठाभावप्रतियोगित्वसंबंधेनघटत्वनिष्ठावच्छेदकता
विशिष्टघटत्वावच्छिन्नप्रकारत्वनिरूपकत्वाभावेनतद्दोषतादवस्थ्यमनोन्मानाधिकरणांतं॥ यटत्वेनभूतलाद्वृत्तिघटप्रकारकभ्रमो-
त्पत्त्यैवत्वन्मायकल्पनाश्चनकाचिदपिक्षतिः॥ यद्यद्रूपावच्छिन्नम्ययस्ययस्यतादृशविशिष्टघटकनेति॥ यद्यन्निष्ठतादृशविशि
ष्टघटकतावच्छेदकंयद्यद्रूपंतन्नदवच्छिन्नतत्तन्निष्ठविषयतानिरूपकंकिंचिदवच्छिन्नविषयताशून्यत्वंज्ञानेविशेषणंपर्यवसितं॥ वस्तु
भावयद्भदरूपविशिष्टशरीरेद्भदत्वस्यरूपत्वेघटकतादृटकतावच्छेदकावच्छिन्नविषयतानिरूपकद्भदत्वनिष्ठनिरवच्छिन्नविष
यताशून्यत्वस्यतादृशविशिष्टरूपबाधज्ञानेऽसत्वानादृशबाधेऽव्याप्तिरतोकिंचिदवच्छिन्नेति॥ नन्वविषयतायांतत्तन्निष्ठत्वंव्यर्थ-
मितिशंक्यं॥ नदनुपादानेजातिवह्नित्वकालीनद्रोहवह्निभावध्वंसादित्वादोजातिमत्त्वभावयोर्नितिज्ञानवारणासंभवात्॥ नदुपादा
नेतुजातित्वावच्छिन्नवह्नित्वस्यतादृशविशिष्टघटकत्वेपिजातित्वावच्छिन्नवह्निनिष्ठविषयतानिरूपकद्भदत्वनिष्ठजातित्वावच्छिन्न
विषयशून्यत्वस्यतादृशज्ञानेऽसत्वानिवारणसंभवात्॥ यद्यपिस्वनिष्ठयद्रूपावच्छिन्नविषयतानिरूपितविषयिताशून्यप्रतीत्यनुमिता

दृश्यविशिष्टविषयितासामान्यकत्वंयद्रूपावच्छिन्नंयन्निष्ठंतादृशविशिष्टघटकत्वमितिविवक्षणेद्रोवह्निमानित्यादौवह्नित्वावच्छिन्नतत्तद्व्यक्तिनिष्ठविषयतानिरूपितविषयिताशून्यत्वस्यतरावगाहिबाधनिश्चयसंभवाद्वह्नित्वावच्छिन्नतत्तद्व्यक्तेर्नबाधघटकतेतिवह्नित्वावच्छिन्नतत्तद्व्यक्तिनिष्ठविषयतायास्तत्तद्रूपावच्छिन्नविषयताभिन्नतयातच्छून्यत्वस्यबाधनिश्चयेऽभावाद्व्याप्तिस्तथापितादृशविशिष्टावच्छिन्नभेदीयप्रतियोगितायांयद्रूपावच्छिन्नयन्निष्ठावच्छेदकतानिरूपकत्वंतेनरूपेणतस्यतादृशविशिष्टघटकत्वमितिविवक्षितमवच्छेदककोटिप्रविष्टानामप्यवच्छेदकत्वस्वीकारात्॥नहिद्रोवह्निमानित्यादौवह्नित्वेनकस्यापिवह्नेरीदृशघटकत्वंनास्तीतिशक्यतेवक्तुं॥यद्वातन्निष्ठयद्रूपावच्छिन्नेत्यादिरूपमेवघटकत्वंवह्नित्वेननत्तद्व्यक्तेर्घटकतानिर्वाहायघटकताघटकज्ञानेपूर्वोक्तावच्छेदकताविशिष्टविषयत्वानिरूपकत्वंदेयमितिविभावनीयं॥तज्ज्ञानव्यावृत्तिरिति॥जातिमान्त्वत्यभाववानितिचानव्यावृत्तिरित्यर्थः॥अथैवमपिद्रोजात्यभाववानित्यादौजातित्वादिनाद्रव्यत्वावगाहिजातिमज्जातिमानितिज्ञानस्यकथंव्यावृत्तिः॥जातित्वावच्छिन्नविषयिताया जातिमत्त्वावच्छिन्नविषयिताया श्चजातिमद्द्रव्यरूपविशिष्टविषयकत्वाव्यापकत्वाभावात्॥जातिमज्जातिमत्त्वावच्छि

न्निष्ठविषयिताया अव्यापकत्वोक्तिरपि न साधीयसी॥ जातिमज्जातिमत्त्वमित्यनेनातिरिक्तालाभात्तादृशज्ञानीयविषयितायां तदवच्छिन्नत्वाक्षतेः॥ नत्वेकस्यद्विरूपाहानमात्रेणवस्तुभिद्यते॥ नच जातिधर्मितावच्छेदकतापन्नजातिनिरूपकताकविषयिताश्रये जातिमानितिज्ञानेनवर्ततेवर्ततेचजातिमाञ्जातिमानितिज्ञानइतिनव्यावृत्तिरितिवाच्यं॥ यद्रूपावच्छिन्नविषयितात्वमित्यत्रयद्रूपपदेन जातित्वमात्रपरिग्रहेतद्व्यावर्तनात्॥ जातित्वविशिष्टधर्मितावच्छेदकतापन्नजातिपरिग्रहे आपन्नांतस्याव्यावर्तकतया तज्ज्ञानाव्यावृत्तेश्च॥ नचयद्रूपावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकत्वावच्छिन्नयद्रूपनिष्ठनिरूपकताकविषयितात्वंफलतोयद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपावच्छिन्नावच्छेदकताकविशेष्यतानिरूपितविषयितात्वंनादृशाभावप्रतियोगितावच्छेदकमितिविवक्षितंजातिमाञ्जातिमानितिज्ञानेजातित्वावच्छिन्नप्रकारतानिरूपितजातित्वावच्छिन्नावच्छेदकताकविशेष्यतानिरूपितविषयितासत्त्वेनजातिमान्नदृइतिज्ञानेचतादृशविषयित्वासत्त्वेनोक्तज्ञानव्यावृत्तिरितिवाच्यं॥ तथापिघटःपृथिवी भिन्नोभेयत्वादित्यादौजातिमत्पृथिवीत्वप्रतिबंधकज्ञानाव्यावृत्तेः॥ जातिविशिष्टेस्वरूपतएवपृथिवीत्वभानात्॥ नच यन्निष्ठप्रकारतानिरूपि

नस्यादिकमेणनिवेशान्नदोषइतिवाच्यं॥जात्यवच्छेदेनद्रव्यभेदसाधनेजानिमान्जातिमानितिज्ञानवारणायद्रव्यावच्छिन्नेतस्यावयकत्वात्॥अत्रकेचित्॥जानिमान्द्रव्यइतिज्ञानंजातिमज्जातिमद्विषयकत्वंनास्तीतिप्रतीतेःप्रमात्वनिर्वाहायजानिमद्द्रव्यविषयकत्वंनास्तीतिप्रतीतेरप्रमात्वनिर्वाहायचनत्वनोक्तविषयाभावयोर्भेदोवाच्यः॥अभावभेदश्चप्रतियोगितावच्छेदकभेदादवनिर्वहतिविषयितानिष्ठप्रतियोगितायांनिरूपितत्वसंबंधेनद्रव्यत्वावच्छेदकस्यजानिमत्त्वउभयत्रावशिष्टत्वात्॥किंतुप्रतियोगितावच्छेदकतापर्याप्तिसंबंधावच्छिन्नावच्छेदकभेदादेव॥एवंचतादृशविशिष्टविषयकत्वसमानाधिकरणाभावीयविषयितानिरूपितत्वावच्छिन्नप्रतियोगितायांनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतापर्याप्तिसंबंधावच्छिन्नावच्छेदकोयोयोधर्मस्तदवच्छिन्नपर्याप्तिकोक्तसंबंधावच्छिन्नावच्छेदकताकविषयितात्वावच्छिन्नप्रतियोगिताकाभावत्वंविवक्षितं॥तथाचद्रव्योजात्यभाववानित्यादौजातिमद्द्रव्यरूपविशिष्टविषयकत्वसमानाधिकरणोयोजातिमज्जातिमद्विषयकत्वंनास्तीतिप्रतीतिसिद्धोऽभावस्तदभावीयप्रतियोगितानिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतापर्याप्तिसंबंधावच्छिन्नावच्छेदकोयोजातिमान्जातिमानित्याकारकज्ञानव्यक्तिनिरूपितविषयतात्वरूपोधर्मस्तदवच्छिन्नोक्तसंबंधावच्छिन्नावच्छेदकता

कप्रतियोगिताकजातिमान्द्रव्यइतिज्ञानव्यक्तिनिरूपितविषयतात्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकप्रतियोगिता
कजातिमद्द्रव्यविषयकत्वंनास्तीतिप्रतीतिसिद्धाभावविलक्षणाभावस्यद्रव्यत्वस्यजातिमान्जातिमानितिज्ञानेऽसत्वाच्चाद्यवृत्तिरितिवदं-
ति॥तदपरेनक्षमंते॥जातिमद्द्रव्यरूपविशिष्टविषयकत्वाधिकरणेजातिमान्जातिमानितिज्ञानेवर्ततेयोजातिमद्द्रव्यविषयकत्वं
नास्तीतिप्रतीतिसिद्धाभावस्तदीयप्रतियोगितानिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतापर्याप्त्यवच्छेदकोयोजातिमान्द्रव्यइति-
ज्ञानव्यक्तिनिरूपितविषयतात्वरूपोधर्मस्तद्वच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यजातिमान्द्रव्य
तिज्ञानेऽसत्वाज्जातिमद्द्रव्यादेरसंग्रहताजदवस्थात्॥वस्तुतस्तुयद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपावच्छिन्नावच्छेदकताकवि
शेष्यतानिरूपितविषयितात्वंयादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंतद्रूपावच्छिन्नप्रकारतानिरूपि
ततद्रूपावच्छिन्नावच्छेदकताकविशेष्यतानिरूपितविषयितात्वावच्छिन्नाभाववत्वमप्युक्तवाक्येनविवक्षणीयं॥तथाचजातिमान्द्रव्य
इतिज्ञानेजातित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितजातित्वावच्छिन्नावच्छेदकताकविशेष्यतानिरूपितविषयितात्वा

वच्छिन्नाभावसत्वाज्जातिमान्जातिमानितिज्ञानेचासत्वान्नासंग्राह्यासंग्रहः संग्राह्यासंग्रहोवा॥ घटः पृथिवीभिन्नइत्यादौजातिमत्पृथिवी तिज्ञानव्युदासस्यैवयद्रूपावच्छिन्नविषयितात्वमित्यादियथाश्रुतविशेषणेनैव॥ एवंह्रदोवह्निमान्धूमादित्यादावभावोवह्निमानित्यादौचा भावत्वेनह्रदत्वाभावत्वावगात्यभाववान्वल्यभाववानितिज्ञानस्यजातिमान्जातिमानितिज्ञानवारकविशेषणेनैवव्याहृत्तिरतस्तज्ज्ञाननिष्ठा यावल्यभावत्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नावच्छेदकताकविशेष्यतानिरूपितविषयितायाःवल्यभाववि ष्टह्रदव- त्वाभावनिष्ठाभावरूपदोषविषयकत्वाव्यापकत्वात्॥ एवंच॥ यद्रूपावच्छिन्नविषयितात्वमित्यादिरूपाव्यापकविषयिताशून्यत्वनि विशेऽभावत्वेनह्रदत्वावगात्यभाववान्वल्यभाववानितिज्ञानाव्याहृत्तिः॥ नच विशेष्यदलेयद्रूपनिष्ठावच्छेदकतायांस्वव्यधिकरणधर्मान वच्छिन्नत्वंदेयमितिनदोषइतिवाच्यं॥ तावतापिप्रकारतावच्छेदककोटिनिविष्टवह्नित्वस्यवह्नित्वादिनायज्ञानंह्रदवारणाद्वल्यभाव इ दत्वोभयंयद्रूपशब्दार्थस्तन्निष्ठावच्छेदकतावतद्दृत्तिधर्मावच्छिन्नेति॥ किंचोक्तज्ञानमादायदोषवारणायावच्छेदकतायांस्वव्यधिकरण धर्मानवच्छिन्नत्वविशेषणावश्यकत्वेज्ञानेस्वव्यधिकरणधर्मविच्छिन्नविशेष्यतानिरूपकत्वरूपयाथार्थ्यविशेषणस्यप्रथमलक्षणेपु

क्तभ्रमव्यावर्तकतयावच्छेदकतायामुक्तविशेषणमनिवेश्यैवसार्थक्यसंभवादवतरणविरोधः॥ननुचयद्रूपपर्याप्तावच्छेदकताकविषयितात्वमितिरीत्यानिवेशनीयमभावत्वपर्याप्तावच्छेदकताकविषयितायाअव्यापकत्वात्तज्ज्ञानव्यावृत्तिरितिवाच्यं॥तथापिवह्न्यभाववत्त्वेनहृदत्वावगाहिवह्न्यभाववान्वह्न्यभाववानितिज्ञानस्यावारणादितिपूर्वपक्षानवकाशः॥अथैवमपिवह्नित्वावच्छेदेनसमवायसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावसाधनेवह्निमद्ह्रदबाधस्तद्विषयकत्वाव्यापिकानवह्नित्ववह्न्यवच्छिन्नविषयितेतिवह्नित्वेनवह्नित्वावगाहिदह्निमत्त्वान्वह्नितिज्ञानव्यावृत्तिर्यथाश्रुतविशेषणेनदुर्घटा॥नापिजातिमान्जातिमानितिज्ञानवारकविशेषणेन॥वह्नित्ववह्न्यवच्छिन्नप्रकारतानिरूपितकिंचिद्रूपावच्छिन्नावच्छेदकताकविशेष्यतानिरूपितविषयिताया दोषविषयकत्वाव्यापकत्वेपितच्छून्यत्वम्यतादृशज्ञानेःसत्वात्॥नैवंयद्रूपावच्छिन्नयन्निष्ठविषयतानिरूपितयद्रूपावच्छिन्नविषयितात्वंतादृशाभावप्रतियोगितावच्छेदकंनद्रूपावच्छिन्नतन्निष्ठविषयतानिरूपितनद्रूपावच्छिन्नविषयिताशून्यत्वंयद्रूपावच्छिन्नविषयितात्वमित्यादिनाविवक्षितंवह्नित्वावच्छिन्नवह्नित्वनिष्ठविषयतानिरूपितवह्नित्वावच्छिन्नविषयिताया वह्निमद्ह्रदरूपबाधविषयित्वाव्यापक

या वह्निलेनवह्नित्वावगाहिज्ञानेसत्वात्तज्ज्ञानव्यावृत्तिः॥यद्वास्वभिन्नयद्रूपावच्छिन्नविषयतानिरूपितविषयतानिरूपितयद्रूपावच्छिन्नविषयि
तात्वंतादृशाभावप्रतियोगितावच्छेदकंतादृशविषयिताशून्यत्वंयद्रूपावच्छिन्नविषयितात्वमित्यनेनविवक्षणीयं॥वह्निलेनवह्नित्वा
वगाहिज्ञानेवह्नित्वावच्छिन्नवह्नित्वनिष्ठविषयतानिरूपितसंसर्गविषयतानिरूपितवह्नित्वावच्छिन्नवह्निविषयितायाःवह्निभद्वह्नि
रूपबाधविषयकत्वाव्यापिकायाःसत्त्वात्तद्व्यावृत्तिः॥द्रव्यत्वजातित्वावच्छिन्नविषयतानिरूपितविषयतानिरूपितजातित्वावच्छिन्नवि
षयतात्वस्यजातिविशिष्टद्रुदविषयित्वव्यापकतानवच्छेदकतयातादृशविषयिताशून्यत्वस्यजातिमान्नातिमानितिज्ञानेऽसत्वेनैव
तज्ज्ञानव्यावृत्तेस्तद्वारकविशेषणंदृष्टथगनुपादेयं॥अभावत्वेनद्रुदत्वावगात्यभाववान्वल्यभाववान्वल्यभावत्वेनद्रुदत्वावगाहिव
ल्यभाववान्वल्यभाववानितिज्ञानेचवल्यभावत्वावच्छिन्नविषयतानिरूपितद्रुदविषयतानिरूपिताभावत्वंवल्यभावत्वावच्छिन्नाया
द्रुदत्वनिष्ठविषयिताया वल्यभावत्वावच्छिन्नप्रकारताभिन्नाया वल्यभावविशिष्टद्रुदरूपदोषविषयकत्वाव्यापिकायाःसत्वेनतज्ज्ञा
नयोर्व्युदासः॥स्वभिन्नत्वोपादानाच्चवल्यभावत्वावच्छिन्नविषयतानिरूपितद्रुदविषयतानिरूपितप्रकारतात्मकवल्यभावत्वाव

च्छिन्नविषयतायाः केवलान्वयिभाववान्कदृष्टनिज्ञाने सत्येपि नादृश्यविषयतायाअव्यापकत्वहानिः॥ यद्यपि सपदेनयदूपावच्छिन्नविषयतासामान्यग्रहणेतद्भेदस्यवत्त्वभावत्वावच्छिन्नविषयतानादृश्यत्वेनाभाववान्वत्त्वभाववानितिज्ञानव्यावृत्तिस्तादृश्यत्वंकिंविद्विषयतायाग्रहणेवत्त्वभाववानितिज्ञानेपितादृश्यविषयितासत्त्वेननोक्तविषयितायाअव्यापकत्वं॥ तथापि स्वनिरूपितविषयतानिरूपितत्वंस्वनिष्ठोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदवत्तोभयसंबंधेनयदूपावच्छिन्नविषयतताविशिष्टयदूपावच्छिन्नविषयतानिरूपितविषयितात्वमित्यादिरीत्याविवक्षणीयमित्यदोषः॥ अभावोवह्निमानित्यादौवत्त्वभावबोधस्यद्विषयकत्वाव्यापकविषयिताशून्यमभाववत्त्वेनाभावत्वावगाह्यभाववान्वत्त्वभाववानितिज्ञानंनवार्यते॥ नहितत्रवत्त्वभावत्वावच्छिन्नविषयतानिरूपितविषयतानिरूपिताभावत्वावच्छिन्नविषयिताव्यापिकाप्रतिबंधकज्ञानेपिसंसर्गतामादायतत्त्वात्तोसंसर्गकोटौस्वभिन्नत्वमात्रमनिवेश्योभयावृत्तित्वरूपतद्व्यक्तित्वावच्छिन्नभेदवत्त्वनिवेशस्तथासत्यभावत्वावच्छिन्नविशेष्यतानिष्ठतद्व्यक्तित्वावच्छिन्नाभिन्नवत्त्वभावविषयितायास्तादृशदोषविषयकत्वव्यापकत्वेप्यभावत्वावच्छिन्नप्रकारतानिष्ठतद्व्यक्तित्वावच्छिन्नभिन्नवत्त्वभावविषयितायाअव्यापकत्वात्तज्ज्ञानव्या

दृनिः॥ नन्वेवं वह्निदोवह्निमान्नवेति संशयस्यवह्न्यभावविशिष्टह्रदविषयकत्वव्यापकतानवच्छेदकवह्नित्वावच्छिन्नविषयतानिरूपित विषयतानिरूपितह्रदत्वावच्छिन्नविषयितात्वावच्छिन्नशून्यत्वविरहेणवारणान्निश्चयत्वंव्यर्थमितिवाच्यं॥ घटोजलमित्यत्रजल भिन्नघटादिरूपबाधसंग्रहायतदावश्यकत्वात्॥ अन्यथाघटोजलंनवेत्यादिसंशयस्यजलत्वजलभेदोभयकोटिकस्यजलत्व, कारतायानिरवच्छिन्नत्वेनयद्रूपावच्छिन्नविषयतात्वेनगृहीतेनुमशक्यतयानिरुक्ताव्यापकविषयिताशून्यत्वेनतद्विशेषणेनाव्यावर्तनात्॥ अथैवनपिह्रदोवह्निमानित्यादौयद्रूपशब्देनतत्तद्वह्निमुपादायतत्तदवच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्नविषयतानिरूपितायाद्वितीययद्रूपपदेनसमवायमुपादायसमवायावच्छिन्नविषयतातन्निरूपितविषयितात्वस्यवह्न्यंतरविषयकबाधविषयकज्ञाननिष्ठाभावप्रतियोगितावच्छेदकतयातदवच्छिन्नशून्यत्वस्यबाधज्ञानेसत्वाद्बाधादावव्याप्तिः॥ एवंवह्नित्वावच्छिन्नविषयतानिरूपिताभावत्वावच्छिन्नविषयतानिरूपितविषयितात्वस्यप्रमेयत्वेनवह्न्यभावावगाहिवह्न्यभावविशिष्टह्रदविषयकत्वाधिकरणज्ञाननिष्ठाभावप्रतियोगितावच्छेदकतयातादृशविषयितात्वावच्छिन्नाभावस्यबाधज्ञानेसत्वाद्व्याप्तिश्चेतिचेन्न॥ यद्रूपावच्छिन्नविषयताविशिष्टवि

षयतानिरूपितत्वावच्छिन्नविषयतानिष्ठनिरूपकताकयद्रूपावच्छिन्नविषयताविशिष्टविषयतानिरूपितविषयितात्वंतादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंतादृशविषयितात्वावच्छिन्नशून्यत्वस्यविवक्षितत्वात्॥विशिष्टवैस्त्वावच्छिन्नप्रतिबंधकतावच्छेदकत्वरूपेग्रात्येअवच्छिन्नत्वावच्छेदकत्वेनुसाक्षाद्ग्रात्ये॥अत्रचनिरूपितत्वावच्छिन्ननिरूपकतायानिवेशान्नस्वात्मकविषयतामादायाभाववान्वत्यभाववानितिज्ञानीयविषयितायाअव्यापकत्वहानिः॥द्वितीयविषयतायांतृतीयविषयतायांचनिरुक्तसंबंधेनयद्रूपावच्छिन्नविषयतावैशिष्टत्वनिवेशेनप्रथमेनचरमेणवायद्रूपपदेनतत्तद्धर्म्मिमुपादायतत्तद्वत्यवच्छिन्नविषयतानिरूपितद्रुदत्वावच्छिन्नविषयतानिरूपितसमवायावच्छिन्नविषयितायाःसमवायावच्छिन्नविषयतानिरूपितद्रुदत्वावच्छिन्नविषयतानिरूपितनत्तद्वत्यवच्छिन्नविषयितायाअव्यापकत्वेपिनबाधज्ञानासंग्रहस्तादृशविषयितायाबाधज्ञानेपिसत्वात्॥द्वितीयद्रूपनिवेशान्नाभावोवह्निमानित्यादौदोषज्ञानेवत्यभावत्वावच्छिन्नविषयतानिरूपिताभावत्वावच्छिन्नविषयतानिरूपिताभावत्वावच्छिन्नविषयतायाअव्यापिकायाःसत्वेननाभाववान्वत्यभाववानितिज्ञानमादायाव्याप्तिः॥नन्वेवमपिस्वरूपेस्वरू-

पाभावसाधनेस्वरूपसंबंधेनस्वरूपवान्स्वरूपसंबंधोदोषस्तत्र[illegible]स्वरूपत्वावगाहिस्वरूपवत्स्वरूपवानितिस[illegible]॥ ग·सा·टी·
मिःस्वरूपसंबंधेनस्वरूपवत्स्वरूपमितिप्रतिबंधकज्ञानेसंसर्गतामादायस्वरूपत्वावच्छिन्नविषयतानिरूपितस्वरूपत्वावच्छिन्नविष
यतानिरूपितस्वरूपत्वावच्छिन्नविषयतासत्वादितिचेन्न॥स्वरूपस्वरूपत्वोभयावच्छिन्नविषयतानिरूपितस्वरूपत्वावच्छिन्नविष
यतानिरूपितस्वरूपस्वरूपत्वोभयावच्छिन्नविषयिताएवव्याप[illegible]नतादृशज्ञानव्युदासात्॥यादृशविशिष्टविषय
कत्वसमानाधिकरणेत्वत्रयादृशविशिष्टवि[illegible]ताहेशिष्टंचयादृशविशिष्टवह्नित्वविशिष्टवह्नि[illegible]भावत्व
विशिष्टंतद्विशिष्टंयद्भूदत्वादिविशिष्टंह्रदादितद्विशिष्टंह्रदादितद्विशिष्टकूटकावच्छेदकावच्छेद्यभावापन्नसकलपदार्थविषयकत्ववह्नित्वनिष्ठ
विषयतानिरूपितवह्निनिष्ठविषयतानिरूपिताया:भावत्वनिष्ठवि[illegible]यतानिरूपिताभा व निष्ठ विषयतानन्निरूपितायाह्रदत्वनिष्ठविषय
तानिरूपिताह्रदनिष्ठविषयतानन्निरूपितविषयित्वपर्यवसितंत्रात्यमतोसंसर्गतामादायवह्नित्वावच्छिन्नविषयतानिरूपिताभावत्वा
वच्छिन्नविषयतानिरूपितविषयितात्वस्यवह्नित्वावच्छिन्नविषयतानिरूपिताभावत्वावच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्नविषयि ४४

तात्वस्यवा निरुक्तयद्रूपावच्छिन्नविषयतावि शिष्टेत्यादिरूपस्य प्रमेयत्वेनवत्व्यभावावगाहि प्रमेयवान्द्रव्यइतिज्ञाननिष्ठाभावप्रतियो
गितावच्छेदकत्वेपि नक्षतिस्तादृशज्ञानस्यनिरुक्तयादृशविशिष्टविषयकत्वान धिकरणत्वात्॥ एतेन प्रमेयत्वादिनावत्व्यभावावगाहिज्ञा
नव्यावर्तनाययादृशविशिष्ट विषयकत्वसमानाधिकरणेत्यवयादृशविशिष्टविषयकत्वंज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वा
नवच्छिन्नत्वोभयाभाववत्प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वविशिष्टंज्ञात्वं प्रतिबंधकतायामुभयाभावनिवेशात्नासाधारण्येऽव्या
प्तिर्नवाप्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वमात्रनिवेशेप्रमेयवान्वत्व्यभाववान्प्रमेयवांश्चद्रव्यइतिज्ञाननिष्ठप्रतिबंधकतायांप्रमेय
वान्वत्व्यभाववानितिज्ञानीयविषयिताया अवच्छेदकत्वेनतज्ज्ञानाव्याप्त्योक्तदोषतादवस्थ्यं॥एवंचस्वरूपसंबंधरूपावच्छेदकत्वकल्पे
नसामान्यपदवैयर्थ्यशंकानिरुक्तप्रतिबंधकतावच्छेदकवत्व्यभावत्वाद्यवच्छिन्नैकदेशविषयकत्वाधिकरणेदोषविषयकत्वाभावास
त्वाद्दोषज्ञानस्याव्यापकविषयिताशून्यत्वाक्षतेस्तदीयवत्व्यभावत्वावच्छिन्नविषयकत्वेस्वरूपसंबंधरूपावच्छेदकत्वस्यवेनवत्व्यभाव
त्वावच्छिन्नेऽतिप्रसंगवारणायतदावश्यकत्वादितिपरास्तं॥यादृशविशिष्टविषयकत्वेनिरुक्तविशेषणेपिद्रव्योवह्निमानित्यादौवह्निमदद्रव्यत्वि

रूपवत्त्वभावव्याप्यत्वेनपरत्वभावावगाहिवह्निमदद्रव्यत्वमानुमदद इतिज्ञानेनिरुक्तविशेषणाक्रांतयादृशविशिष्टविषयकत्वाधिकरणेवह्नि-
त्वावच्छिन्नविषयतायाघटितधर्मावच्छिन्नाभावसत्वेनप्रतिबंधकबाधज्ञानसंग्रहायनिरुक्तरीतेरेवशरणीकरणीयत्वाच्चचैकोक्तिभंगोन-
दोषायगत्यंतरविरहादिति सुधियोविदांकुर्वंत्वनाग्रहेणेतिदिक्॥केचित्तुअथैवमितिग्रंथोनगदाधरकृतःकिंतुकेनचित्स्ववुध्यालि
खितः॥जातिमान्वत्त्वभाववानितिज्ञानीयविषयितायानिर्विशेषणकद्रव्यत्वादिघटितविशिष्टविषयसंबंधत्वाभावेनविशिष्टविषयितासंबं
धेनयादृशविशिष्टविशेषितनिश्चयत्वव्यापिकाप्रकृतानुमितिप्रतिबंधकतेतिविवक्षयासर्वसामंजस्यात्॥यथाचजातित्वावगाहिज्ञानी
यविषयितायाननिर्विशेषणद्रव्यत्वादिघटितविशिष्टसंबंधत्वंतथाव्यक्तंदीधितौपरामर्शग्रंथेरत्नाकृ॥विशिष्टविषयित[illegible]ना॥
[illegible]च्छेदकत्वनिवेशेनि॥अथसरूपसंबंधरूपावच्छेदकत्वनिवेशेसामान्यपदंव्यर्थंवत्त्वभावत्वावच्छिन्नवत्त्व[illegible]
देशविषयकत्वाव्यापकवत्त्वभावविशिष्टद्रव्यरूपदोषविषयकत्वशून्यवत्त्वभावइतिज्ञानदृत्तित्वविशिष्टवत्त्वभावत्वावच्छिन्नविषयि
तायास्तादृशावच्छेदकत्वविरहेणैवतादृशैकदेशेऽतिव्याप्तिविरहात्॥नचैवंतत्कल्पेऽव्यापकविषयिताशून्यत्वंनदेयमितिवाच्यं॥द्रव्यत्वा

वच्छेदेनवह्निसाधनेऽदृष्टत्वसामानाधिकरण्येनवह्न्यभाववद्धूमादिरूपबाधाच्चेत्॥जातित्वादिना दृष्टत्वावगाहिजातिसामानाधिकरण्ये नजा
तिमान्वह्न्यभाववानितिज्ञानीयविषयितायाःयद्रूपावच्छिन्नविषयितासामान्यांतर्गतायास्तादृशावच्छेदकत्वविरहात्॥नन्वसंयोगःसंयोगा
भाववानित्यादौसंयोगःसंयोगवानितिभ्रमविषयेसंयोगेऽतिव्याप्तिःसंयोगत्वावच्छिन्नविषयितायाव्यापिकायाःविषयितायाःप्रतिबंधकज्ञा
नेऽसत्वादितिवाच्यं॥संयोगावच्छिन्नविषयितायाअव्यापिकायाःप्रतिबंधकज्ञानेसत्वात्॥ननुतथैवसंयोगावच्छिन्नेतिव्याप्तिरतोसामा
न्यपदमितिशंक्यं॥पर्वतोवह्न्यभाववानित्यादौवह्नित्वेनवह्नित्वावगाहिवह्नित्वान्पर्वतइत्यप्रतिबंधकज्ञानवारणाययद्रूपावच्छिन्नवि
षयतानिरूपितयद्रूपावच्छिन्नविषयितात्वमितिरीत्याऽव्यापकविषयिताशून्यत्वस्यपरिष्करणीयतयासंयोगःसंयोगवानितिज्ञानेतादृश-
संयोगत्वावच्छिन्नविषयतानिरूपितसंयोगत्वावच्छिन्नविषयितायाःसत्वेनसंयोगत्वाद्यवच्छिन्नेऽतिव्याप्तिविरहात्॥नन्वगोत्वाभावोगो
त्वाभाववानित्यादौगोत्वाभावोगोत्ववानितिभ्रमविषयेगोत्वाभावेऽतिव्याप्तिं तत्रप्रतिबंधकज्ञाननिष्ठायाःगोत्वत्वावच्छिन्नविषयतानिरूपि
तगोत्वाभावत्वावच्छिन्नविषयितायाःगोत्वाभावविषयकज्ञानेपिसत्वेनतद्विषयकत्वाव्यापकत्वाभावादितिवाच्यं॥पर्वतोवह्न्यभाववान्

त्यादौवह्निलेनपर्वतत्वावगाहिवह्निमान्वह्निमानित्यप्रतिबंधकज्ञानवारणायसंबंधावच्छिन्नयद्रूपावच्छिन्नविषयतानिरूपितवि
षयितात्वमितिनिरीत्याऽव्यापकविषयिताभूत्यंतनिवेशनीयंतथाचसमवायसंबंधावच्छिन्नवह्नित्वावच्छिन्नविषयतानिरूपितपर्वतत्व
वच्छिन्नविषयिताया अव्यापिकायाअभावस्यतादृशज्ञानेऽसत्वान्नद्यादृष्टतिः॥प्रकृतेचसमवायसंबंधावच्छिन्नगोत्वत्वावच्छिन्नविषयता
निरूपितगोत्वाभावत्वावच्छिन्नविषयिताया:गोत्वाभावविषयकत्वाव्यापकतयातच्छून्यत्वस्यप्रतिबंधकतादृशभ्रमेऽसत्वेनगोत्वाभावेऽति
व्याप्तिविरहात्॥नचैवमपिवल्यभावोवल्यभाववानित्यादौवल्यभावोवल्यभावाभाववानितिभ्रमविषयवल्यभावाभावविशिष्टेऽतिव्याप्तिः स्व
रूपसंबंधावच्छिन्नवल्यभावाभावत्वावच्छिन्नविषयतानिरूपितवल्यभावत्वावच्छिन्नविषयिताया वल्यभावाभावविशिष्टविषयकत्वाव्या
पकत्वविरहात्स्वरूपसंबंधावच्छिन्नवल्यभावत्वावच्छिन्नविषयतानिरूपितवल्यभावाभावत्वावच्छिन्नविषयिताया अव्यापकत्वेपिसंबंधा
नवच्छिन्नवल्यभावनिष्ठविशेष्यताकप्रतिबंधकज्ञानेतच्छून्यत्वसत्वादितिवाच्यं॥अभावोवह्निमानित्यादावभावत्वेनाभावत्वावगात्यभाव
वान्वल्यभाववानित्यप्रतिबंधकज्ञानव्यावृत्तयेस्वभिन्नत्वस्वनिरूपितसंसर्गतान्यविषयतानिरूपितोभयसंबंधेनयद्रूपावच्छिन्नविषय- ४६

तावविशिष्टयद्रूपावच्छिन्नविषयितात्वमित्यादिरीत्याऽव्यापकविषयितानिरूप्यत्वस्यवक्तव्यत्वेननिरुक्तोभयसंबंधेनवह्न्यभावाभावत्वावच्छिन्न
विषयतावविशिष्टवह्न्यभावत्वावच्छिन्नविषयितायाःवह्न्यभावाभावविशिष्टविषयकत्वाव्यापकत्वेननच्छून्यत्वस्यवह्न्यभावोवह्न्यभावाभाववानिति
प्रतिबंधकज्ञानेऽसत्वेनवह्न्यभावाभावविशिष्टेऽनिव्याप्तिरहानू॥मैवंह्रदःपृथिवीभिन्नइत्यादौह्रदःपृथिवीतिभ्रमविषयेपृथिवीरूपैकदे
शेऽतिव्याप्तिस्तत्रप्रतिबंधकज्ञानेपृथिवीत्वस्यस्वरूपतएवभानान्निरुक्तोभयसंबंधेनयद्रूपावच्छिन्नविषयतावविशिष्टयद्रूपावच्छिन्नविषयिता
त्वमिनिरुक्तऽव्यापकविषयितानिरूप्यत्वाक्षतेःसामान्यपदोपादानमावश्यकं॥विशिष्टविषयितान्यापकत्वनिवेशनमेवोचितमिति॥यद्य
प्यवच्छेदकतायांविशिष्टविषयितात्वव्यापकत्वंविशिष्टविषयितानिष्ठभेदप्रतियोगितानवच्छेदकत्वंप्रतिबंधकतायांविशिष्टविषयिताव्या
पकत्वंतद्निष्ठभेदप्रतियोगितानवच्छेदकत्वं॥एवंचस्वरूपसंबंधरूपावच्छेदकत्वपक्षेऽवच्छेदकत्वनिवेशस्थानीयाधिकरणनिवेशा
स्यप्रतिबंधकतायांव्यापकत्वनिवेशकल्पेसत्वादिनरांशस्यतुल्यत्वेनपक्षद्वयेपिशरीरसाम्येव्यापकत्वनिवेशनमेवोचितमित्यसंगतं॥
तथापिस्वरूपसंबंधरूपावच्छेदकत्वनिवेशकल्पेपर्वतोवह्निमानित्यादावप्रामाण्यविशिष्टवह्न्यभाववानितिज्ञानेऽतिप्रसंगःस्वधर्मिका

प्रामाण्यज्ञानाभावविशिष्टवत्त्वभाववानितिज्ञानस्यैवप्रतिबंधकतयाऽवच्छेदककोटिप्रविष्टानामवच्छेदकत्वेऽप्रामाण्यवत्ताद्यज्ञानविषयत्वस्यापिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वेनतदवच्छेदकत्वादतोऽवच्छेदकनायांसाक्षात्स्वस्यस्वरूपबंधावच्छिन्नत्वस्यवाविवक्षणीयतयास्वरूपसंबंधरूपावच्छेदकत्वपक्षेशरीरगौरवादितिभावः॥तथासंतिनिश्चयत्वाद्यनिवेशादिति॥एवंचतल्लक्षणस्यसर्वमतसाधारण्येनवक्तव्यतयाज्ञानभेदेनविषयितामेदमतेऽप्रामाण्यज्ञानात्कंदितज्ञानीयविषयितायाःप्रतिबंधकतानवच्छेदकतायारूपावच्छिन्नविषयितात्वस्यनत्वसाधारण्यान्नतविशेषेऽसंभवः॥एवंसंशयेकोटितारतम्यविषयितास्वीकर्तृमतेऽवच्छेद्यावच्छेदकभावापन्नकोटिद्वयविषयितास्वीकर्तृमतेवासंशयीयविषयितायानिश्चयीयविषयितामिन्नतयासंशयीयविषयितासाधारण्यरूपावच्छिन्नविषयितात्वव्यापकत्वस्यप्रतिबंधकतावच्छेदकत्वेऽसत्वेननमतविशेषेऽसंभववारणायचस्वरूपसंबंधरूपावच्छेदकतानिवेशपक्षेप्यप्रामाण्यज्ञानाभावविशिष्टत्वसंशयान्यत्वयोर्निवेशावश्यकतयातदनिवेशप्रयुक्तलाघवोपपादनमसंगतमेव॥किंचमतविशेषाभिप्रायकतयैवलाघवोपपादनमन्यथापुनर्लाघवानवकाशेपिप्रथमोपस्थितत्वात्स्वरूपसंबंधरूपावच्छेदकत्वमेवकुतोननिवेशितमितिनान्वित्या

दिनाऽशंक्यमेवमित्यादिनानन्निवेशनिराकरणमित्येवाभिप्रायः कल्पनीय इति न्यूनः॥ननु संशये कोटि [illegible] ज्ञानप्रयोज्य
कसामग्रीद्वयसंवलनप्रयोज्यकोटिद्वयप्रकारतानिरूपितविशेष्यताद्वयस्वीकर्तुमते [illegible] यवत्यभाववद्भूदविशेष्यितायावत्यभाववद्भू
दादिनिश्चयसाधारण्येनैकैपित्वविरोधिधर्मधर्मितावच्छेदककत्वप्रकारकाहार्यवत्यभाववद्भूदादिविषयकज्ञानीयविषयिताभेदोभा
हार्यनज्ञानीयविषयितायामावश्यकएवाहार्यनद्विषयितायाःबाधज्ञानेच्छादिघटितसामग्रीप्रयोज्यायावत्यादिनिष्ठप्रकारतानिरूपितत्वा
द्बाधज्ञानाभावादिघटितसामग्रीप्रयोज्यायाअनाहार्यतज्ज्ञानीयविषयितायास्तदनिरूपितत्वान्निरुक्तसामग्रीद्वयसंवलनस्यचासंभवाद
हार्यज्ञानीयविषयितायाअनाहार्यज्ञानसाधारण्यासंभवेनैक्यायोगादित्याशयेनशंकतेनन्वेति॥सामान्यतआहार्यज्ञानसमानाकारका
नाहार्यज्ञानाप्रसिध्यभिधानंनसंभवतिह्रदोवह्निमानितिबाधज्ञानानंतरमिच्छाजन्यह्रदोवत्यभाववानित्याहार्यज्ञानस्यकैश्चिदभ्युपगा
मादतस्तथोक्तेः॥वह्निमान्ह्रदोवत्यभाववानित्याकारकेत्यर्थः॥पूर्वंह्रदोवह्निमानितिबाधज्ञानरूपह्रदांशेवत्यभावधर्मितावच्छेद
कतयावह्निभासककारणसत्वेनिरुक्तरूपमेवाहार्यज्ञानंजायतइत्यभिप्रायः॥ननु मतद्वयेप्यव्यापकविषयिताशून्यत्वनिवेशावश्य

कतयानिरुक्ताहार्यज्ञानेवह्नित्वावच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्नविषयितायाःवह्न्यभावविशिष्टह्रदरूपदोषविषयक
त्वाव्यापिकायाःसत्वेनतच्छून्यत्वविशेषणेनैवाहार्यज्ञानव्यावृत्तेरनाहार्यत्वविशेषणंव्यर्थमितिचेन्न॥ह्रदोजलमित्याप्तोक्तादात्मेय-
नसाध्येजलंह्रदोजलभिन्न इत्याहार्यज्ञानेजलत्वस्यस्वरूपतएवभानात्तस्यचयद्रूपावच्छिन्नविषयतावैशिष्ट्येत्यादिनिरुक्ताव्यापक
विषयिताशून्यत्वेननह्यावर्तनायानाहार्यत्वविशेषणावश्यकत्वात्॥अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशपक्षेऽव्याप-
कविषयिताशून्यत्वनिवेशेपिसंशयान्यत्वप्रयोजनंप्रागभिहितमेव॥तावतापिसंशयान्यत्वाप्रामाण्यज्ञानानास्कंदितत-
त्वयोरनिवेशेनलाघवादिति॥ननुस्वरूपसंबंधरूपावच्छेदकत्वनिवेशमतेपिज्ञानेअप्रामाण्यज्ञानानास्कंदितत्वनिवेशआ
वश्यकोऽन्यथावह्निमद्विशेष्यकत्वावच्छिन्नवत्यभावप्रकारकत्ववह्न्यभाववद्ह्रदज्ञानसमानकालीनह्रदोवत्यभाववानित्या
कारकस्यस्वांशेऽप्रामाण्यविषयकबाधज्ञानस्याविषयितातस्याअप्रामाण्यज्ञानानास्कंदितह्रदोवत्यभाववानितिबाधज्ञान-
रूपप्रतिबंधकावृत्तित्वेनप्रतिबंधकतानवच्छेदकत्वाद्ह्रदोवह्निमानित्यादौबाधाद्यसंग्रहइतिचेन्नैवं॥एतन्मतेप्रामा ४८

ण्यानवगाहित्वेनैवज्ञानंविशेषणीयंननुविषयत्वैकक्षणावच्छिन्नैकात्मवृत्तित्वरूपसामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावत्वेनैतिलाघवानपायात्॥यादृशस्थलेबाधज्ञानादेःस्वभिन्नेनैवाप्रामाण्ययहेणास्कंदननियमस्तत्राप्रामाण्यानवगाहित्वस्याप्येतत्पक्षेनिवेशाच्चेत्यवधेयं॥विशिष्टज्ञानस्यप्रतिबंधकतासंपत्तयेजलावच्छेदेनेति॥कृत्सदोषांतर्भावंनिरस्यतिसत्प्रतिपक्षज्ञानात्मकस्येति॥तादृशविशिष्टज्ञानस्यजलत्वाद्यवच्छिन्नेजलव्यापकवह्न्यभावसामानाधिकरण्यानवगाहितयावह्न्यभावत्वावच्छिन्नविधेयताकानुमितिजनकत्वाभावेनतादृशविशिष्टविषयितायास्तादृशानुमितिजनकतानवच्छेदकतयाप्रकृतपक्षतावच्छेदकावच्छिन्नेप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदिकासतीविशिष्टपक्षसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतानवच्छेदकविषयितावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिकायादृशविशिष्टनिरूपितविषयितातादृशत्वरूपसत्प्रतिपक्षत्वस्यविशिष्टतस्मिन्नसत्वादितिभावः॥अवश्यंनिवेशनीयतयेति॥अथैवमपिजलावच्छेदेनवह्न्यभाववत्ताघटितवह्न्यभाववज्जलवत्कालीनोद्देशवृत्तिभान्धूमादित्यादौजलवद्ह्रद-

ल्यभाववज्जलवत्कालीनह्रदत्वावच्छिन्नेऽनित्यात्मिसाद्दशपक्षेजलवत्तानिश्चयस्यनियमनोजलावच्छेदेनवह्न्यभाववत्तानिश्चयकालीनतयाविशिष्टपक्षेसाध्यानुमितिंप्रतिविशिष्टपक्षेजलवत्तानिश्चयत्वेनप्रतिबंधकतायामव्यभिचारेणज्ञानविशिष्टत्वस्यतादृशप्रतिबंधकतावच्छेदककोटावनिवेशात्॥एवमनतिरिक्तवृत्तित्वनिवेशकल्पेविशिष्टद्वयाघटितत्वघटकप्रतिबंधकतायामसंभववारणायज्ञानविशिष्ट्यावच्छिन्नत्वनिवेशस्यावश्यकतयादर्शितप्रतिबंधकतायाज्ञानविशिष्ट्यावच्छिन्नत्वाभावेनविशिष्टद्वयाघटितत्वस्याक्षतयादर्शितस्थलेदर्शनविशिष्टेऽनिष्प्रसंगोदुर्वारः॥**अन्यकेचित्**॥यत्रजलसामानाधिकरण्येनवह्न्यभावस्यपक्षतावच्छेदकघटकतातत्रवह्न्यभाववज्जलवत्कालीनह्रदविशेष्यकजलवत्तानिश्चयस्यजलावच्छेदेनवह्न्यभाववत्तानिश्चयकालीनत्वानियमात्तत्रजलावच्छेदेनवह्न्यभाववत्तानिश्चयविशिष्टस्यैवविशिष्टपक्षेजलादिमत्तानिश्चयस्यविरोधितायाअवश्यंवाच्यतयातयैवयत्रजलावच्छेदेनवह्न्यभावस्यपक्षतावच्छेदकघटकतातत्रापिविशिष्टपक्षेजलादिमत्तानिश्चयस्यकार्यानुत्पादकत्वनिर्वाहेऽनिरुक्तप्रतिबंधकत्वकल्पनेनयोजनाभावान्नोक्तानिष्प्रसंगः॥नचतत्सामानाधिकरण्येनविशिष्टबुद्धौतत्सामानाधिकरण्येनबाधनिश्चयस्यैवतत्सामानाधि

करण्येनावच्छेदकधर्मदर्शनस्याप्यविरोधितयातदवच्छेदेनैवावच्छेदकधर्मदर्शनंविरोधीतिवाच्यं तच्चसंसर्गांशेधर्मितावच्छेदक-व्यापकत्वावगाहितथाचजलसामानाधिकरण्येनवह्न्यभाववत्ताघटितवह्न्यभावजज्जलवत्कालीनह्रदत्वव्यापकतातोजलावच्छेदकवह्न्यभाववत्ताघटिततादृशह्रदत्वव्यापकतायाभेदान्नकृसप्रतिबंधकत्वेननिर्वाहइतिज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतांनरमावश्यकमिति वाच्यं॥तत्सामानाधिकरण्येनविशिष्टबुद्धौतत्सामानाधिकरण्येनावच्छेदकधर्मवत्तानिश्चयस्यापिप्रतिबंधकतायामथुरानाथैस्तर्कग्रंथेउक्तत्वात्॥तत्सामानाधिकरण्येनविशिष्टबुद्धौतदवच्छेदेनैवावच्छेदकधर्मदर्शनस्यविरोधित्वेपिप्रकृतेनप्रतिबंधकताभेदः॥यतोप्रतिबंधकतावच्छेदककोटौधर्मितावच्छेदकव्यापकतायाः+व्यापकतात्वेनैवनिवेशान्नतुधर्मितावच्छेदकव्यापकतात्वेन॥एकधर्मावच्छिन्नविशेष्यकज्ञानेचनधर्मिनिरूपितव्यापकतासंसर्गतावच्छेदिकेनिनतद्धर्मव्यापकतात्वेननिवेशावश्यकतेत्याकूस्तदेतत्॥एवमग्निमान्जलह्रदत्वभावकालीनह्रदोवह्निमानित्यादावुक्तदिशाजलवह्निशिष्टपक्षनिश्चयस्यापिविशिष्टज्ञानत्वेनविरोधितांकल्पनेमानाभावेनतादृशजलवह्निशिष्टपक्षेऽतिव्याप्तेर्दुर्वारत्वात्॥परेतुस्वनिरूपितविशेष्यतावच्छेदकतावच्छेदकावच्छिन्नप्रकारताकत्वसामानाधिक

+ अधिकरणनिष्ठावच्छेदकतानिरूपितेत्यादौभावनिष्ठावच्छेदकतानिरूपकसंयोगनिष्ठसांसर्गिकविषयतानिरूपितजलत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेनेकंप्रतिबंधकत्वमित्यभिप्रायः

× नत्विति ह्रदनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकेत्यादिकमेणेत्यर्थः

रण्योभयसंबंधेनवह्न्यभाववत्तानिश्चयविशिष्टतन्नङ्मावच्छिन्नविशेष्यताशालिनिश्चयत्वेनैवतन्नङ्मावच्छिन्नविशेष्यकवह्न्यादिवि-
शिष्टबुद्धिविरोधितोपेयते॥अन्यथाजलवत्त्वाद्यनेकधर्मभेदेनावच्छेदकधर्मदर्शनानामनंतप्रतिबंधकतापत्तेस्तथाचोक्तधर्मावच्छि-
न्नेजलवत्तानिश्चयस्यापेक्षितप्रतिबंधकनयेवकार्यानुत्पादप्रयोजकत्वसंभवान्नतस्यज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतांतरमुपे
यं॥जलव्यापकोवह्न्यभावइतिज्ञानविशिष्टानांजलवान्ह्रदइतिज्ञानानांवह्न्यभावत्वावच्छिन्नधर्मिकजलव्यापकताप्रकारकनिश्चयवि
शिष्टजलत्वावच्छिन्नप्रकारकनिश्चयत्वेनानुगतेनैवप्रतिबंधकत्वमितिनोक्तदोषावकाशइतिवदंति॥वक्ष्यमाणविशिष्टांतरा
घटितत्वस्येत्यादि॥अत्रनिश्चयविशिष्टांतस्यानुपादानेबाधाद्यसंग्रहइतितदुपादानं॥अथैवमपिप्रथमयादृशपदेनबाधा-
द्येकदेशस्यद्वितीययादृशपदेनचविशिष्टबाधादेरुपादानसंभवाद्बाधादेस्तदुभयघटितत्वाव्याप्तिर्दुर्वारैव॥नचत्वावच्छिन्नविषयकनि
श्चयविशिष्टयादृशावच्छिन्नविषयिताव्यापिकाप्रकृतानुमितिप्रतिबंधकतानदृशावच्छिन्नविषयकनिश्चयविशिष्टत्वावच्छिन्नविषयकनि
श्चयत्वव्यापिकाभवतित्वावच्छिन्नविषयकत्वविशिष्टतादृशावच्छिन्नविषयिताशून्यत्वविवक्षणान्नदोषः॥तादृशप्रतिबंधकतात्वेव्याप

कतावच्छेदकत्वंविवक्षणीयमनोवत्त्वभाववज्जलादिमद्वृत्तिजलवद्ध्रुदविषयकज्ञानप्रतिबंधकत्वयोर्विशेषणविशेष्यभावभेदेनभिन्नत्वेऽपि नक्षतिरितिवाच्यं॥ एवमपत्वपदेनवत्त्वभाववद्ध्रुदत्वस्ययद्रूपपदेननस्यैवोपादानसंभवाद्वत्त्वभाववद्ध्रुदादेरसंग्रहनादवस्थ्यात्॥अभावाप्रतियोगित्वक्रःसाध्यत्वेवत्त्वभाववद्ध्रुदादावव्याप्तेश्च॥वत्त्वभावत्वविशिष्टविषयकत्वस्यापिविशिष्टसाध्यवत्तायहप्रतिबंधकताव्याप्यत्वात्॥ननुयादृशविशिष्टाविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वंप्रहतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टहयाघटितत्वंनिवेशनीयंतथासतिप्रथमयादृशविशिपदेनवत्त्वभावत्ववत्त्वभाववद्ध्रुदत्वादिविशिष्टपरित्यहेद्वितीययादृशविशिष्टपदेनवत्त्वभाववद्ध्रुदत्वादिविशिष्टंनोपादातुंशक्यंतद्विषयकनिश्चयस्यवत्त्वभावत्वादिविशिष्टविषयकत्वनियमात्॥यद्वायादृशविशिष्टविषयकनिश्चयत्वज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टाघटितत्वंसंतार्थोज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतालाभायैवनिश्चयविशिष्टांतोपादानमितिनोक्तदोषइतिवाच्यं॥एवमपिरूढ्योवह्निमान्वत्त्वभाववज्जलादिमत्कालीनजलाभावादित्यादौनादृशजलवद्ध्रुदरूपासिद्धावव्याप्तेर्दुर्वारत्वात्॥वत्त्वभाववज्जलादिमत्वावच्छिन्नविषयकनिश्चय

विशिष्टतादृशजलादिमत्वावच्छिन्नाविषयकजलवह्न्यादित्वावच्छिन्नविषयकनिश्चयत्वस्यप्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितयातादृ
शविशिष्टद्वयाघटितत्वस्यतादृशासिद्धिरूपविशिष्टविषयकनिश्चयत्वस्यतादृशविशिष्टसाध्यवत्ताज्ञानवैशिष्ट्यावच्छिन्नसाध्यवत्ताज्ञानप्रतिबंधकतानतिरिक्तवृ
त्तितयातादृशविशिष्टाघटितत्वस्यचतादृशासिद्धावसत्त्वात्॥ननुप्रकृतानुमितित्वव्यापकयद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानतिरिक्तवृत्तियादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वंतादृशविशिष्टद्वयाघटितत्वेसतिप्रकृतानुमितित्वव्यापकतद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानतिरिक्तवृत्तिविषयितानिरूपकत्वस्यप्रकृतानुमितित्वव्यापकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानतिरिक्तवृत्तिविषयितानिरूपकत्वावच्छिन्नप्रकृतानुमितित्वव्यापकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानतिरिक्तवृत्तियादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वंतादृशविशिष्टद्वयविषयि
ताशून्यप्रतीतिविषयत्वोभयसंबंधेनयत्किंचिद्धर्मविशिष्टत्वंसिद्धसाध्यकत्वंतस्यविवक्षणान्नदोषः॥हेतुमत्ताज्ञानत्वरूपयत्किंचिद्धर्मविशिष्टत्व
स्योक्तस्वरूपासिद्धौसत्त्वात्तत्संग्रहइतिवाच्यं॥एवमपिविशिष्टांतराघटितत्वरूपविशेषणस्यव्यर्थापत्तेर्दुर्वारत्वात्॥प्रमेयत्वविशिष्ट

व्यभिचारविषयकनिश्चयविशिष्टव्यभिचारत्वविशिष्टविषयकनिश्चयत्वस्यानुमितिप्रतिबंधकतानतिरिक्तवृत्तिनयातादृशविशिष्टद्वयघटितत्वाभावादेवप्रमेयत्वविशिष्टताभिचारेऽतिव्याप्त्यनवकाशात्॥ अत्रके चित्॥ यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतानुमितिप्रतिबंधकतानवच्छेदकतादृशविशिष्टविषयितताविषयितादृशविशिष्टविषयिताभून्यप्रतीतिविषयत्वरूपस्यविशिष्टद्वयाघटितत्वस्यविवक्षितत्वात्॥ निरुक्तासिद्धिज्ञानीयवह्न्यभाववज्जलावच्छिन्नविषयितादिकंतुज्ञानवैशिष्ट्यानवच्छिन्नाश्रयासिद्धिज्ञानप्रतिबंधकतायामवच्छेदकमेवेतितादृशंविषयितंजलवान्वह्न्यभाववान्जलवांश्चह्रदइतिज्ञानीयविषयितमेवतच्छून्यत्वंचविशिष्टाश्रयासिद्धिज्ञानेऽक्षतमितिनासिध्यादावव्याप्तिः॥ प्रमेयत्वविशिष्टव्यभिचारविषयकत्वव्यभिचारविषयकत्वयोर्ज्ञानवैशिष्ट्यानवच्छिन्नव्यभिचारज्ञाननिष्ठप्रतिबंधकतानवच्छेदकत्वविरहेणतादृशविशिष्टद्वयविषयिताभून्यप्रतीतिविषयत्वस्यप्रमेयत्वविशिष्टव्यभिचारेसत्त्वान्नातिव्याप्तिवारणायविशिष्टांतराघटितत्वघटकविशेष्यदलसार्थकता॥ ननु ह्रदोवह्निमान्धूमादित्यादौवह्न्यभाववद्ह्रदत्वविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ह्रदत्वविशिष्टविषयक

निश्चयत्वमपि प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तिभवतिज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतानुमितिप्रतिबंधकतानवच्छेदकतादृशवि
शिष्टद्वयविषयित्वाप्रसिध्याबाधाद्यसंग्रहः॥ यत्किंचिद्विशिष्टद्वयाघटितत्वमादायवह्न्यभाववज्जलादिमद्वृत्तिजलभाववद्ध्रदत्वावच्छिन्नेऽतिप्र
संगवारणायसद्यद्रूपावच्छिन्नविषयकनिश्चयविशिष्टयद्यद्रूपावच्छिन्नविषयकनिश्चयत्वंप्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृ
त्तिज्ञानवैशिष्ट्यानवच्छिन्न प्रतिबंधकतानवच्छेदकतत्तद्रूपावच्छिन्नविषयितानिरूपितविशिष्टतत्तद्रूपावच्छिन्नविषयिताशून्यप्रतीतिविषय
त्वमित्यर्थकत्वात्॥ मैवंयादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमित्यत्रापिज्ञानवैशिष्ट्यानवच्छि
न्नप्रकृतानुमितिप्रतिबंधकतानवच्छेदकयादृशविशिष्टविषयकत्वस्यनिवेशनीयत्वात्॥ वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वयोरना
दृशत्वाद्यादृशविशिष्टपदेनवह्न्यभावविशिष्टह्रदोपादानायोगात्॥ नच तर्ह्यादावेवनविशेषणमुपादेयंपरत्रतन्निवेशेप्रयोजनाभावइ
तिवाच्यं॥ परत्रनदनिवेशेवह्न्यभाववज्जलादिमद्वृत्तिजलाभाववद्ध्रदपक्षकवह्निसाध्यकस्थलेनादृशजलवद्ध्रदरूपासिद्धावव्याप्तिर्ज्ञा
नवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकज्ञानद्वयीयवह्न्यभाववज्जलावच्छिन्नविषयकत्वाश्रयनिश्चयविशिष्टनादृशजलवद्ध्रद-

त्वावच्छिन्नविषयकत्वविशिष्टनिश्चयत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नविषयितावि[illegible]च्छिन्नविषयिता
शून्यप्रतीतिविषयत्वस्यनस्यामभावात्॥ यद्यपिज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताशून्यवृत्तियादृशविशिष्टविषयिताकनिश्चयत्वं
प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टविषयिताशून्यप्रतीतिविषयत्वमेवलाघवान्निवेशयितुमुचितंतथाप्यु सति
कालीनघटोगंधवान्पृथिवीत्वादित्यादौतादृशविशिष्टाप्रसिद्धिः॥ प्रतियोगिवैय्यधिकरण्यघटितगंधाभावनिरूपितव्याप्तिविशिष्टपृथिवीत्वा
दिविशिष्टघटादेःप्रसिद्धत्वेपितज्ञानस्यप्रकृतानुमितावप्रतिबंधकत्वात्प्रतियोगिवैय्यधिकरण्याघटितगंधाभावनिरूपितव्याप्तेःपृ
थिवीत्वादावभावादतोविशिष्टद्वयाघटितत्वनिवेशः॥ ननुनिरुक्तविशिष्टद्वयाघटितत्वनिवेशेव्युत्पत्तिकालीनघटोगंधवान्पृथिवीत्वा
दित्यादावुक्तविशिष्टद्वयविषयित्वाप्रसिद्धिर्दुर्वारैव॥ उक्तरीत्यागंधाभाववत्पृथिवीत्वविशिष्टपृथिवीत्वविशिष्ट[illegible]रूपविशिष्टद्वय
विषयितयोरतथात्वादिति चेन्मैवं॥ यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयताकनिश्चयविशिष्टयद्रूपावच्छिन्नविष
यताकनिश्चयत्वंप्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतानुमितिप्रतिबंधकतानवच्छेदकतद्रूपा

यावच्छिन्नविषयतानिरूपितनङ्रूपावच्छिन्नविषयितानिरूपितनङ्रूपावच्छिन्नविषयितावैशिष्ट्यनञ्प्रतीतिविषयत्वमितिरीत्याविशिष्टहयाघटितत्वनिवेशात्॥ घटाभिन्नत्वव्यापकोगंधाभावः घटाभिन्नत्वावान्पट इत्यादिज्ञानीयघटाभिन्नत्वव्यापकत्वत्वावच्छिन्नविषयतानिरूपितगंधाभावत्वावच्छिन्नविषयित्वघटाभिन्नत्वविशिष्टघटत्वावच्छिन्नविषयित्वयोस्तादृशतयातच्छून्यप्रतीतिविषयत्वस्यदर्शितस्थलीयबाधेसत्वालक्षणसमन्वयसंभवादितिदिक्॥ अथयादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयितावैशिष्ट्यालिनिश्चयत्वमनुमितिप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्ववत्तादृशविशिष्टहयाघटितत्वमेवनिवेश्यं॥ [illegible]वंजलंवह्निमज्जलादित्यादौवह्निव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्येऽव्याप्तिः॥ नस्यप्रतियोगितावान्वह्न्यभाववानितिनिश्चयविशिष्टस्यजलंप्रतियोगितावदितिनिश्चयस्यप्रतिबंधतानुमितिविरोधितयावह्नित्वावच्छिन्नविषयताकप्रतियोगितावान्वह्न्यभाववानितिनिश्चयविशिष्टप्रतियोगितावज्जलत्वावच्छिन्नविषयिताकनिश्चयत्वस्यतत्रावच्छेदकतयावह्नित्वविशिष्टप्रतियोगितावज्जलत्वादिविशिष्टरूपविशिष्टहयघटितत्वादितिवाच्यं॥ जातित्वादिनाजलत्वद्रवत्वावगाहिजातिमद्वान्वह्न्यभाववान्जातिमांश्चद्रवइतिनिश्चयसाधारणस्यतादृशविशिष्टनिश्चय

त्वस्य प्रतिबंधकतानतिरिक्तवृत्तित्वविरहेणतादृशविशिष्टद्वयाप्रसिद्धिवारणायनिश्चयद्वयेअव्यापकविषयिताशून्यत्वरूपकतयावच्छि
न्नत्वावच्छिन्नविषयकत्वाव्यापकप्रतियोगितावद्द्वत्वाभावावच्छिन्नविषयिताशून्यप्रतियोगितावज्जलत्वावच्छिन्नविषयकत्वाव्यापकनिश्चयत्वस्यतादृ
शावच्छेदकत्वविरहेणदर्शितविशिष्टद्वयस्यनिरुक्तविशिष्टद्वयानात्मकत्वेनासाधारण्याव्याप्तिविरहात्॥ यद्वारूपत्ववद्गंधत्ववत्संयोगपक्ष
कगंधत्वाभाववद्व्याप्यसंयोगवत्त्वमेयसाध्यकरूपत्वाभाववद्व्याप्यजातित्ववद्गुणत्वहेतुकेगंधत्वाभाववद्व्याप्यसंयोगवत्त्वमेयव्यापकीभूताभा
वप्रतियोगिरूपत्वाभाववद्व्याप्यजातित्ववद्गुणत्वरूपासाधारण्येऽव्याप्तिस्तत्रगंधत्वाभाववद्व्याप्यःसंयोगःसंयोगवान्संयोगइतिज्ञानद्वयस्य
गंधत्वप्रकारकसंयोगविशेष्यकज्ञानंप्रतिप्रतिबंधकतयागंधत्वाभाववद्व्याप्यसंयोगत्वावच्छिन्नविषयितायाःस्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकत्वाद्वैरूपत्वाभाववद्व्याप्यंजातित्वंजातित्ववान्संयोगइतिज्ञानद्वयस्यरूपत्वप्रकारकबुद्धिंप्रतिप्रतिबंधकतयारूपत्वाभाववद्व्याप्यजा
तित्वावच्छिन्नविषयितायाअपिस्वरूपसंबंधरूपावच्छेदकतागंधत्वाभाववद्व्याप्यसंयोगत्वावच्छिन्नविषयितावैशिष्ट्यस्वरूपाभाववद्व्याप्यजातित्वा
वच्छिन्नविषयितायास्तादृशजातित्वावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यंयज्जातित्वंतत्संयोगइतिज्ञानविशिष्टंरूपत्वाभाववद्व्या

यंजातित्वमितिज्ञानंतदीयायास्तादृशजातित्वावच्छिन्नविषयितायाविशिष्टतादृशसंयोगत्वावच्छिन्नविषयितायावातादृशसंयोगत्वावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यंयत्संयोगवान्संयोगइतिज्ञानविशिष्टंगंधत्वाभावव्याप्यःसंयोगइतिज्ञानंतदीयायाःप्रकृतानुमितिप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वेनतादृशसंयोगत्वावच्छिन्नविषयिताविशिष्टतादृशजातित्वावच्छिन्नविषयितात्वावच्छिन्नविषयितात्वाभावस्यजातित्वावच्छिन्नविषयिताविशिष्टतादृशसंयोगत्वावच्छिन्नविषयितात्वाभावस्यचनिरुक्तस्थलीयासाधारण्यज्ञानेऽभावादतोऽनतिरिक्तवृत्तित्वनिवेशस्यथासत्यनिकेवलगंधत्वाभावव्याप्यःसंयोगोरूपत्वाभावव्याप्यंजातित्वमित्याकारकज्ञानयोरपितादृशविशिष्टविषयितावैशिष्टनातादृशविशिष्टविषयितासत्वेनतत्रप्रतिबंधकतायाअसत्वेननतादृशविषयितमनतिरिक्तवृत्तित्वरूपावच्छेदकत्ववदितिन्यदेवतादृशविशिष्टद्वयविषयित्वंतच्छून्यत्वंचासाधारण्यज्ञानेऽस्तीतिलक्षणसमन्वयइति॥तन्न॥अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेपिगगनवज्जलंगगनाभावव्याप्यप्रतियोगित्वदृष्टिमज्जलादित्यादौगगनाभावव्याप्यप्रतियोगित्वदृष्टिव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्येऽव्याप्तिर्दुर्वारातत्रगगनाभावव्याप्यंप्रतियोगित्वंप्रतियोगित्ववज्जलमितिज्ञानद्वयस्यप्रतिबंधकत्वेनगगनाभावव्या

प्यप्रतियोगित्वावच्छिन्नविषयिताकनिश्चयविशिष्टप्रतियोगित्वज्जलत्वावच्छिन्नविषयताकनिश्चयत्वंप्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तिभवतितद्रूपावच्छिन्नविषयतावैशिष्टतद्रूपावच्छिन्नविषयताशून्यत्वस्यासाधारण्यज्ञानेऽसत्यादतोऽसाधारण्यविषयताबहिर्भूतत्वंविशिष्टहेयविषयतायामवश्यंनिवेशनीयंतेनैवदर्शितासाधारण्याव्याप्तिवारणसंभवात्॥ वह्निमान्वह्निमज्जलवत्कालीनजलाभावादित्यादौवह्न्यभाववज्जलादिमद्धृत्तिजलवद्धृदादावतिव्याप्तिवारणायादृशावैशिष्टहेयविषयतायांज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकत्वमनिवेश्याश्रयासिद्धिघटकदलहेयविषयताभेदएवनिवेश्यस्तथाचनोक्तासाधारण्येऽव्याप्तिरित्यसाधारण्यविषयताबहिर्भूतत्वनिवेशोमयोजनाभावइतिनाशंनीयंदर्शितस्थलेदर्शितविशिष्टस्यवह्न्यभाववज्जलवदात्मकविशिष्टांतराघटितत्वविरहेणैववारणात्॥ एतेनजलवत्समानकालीनपर्वतोजलवत्समानकालीनपर्वतकालीनवह्निमान्जलादित्यादौजलवत्समानकालीनपर्वतकालीनवह्निव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्येऽव्याप्तिस्तत्रतादृशपक्षेजलवत्तानिश्चयविशिष्टासाधारण्यज्ञानस्यानुमितिप्रतिबंधकतयाजलत्वावच्छिन्नप्रकारतायास्तादृशपक्षरूपैकविशिष्टविषयकत्वाव्यापकत्वाभावेनतादृशविषयताशून्यजलवा

न्तादृशपक्ष इतिनिश्चयविशिष्टासाधारण्यरूपावविशिष्टविषयकनिश्चयत्वस्यस्वरूपसंबंधरूपावच्छेदकत्वेतादृशा
साधारण्य रूपविशिष्टद्वयघटितत्वादतोऽनतिरिक्तवृत्तित्वनिवेशस्तथासतिजलवत्तानिश्चयासमानकालीनेपिनिश्चयेतादृशनिश्चयत्व
सत्तान्तत्रप्रतिबंधकतायाअभावेननाव्याप्तिरितिनिरस्तं॥यद्रूपावच्छिन्नविषयतावविशिष्टयद्रूपावच्छिन्नविषयतेत्यादिक्रमेणाव्यापक-
विषयिताशून्यत्वनिवेशावश्यकतयाजलत्वावच्छिन्नप्रकारतानिरूपितजलवत्समानकालीनपर्वतत्वावच्छिन्नविषयतायास्तादृशप
र्वतत्वविशिष्टाव्यापकतेननतच्छून्यासाधारण्यविषयकनिश्चयत्वस्यस्वरूपसंबंधरूपावच्छेदकत्वाभावेनदर्शितविशिष्टद्वयमादा
याव्याप्यप्रसक्तेश्च॥तादृशविशिष्टद्वयविषयितायामसाधारण्यविषयतावहिर्भूतत्वनिवेशावश्यकतयाघटित्वाभेदवान्घटत्वादित्ता
दृशघटित्वाभेदव्यापकीभूताभावप्रतियोगिघटत्वरूपासाधारण्याव्याप्तिरतोऽनतिरिक्तवृत्तित्वनिवेशोऽवश्यकः॥अन्यथेयंघटित्वीघ-
टोयमितिज्ञानयोःस्वरूपतोघटित्वीत्वघटत्वावगाहिनोरपियद्रूपावच्छिन्नविषयतावविशिष्टयद्रूपावच्छिन्नविषयतेत्याद्यव्यापकविष
यिताशून्ययोरवच्छेदकधर्मदर्शनविधयाप्रतिबंधकत्वेनघटित्वीत्वविशिष्टविषयकेयंघटित्वीतिनिश्चयविशिष्टघटत्वविशिष्टविषयक

घटोयमितिनिश्चयत्वस्यानुमितिप्रतिबंधकतायांस्वरूपसंबंधरूपावच्छेदकत्वेनघटीयत्वविशिष्टघटत्वविशिष्टरूपतादृश
विशिष्ट[illegible]घटनत्वादितिचकेषांचिदुक्तिः[illegible]॥अत्राहुः॥अनुमितिग्रंथेअनुमितिंप्रतियत्रपरामर्शस्यसर्वांशेप्रमात्वनियम
स्तत्रसाध्यव्याप्यहेतुमत्पक्षवज्ज्ञानत्वेनकारणतायाउक्तत्वात्तुल्ययुक्त्यायादृशविशिष्टस्थलेभ्रमात्मकंज्ञानंनकस्यापिजातंतत्रा
वच्छेदकधर्मदर्शनविधयातादृशज्ञानस्यविशिष्टवज्ज्ञानत्वेनप्रतिबंधकत्वंनतुनिरूप्यनिरूपकभा[illegible]विषयिताशालिज्ञानत्वे
नप्रयोजनविरहात्तथाचतादृशविशिष्टज्ञानीयविषयितायांस्वरूपसंबंधरूपावच्छेदकत्वविरहादन्यदेवतादृशंविषयितादृयंत
च्छून्यत्वस्यतादृशविशिष्टज्ञानेसत्त्वात्तादृशविशिष्टेऽव्याप्तिरतोऽनतिरिक्तवृत्तित्वनिवेशनं॥तथासतिविशिष्टस्ययत्रावच्छेद
कत्वंतत्रापिविशिष्टविषयितायाअनतिरिक्तवृत्तित्वसत्त्वान्नक्षतिः॥नचतुल्ययुक्त्यातादृशविशिष्टद्वयंयत्रासिद्धियटकंतत्रज्ञानवैशि
ष्ट्यानवच्छिन्नासिद्धिज्ञाननिष्ठप्रतिबंधकतानवच्छेदकतादृशविशिष्टद्वयविषयिताशून्यप्रतीतिविषयत्वस्यतादृशासिद्धावभावेना-
व्याप्तिरनतिरिक्तवृत्तित्वनिवेशोपिदुर्वारेतिवाच्यं॥यद्विषयकत्वेनेत्यादिलक्षणमनाहार्यारोपाधिष्ठानस्कंदितनिश्चयीयविष

यितासंबंधावच्छिन्नयद्रूपावच्छिन्नावच्छेदकताकभेदानुयोगितावच्छेदक भेदप्रतियोगितावच्छेदक[illegible]नुमितिप्रतिबंधकता तद्रूपावच्छिन्न[illegible]मितिरीत्याअनतिरिक्तहेत्वितिकल्पेपरिकरणायंतत्रयद्रूपावच्छिन्नेत्यत्रयद्रूपेज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वाभावावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकतापर्याप्यवच्छेदकान्योयः प्रकृतानुमितिप्रतिबंधकत्वाभावावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकतापर्याप्यवच्छेदकोधर्म[illegible]दयं॥ तथाचनवह्न्यभाववज्जलादिमद्धृदादिजलवद्धृदेतिव्याप्तिस्तादृशद्रदत्वज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतानुमितिप्रतिबंधकत्वाभावावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकतापर्याप्यवच्छेदकान्यत्वस्यप्रकृतानुमितिप्रतिबंधकत्वाभावावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वस्यचसत्त्वेनतदुभयभिन्नत्वाभावात्तस्ययद्रूपपदेनोपादानासंभवात्॥ इत्थंचतादृशद्रदात्मकस्वरूपासिद्धेनाव्याप्तिस्तादृशासिद्धिज्ञानस्यविशिष्टज्ञानत्वेनैवप्रतिबंधकतयातादृशासिद्धिनावच्छेदकेज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वाभावावच्छिन्नानुयोगितावच्छेदकभेदप्रतियोगितावच्छेदकतापर्याप्यवच्छेदकत्वसत्वादुक्तविशेषणवानन्यएवधर्मस्तदन्यत्वासिद्धितावच्छेदकेसत्वात्तस्ययद्रूपपदेनग्रहणसंभवादितिध्येयं॥अथ

प्रमेयत्वविशिष्टव्यभिचारित्वावच्छिन्नवह्न्यभाववान्जलादिमद्वृत्तिजलवद्ह्रदेचातिव्याप्तिवारणायजातिमत्त्वविशिष्टाभाववानितिज्ञानमादायासंभवात्तादृशज्ञानवच्छेदकविषयितानिरूपितशून्यत्वंज्ञानेविशेषणंदेयं॥ एवंहेत्वनुमितिप्रतिबंधकता॥ तथाचप्रमेयत्वविशिष्टव्यभिचारविषयकज्ञानेतादृशप्रमेयत्वविषयितायास्तादृशावशिष्टह्रदविषयकज्ञानेतादृशवृत्तित्वविषयितायाजातिमान्वह्न्यभाववानित्यादिज्ञानेचतादृशजातित्वावच्छिन्नविषयितायाःसत्वेननिरुक्तज्ञानानांतादृशविषयिताशून्यत्वाभावेनैवदोषवारणेविशिष्टांतराघटितत्वस्यविशिष्टहृयाघटितत्वस्याव्यापकविषयिताशून्यत्वस्यचवैय्यर्थ्यं॥ स्वानवच्छेदकविषयिताशून्यज्ञानवृत्तित्वविशिष्टव्यभिचारावच्छिन्नविषयितायाव्यापकंस्वंतत्वस्यैवलक्षणत्वात्तत्रचयादृशदोषलक्षणसमन्वयश्चिकीर्षितस्तादृशदोषज्ञाननिष्ठप्रतिबंधकतायाएवस्वपदेनोपादेयतयाप्रमेयत्वाभाववद्ह्रदकालीनपर्वतोधूमवान्वह्नेरित्यत्रप्रमेयत्वविषयितायामाश्रयासिद्धिज्ञानप्रतिबंधकतावच्छेदकेलेपिनप्रमेयत्वविशिष्टव्यभिचारितिव्याप्तिः॥ नन्वधर्मितावच्छेदकनिष्ठप्रकारतानिरूपितविशेष्यतायाःप्रकारतानिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यतापेक्षयाभिन्नत्वमतेधर्मितावच्छेदकनिष्ठप्रकारतानिरूपितविशेष्यतायाःप्रतिबंधकतानवच्छेदकत्वेनतच्छून्यत्वस्यकस्मिन्नपिदोषज्ञानेऽभावादसंभवइतिवाच्यं॥स्वानवच्छेदकत्वेनेन

स्वावच्छेदकत्वस्वावच्छेदकविषयतावच्छिन्नान्यतरसंबंधेनस्वविशिष्टस्यैवविवक्षितत्वात्तादृशविशेष्यतयाभेदमनेनयोरवच्छे गू.सा.टी.
द्यावच्छेदकभावस्वीकारान्नदोषइतिचेन्नैवं॥ह्रदोवह्निमान्धूमादित्यादौसामानाधिकरण्येनसाध्यतायामवच्छेदकावच्छेदेनबाधाव्यासेस्तादृशबाधज्ञानप्रतिबंधकतायांह्रदत्वव्यापकत्वविशिष्टस्वरूपसंबंधेनवह्न्यभावप्रकारकत्वस्यैवावच्छेदकतयातदनवच्छेदकतादृशसंबंधेनवह्न्यभावविशिष्टह्रदविषयिताशून्यत्वस्यतादृशबाधज्ञानेऽसत्वात्॥यदिचसव्यभिचारेगदाधरैर्वक्ष्यमाणरीत्याह्रदत्वव्यापकवह्न्यभावस्यैवतत्वेलमित्युच्यतेतदाप्यनुमितिप्रतिबंधकतानवच्छेदकविषयिताशून्यत्वंनैकदेशज्ञानस्यापिनुवह्न्यभाववद्ह्रदविषयकज्ञानस्यैवनहृत्तित्वविशिष्टवह्न्यभावत्वाद्यवच्छिन्नविषयितायाःप्रतिबंधकतान।तेरिक्तहृत्तित्वादेकदेशवह्न्यभावत्वाद्यवच्छिन्नेऽतिव्याप्तिर्दुर्वारा॥एवंघटोऽवृत्तिरित्यत्रघटावच्छिन्नरूपबाधेऽव्याप्तिर्घटेवृत्तित्वसामान्याभावबुद्धिंप्रतिघटत्वावच्छिन्नप्रकारताकज्ञानत्वेनैवप्रतिबंधकतयाघटावच्छिन्नविशेष्यतायाःप्रतिबंधकतानवच्छेदकत्वेनघटत्वानितिप्रतिबंधकज्ञानस्यनच्छून्यत्वाभावाद्॥अथहृद्भाववज्जलादिमद्भिजलवद्ह्रदेतिप्रसंगवारणायप्रमेयत्वविशिष्टव्यभिचारेऽतिप्रसंगवारणायजातिमान्वह्न्यभावधानित्यादिज्ञानम। ५७

दाधामंभववारणायवस्त्वाव्यापकप्रतिबंधकताशून्यत्वमे ज्ञानेविशेषणंदेयं॥स्वंप्रकृतानुमितिप्रतिबंधकता॥इत्थंचवह्न्यभाववज्जलादिमद्वृत्तिजलवान्ह्रदइतिज्ञानस्यतादृशप्रतिबंधकताशून्यत्वंजलवान्वह्न्यभाववान्जलवांस्ह्रदइतिज्ञानद्वयनिष्ठजलवद्ह्रदविषयकनिश्चयविशिष्टवह्न्यभाववज्जलावच्छिन्नविषयकनिश्चयतावच्छिन्नप्रतिबंधकतायावह्न्यभाववज्जलावच्छिन्नविषयकनिश्चयविशिष्टजलवद्ह्रदविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकतायास्वपरस्परमव्यापकत्वेनतादृशविशिष्टज्ञानेतादृशप्रतिबंधकताद्वयसत्वात्॥धूमाभाववद्वृत्तिर्वह्निःप्रमेयइतिज्ञानेचप्रमेयत्वाभाववान्वह्निरित्यादिज्ञाननिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतायाःप्रकृतानुमितिप्रतिबंधकत्वाव्यापिकायाःसत्वान्नतदादायप्रमेयत्वविशिष्टव्यभिचारेऽतिप्रसंगः॥जातिमान्वह्न्यभाववानितिज्ञानेतादृश्याःजातिमान्वह्निमानितिज्ञाननिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतायाःसत्वान्नतादृशज्ञानस्यतच्छून्यत्वं॥नन्चसपदस्यनत्तद्व्यक्तिपरत्वेनाननुगमाद्बाधादिज्ञानप्रतिबंधकतानांपरस्परमव्यापकत्वेनदोषज्ञानेतच्छून्यत्वाभावात्तेषामसंग्रहइतिवाच्यं॥समानाधिकरणभेदप्रतियोगितावच्छेदकत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतिबंधकत्वनिष्ठप्रतियोगिता

वच्छेदकता

कभेदत्वसंबंधेनप्रकृतानुमितिप्रतिबंधकताविशिष्टत्वस्याव्यापकप्रतिबंधकताशून्यत्वसंबंधेनप्रकृतानुमितिप्रतिबंधकताविशिष्ट[illegible]

धकताशून्यत्वसंबंधेनप्रकृतानुमितिप्रतिबंधकताविशिष्टत्वस्यवास्याव्यापकप्रतिबंधकताशून्यत्वमित्यनेनविवक्षितत्वान्दोषोवह्न्यभाववद्ध्रदविषयकत्वावच्छिन्नप्रतिबंधकत्वविशिष्टत्वस्येवनिरुक्तसंबंधेनबाधादिज्ञानेसत्वादितिचेन्नैवं॥ह्रदोवह्निमान्धूमादित्यादौयत्रवह्न्यभाववान्धूमाभाववानितिज्ञानस्यपूर्वंपरतोवावह्न्यभावविशिष्टह्रदादिविषयकज्ञानंसंभवतिनान्यदा॥अन्यदानुवह्नित्वेनगुंजापुंजावगात्यभावत्वेनघटावगाहिवह्न्यभाववान्ह्रदइतिभ्रमात्मकमेवतत्रवह्न्यभावविशिष्टह्रदादिरूपबाधविषयकज्ञानीयाभ्रमप्रमासाधारणप्रतिबंधकतातदव्यापिकायाह्रदधर्मिकधूमप्रकारकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितवह्न्यभावावच्छेदेनधूमाभावप्रकारकनिश्चयविशिष्टह्रदधर्मिकवह्न्यभावप्रकारकनिश्चयत्वावच्छिन्नाप्रतिबंधकनातस्यास्तादृशविशिष्टज्ञानेसत्वात्तादृशभ्रमात्मकज्ञानेतादृशप्रतिबंधकताशून्यत्वसत्वेपितद्वृत्तित्वविशिष्टबाधविषयकत्वाप्रसिध्याबाधेव्याप्तिः॥नचाव्यापकत्वशरीरनिविष्टस्याधिकरणंभ्रमभिन्नत्वेनविशेषणीयंतथाचतादृशज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायानबाधज्ञानप्रतिबंधकत्वाव्यापकत्वमपितुघटादिज्ञाननिष्ठप्रतिबंधकतायाएवत

च्छून्यतादृशविशिष्टज्ञानमादायैव बाधलक्षणसमन्वय इति वाच्यं॥ एवमपि प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षविषयकज्ञाननिष्ठप्रतिबंधकतयोः परस्परमव्यापकत्वेन तादृशज्ञानस्य तच्छून्यत्वाभावात्सत्प्रतिपक्षाव्याप्तिर्दुर्वारा। अथादिच्च-व्यापकताघटितसत्प्रतिपक्षस्य लक्षत्वेऽभिज्ञानेविशिष्टद्वयाघटितत्वघटकतादृशविशिष्टद्वयविषयिनायाःसत्प्रतिपक्षघटकद्वय विषयिताभिन्नत्वनिवेशाद्वस्वाव्यापकप्रतिबंधकतायांसत्प्रतिपक्षघटकानियानिप्रतिहेतुव्यापकसाध्याभावप्रतिहेतुमत्पक्षप्रति हेतुनिष्ठसाध्याभावसामानाधिकरण्यानितत्तद्विषयकत्वानवच्छिन्नत्वनिवेशान्नतदसंग्रहः॥ वह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृ द्विषयकज्ञानेतादृश्याजलादौवह्न्यभाववज्जलादिमद्वृत्तित्वाभावप्रकारकज्ञानीयप्रतिबंधकतायाःसत्वान्नतादृशविशिष्टःति व्याप्तिरित्युच्यते तदाग्न्यभावोवह्निमानित्यादौसंयोगसंबंधेनवह्नेःसाध्यतायांसंयोगसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेन वह्निमद्वह्न्यभावावच्छिन्नेःतिव्याप्तिस्तत्रसंयोगसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेनवह्निमान्वह्न्यभाववान्तादृशसंबंधेनवह्नि मांस्वाभावइत्यवच्छेदकधर्मदर्शनस्याभावत्वावच्छिन्नेतादृशसंबंधेनवह्निप्रकारकत्वनियततादृशसंबंधेनवह्न्यवच्छेदेनवह्न्यभावप्रकारकत्वेनै

वलाघवेन प्रतिबंधकत्वाद्दंडित्वभावावच्छिन्नविषयकज्ञानस्यतादृशप्रतिबंधकताशून्यत्वात्॥ यदि च ज्ञानवैशिष्ट्यानवच्छिन्नप्र
तिबंधकतावच्छेदकतादृशविशिष्टद्वयविषयिताशून्यत्वघटितविशिष्टद्वयाघटितत्वस्य तुल्यमूलत्वसिद्धांतेपितन्नातिव्याप्तिर्दुर्वारा विशि
ष्टद्वयाघटितत्वघटकज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतायांतत्प्रतिबंधकताभेदनिवेश्यतदतिव्याप्तिवारणेस्याव्यापकप्रतिबंधकताया
मपितद्भेदंनिवेश्यतद्वारणंसुकरमित्युच्यतेतदाप्येतत्कल्पेद्रोजात्यभाववानित्यादौजातिमान्जातिमानितिज्ञानवारणमशक्यंजा
तिमान्जात्यभाववानितिज्ञानस्याहार्यतयातज्ज्ञानेस्याव्यापकप्रतिबंधकत्वासत्॥ ननुजातिमान्जातिमान्वह्निमानित्याकारकप्रत्यक्ष
सामग्रीविधयायाप्रतिबंधकतासैवाव्यापिकातत्रास्तीतिशंक्यं॥जातिमान्जातिमान्वह्न्यभाववानितिबाधग्रहकालीनतादृशसाम
ग्र्या अप्रतिबंधकत्वेननच्छून्यत्वस्यतत्रसत्त्वेनतद्वारणात्॥ एवंजातिमान्द्रद्दइतिज्ञानकालीनजातिमान्वह्न्यभाववानितिज्ञाननिष्ठप्र
तिबंधकत्वाव्यापकत्वस्यजातिमान्वह्निमानितिज्ञाननिरूपितप्रतिबंधकतायामसत्त्वेनद्रदोवह्निमानित्यत्रजातिमान्वह्न्यभाववानितिज्ञा
नवारणमप्यशक्यमित्यव्यापकविषयिताशून्यत्वनिवेशोऽवश्यकः॥ एवंधूमवान्वह्नेरित्यादौदृत्तित्वविशिष्टधूमाभाववद्वृत्तिवह्नावति

व्याप्तिस्तत्र वह्निरहितिज्ञाननिरूपितप्रतिबंधकतायाः व्यभिचारज्ञानप्रतिबंधकत्वाव्यापकत्वाभावेनतादृशीघटादिज्ञानप्रतिबंधकतैवनच्छून्यत्वस्यतादृशविशिष्टवह्निज्ञानेऽक्षतत्वादतोविशिष्टांतरघटितत्वनिवेशोप्यावश्यकः॥ एवंह्रदोवह्निमान्वह्त्यभाववज्जलादिमद्वृत्तिमेयत्वविशिष्टजलाभावादित्यादौवह्त्यभाववज्जलादिमद्वृत्तिजलवह्नदविषयकज्ञानेस्वरूपासिद्धिज्ञाननिष्ठप्रतिबंधकत्वाव्यापकप्रतिबंधकतायाअसत्वात्तद्विषयेवह्त्यभाववज्जलादिमद्वृत्तिजलवह्नदेऽतिव्याप्तिवारणायविशिष्टहेत्वाघटितत्वनिवेशोप्यावश्यकइतिकिमेतावताप्रयासेन॥ अत्रेदंबोध्यं॥ स्वाव्यापकप्रतिबंधकताश्रयत्वंहेतौनयत्वातेबंधकताविशिष्टनिरूपितस्वत्वविशिष्टयादृशविशिष्टविषयिताव्यापिकाप्रकृतानुमितिनिरूपितत्वत्वातिबंधकतातादृशत्वमितिपरिष्कारेविशिष्टहेत्वाघटितत्ववैयर्थ्यंदुर्वारमेवजातिमान्जातिमानितिज्ञानमादायह्रदोजात्यभाववानित्यादावव्याप्तिवारणायाव्यापकविषयिताशून्यत्वंनिवेशनीयंविशिष्टांतरघटितत्वनिवेशप्रयोजनमभिहितमेव॥ इदंपुनरत्रतत्वं स्वाव्यापकत्वशरीरेउक्तरीत्याप्रमात्वनिवेशावश्यकतयाप्रमात्वघटितप्रथमलक्षणंपरित्यज्यतदघटितद्वितीयलक्षणप्रणेतुर्लक्षणेप्रमात्वनिवेशोनास्तीत्याशयमवगत्यैवविशिष्टहेत्वाघटितत्वादीनांनिवेशो

नदाधराणामन्यथासाववच्छिन्नाविषयकप्रमाऽदृष्टप्रतिबंधकतंयादृशविशिष्टविषयकत्वव्यापकंतादृशत्वंदोषत्वमित्युक्तावपिविशिष्टा
तराघटितत्वविशिष्टद्वयाघटितत्वादीनांवैय्यर्थ्यस्यसुवचत्वेनकिमेतावतामयासेनेतिदिक्॥पाषाणमयत्वविशिष्टपर्वतादावति
व्याप्तेरिति॥अत्रनवीनाः यद्रूपावच्छिन्नविषयिनासामान्यमनुमितिप्रतिबंधकतावच्छेदकंतत्त्वमेवहेत्वाभासत्वंपाषाणमयत्वावि
शिष्टपर्वतादावतिव्याप्तिवारणायज्ञानवैशिष्ट्यानवच्छिन्नत्वमेवानुमितिप्रतिबंधकतायांनिवेशनीयंप्रतिहेतुव्यापकसाध्याभावस
मानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षसंग्रहायथोयत्रहेत्वाभासस्तद्व्याप्योपिसएवनत्रदोषइतिशिरोमण्युक्तरीत्या असिध्यात्म
कहेत्वभावव्याप्यधर्मवत्पक्षादेश्वसंग्रहायचप्रकृतानुमितिप्रतिबंधकेत्यनेनज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतानुमितिप्रतिबंधकत्व
प्रकृतपरामर्शप्रतिबध्यानुमितिजनकत्वान्यतरस्यैवविवक्षणाज्ज्ञानवैशिष्ट्यानवच्छिन्नेत्यनेनज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यवि
षयकज्ञानीयप्रतिबंधकताव्यक्तिभिन्नत्वोभयाभाववत्त्वस्यविवक्षणीयतयानासाधारण्यासंग्रहः॥प्रतियधकतायांसत्प्रतिपक्षविषयकत्वा
नवच्छिन्नत्वासाधारण्यविषयकत्वानवच्छिन्नत्वज्ञानवैशिष्ट्यावच्छिन्नत्वंतत्रितयाभावंनिवेश्यसत्प्रतिपक्षासाधारण्ययोःसंग्रहस्तुनसम्य

क्॥ इदंतावद्भिमान्जलादित्यादौ हेतुमत्पक्षातिव्याप्तेरसाधारण्यविषयकनिश्चयविशिष्टहेतुमत्ताज्ञानप्रतिबंधकतायामुक्तोभयाभाववत्यांहेतुमत्पक्षविषयितासामान्यस्यावच्छेदकत्वात्॥ नन्वसाधारण्यविषयकत्वानवच्छिन्नत्वमित्यत्रासाधारण्यविषयकत्वनिष्ठसाक्षादवच्छेदकत्वानिरूपकत्वंस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्ववृत्तित्वोभयसंबंधेनासाधारण्यविषयितात्वविशिष्टावच्छेदकत्वानिरूपकत्वपर्यवसितं ग्राह्यं॥ प्रतिबंधकतावच्छेदकत्वमपिसाक्षात्त्वव्याप्यत्वत्वावच्छेदकत्वोभयसंबंधेनप्रतिबंधकताविशिष्टत्वरूपं ग्राह्यमितिनहेतुमत्पक्षातिव्याप्तिर्यत्प्रतिबंधकतावच्छेदिकाहेतुमत्पक्षविषयितासानिरुक्तासाधारण्यविषयकत्वानवच्छिन्नैवेतिगोक्तोभयाभाववर्त्तीयाप्रतिबंधकतोभयाभाववतीनस्यांनहेतुमत्पक्षविषयितासामान्यंनिरुक्तावच्छेदकत्ववदितिवाच्यं॥ तावतापिहेत्वभावपक्षतावच्छेदकाभावव्याप्यवत्पक्षादेरसिध्यात्मकस्यासंग्रहादवस्थात्॥ तन्नाहिषयकत्वानवच्छिन्नत्वमपिप्रतियोगिकोटौनिवेश्यचनुष्टयाभाववत्वंपंचाभाववत्वादिकंप्रतिबंधकतायांनिवेश्यतत्संग्रहेबहुतरगौरवमितिवदंति॥ केचित्तुविशिष्टद्वयाघटितत्वमनिवेश्यैवशिरोमण्यभिप्रायंवर्णयंतितथाहिविशिष्टांतरविषयित्वाव्यापकत्वविषयिताव्यापकप्रकृतानुमितिप्रतिबंधकताक-विशिष्टायर्थी

सासती विशिष्टांतरविषयित्वाव्यापकत्वविषयिताव्यापकप्रकृतपरामर्शप्रतिबध्यानुमितिजनकताकविशिष्टापर्याप्तायाविषयनालत्वर्या
त्यनधिकरणत्वमेवविशिष्टांतराघटितलविशेष्यदलयोर्निष्कृष्टार्थः॥इतोपिलाघवान्वेषणेविशिष्टांतरविषयित्वाव्यापकत्वविषयिताव्यापकत्व
कप्रकृतानुमितिप्रतिबंधकत्वप्रकृतपरामर्शप्रतिबध्यानुमितिजनकतान्यतरकत्वमेवपर्यवसितदोषलक्षणंवक्तव्यमितिनकोपिदोषः॥नत्वभा
ववज्जलादिमद्वृत्तिजलवद्वृत्तात्मकविशिष्टविषयिताव्यापकज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायावत्यभाववज्जलवत्कालीनजल
वद्वृत्तात्मकंजलवद्वृत्तिकालीनवत्यभाववज्जलवद्वृत्तात्मकंवायद्विशिष्टांतरंतद्व्यापकतयानताद्दशविशिष्टेऽतिव्याप्तिः॥पाषाणमयोनवह्निभा
वनिश्चयकालीनपर्वतःपाषाणमयइतिज्ञाननिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायांविशिष्टांतरविषयित्वाव्यापकत्वेपिपाषाणमयत्वावि
शिष्टपर्वतविषयिताव्यापकत्वाभावेननपाषाणमयत्वविशिष्टपर्वतेऽतिव्याप्तिः॥सत्प्रतिपक्षज्ञानीयप्रतिबंधकतायांप्रतिहेतुव्यापकसा
ध्याभावकालीनप्रतिहेतुमत्पक्षरूपविशिष्टांतरविषयित्वाव्यापकत्वासंभवेपिज्ञानवैशिष्ट्यानवच्छिन्नसाध्याभावानुमितिजनकतामादा
यैवलक्षणसमन्वयसौकर्यं॥इतोपिस्वरूपसंबंधरूपावच्छेदकत्वपक्षीयनिष्कृष्टार्थोलघीयान्तथाहिविशिष्टांतरविषयित्वाव्यापकत्व

विषयितात्वव्यापकावच्छेदकताकप्रकृतानुमितिनिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधक[illegible]प्रतिबध्यानुमितिजनकत्वान्यतरकत्वंदोषत्वं॥अत्रच विशिष्टांतरविषयितायांस्वविषयितायांचानाहार्यज्ञानीयत्वनिवेशावश्यकत्वे[illegible]ज्ञानास्कंदितनिश्चर्यीयत्वानिवेशाल्लाघवंबोध्यं॥इत्थंचबाधघटितसत्प्रतिपक्षोपिसंगृह्यतेतज्ज्ञानस्यबाधज्ञानप्रतिबंधकतातःपक्षप्रतिबंधकतालेमानाभावेनविशिष्टांतरविषयितात्वव्यापकस्वविषयितात्वव्यापकप्रतिबंधकताकलेमानाभावेपिविशिष्टांतरविषयितात्वव्यापकस्वविषयितात्वव्यापकप्रकृतपरामर्शप्रतिबध्यसाध्याभावानुमितिजनकताकत्वानपायात्॥नहिव्याप्यत्वासिद्धावगाहिबाधज्ञानसाधारणबाधज्ञानत्वेनैवानुमितिजनकत्वमनुमन्यतेसत्प्रतिपक्षघटितसत्प्रतिपक्षस्तुनलक्ष्यः॥संगृह्यतेचपक्षवृत्तित्वघटितमप्यसाधारण्यंतस्यसाध्याभावान्यथासिद्धत्वात्॥व्युदस्तश्चसाध्याभावाननुन्यायकत्वेनप्रतिहेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षोपिसत्प्रतिपक्षसंग्राहकसत्प्रतिपक्षघटकदलद्वयविषयिताभिन्नत्वविशेषणाक्रांतविशिष्टांतरद्वयविषयिताशून्यप्रतीतिविषयत्वसत्वेनग्रहाधरणेतदधारणात्॥यत्तुसत्प्रतिपक्षघटकदलद्वयभिन्नंयत्प्रतिहेतुव्यापकसाध्याभावकालीनत्वंप्रतिहेतुमत्पक्षश्चेत्युभयंतद्घटित

त्वादेवनतत्रातिव्याप्तिः॥ **नच** कालीनत्वसंबंधेनप्रतिहेतुव्यापकसाध्याभावविशेषितप्रतिहेतुमत्पक्षएवातिव्याप्तिः प्रतिहेतुव्यापकसाध्याभाव
प्रतिहेतुमत्पक्षयोर्दर्शितविशिष्टघटकयोःसत्प्रतिपक्षीयदलद्वयभिन्नत्वासंभवादिति **वाच्यं**॥कालीनत्वसंबंधेनप्रतिहेतुव्यापकसाध्याभावविशेषितप्रतिहेतुः प्रतिहेतुमत्पक्षश्चेतिद्वयस्यदर्शितविशिष्टघटकस्यसत्प्रतिपक्षीयदलद्वयभिन्नत्वसंभवादिति **तद्वक्तव्यं तु**॥सत्प्रतिपक्षघटक
दलद्वयशब्देनविशिष्यप्रतिहेतुव्यापकसाध्याभावप्रतिहेतुमत्पक्षोभयमेवोपादेयमितरथाजलादिव्यापकवह्न्यभावकालीनजलवद्ध्रदादेर्यत्रप्रतिहेत्वादिघटकतयासत्प्रतिपक्षघटकत्वंतत्रतादृशविशिष्टद्वयस्यसत्प्रतिपक्षघटकद्वयाभिन्नतयातादृशविशिष्टेऽतिव्याप्त्यापत्तेरे**वंच** प्रतिहेतुव्यापकसाध्याभावसामानाधिकरण्यंप्रतिहेतुमत्पक्षश्चेतिदलद्वयस्यप्रतिहेतुव्यापकसाध्याभावप्रतिहेतुमत्पक्षोभयात्मकसत्प्रतिपक्षघटकदलद्वयभिन्नतयातादृशदलद्वयघटितसत्प्रतिपक्षएवाव्याप्तिवारणंदुःशकं स्यादतोयादृशविशिष्टविषयकनिश्चयविशिष्टत्वादेर्यादृशविशिष्टविषयितासामान्यावच्छिन्नज्ञाननिष्ठावच्छेदकताकप्रतिबंधकतायादृशविशिष्टविषयितासामान्यावच्छिन्नातादृशविशिष्टद्वयेत्येवार्थोविषयितासामान्यनिवेशस्फोरणायैवचानतिरिक्तइतित्वपर्यंताभिधानमितिवक्तव्यं॥**एवंच** प्रतिहे

नुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षादेरपिसत्प्रतिपक्षत्वेनदर्शितविशिष्टद्वयाघटितत्वंनिरूढमेवेतिवदंति॥अत्रमतद्वयेपि स्वरूपसंबंधरूपावच्छेदकत्वनिवेशेघटोऽस्तिरित्यादौघटावच्छिन्नेबाधेऽतिव्याप्तिरतोऽनतिरिक्तास्तित्वरूपावच्छेदकत्वनिवेशा षश्यंथलान्निर्भरइतिध्येयं॥सत्प्रतिपक्षघटकदलद्वयविषयितानिष्ठेति॥अत्रनिरुक्ताद्दशविशिष्टद्वयविषयितयोःप्रत्येकंस त्प्रतिपक्षघटकदलद्वयविषयितानिष्ठद्वित्वावच्छिन्नभेदनिवेशेसत्प्रतिपक्षघटकदलद्वयविषयितयोःप्रत्येकंनाद्दशविषयितानिष्ठ द्वित्वावच्छिन्नभेदसत्वात्सत्प्रतिपक्षासंग्रहः॥यदिचताद्दशविषयितानिरूपितत्वाद्यत्किंचिद्वावच्छिन्नप्रतियोगिताकभेदद्वयंनिवेश्य तेतदाजलवद्ध्रदस्यसत्प्रतिपक्षघटकतयानद्विषयितायांताद्दशभेदद्वयासत्वेनताद्दशविषयिताकविशिष्टद्वयाघटितत्वस्यवह्न्य भावकज्जलवद्वह्निजलवद्ध्रदेसत्वात्तत्रातिव्याप्तिरतोताद्दशविशिष्टविषयितानिष्ठद्वित्वावच्छिन्नेसत्प्रतिपक्षघटकदलद्वयविष यितानिष्ठद्वित्वावच्छिन्नभेदोनिवेश्यस्तथाचसत्प्रतिपक्षघटकदलद्वयविषयितानिष्ठद्वित्वावच्छिन्नानुयोगिताकभेदप्रतियोगि तावच्छेदकस्यनिष्ठद्वित्वकायाताद्दशविशिष्टद्वयविषयितातच्छून्यप्रतीतिविषयत्वंपर्यवसितं॥ननुपर्वतोधूमवान्वह्नेरित्यत्रसत्प्रतिप

क्षाप्रसिध्यानत्स्थलीयदोषेऽव्याप्तिः॥ नच तत्रत्यदोषलक्षणे विशिष्टहेत्वघटितत्वमनुपादेयमिति वाच्यं॥ वह्निर्धूमव्याप्यइतिज्ञानंप्रत्ययो गोलकीयतेजोधूमाभाववद्वृत्तिताद्दशतेजस्त्ववान्वह्निरितिज्ञानहेत्वस्यप्रतिबंधकतयाधूमाभाववद्धृत्तियोगोलकीयतेजोवृत्तिताद्दशतेजस्त्ववद्वह्नित्वावच्छिन्नेऽतिव्याप्तिनिवारणायतदावश्यकत्वादतआहायत्रेति॥ एकोक्तिर्निर्वाहायाह॥ भ्रमात्मकज्ञानीयविषयितासाधारणरूपेणेति॥ प्रतिहेतुव्यापकत्वनिष्ठविषयतानिरूपितसाध्याभावत्वावच्छिन्नविषयितात्वेनेत्यर्थः॥ आदिनाप्रतिहेतुमत्पक्षविषयितापरिग्रहस्तथाचप्रतिहेतुनिष्ठप्रकारतानिरूपितपक्षविषयितात्वेनप्रतिहेतुमत्पक्षविषयितायानिवेशइत्यपिलभ्यते॥ हेतुतावच्छेदकाघटितस्येति॥ तद्घटितस्यतत्वेतुहेतुःसाध्याभावाभाववद्वृत्तिर्हेतुमांश्चपक्षइतिज्ञानहेत्वसाधारणज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतयैवतज्ज्ञानस्यकार्यानुत्पादप्रयोजकत्वनिर्वाहाज्ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतांतरेमानाभावात्तदसंग्रहोदुर्वार इतिध्येयं॥ अथसाध्याभावाभाववद्वृत्तित्वंपक्षस्यसत्वंतिपक्षत्वेनिर्भरोनरुक्तोगगनत्वान्नेयत्वादित्यादौसाध्याभावाभावस्यगगनरूपत्वस्वीकारेपितदधिकरणाप्रसिद्धेस्तादृशहेतोरसत्वंतिपक्षितइतिव्यवहारानुपपत्तेरितिचेन्न॥ तत्रपक्षवृत्तित्वाभाववद्गगनस्यापिबाधितयात ६३

ध्याप्यतादृशाभावाभाववदवृत्तिमद्गगनस्यैवसत्प्रतिपक्षतासंभवेनतमादायैवतादृशव्यवहारोपपादनसंभवात्॥नहियोयोबाधस्तत्त
द्व्याप्यःसत्प्रतिपक्षइतिनियमोस्युत्पत्तिकालीनघटेगंधसाधनेबाधव्याप्यस्यसत्प्रतिपक्षस्याभावात्॥साध्याभावाभाववदवृत्तिमत्पक्षस्येत्य
त्रसाध्याभावपदंसाध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकविषयताश्रयपरंपक्षपदंबाधज्ञानविशेष्यपरमितिनासंगतिरिति **ध्ययं**॥**पक्षवृ**
त्तित्वाघटितस्येति॥गोपक्षकेअश्वत्वहेतुनागोत्वसाधनेपक्षवृत्तित्वघटितस्यतस्यासंभवादिति **भावः**॥**संग्रादनीयत्वादिति**॥
यादृशविशिष्टविषयकनिश्चयत्वव्यापकःप्रकृतानुमित्यप्रतिबंधकत्वपक्षधर्मताज्ञानसमानकालीनत्वोभयाभावस्तादृशत्वंदोषत्व
मितिविवक्षयेत्यादिः॥**व्यभिचारादिघटितपदार्थांतरेति**॥व्यभिचारविशिष्टमेयत्वादावित्यर्थः॥अत्रघटितेतितस्यालक्ष्यतावी-
जमाविष्कर्तुं॥तस्यदोषतोपगमेव्यभिचारविशिष्टवस्तुमात्रस्यैवलक्ष्यतापत्तेः॥पदार्थांतरपदंप्रमेयत्वविशिष्टव्यभिचारादेरिदानींव्य
भिचारपदार्थत्वेनालक्ष्यतायाननिर्णयःपश्चात्तुनिर्णयइतिलाभायेतिकेचित्॥**अनुमितिप्रतिबंधकतायांयद्रूपावच्छिन्नवि**
षयकत्वमवच्छेदकमिति॥अत्रापिवच्छेदकत्वमनतिरिक्तवृत्तित्वंबोध्यमन्यथावह्न्यभावत्वावच्छिन्नविषयकत्वस्यस्वरूपसं

बंधरूपावच्छेदकत्वेनवह्न्यभावस्यापिविशिष्टांतरत्वापत्त्यातदघटितत्वस्यवह्न्यभाववद्ह्रदादावसत्त्वेनबाधाद्यसंग्रहापत्तेः॥यद्रूपावच्छिन्नविषयकत्वंप्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वावच्छिन्नाविषयकप्रतीतित्वविषयतावच्छेदकावच्छिन्नंयत्तद्रूपावच्छिन्नंतदघटितत्वमितियथाश्रुतार्थेव्यभिचारत्वावच्छिन्नस्यतादृशप्रमेयत्वावच्छिन्नत्वादसंभवइत्यनुमितिप्रतिबंधकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वावच्छिन्नाविषयकप्रतीतित्वविषयतावच्छेदकयोरैक्यंविवक्षयति॥एवंचेति॥अथयद्रूपावच्छिन्नविषयितासामान्यमनुमितिप्रतिबंधकतावच्छेदकंतादृशंयत्त्वावच्छिन्नाविषयकप्रतीतित्वविषयतावच्छेदकमितिविवक्षयावह्न्यभावाद्येकदेशस्यविशिष्टांतरत्वाप्रसक्त्याबाधादिसंग्रहसंभवइतिकिमनतिरिक्तवृत्तित्वरूपावच्छेदकघटितविशिष्टांतराघटितत्वनिवेशनेनएवंचवह्न्यभाववज्जलादिमद्ह्रदनिजलवद्ह्रदादेस्तादृशजलवद्ह्रदादिरूपविशिष्टांतरघटितत्वेवारणेविशिष्टद्वयाघटितत्वंननिवेशनीयमितिचेन्न॥अभाववान्वह्न्यभाववानभाववांश्चह्रदइतिज्ञानद्वयनिष्ठप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वाश्रयाभाववद्ह्रदघटितत्वाद्वह्न्यभाववद्ह्रदस्यासंग्रहवारणायप्रतिबंधकतायांज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवे

शावश्यकत्वेनतादृशप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वस्यजलवद्वृदविषयितायामसत्वान्तस्यविशिष्टांतरत्वाप्रसन्न्यानिरुक्तविशिष्टेतिव्याप्तिवारणायविशिष्टद्वयाघटितत्वमावश्यकं॥ननुवमाप[illegible]संबंधरूपावच्छेदकत्वघटितविशिष्टांतराघटितत्वनिवेशानमेवलाघवादुचितमिति वाच्यं॥घटोऽदृत्तिरित्यत्रपूर्वोक्तयुक्त्याघटावच्छिन्नविषयिता[illegible]रूपसंबंधरूपावच्छेदकत्वाभावेनतस्यविशिष्टांतरत्वाभावेनप्रमेयत्वविशिष्टघटावच्छिन्नेऽनिरुक्तवृत्तित्वरूपावच्छेदकत्वघटितविशिष्टांतराघटितत्वनिवेशोऽवश्यकः॥आधत्वादद्यइति॥एकमात्रदोषस्थलेविशेषणविशेष्यभावव्यत्यासेनविशिष्टांतरमादायैवलक्षणंसंगमनीयं॥दुर्घटत्वादिति॥ननुप्रमेयत्वविशिष्टव्यभिचारत्वादिनाघटावगाहिप्रतीतिःसंभवतीतिचेन्न॥तुल्ययुक्त्याबाधाद्यविषयकबाधत्वादिनाऽवगाहिप्रतीतिसंभवादसंभवःस्यादतोत्राश्रयाविषयकप्रतीतौप्रमात्वंनिवेशनीयंनथाचायंदोषइतिध्येयं॥प्रमेयंगगनवदिति॥अत्रेदंबोध्यंवह्न्यभाववद्भूदत्वावच्छिन्नाधिकरणतानिरूपितविषयतावच्छेदकेयत्तादृशंभूदवृत्तिवह्न्यभावत्वंतदाश्रयाविषयकत्वस्यबाधज्ञानेऽसत्यधूमाभाववद्वृत्तिवह्नित्वावच्छिन्नाविषयकप्रतीतिविष

यतावच्छेदकंयत्तादृशंधूमाभाववद्वृत्तित्वव्याप्यवह्नित्वंतदाश्रयाविषयकत्वस्यव्यभिचारज्ञानेऽसत्याशासंभवएवसंभवनीत्यव्याप्तिक
थननसंगतं॥ वस्तुतदाश्रयत्वविशेष्यताशून्यत्वनिवेशवत्यभाववद्वृत्तिदौलक्षणसमन्वयसंभवाद्व्याप्तिकथनमितितदसत्॥तथास
तिव्यभिचारविशिष्टलक्षणेतादात्म्यनिवेशात्॥ अत्रकेचित्॥ मनवान्तादात्म्येनघटादित्वादौव्यभिचारिण्यभावत्वतादात्म्य-
विशिष्टघटादौलक्षणसमन्वयस्तादृशतादात्म्यस्यकेवलान्वयितयातदभाववद्वृत्तित्वाभावरूपव्याप्यप्रसिद्धेस्तादृशव्याप्तिर्विशिष्टहेतु-
रूपद्वारापिप्रसिद्धेः॥ व्यापकसामानाधिकरण्यरूपव्याप्तिप्रसिध्याघटव्यापकनत्वतादात्म्यवद्वृत्त्यभिन्नत्वस्यतादृशत्वेपिविशिष्टहेतुया घ
टित्वाक्रांतस्यलक्षणसमन्वयायतादृशस्यविवक्षणेतस्यतादृशत्वाभावादित्याहुस्तदसत्॥ एवमपिहेतुसमानाधिकरणसाध्याभा
वत्वादेस्तादृशत्वसंभवात्तत्राव्याप्तेर्दुर्हरत्वात्॥ वस्तुतस्तुतादृशरूपाश्रयाविषयकप्रतीत्यप्रसिद्धिनिबंधनाव्याप्तिरत्रविवक्षिताय
द्यपिह्रदादिवह्निमत्त्वाभाववद्वृत्तित्वोपलक्षितप्रमेयत्वस्यापितादृशरूपत्वात्तदाश्रयाविषयकप्रतीत्यप्रसिद्धिनिबंधनासंभवशंकासंभवतितथा
पितादृशरूपशरीरेस्वरूपसंबंधरूपावच्छेदकत्वस्यविषयितायांविवक्षणेननन्निबंधनासंभवइतिज्ञेयं॥ अथेत्यादि॥ अत्रधूमव्यभि

चारिवह्नेःपक्षतेवाधघटकधूमव्यभिचारिवह्नित्वावच्छिन्नमादायतथासतीत्यादिनावक्ष्यमाणाव्याप्तिर्नसंभवतीतितदर्थंनादृश-
वह्निमत्वावच्छिन्नस्यपक्षत्वानुसरणं॥ यद्रूपावच्छिन्नविषयकत्वमित्यादि॥अत्रयद्रूपंस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वेनविवक्षणीयमन्यथाव्यभिचारत्वादेरपियद्रूपदेनधर्तुंशक्यत्वादसंभवप्रसंगात्॥प्रमेयत्वविशिष्टव्यभिचारादेरप्यभिधेयत्वविशिष्टव्यभिचारादघटितत्वेनातिव्याप्तिवारणायस्वद्रूपावच्छिन्नविषयकत्वमितिविवक्षायाआवश्यकत्वात्॥प्रतिबंधकता-
विशेषणमवच्छिन्नत्वंव्यापकत्वरूपंग्रात्यंतेनवह्न्यभावावद्वृदसमानकालीनजलवान्धूमाभाववानितिनिश्चयविशिष्टस्यतादृशज-
लवान्ह्रदइतिनिश्चयस्यापिधूमवत्वावगाह्यनुमितिविरोधितयानदनतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकस्यवह्न्यभावावद्वृद-
त्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्याप्रसिद्धत्वेपिनहृदोवह्निमान्धूमादित्यादिस्थलीयबाधाद्यसंग्रहः॥स्वावच्छिन्नविषयि-
तासामान्यावच्छिन्नत्वनिवेशेनत्वेवजलवद्ह्रदेःतिव्याप्तिः॥ननुजलवद्ह्रदत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्त-
वृत्तिविषयितानिरूपकतावच्छेदकस्यजलवद्ह्रदत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्याप्रसिध्यानातिव्याप्तिरितिचान्यं॥

अवच्छेदकधर्मदर्शनविधयाप्रतिबंधकयोरपिजलवान्हृदोह्रदेजलमितिनिश्चययोर्जलत्वावच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्न
विषयतायाघटितैकरूपेणैवप्रतिबंधकतयाजलवद्ह्रदविषयितासामान्यावच्छिन्नप्रतिबंधकतानातिरिक्तह्रत्तिविषयितानिरूपकतावच्छे
दकस्यवह्न्यभाववज्जलादिमहृत्तित्वविशिष्टह्रदहृत्तिजलत्वादेरवतादृशधर्मस्यप्रसिद्धतयोक्तानिष्प्रत्यूहदुर्वारत्वात्॥विषयितानिरूपण-
मवच्छेदकत्वमतिरिक्तहृत्तिरूपंयावंतेनह्रदोवह्निमानित्यादौबाधज्ञानीयाभाववद्ह्रदत्वावच्छिन्नविषयितायास्तादृशप्रतिबंधकता
वच्छेदकत्वात्तन्निरूपकाभाववद्ह्रदघटितत्वेपिनवह्न्यभाववद्ह्रदादेरसंग्रहः॥ननुयद्रूपावच्छिन्नविषयितासामान्यंतादृशावच्छेदक
त्वमितिरीत्याविवक्षणान्नैषदोषइतिशंक्यं॥एवमपिघटोहृत्तिरित्यादौघटावच्छिन्नविषयितायांतादृशावच्छेदकत्वविरहेणघटा
देर्यद्रूपपदेनधर्तुमशक्यतयाप्रमेयत्वविशिष्टेघटावच्छिन्नेतिव्याप्तिवारणायतदावश्यकत्वं॥ननुतत्रतादृशरूपाप्रसिद्धिःशंक्या॥घटोः
हृत्तिरितिज्ञानंप्रतिघटवान्यटोहृत्तित्ववानितिज्ञातयोर्हृत्तित्वनिष्ठविषयतानिरूपितघटनिष्ठविषयतायाघटितैकरूपेणैवप्रतिबंधकत्वोपग
मेनहृत्तिघटत्वस्यैवतादृशरूपस्यप्रसिद्धेः॥व्यभिचारघटितबाधाव्याप्तिवारणायप्रतिबंधकतासामान्येति॥तदेतदुपपादयतिव्य

भिचारस्येत्यादिना॥अथास्मिन्कल्पेवह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृदादावतिव्याप्तिरुक्तरीत्याविशिष्टहेत्वाघटितत्वनिवेशेनत
द्वारणेपुनर्व्यभिचारघटितबाधाव्याप्तिर्बाधविषयकनिश्चयविशिष्टव्यभिचारविषयकनिश्चयत्वस्यानुमितिप्रतिबंधकतानतिरिक्त
वृत्तित्वात्तदुभयाघटितत्वस्यतत्राभावादितिचेन्नैवं॥व्यभिचारघटितबाधघटकव्यभिचारबाधविषयित्वयोर्जातिवैशिष्ट्यानवच्छिन्न
प्रतिबंधकतानवच्छेदकत्वविरहेणतद्घटितविशिष्टहेत्वाघटितत्वस्यतत्राबाधात्॥यद्वास्वावच्छिन्ननिरूपितत्वव्यापकप्रकृतानुमिति
प्रतिबंधकतासामान्यंस्वावच्छिन्नाविषयकयादृशविशिष्टविषयकत्वविशिष्टयादृशविशिष्टविषयकनिश्चयत्वव्यापकंतादृशविशि
ष्टहेत्वाघटितनानवच्छेदकत्वस्यस्वपदार्थेविवक्षितत्वान्नतत्राव्याप्तिः॥भवतिचवह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृदत्वावच्छिन्नविषय
कत्वव्यापकंवह्निमत्ताबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतासामान्यमुक्तजलवद्वृदविषयक[illegible]भाववज्जलादि
मत्वावच्छिन्नविषयकत्वविशिष्टजलवद्वृदत्वावच्छिन्नविषयकनिश्च[illegible]यकंतदुभयघटितनानवच्छेदकंचनतादृशजलादिमद्वृ
त्तिजलवद्वृदत्वमितिनतादृशजलवद्वृदत्वावच्छिन्नेतिव्याप्तिः॥व्यभिचारघटितबाधसंग्रहायस्वावच्छिन्नाविषयकेतिनिश्च-

यविशेषणं॥ उक्तबाधसंग्रहायैवसामान्यपदं॥ प्रमेयत्वविशिष्टव्यभिचारत्वस्यप्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविष
यकस्यप्रमेयत्वविषयकत्वविशिष्टनिश्चयविशिष्टस्यव्यभिचारत्वविशिष्टविषयकस्यप्रमेयत्वंव्यभिचारश्चेतिनिश्चयसामा-
न्यस्यतदवच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबंधकतासामान्यत्वेनप्रमेयत्वव्यभिचारत्वोभयघटितताव च्छेदकत्वान्नतद्
वच्छिन्नेतिप्रसंगोपि॥ इदंचहृदोवह्न्यभावत्वान्नदेवह्न्यभावइतिज्ञानयोः प्रथमेस्वरूपसंबंधावच्छिन्नाधेयतानिरूपिताधारत्वंसंसर्ग
तयाभासतेद्वितीयेतुस्वरूपसंबंधावच्छिन्नाधारतानिरूपिताधेयत्वंसंसर्गतयाभासतेतत्रचद्वयोरपिज्ञानयोर्हृदत्वावच्छिन्नविषयतानि
रूपिताधारत्वविषयतानिरूपितनिरूपितत्वविषयतानिरूपिताधेयत्वविषयतानिरूपितवह्न्यभावत्वावच्छिन्नविषयताशालिनिश्चयत्वे
नैकरूपेणप्रतिबंधकत्वमित्यभिमानेनतादृशाभिमानमेवनिराकरोति व्यभिचारत्वादिरूपेत्यादिना॥ तद्बीजंतुहृदोवह्न्यभावत्वान्नहृ
दोवह्न्यभावइत्याकारकप्रतिबंधकतायांहृदत्वाभावावच्छिन्नवह्न्यभावप्रकारकत्वस्वरूपसंबंधावच्छिन्नाधेयतासंबंधे
नहृदाभाववद्विशेष्यकत्वावच्छिन्नतादृशसंबंधेनहृदप्रकारकत्वरूपाननुगतासामान्यद्वयोरेवोत्तेजकत्वानुरोधेनतादृशज्ञानयोर्नै

करूपेणप्रतिबंधकत्वंसंभवतीति॥एवंनिश्चयत्वाननुगमादपीति॥असंभवादितिप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्सक्षविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकतादृशपक्षावि[illegible]कप्रतीतिविषयतावच्छेदकस्यतादृशसाध्याभावकालीनप्रतिहेतुमत्सक्षातावच्छेदकस्यसंभवेपि[illegible]त्प्रतिपक्षस्यप्रतिहेतुमत्सक्षप्रतिहेतुव्यापकसाध्याभावरूपविशिष्टहयघटितत्वान्ननत्रापिलक्षणसमन्वयइतिभावः॥असंभवंपरिहर्तुमाशंकतेनन्वेति॥अत्रापिप्रतिबंधकतावशेषणमवच्छिन्नत्वंव्यापकत्वरूपंग्रात्यंनस्वरूपसंबंधविशेषस्तथासतिह्रदोवह्निमान्धूमादित्यादौप्रमेयत्वविशिष्टोयोवह्यभावस्तद्वद्ह्रदत्वावच्छिन्नादावतिव्याप्त्यापत्तेस्तादृशह्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यांतर्गतभेदत्वविशिष्टवह्न्यभाववान्धूमाभाववानितिनिश्चयविशिष्टप्रमेयत्वविशिष्टवह्न्यभाववद्ह्रदविषयकनिश्चयनिष्ठधूमवत्ताज्ञानप्रतिबंधकतानतिरिक्तहत्तिविषयितानिरूपकतावच्छेदकतद्वच्छिन्नाविषयकप्रतीतित्विषयतावच्छेदकाप्रसिध्यास्वपदेनप्रमेयत्वविशिष्टोयोवह्न्यभावस्तद्वद्ह्रदत्वस्यधर्तुमशक्यत्वात्तस्मेयत्वविशिष्टंयद्वह्न्यभाववद्ह्रदत्वंतत्तैवतत्रेत्यात्यंतात्॥इत्यान्यत्वव्यभिचारिणोभिन्नोघटा

दित्यादौ स्वरूपतोऽव्यत्वविशिष्टद्रव्यान्यत्वव्यभिचारिद्रव्यघटादावव्याप्तिवारणायसामान्यपदं॥अत्रयथाश्रुतेपिवह्न्यभाववज्ज
लवद्वृत्तिजलवद्भूदत्वावच्छिन्नेनातिव्याप्तिस्तदवच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयितानिरूपकता
[illegible]च्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्यवह्न्यभाववज्जलवत्कालीनजलवद्भूदत्वादेःप्रसिद्धत्वात्स्वपदे
नतादृशभूदत्वादेर्निर्देशाक्यत्वात्॥प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्सक्षस्त्वंतत्कल्पेःलक्ष्यएव॥प्रतिबंधकतासा
मान्यावच्छेदकत्वमथननिरिक्तवृत्तित्वंवयात्यन्यथावह्न्यभाववद्भूदत्वावच्छिन्नविषयकत्वव्यापकप्रतिबंधकतानिरूपितस्वरू
पसंबंधरूपावच्छेदकत्ववत्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकभूदत्वादिकतस्यवह्न्यभाववद्भूदत्वादेःसत्ताद्वाधाद्यसं
यहप्रसंगात्॥यद्रूपावच्छिन्नविषयितासामान्यंनादृशावच्छेदकत्ववत्त्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयत्किंचित्तादृश
रूपकंयत्त्वमितिनिरीत्याविवक्षणेनासंभववारणेऽपिघटोवृत्तिरित्यादौप्रत्येकत्वविशिष्टघटावच्छिन्नेतिव्याप्तिरतोतदेवनिवेशनीयं॥अ
त्रकल्पेउदासीनेऽतिव्याप्तिवारणायविशेषदलंदेयं॥**स्वावच्छिन्नेति**॥अत्रपाषाणमयत्वविशिष्टेऽतिव्याप्तिवारणायोभयत्राप्यवच्छे

दकत्वमनतिरिक्तवृत्तित्वरूपंनिवेशनीयं॥नचैवंकथंतन्निवेशनैवदर्शितानिव्याप्तिवारणसंभवादुभयत्रतन्निवेशनंनिष्फलमिति शंक्यं॥स्वावच्छिन्नविषयितायांतन्निवेशेव्यभिचारघटितबाधेऽव्याप्तिस्तत्रस्वावच्छिन्नविषयिताव्यापकप्रतिबंधकतासामान्यावच्छेदकव्यभिचारविषयितायांस्वावच्छिन्ननिरूपितत्वाभावसत्वाद्दोषैकदेशाविषयितायांतादृश्यांदोषनिरूपितत्वाभावसत्वादसंभवोवा॥यत्किंचिद्विषयितायांतन्निवेशेऽदोवह्निमान्धूमादित्यादौस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्तवृत्तिविषयिताया अप्रसिद्धिर्वह्यभाववद्धूदत्वावच्छिन्नविषयिताया ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकताशून्यवृत्तित्वादुनयत्रतन्निवेशआवश्यकः॥प्रमेयत्वविशिष्टव्यभिचारविषयित्वमादायातिव्याप्तिवारणायययद्रूपावच्छिन्नविषयित्वंतादृशप्रतिबंधकतावच्छेदकंतत्तद्रूपावच्छिन्नविषयतान्यतमत्वसामानाधिकरण्येननिरूपितत्वाभावोनिवेशनीयः॥एतच्चाभावत्वयत्किंचिदिति॥व्यभिचारघटितबाधविषयित्वावच्छिन्नप्रतिबंधकतावच्छेदकव्यभिचारविषयितायांनादृशबाधनिरूपितत्वाभावसत्वान्नाव्याप्तिरतोप्रतिबंधकतासामान्येनि॥अथवादेशत्वावच्छिन्नविषयितायांतादृशविषयितान्यतमांतर्गतायांदोषनिरूपि

तत्वाभावस्तादृसंभवइतिचेदत्रोच्यते॥यद्यद्रूपावच्छिन्नविषयितायांस्वरूपसंबंधरूपानतिरिक्तवृत्तित्वरूपयोर्द्वयोरेवावच्छेदकत्वयो
र्विवक्षणीयत्वयादोषविशिष्टदेशादिविषयितायांस्वरूपसंबंधरूपावच्छेदकत्वविरहेणैवनासंभवः॥ननुदेवंव्याभिचारिघटितबाधे
स्वावच्छिन्नविषयिताव्यापकप्रतिबंधकतासामान्यनिरूपितताद्दशावच्छेदकत्वद्वयवद्विषयित्वाप्रसिद्धिरितिवाच्यं॥स्वावच्छिन्न
विषयकत्वावच्छिन्नेत्यत्रापिस्वावच्छिन्नविषयितानिष्ठताद्दशोभयरूपावच्छेदकत्वस्यविवक्षणादेवंसनिधूमव्यभिचारिवह्निधूमा
वान्वह्नेरित्यादौव्यभिचारविषयितायांताद्दश्यांव्यभिचारघटितबाधानिरूपितत्वसत्वाद्व्यभिचारघटितबाधसंग्रहायसामान्यपदं॥
नन्चेवंसनिघटोवृत्तिरित्यादौघटावच्छिन्नबाधेऽव्याप्तिस्तत्रघटावच्छिन्नविषयितायांपूर्वोक्तयुक्त्यास्वरूपसंबंधरूपप्रतिबंधक
तावच्छेदकत्वविरहेणस्वपदेनघटादेरुपादानायोगादितिवाच्यं॥स्वावच्छिन्नविषयतानिरूपितप्रकारतानिष्ठोभयरूपावच्छेद
कताकत्वस्यैवस्वावच्छिन्नविषयकत्वावच्छिन्नेत्यनेनविवक्षणात्॥अत्रेपियद्यद्रूपावच्छिन्नविषयतानिरूपितप्रकारतानिरुक्तोभ
यरूपावच्छेदकत्ववतितत्तद्रूपावच्छिन्नविषयितान्यतमत्वसामानाधिकरण्येननिरूपितत्वाभावोविवक्षणीयोनिरुक्तस्थलेघटवा

निति साध्यीयघटावच्छिन्नविषयतानिरूपितघटत्वावच्छिन्नप्रकारतायांतादृशावच्छेदकत्वद्वयसत्त्वेनघटावच्छिन्नरूपबाधेऽव्याप्ति
विरहात्॥ नच्चदोषवद्देशतावच्छेदकावच्छिन्नविषयतानिरूपितदोषप्रकारतायाअपितादृशोभयरूपावच्छेदकत्ववत्त्वेनतादृशदेश
तावच्छेदकावच्छिन्नविषयतायास्तादृशविषयितान्यूनमत्वप्रसक्त्यातस्यांदोषनिरूपितत्वाभावमादायासंभवइतिवाच्यं॥ यद्यद्रूपा
वच्छिन्नविषयतानिरूपितप्रकारतात्वावच्छिन्नप्रकारतानिष्ठोक्तोभयरूपावच्छेदकताकत्वस्यत्वावच्छिन्नविषयकरजादावच्छिन्नप्रति
बंधकतायांनिवेशेनदेशादिनिष्ठविषयतानिरूपितदोषविषयतायाविशेष्यतावच्छेदकत्वादनुपपत्त्यभावात्॥ नन्वविशिष्ट
दोषविषयितायांनद्वटकतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपितत्वाभावमादायासंभववारणायायद्यद्रूपावच्छिन्तानिरूपितेत्यनेन
यद्यद्रूपघटितधर्मावच्छिन्तानिरूपितत्वस्ययद्यद्रूपावच्छिन्ताविषयकप्रतीतिनिष्ठत्वस्यवाविक्षणावश्यकत्वेनदोषवद्देशादिविषयिता
यांतादृशदोषतावच्छेदकावच्छिन्तनिरूपितत्वाभावासत्त्वेनैवासंभवाप्रसक्तोदोषवद्देशविषयितान्यावर्तकनिरुक्तोभयरूपावच्छेदक
त्वविशेषणस्यानुपयोगइतिवाच्यं॥ उदासीनघटत्वंपटत्वाद्यवच्छिन्तानिरूपितत्वस्यतादृशविषयितान्यूनमत्वसामानाधिकरण्येनस

त्वान्नन्तद्वच्छिन्नविषयकत्वाभावकूटस्यप्रतीतिविशेषणत्वापेक्षयाद्यद्रूपावच्छिन्ननिरूपितमित्यत्रत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकतेनयद्रूपस्यविशेषणीयतयावक्ष्यतेतद्यावच्छिन्ननिरूपितत्वमादायासंभवानवकाशः॥ एवंसतिदोषवद्दशाविषयितायांतादृश्यांदोषनिरूपितत्वाभावमादायासंभववारणायनिरुक्ताभयरूपावच्छेदकत्वविवक्षाआवश्यकी॥ ननुचैवंबाधविशिष्टव्यभिचारेऽतिव्याप्तिकथनासंगतिर्बाधविशिष्टव्यभिचारविषयकत्वनिष्ठनिरुक्तोभयरूपावच्छेदकताकप्रतिबंधकत्वप्रसिद्धेः॥ यद्यप्यनतिरिक्तवृत्तित्वरूपावच्छेदकतमात्रनिवेशेपिबाधविशिष्टव्यभिचारविषयकत्वव्यापकप्रतिबंधकतानतिरिक्तवृत्तिन्यायेनैकसंबंधेनबाधविशिष्टव्यभिचारनिरूपितविषयितायांमपरसंबंधेनबाधविशिष्टव्यभिचारनिरूपितत्वाभावसत्त्वाद्बाधविशिष्टव्यभिचारत्वावच्छिन्नेतसर्वत्रातिव्याप्तिःसंभवति तथापिकालिकसंबंधावच्छिन्नप्रतियोगिताकायोगालकाभाववद्वह्निहेतुकेधूमेसाध्येकालिकसंबंधेनधूमाभाववदयोगोलकविशिष्टधूमाभाववद्वह्तित्वरूपेबाधविशिष्टव्यभिचारेऽतिव्याप्तिःकालिकसंबंधेनतादृशबाधविशिष्टव्यभिचारविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यांतर्गतहेत्वसिद्धिप्रतिबंधकतानतिरिक्तवृत्तित्वस्यकालिक

संबंधातिरिक्तसंबंधेनबाधविशिष्टव्यभिचारविषयितायामसत्वादितिवाच्यं॥उभयरूपावच्छेदकत्वनिवेशेवह्निधूमवान्वह्नेरित्यत्रधूमा
भावविशिष्टधूमाभाववद्वृत्तित्वविशिष्टवह्नित्वावच्छिन्नएवातिव्याप्तिस्तादृशवह्निविषयितायाधूमाभावत्वावच्छिन्नविषयतानिरूपितव
ह्नित्वावच्छिन्नविषयितात्वेनसाध्यवत्ताबुद्धिंप्रतिबंधकतानिरूपितोभयरूपावच्छेदकत्वस्यधूमाभाववद्वृत्तित्वनिष्ठविषयतानिरूपित
वह्नित्वावच्छिन्नविषयितात्वेनचव्याप्तिबुद्धिंप्रतिबंधकतानिरूपितोभयरूपावच्छेदकत्वस्यचसत्वात्॥विषयितद्वयेऽप्रसंबंधरू
पानतिरिक्तवृत्तित्वरूपयोर्द्वयोरेवावच्छेदकत्वयोरेवोक्तयुक्त्यानिवेशावश्यकत्वेनविषयिताद्वयेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्व
मात्रनिवेशाभिमानमूलकयाः॥अथबाधविशिष्टव्यभिचारविषयकत्वव्यापकप्रतिबंधकतानतिरिक्तवृत्तिव्यभिचारविशिष्टबाधनि
रूपितविषयितायांबाधविशिष्टव्यभिचारनिरूपितत्वाभावसत्वान्नबाधविशिष्टव्यभिचारेऽतिव्याप्तिः॥नन्चह्रदोवह्न्यभाववान्ह्रदव
ह्न्यभाववइतिज्ञानयोरेकरूपेणप्रतिबंधकतयावह्न्यभाववद्ह्रदत्वावच्छिन्नासंग्रहस्तदवच्छिन्नविषयकत्वव्यापकप्रतिबंधकतानतिरि
क्तवृत्तिह्रदवृत्तिवह्न्यभावविषयितायांवह्न्यभाववद्ह्रदत्वावच्छिन्ननिरूपितत्वसत्वादितियत्किंचिद्विषयितेस्वावच्छिन्नविषयकत्वव्याप

कविषयिताशून्यज्ञानीयत्वविशेषणमावश्यकमेवं च व्यभिचारविशिष्टबाधविषयितायाः बाधविशिष्टव्यभिचारविषयकत्वाव्यापकविषयिताशून्यज्ञानीयत्वाभावेन बाधविशिष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तिसंगतिरिति वाच्यं॥ उत्तेजकीभूताप्रामाण्यानुगमेनतादृशज्ञानयोरेकरूपेणप्रतिबंधकतायोगात्प्रथमनचेत्यादिकल्पेऽसंभवमभिधास्यतोग्रंथकर्तुस्तादृशज्ञानयोरेकरूपेणप्रतिबंधकत्वस्यानुमत्तत्वाच्च॥ नन्वमहानसीयवह्नेः साध्यत्वेऽमहानसीयवह्न्यभाववद्ध्रदोवह्न्यभाववद्ध्रदत्वबाधस्तत्रमहानसीयवह्निमत्ताबुद्धिंप्रतिमहानसीयवह्न्यभाववत्ताज्ञानवह्न्यभाववत्ताज्ञानसाधारण्यमहानसीयत्वनिरवच्छेदकतावच्छिन्नंवह्नित्वनिष्ठावच्छेदकतावच्छिन्नंयदवच्छेदकत्वंतदनिरूपकप्रतियोगिताकाभाववत्ताज्ञानत्वेनैकप्रतिबंधकत्वसंभवतितादृशाभावाभाववद्विशेष्यकत्वावच्छिन्नतादृशाभावप्रकारकत्वप्रकारकयत्किंचिद्विषयितेनानुगतेननतादृशज्ञानप्रतिबंधकतायामप्रामाण्यग्रहस्योत्तेजकत्वसंभवात्तथाचमहानसीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताव्यापकप्रतिबंधकतानतिरिक्तवृत्तिवह्न्यभाववद्ध्रदविषयितांशेऽमहानसीयवह्न्यभाववद्ध्रदत्वावच्छिन्ननिरूपितत्वसत्वान्महानसीयवह्न्यभाववद्ध्रदरूपबाधाव्याप्तिवारणाययत्किंचिद्विषयितेत्वावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यज्ञानीयत्वंविशेषणमावश्यकमितिबाधविशिष्टव्यभिचारेतिव्याप्तिसंगतिरितिवा॥

च्यं॥वह्निमत्ताबुद्धिप्रतिबध्यभावबत्ताज्ञानत्वेनप्रतिबंधकतायाः कृत्स्नत्वेननत्साधारण्येकप्रतिबंधकतायांमानाभावात्॥नच्चमहानसीयवह्नि-
मत्ताबुद्धिप्रतिमहानसीयवह्निघटोभयाभावबत्ताज्ञानस्यप्रतिबंधकतावारणायमहानसीयत्वनिष्ठावच्छेदकतानिवेत्यादिदर्शितरूपे
णप्रतिबंधकतायाआवश्यकत्वेनतादृशप्रतिबंधकतायावह्न्यभावबत्ताज्ञानसाधारण्यंकेनवार्यतइतिवाच्यं॥महानसीयत्ववह्नित्वो
भयपर्याप्तावच्छेदकताकप्रतियोगिताघटितरूपेणवह्नित्वविषयतामहानसीयत्वत्वावच्छिन्नविषयतोभयपर्याप्तनिरूपकताकप्र
तियोगितावच्छेदकतीयसांसर्गिकविषयताघटितरूपेणयामहानसीयवह्न्यभावबत्ताज्ञानस्यप्रतिबंधकतयातादृशरूपस्यवह्न्यभा
वबत्ताज्ञानसाधारण्याभावात्॥नच्चदोषज्ञानीयदोषैकदेशविषयितायांदोषनिरूपितत्वाभावसत्वादसंभवद्वारणायतदूपाव—
च्छिन्नविषयिताव्यापकंतादृशप्रतिबंधकतासामान्यंतदूपावच्छिन्नविषयितायामेवतदूपावच्छिन्ननिरूपितत्वाभावोनिवेशनीय
स्तथाचजानित्वादिनाकृदत्वावगाहिज्ञानसाधारण्यतदूपपदस्यवह्न्यभाववदूपत्वावच्छिन्नविषयितांप्रतितादृशप्रतिबंधक
तासामान्यस्यव्यापकत्वाभावेननदूषापत्तिर्द्वारणायतदूपावच्छिन्नविषयितेत्वावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यज्ञा

नीयत्वविशेषणमावश्यकमितिबाधविशिष्टव्यभिचारेऽतिव्याप्तिसंगतिरितिवाच्यं॥तादृशतद्रूपप्रसिध्यर्थंयद्रूपावच्छिन्नविषयक

त्वाव्यापकविषयिताशून्यज्ञानीयत्वस्यैवयद्रूपावच्छिन्नविषयितायांनिवेशनीयत्वात्प्रसिद्धिवारकातिव्याप्तिसंपादकविशेषणदान

स्यानुचितत्वात्॥दोषतावच्छेदकावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यत्वनिवेशेवह्न्यभाववज्जातिमत्कालीनत्वविशिष्टवह्न्य

भाववद्ध्रदेऽतिव्याप्तिश्चवह्न्यभाववज्जातिमत्कालीनत्वविशिष्टवह्न्यभाववद्ध्रदत्वरूपदोषतावच्छेदकतामितस्तावच्छिन्नविषयकत्वा

व्यापकत्वंनवह्न्यभाववज्जातिमत्वावच्छिन्नविषयितायाइतितादृशविषयिताशून्यजातिमान्वह्न्यभाववानितिज्ञानसाधारणवह्न्यभाववद्

ध्रदत्वावच्छिन्नविषयकत्वव्यापकतायास्तादृशप्रतिबंधकतासामान्येऽसत्वाद्वह्न्यभाववद्ध्रदत्वस्ययद्रूपपदेनधर्तुमशक्यत्वात्तद्रूपावच्छि

न्नविषयित्वंनतादृशविषयितान्यतमांतर्गतंकिंतुवह्न्यभाववज्जातिमत्कालीनवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वंतच्चतादृशद्रद

त्वावच्छिन्ननिरूपितमेवेति॥नचबाधाभावविशिष्टबुद्धित्वावच्छिन्ननिरूपितप्रतिबंधकतापिप्रतिबंधकतासामान्यांतर्गतातस्यांचव्य

भिचारविशिष्टबाधत्वावच्छिन्नविषयितानावच्छेदकेतिबाधविशिष्टेऽतिव्याप्तिसंगतिरितिवाच्यं॥व्यभिचारविषयितायाःप्रमेयत्वाभावबुद्धित्वा

वच्छिन्ननिरूपितप्रतिबंधकतानवच्छेदकतावच्छेदकतासंबंधेन यत्वावच्छिन्नव्यभिचाराभावनिवेशात्तेनातिव्याप्तिवारणाय प्रकृतानुमितिप्रतिबंधकतासामान्यस्यैवनिवेश्यत्वात्॥ ननु द्रव्यत्वंवह्निमद्द्रव्यत्वाभाववच्छेवालादित्वादिस्थलीयवह्न्यभाववद्वृत्तिसाध्यविशिष्टवह्न्यभाववद्वृत्तिशैवालरूपव्यभिचारएवातिव्याप्तिस्तत्रव्यभिचारविशिष्टबाधविषयितायांतादृशप्रतिबंधकतासामान्यांतर्गतासिद्धिज्ञानप्रतिबंधकतानवच्छेदकतादितिवाच्यं॥ तत्रापिद्रव्यत्ववद्वह्न्यभाववद्वृत्तिशैवालविशिष्टवह्न्यभाववद्द्रव्यत्वविषयितायास्तादृशतयातत्रत्वावच्छिन्ननिरूपितत्वसत्वात्॥ ननुवह्न्यभाववज्जलाभाक्ववह्निव्यभिचारिजलंवह्निमज्जलादित्वादिस्थलीयवह्न्यभाववज्जलरूपबाधविशिष्टवह्निव्यभिचारिजलरूपेबाधविशिष्टव्यभिचारेऽतिव्याप्तिस्तत्रव्यभिचारविशिष्टबाधविषयितायास्तादृशप्रतिबंधकतासामान्यांतर्गतविशिष्टपक्षत्वावच्छिन्ननिरूपितवह्निव्यभिचारिजलत्वावच्छिन्नधर्मिकवह्न्यभाववज्जलत्वावच्छिन्नप्रकारकनिश्चयत्वावच्छिन्नप्रतिबंधकतायामनवच्छेदकत्वाज्जलत्वसामानाधिकरण्येनैववह्निंतदभावयोर्निवेशान्नदर्शितस्थलीयानुमितेराहार्यत्वशंका॥ यद्यपितादृशबाधविशिष्टव्यभिचारस्यविशिष्टपक्षत्वविरोधिज्ञानविषयतयालक्ष्यत्वमेवेतिशंकासंभवतितथापिजलत्वव्यापकताविशिष्टस्वरूप

संबंधेनवह्न्यभावविशिष्टजलरूपबाधविशिष्टव्यभिचारस्यशुद्धस्वरूपसंबंधेनवह्न्यभावविशिष्टजलविशिष्टव्यभिचारात्मकाश्रयासिद्धिरूप

विशिष्टांतरघटिततयाऽलक्ष्यत्वमेवेतिवाच्यं॥शुद्धस्वरूपसंबंधेनवह्न्यभाववज्जलघटितवह्न्यभाववज्जलविशिष्टंयद्द्रव्यमभिचारि

जलंतद्विशिष्टंयज्जलत्वव्यापकतावच्छिन्नस्वरूपसंबंधेनवह्न्यभाववज्जलरूपंबाधस्वरूपंतदीयविषयित्वमपितादृशप्रतिबंधकतासा

मान्यावच्छेदकंतादृशबाधविशिष्टव्यभिचारानिरूपितंचेतितत्रायातिव्याप्त्यभावात्॥स्वरूपसंबंधेनवह्न्यभाववज्जलाभाववत्ताबुद्धिं

प्रतिस्वरूपसंबंधेनवह्न्यभाववैशिष्ट्यघटितवह्न्यभाववज्जलवत्ताबुद्धेःप्रतिबंधकतायांस्वरूपस्यजलत्वव्यापकतावच्छिन्नस्वरूपस्यचशुद्धरू

पसाधारणस्वरूपत्वेनैवनिवेशात्प्रतिबंधकतैक्यादितिचेदत्रकेचित्॥प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्प·

क्षस्यसत्प्रतिपक्षतामताभिप्रायकंबाधविशिष्टव्यभिचारेऽतिव्याप्तिकथनंतादृशसत्प्रतिपक्षविषयकत्वावच्छिन्नप्रतिबंधकतासामान्या

वच्छेदकंयत्प्रतिहेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षनिरूपितविषयित्वंतत्रसत्प्रतिपक्षनिरूपितत्वाभावसत्त्वात्तादृशसत्प्रतिप

क्षाव्याप्तिवारणाययत्किंचिद्विषयित्वसावच्छिन्नविषयकत्वाव्यापकविषयितात्मून्यज्ञानीयत्वस्यत्वावच्छिन्ननिरूपितत्वस्यवाविशेष

णस्यावश्यकतयाव्यभिचारविशिष्टबाधविषयितायांतादृशविशेषणविरहेणबाधविशिष्टव्यभिचारविषयितायाएवतादृशतयातस्यां
चबाधविशिष्टव्यभिचारनिरूपितत्वाभावासत्वेनबाधविशिष्टव्यभिचारेऽतिव्याप्तेर्दुर्धरत्वादिति पूर्वपक्षसमाधानयोरनवकाशः॥
सत्प्रतिपक्षविषयित्वाव्यापकविषयितावत्वसत्प्रतिपक्षविषयकत्वावच्छिन्नप्रतिबंधकतावच्छेदकविषयितावत्त्वोभयाभाववत्त्वान
दृत्तितादृशयत्किंचिद्दूषणत्वंयादृशयादृशधर्मावच्छिन्ननिरूपितमितिपरिष्कारेनिरुक्तविशेषणस्ययत्किंचिद्दूषयितायामदानेपिदर्शितस
त्प्रतिपक्षसंग्रहव्यभिचारविशिष्टबाधविषयितामादायबाधविशिष्टव्यभिचारासंग्रहयोःसंभवाच्चास्मदुक्तंविषयिताद्वयेनिरुक्तोभ
यरूपावच्छेदकत्वविवक्षणमेवग्रंथकृदभिप्रेतमितिसुधियोविदांकुर्वंतु॥लाघवाद्धाहाथवेति॥अत्रापिपाषाणमयत्वविशिष्टपर्व
तादावतिव्याप्तिवारणायविषयिताद्वयेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वंनिवेशनीयंतादृशदोषवद्दोषादिविषयितामादायासंभववा
रणायव्यभिचारघटितबाधेऽव्याप्तिवारणायस्वरूपसंबंधरूपावच्छेदकत्वमपिनिवेशनीयंयद्धर्मावच्छिन्नविषयकत्वावच्छिन्नभि
त्वंयद्रूपावच्छिन्नविषयतानिरूपितप्रकारकत्वावच्छिन्नत्वंतादृशप्रकारत्वंयद्धर्मावच्छिन्नविषयकत्वान्यतरावच्छिन्नत्वंवार्थः॥य

द्वर्मावच्छिन्ननिरूपितत्वव्याप्यमित्यस्ययद्धर्मावच्छिन्नविषयतानिरूपितप्रकारितात्वव्याप्यतादृशप्रकारितात्वयद्धर्मावच्छिन्ननि
रूपितत्वान्यतरव्याप्यनिर्वाहार्थत्वेननघटोद्वृत्तिरित्यत्रैवंरूपावच्छिन्नरूपबाधेऽव्याप्तिःशेषंपूर्ववद्बोध्यं॥विषयितादृष्टेऽनतिरिक्त
दृत्तित्वरूपावच्छेदकत्वस्यकल्पद्वयेपिनिवेशात्साषाणमयत्वादिविशिष्टपर्वतादावतिव्याप्तिर्विरहाद्विशेषदलंव्यर्थमित्याशयेनाह
समुदितलक्षणार्थइति॥विशेषगुणवद्भिन्नइति॥संख्यान्यत्वंपरिमाणान्यत्वंवाविशेषइतिकेचित्॥घटत्वावच्छेदेनगुणव
त्वमेवेति॥धर्मितावच्छेदकैकदेशव्यापकत्वावगाहनस्यधर्मितावच्छेदकावच्छेदेनबुद्धावनभ्युपगमेनविशेषगुणवद्भिन्नत्वघटत्वोभ
यावच्छेदेनगुणवद्देशावगाहिज्ञानस्यगुणवद्देशसंसर्गिकोवाघटत्वमात्रव्यापकत्वावगाहित्वाभावेनतदप्रतिबध्यज्ञानविषयघट
त्वसामानाधिकरण्येनगुणवत्त्वस्यनिरुक्तस्थलेबाधत्वंनसंभवतीतिभावः॥घटत्वसामानाधिकरण्येनघटत्वावच्छेदेनवेति॥
घटत्वावच्छेदेनविशेषगुणवद्देदस्यपक्षतावच्छेदकघटकत्वेनसामानाधिकरण्येनविशेषगुणवत्वमाश्रयासिद्धिर्घटत्वसामाना
धिकरण्येननस्यपक्षतावच्छेदकघटकत्वेनदवच्छेदेनविशेषगुणत्वमाश्रयासिद्धिरितिभावः॥नप्रवेशइति॥विशेषगुणत्वत्वपर्याप्ता

वच्छेदकतावच्छिन्नप्रतियोगिताकघटत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदवद्द्वितीयक्षणे गुणत्व। द्वितीयक्षणवद्घटरूपाश्रयासिद्धेः घटत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकताकानुयोगिताकघटत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदवद्गुणत्ववद्गुणवद्घटरूपबाधस्याप्रवेशादित्यर्थः॥विशेषगुणाभाववान्द्वितीयादिक्षणावच्छिन्नोघटोगुणसामान्याभाववानिति॥आवश्यकत्वादिति॥घटत्वसमानाधिकरण्येनविशेषगुणवद्द्वितीयक्षणावच्छिन्नघटरूपाश्रयासिद्धौ घटत्वसमानाधिकरण्येनगुणवद्द्वितीयक्षणावच्छिन्नघटरूपबाधेचघटत्वव्यापकतायाविशेषरूपावच्छिन्नायाःसामान्यरूपावच्छिन्नायाचाअघटकत्वादिति भावः॥अत्रेदंबोध्यं॥द्वयोरपेक्षात्वत्तदभावयोर्धर्मितावच्छेदकसामानाधिकरण्यंभिन्नाधिकरणांतर्भावेणसंभावितमितिधर्मितावच्छेदकसामानाधिकरण्येनग्राह्यबुद्धिंप्रतिधर्मितावच्छेदकसामानाधिकरण्येनग्राह्याभावावगाहिज्ञानस्यनप्रतिबंधकत्वंविषयविरोधाभावेवाप्रतिबध्यप्रतिबंधकभावादुपपद्यतएवप्राचीनाःसामानाधिकरण्यंविशेष्यकत्वंज्ञानस्यप्रतिबंधकतायांतंत्रमित्याचुः॥नव्यतार्किकास्त्वप्रतिबध्यप्रतिबंधकान्यतरस्यधर्मितावच्छेदकव्यापकतावगा

हितंप्रतिबध्यप्रतिबंधकभावे तंत्रमित्युररीचक्रुः॥ एवंचात्यंतदभावयोर्द्वितीयक्षणादिरूपाननुगतैककालावच्छेदेनाभिन्नाधिकरणांतर्भावेणधर्मिताच्छेदकसामानाधिकरण्यसंभावितोपपत्तिकमेवेतिरहस्यं॥ अन्यथाभावादौद्वितीयादिक्षणावच्छेदेनघटत्वसामानाधिकरण्यावगाहिबुद्धिंप्रतिप्रात्याभावेद्वितीयक्षणावच्छिन्नेद्वितीयादिक्षणावच्छेदेनघटत्वसामानाधिकरण्यावगाहिज्ञानंनप्रतिबंधकमतएवद्वितीयक्षणावच्छिन्नोनीलघटोगुणसामान्याभाववानितिबुद्धिंप्रतिद्वितीयक्षणावच्छिन्नपीतघटोगुणवानितिज्ञानंनप्रतिबंधकमित्युक्तंभवेत्॥ अन्यथाद्वितीयक्षणादेःस्वरूपसंबंधरूपंघटत्वादेस्तुव्यापकत्वरूपंप्रात्याभावावच्छेदकत्वमवगाहमानस्यैवद्वितीयक्षणावच्छिन्नगुणवानितिज्ञानस्यप्रतिबंधकत्वं॥ ननुचात्यंतकालावच्छिन्नत्वबुद्धिंप्रतिप्रात्याभावेतत्कालावच्छिन्नत्वावगाहिज्ञानत्वेनप्रतिबंधकत्वात्द्वितीयक्षणावच्छिन्नगुणादिरेवबाधादिरितिवाच्यं॥ विषयविरोधस्योक्तरीत्याऽभावेनतादृशज्ञानस्यप्रतिबंधकतायानिर्बीजत्वात्॥ एतेनविशेषगुणवद्भिन्नोद्वितीयक्षणावच्छिन्नघटोगुणसामान्यवद्भिन्नइतिपाठकल्पनमप्यपास्तं॥ वस्तुतस्तुघटोगुणसामान्याभाववानिविशेषगुणाभावादित्यादावच्छेदकावच्छेदेनसाध्यहेतुभावेघटत्वसामा

नाधिकरण्येनविशेषणवृत्तिरूपभागासिद्धेःसामानाधिकरण्येनविशेषणवृत्तिरूपबाधघटितत्वमावश्यकमिति॥ननुप्रतिबंधकतायाघटितलक्षणस्यदीधितिकारेणैवत्याज्यतयेयमव्याप्तिरपितत्यागबीजमध्येप्रवेश्येत्यतआहवस्तुतस्त्विति॥एतेन॥अतोभयत्रापिविषयितानिष्ठस्वरूपसंबंधरूपावच्छेदकत्वविवक्षणेपाषाणमयत्वविशिष्टपर्वतेःनिव्याप्तिरुद्धरणायप्रथमतोःनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेःसाधारण्येःव्याप्तिःपक्षधर्मतासामानकालीनत्वासाधारण्यविषयकत्वोभयाभाववज्ज्ञानवृत्तित्वविशिष्टासाधारण्यविषयिताव्यापकप्रतिबंधकतावच्छेदकविषयिताकहेतुमत्पक्षरूपविशिष्टनिरूपितविषयितात्वव्यापकत्वस्यासाधारण्यनिरूप्यतायामसत्त्वात्॥पूर्वमनिवेश्यपरंत्वेवानतिरिक्तवृत्तित्वनिवेशेःसाधारण्यविषयितानिरूपितसंबंधरूपावच्छेदकताकप्रतिबंधकतानतिरिक्तवृत्तिनिरुक्तोभयाभाववज्ज्ञानवृत्त्यसाधारण्यविषयित्वमेवेतिनासाधारण्येःव्याप्तिर्नवापाषाणमयत्वविशिष्टपर्वतेःनिव्याप्तिःपरंतुजलवद्ध्रदेःनिव्याप्तिस्तद्विषयितानिष्ठस्वरूपसंबंधरूपावच्छेदकताकप्रतिबंधकतानतिरिक्तवृत्तिविषयिताकवह्न्यभाववज्ज्वालादिमद्वृत्तिजलवद्ध्रदरूपविशिष्टविषयितात्वव्यापकत्वस्यजलवद्ध्रदावच्छिन्ननिरूपितत्वेसत्वादत

उभयत्रापिविषयितानिष्ठमवच्छेदकत्वमनतिरिक्तवृत्तित्वरूपंनिवेश्यं॥प्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वव्यापकप्रतिबंधकतानतिरिक्तवृत्तिविषयिताकप्रमेयत्वविशिष्टव्यभिचाररूपविशिष्टनिरूपितविषयितात्वव्यापकत्वस्यप्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्ननिरूप्यत्वेसत्वात्प्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तिवारणायतादृशप्रतिबंधकतंयद्रूपावच्छिन्नविषयित्वव्यापकंतत्तद्रूपावच्छिन्नविषयितान्यतमत्वव्यापकंत्वावच्छिन्ननिरूप्यत्वमितिनिवक्तव्यं॥नचैवंत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिविषयितात्वव्यापकत्वावच्छिन्ननिरूप्यताकधर्मवत्त्वमेववक्तव्यंनतुतादृशविषयिताकविशिष्टनिरूपितेतितथाचतादृशविषयितात्वस्यकेवलव्यभिचारविषयितायामपिसत्त्वान्नप्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिरितिवाच्यं॥अनतिरिक्तवृत्तित्वस्यस्वव्यापकतत्कत्वरूपतयास्वपदस्यतत्तद्व्यक्तिपरतयाद्वोवह्न्यभाववानितिज्ञानीयनिरूप्यनिरूपकाभावापन्नवह्न्यभावादिविषयितासाधारणतत्कत्वविशिष्टविषयितात्वव्यापकत्वस्यस्वावच्छिन्ननिरूप्यत्वेऽसंभवादसंभवारणायतद्रूपावच्छिन्नेत्यादिविवक्षणस्यावश्यकत्वादेतादृशविवक्षातात्पर्यकमेवतादृशविषयिताकविशिष्टनिरूपितेतिध्येयं॥नचैवंदोषवद्देशविषयितासाधारणतादृशवि

पयितान्यतमत्वव्यापकत्वस्यदोषनिरूप्यत्वेऽभावादसंभवइतिवाच्यं॥स्वावच्छिन्नविषयकज्ञानवृत्तित्वेउक्तविषयितान्यतमत्वव्यापकत्वविवक्षणात्॥स्वावच्छिन्नानिरूपितेति॥अत्रस्वावच्छिन्नानिरूपितविषयित्वनिष्ठस्वरूपसंबंधरूपावच्छेदकत्वनिरूपकप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वनिवेशेऽसाधारण्येऽव्याप्तितत्तज्ज्ञानीयप्रतिबंधकतायास्तदनिरूपितहेत्वक्षनिरूपितविषयित्वनिष्ठस्वरूपसंबंधरूपावच्छेदकत्वनिरूपकत्वात्तादृशविषयितात्वव्यापकत्वमेतादृशविषयितानवच्छिन्नत्ववक्तव्यंतथाचहेतुमत्पक्षविषयितायाःकेवलहेतुमत्पक्षज्ञानेपिसत्वात्तदव्यापकत्वंतज्ज्ञानीयप्रतिबंधकतायामव्याहतमितिनाव्याप्तिस्तथापिपाषाणमयत्वविशिष्टपर्वतेऽतिव्याप्तिरतोप्रतिबंधकतावच्छेदकत्वमनतिरिक्तवृत्तित्वरूपमेवनिवेशनीयं॥प्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नानिरूपितघटत्वावच्छिन्नविषयितानवच्छिन्नप्रतिबंधकतावच्छेदकविषयितानिरूपकतावच्छेदकप्रमेयत्वविशिष्टव्यभिचारत्वमादायतदवच्छिन्नेऽतिव्याप्तिवारणायस्वावच्छिन्नाविषयकप्रतीतीतिवृत्तियद्रूपावच्छिन्नविषयितंतद्रूपावच्छिन्नविषयितानवच्छिन्नत्वमेवनिवेशनीयं॥व्यभिचारघटितबाधाव्याप्तिंवारयतांमतमाह॥अत्रकेचिदिति॥साजात्यंचहेत्वाभा

सविभाजकरूपेणेति तथाचत्वसमानाधिकरणहेत्वाभासविभाजकरूपसमानाधिकरणं यदवच्छिन्नाविषयकप्रतीतिविषयता
वच्छेदकंतादृशंरूपंतदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंयत्वंतदवच्छिन्नत्वंस्वसजातीयविशिष्टांतराघटितत्वंफलितं।व
ह्यभाववद्वृत्तित्वरूपस्वसमानाधिकरणहेत्वाभासविभाजकबाधत्वसमानाधिकरणस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकवृ
त्तित्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्यवह्यभाववद्वृत्तित्वरूपस्वपदार्थैः सत्वात्तादृशप्रतीतिविषयतावच्-
छेदकेनातादृशत्वनिवेशात्तादृशत्वंचयद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्येविरोधिज्ञानप्र
युक्तोभयाभावस्वत्वंनातादृशंचरूपंनवृत्तित्वादिकंकिंतुवृत्तित्वंवह्यभावत्वादिकमेवेतिनदोषः॥तच्चरूपंबाधत्वव्यभि
चारत्वादीतिआदिनासत्प्रतिपक्षत्वासाधारणत्वानुपसंहारित्वविरोधित्वाश्रयासिद्धित्वसाधनासिद्धित्वव्याप्यत्वासिद्धित्वस्वरूपासिद्धि
त्वसाध्यासिद्धित्वपरिग्रहः॥तत्रबाधत्वंपक्षेपक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकसाध्येसाध्यतावच्छेदक
वैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नविषयतानिष्ठप्रयोजकताकःपक्षतावच्छेदकावच्छिन्नप्रकारतासा

ध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वाभावो यद्रूपावच्छिन्नविषयताकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तद्रूपवत्वं॥अत्रविषयतानिष्ठप्रयोजकतायांयक्षनातच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपा वच्छिन्नत्वनिवेशान्नाश्रयासिद्धो बाधत्वलक्षणातिव्याप्तिः॥ न वा गुणवद्भिन्नो घटो विशेषगुणवद्भिन्न इत्यादौ गुणवद्वृत्तिरूपाश्रया सिद्ध्यास्वसजातीय याघटितेविशेषगुणवद्वृत्तिरूपबाधादौसामान्यलक्षणाव्याप्तिः॥ विषयतायांतादृशाभावप्रयोजक[illegible]निवेशेउक्तस्थलेब धविषयताया आश्रयासिद्धि विषयत्वाभिन्नतयाआश्रयासिद्धि विषयतायास्तादृशाभाव[illegible]ते बाधविषयताया अपि-तादृशाभावप्रयोजकत्वंभवतीत्यव्याप्तिरतोप्रयोजकतानवच्छेदकरूपावच्छिन्नत्वस्यविषयता[illegible]यांनिवेशस्तथासतिपक्षतावच्छे[illegible]शिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकंयद्विशेष[illegible]विशिष्टगुण[illegible]वावच्छिन्नप्रकारतात्वंतदवच्छिन्नत्वस्यपक्षसाध्यवैशिष्ट्यावगाहित्वाभावप्रयोजकतायांसत्वान्नदोषः॥निरूपितत्वविशिष्टवृत्तित्वपक्षकनिरूपितत्वाभावविशिष्टवृत्तित्वाभाव-साध्यकवृत्तित्वनिरूपितत्वविशिष्टवृत्तित्वरूपबाधेस्वसजातीयनिरूपितत्वविशिष्टवृत्तित्वरूपसाध्यासिद्धिघटितेसामान्यलक्षणाव्या-

मिरतोनादृशप्रयोजकतानवच्छेदकरूपेसाध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजक[illegible]दकत्वनिवेशः॥विषयतायांतादृशावगाहित्वाभावाप्रयोजकत्वमात्रनिवेशेऽक्तबाधसिद्धिविषय[illegible]त्यूर्वोक्तरीत्यातादृशबाधेऽव्याप्तिरतोप्रयोजकतानवच्छेदकरूपावच्छिन्न[illegible]र्वनिवेशः॥अभावेनादृशरूपानवच्छिन्न[illegible]योजकताकत्वनिवेशान्ननिर्वक्तिः[illegible]क्तिमानित्यादावेकदेशेऽदासीनेतद्घटिताश्रयासिद्धौचातिव्याप्तिःसामान्यलक्षणाव्याप्तिर्वा॥यद्यपिनिरुक्तबाधत्वस्ययद्रूपपदेनात्यवह्न्यभाववद्धूदत्वरूपतयातस्यचह्रदनिवह्न्यभावेऽसत्वाद्दह्न्यभाववद्धूदत्वरूपंयत्त्वंतत्समानाधिकरणहेत्वाभासविभाजकनिरुक्तबाधत्वसमानाधिकरणतदवच्छिन्नाविषयकप्रतीतिविषयतत्[illegible]दकतादृशरूपाप्रसिद्धिस्तथापितादृशाभावोयद्रूपावच्छिन्नविषयताकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तत्तद्रूपावच्छिन्नान्य[illegible]धत्वेनसाजात्यंदोषसामान्यलक्षणेविवक्षणीयं॥एवंरीत्यैवव्यभिचारित्वादिनार्पातिनदोषः॥उक्तबाधत्वस्यसत्प्रतिपक्षसाधारण्येपिसत्प्रतिपक्षघटितबाधस्यालक्ष्यत्वादेवनतत्रतादृशसामान्यलक्षणस्याव्याप्तिः॥प्रकृतसामान्यलक्षणघटकंसत्प्रतिपक्षत्वंतुनिरुक्तबाधत्वरूपमेव॥नन्वेवंबाधघटितसत्प्रतिपक्षेसामान्यलक्षणाव्याप्तिस्त[illegible]

तीयबाधरूपविशिष्टांतरघटितत्वादितिवाच्यं॥ बाधघटितसत्प्रतिपक्षस्थलेबाधस्यैवदोषत्वांगीकरणा[illegible]टितसत्प्रतिपक्षस्यालक्ष्यत्वात्॥व्यभिचारत्वंचहेतौहेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावसाध्येसाध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नविषयतानिष्ठप्रयोजकताप्रकृतहेतुतावच्छेदकावच्छिन्नेप्रकृतसाध्यात्यंताभाववद्वृत्तित्वसाध्यतावच्छेदकेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाद्यन्यतमावगाहित्वाभावोयद्रूपावच्छिन्नविषयताकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तद्रूपावच्छिन्नत्वं॥अत्रावृत्तित्वविशिष्टवह्निहेतुकधूमसाध्यकस्थलेवृत्तित्वविशिष्टवह्निरूपहेत्वसिद्धावतिव्याप्तिस्तद्विषयतायाअप्रयोजकहेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोज्योक्तान्यतमाभावप्रयोजकत्वादतस्तद्वारणायविषयतानिरूपकहेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नत्वनिवेशः॥[illegible]लक्षणस्यव्यवहाराप्रयोजकत्वेनातिव्याप्तिर्नक्षतिकरीतिवाच्यं॥तथासतिव्यभिचारत्वेनस्वसजातीयवृत्तित्वविशिष्टवह्निरूपहेत्वसिद्धिरूपविशिष्टांतरघटिततयासामान्यलक्षणस्यतादृशव्यभिचारेऽव्याप्तिरतस्तद्वारणायोक्तविशेषणसार्थक्यात्॥एवंनिरूपितत्वाभाववद्विशिष्टवृत्तित्वसाध्यकप्रमेयत्वहेतुकस्थलेनिरूपित

त्वविशिष्टवृत्तित्वरूपसाध्यासिद्धावतिव्याप्तादृशसाध्यासिद्धिघटितप्रमेयत्वनिष्ठवृत्तित्वाभाववन्निरूपितवृत्तित्वरूपव्यभिचारेसामान्य
लक्षणाव्याप्तिरतस्तद्वारणायसाध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकत्वनिवेशः॥धूमव्यभिचारिवह्निर्धूमवान्व
ह्निरित्याद्याहार्यव्यभिचारस्थलेउदासीनेएकदेशेचातिव्याप्तिरतोविषयताप्रयुक्तत्वनिवेशः॥अत्रसाध्याभावाव्यापकहेत्वभावस्यापिव्यभिचा
रत्वेनतत्राव्याप्तिवारणायव्यतिरेकव्याप्तिरप्यन्यतमभध्येनिवेशनीयाइत्थंचव्यतिरेकव्याप्त्यवगाहित्वाभावंप्रतितद्विषयतायाःप्रयोजकतया
तदवगाहित्वाभावस्यतज्ज्ञानोत्तरानुमितित्वव्यापकत्वाच्चनतत्राव्याप्तिः॥नचव्यतिरेकव्याप्तिनिवेशेवह्त्यादिसाध्यकाभावाप्रतियोगित्व
विशिष्टवाच्यत्वादिहेतुकस्थलेवह्त्यभाववद्वृत्त्यभावाप्रतियोगित्वविशिष्टवाच्यत्वरूपव्यभिचारेऽभावाप्रतियोगित्वविशिष्टवाच्यत्वरूपानु
पसंहारित्वघटितत्वात्सामान्यलक्षणासंभवाद्दितिवाच्यं॥विषयतानिष्ठप्रयोजकतावच्छेदकरूपेहेत्वसाध्यान्यतरस्मिन्नसंताभावप्रति
योगित्वावगाहित्वाभावप्रयोजकतानवच्छेदकत्वनिवेशेनतादृशाव्याप्तिवारणात्॥असाधारणत्वंचपक्षेपक्षतावच्छेदकवैशिष्ट्यावगा
हित्वाभावप्रयोजकतानवच्छेदकसाध्येसाध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नविषयतानिष्ठप्रयोज

कनाकः पक्षतावच्छेदकावच्छिन्नेसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहिज्ञाभावः पक्षधर्मताज्ञानसमानकालीनयद्रूपावच्छिन्नविषयताकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तद्रूपावच्छिन्नत्वं॥ अत्राप्रतियोगित्वविशिष्टजलपक्षकवह्निसाध्यकजलहेतुकेऽसिद्धिघटितासाधारण्यसंग्रहायपक्षेपक्षतावच्छेदकवैशिष्ट्यावगाहिज्ञाभावप्रयोजकतानवच्छेदकत्वनिवेशः॥ एवमवृत्तिवह्निव्यापकीभूताभावप्रतियोगित्वकालीनवह्निमान्जलादित्यादौ वृत्तिवह्निव्यापकीभूताभावप्रतियोगित्वरूपसाध्यासिद्धिघटितजलवृत्तिवह्निव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्येसामान्यलक्षणाव्याप्तिवारणायसाध्येसाध्यतावच्छेदकवैशिष्ट्यावगाहिज्ञाभावप्रयोजकतानवच्छेदकत्वनिवेशः॥ एतादृशासाधारण्यस्यबाधसाधारण्येपिबाधघटितासाधारण्यस्थलेबाधस्यैवदोषत्वोपगमेनतद्घटितासाधारण्यस्यालक्ष्यत्वान्नक्षतिः॥ हेतौहेतुतावच्छेदकवैशिष्ट्यावगाहिज्ञाभावप्रयोजकतानवच्छेदकसाध्येसाध्यतावच्छेदकवैशिष्ट्यावगाहिज्ञाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नविषयतानिष्ठप्रयोजकताकःप्रकृतसाध्यप्रकृतहेत्वन्यतरनिष्ठविशेष्यतानिरूपितज्ञाभावप्रतियोगित्वविषयताकज्ञाभावोयद्रूपावच्छिन्नविषयताकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तद्रूपावच्छिन्नत्वमनुपसंहारित्वं॥ सर्ववाच्यंकांचनमयत्वा

[illegible]कांचनमयमेयत्वादित्यादावभावाप्रतियोगित्वविशिष्टंयत्कांचनमयत्वाभाववत्प्रमेयत्वंतद्रूपानुपसंहारिणिस्वजातीय कांचनमयत्वाभाववत्प्रमेयत्वरूपहेत्वसिद्धिघटितेसामान्यलक्षणाव्याप्तिरतोहेतुनावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकत्वनिवेशः॥एवंसर्वपक्षककांचनमयप्रमेयत्वसाध्यककांचनमयत्वाभाववत्प्रमेयत्वहेतुकेऽभावाप्रतियोगित्वविशिष्टकांचनमयत्वाभाववत्प्रमेयत्वरूपानुपसंहारित्वेकांचनमयत्वाभाववत्प्रमेयत्वरूपसाध्यासिद्धिघटितेसामान्यलक्षणाव्याप्तिरतोसाध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकत्वनिवेशः॥विरो धित्वंतु हेतुनावच्छेदकवैशिष्ट्यावगाहित्वाभाव[illegible]नवच्छेदक साध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नविषयतानिष्ठप्रयोजकताक हेतुतावच्छेदकावच्छिन्नेसाध्यसामानाधिकरण्यावगाहित्वाभावीयरूपावच्छिन्नविषयताकनिश्चयाध्यवहितोत्तरानुमितित्वव्यापकस्तद्रूपावच्छिन्नत्वं॥वह्निसाध्यककांचनमयत्वाभाववज्जलकालीनकांचनमयजलहेतुकेवह्निसमानाधिकरणकांचनमयत्वाभाववज्जलरूपविरोधेकांचनमयत्वाभाववज्जलरूपस्वसजातीयविशिष्टांतरघटितेकांचनमयत्वाभाववह्निकालीनकांचनमयवह्निसाध्यकेजलहेतुकेकांचनमयत्वाभा

वच्छेदकसमानाधिकरणजलरूपविरोधित्वसजातीयत्वाभाववद्वृत्तिरूपसाध्यसिद्धिघटितचरमक्षणत्वनिवारणायहेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकत्वयोर्निवेशः॥ स्वरूपासिद्धित्वंतु हेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकपक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्नविषयतानिष्ठप्रयोजकता[illegible]वच्छेदकावच्छिन्नहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वाभावोयद्रूपावच्छिन्नविषयताकनिश्चयाव्यवहितोत्तरक्षणमितित्वव्यापकसाध्यवदवच्छिन्नत्वं॥पक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकत्वविशेषणप्रयोजनंबाधलक्षणोक्तमेवात्रापिज्ञेयं॥निरूपितत्वविशिष्टवृत्तित्वपक्षकनिरूपितत्वाभावविशिष्टवृत्तित्वाभावहेतुकेवृत्तित्ववन्निरूपितत्वविशिष्टवृत्तित्वरूपरूपासिद्धौस्वजातीयनिरूपितत्वविशिष्टवृत्तित्वरूपहेत्वसिद्धिघटितायांसामान्यलक्षणाव्याप्तिवारणायहेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावप्रयोजकतानवच्छेदकत्वनिवेशः॥विषयताप्रयुक्तःपक्षेपक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावोहेतुमत्पक्षविषयकज्ञानासमानकालीनत्वपक्षतावच्छेदकव्याप-

काभावप्रतियोगित्वविशिष्टहेतुविषयकत्वोभयाभाववज्ज्ञानवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितित्वव्यापकस्वद्रूपावच्छिन्नत्वं आश्रयासिद्धित्वं॥आहार्यस्थलीयाश्रयांसिद्धौस्वसजातीयैकदेशावृत्तितायांसामान्यलक्षणाव्याप्तिवारणायविषयतायुक्तत्वमभावेविशेषणं॥सांप्रदायिकैःकांचनमयद्रव्यवह्निमान्जलादित्यादौकांचनमयत्वव्यापकीभूताभावप्रतियोगिजलस्याश्रयासिद्धित्वस्वीकारात्तत्रचहेतुमत्पक्षकत्वेनसमानकालीनज्ञानस्यैवप्रतिबंधकत्वादसमानकालीनज्ञानोत्तरानुमितौलक्षणघटकोक्ताभावस्यासत्वाद्व्यभिचारतोज्ञानेनिरुक्तोभयाभावनिवेशनं॥विषयतायुक्तःप्रकृतसाध्येप्रकृतसाधनावच्छेदकवैशिष्ट्यावगाहित्वाभावःपक्षधर्मताज्ञानासमानकालीनत्वसाध्यतावच्छेदकव्यापकीभूताभावप्रतियोगिहेतुविषयकत्वोभयाभाववज्ज्ञानवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्वद्रूपावच्छिन्नत्वंसाध्यासिद्धित्वं॥विषयतायुक्तत्वव्याप्तिःपूर्ववत्॥जलंकांचनमयजलवज्जलादित्यादौकांचनमयत्वव्यापकीभूताभावप्रतियोगिजलरूपसाध्यासिद्धावव्याप्तिवारणायज्ञानेउभयाभावनिवेशनं॥विषयतायुक्तोहेतौहेतुतावच्छेदकवैशिष्ट्यावगाहित्वाभावःपक्षधर्मताज्ञानासमानकालीनत्वहेतु

तावच्छेदकव्यापकीभूताभावप्रतियोगिहेतुविषयकलोभयाभाववन्निश्चयवृत्तित्वविशिष्टरूपावच्छिन्नविषयकनिश्चयाव्यवहितो
त्तरानुमितित्वव्यापकस्वरूपावच्छिन्नत्वंहेत्वसिद्धित्वं॥जलंवह्निमत्कांचनमयजलादित्वादौकांचनमयत्वव्यापकीभूताभावप्रतियो
गिजलरूपहेत्वसिद्धावव्याप्तिवारणायोभयाभावोनिश्चयेनिविष्टः॥**अथैवं**साजात्यघटकबाधत्वादिनिर्वचनेपिविशेषगुणवह्निन्नोघ
टोगुणसामान्यवह्निन्नइत्यादौविशेषगुणवह्नटरूपासिद्धावव्याप्तिर्दुर्वारगुणवह्नत्वादिरूपावच्छिन्नान्यतरत्वनिरुक्तबाधत्वस्य
स्वपदार्थविशेषगुणवह्नटत्वसमानाधिकरणहेत्वाभासविभाजकबाधत्वसमानाधिकरणंयत्त्वावच्छिन्ना
विषयकप्रतीतिविषयतावच्छेदकंतादृशंरूपंगुणवह्नटत्वादिनदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्यस्वपदार्थविशेष
गुणवह्नटत्वेसत्वादितिचेन्न॥स्वावच्छिन्नान्यतरवृत्तिहेत्वाभासविभाजकरूपवत्त्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयतासामान्यंनद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंयत्त्वंनदवच्छिन्नत्वमितिरीत्यास्वसजातीयविशिष्टांतराघटितत्वस्यपरिकरणीयत्वात्॥विषयतावृत्तिहेत्वाभासविभाजकबाधत्वादिकंचनिरुक्तवत्तद्रूपावच्छिन्नविषय

तान्यतमत्वादिरूपमेव॥ तथाच गुणवह्नित्वरूपयद्व्यावच्छिन्नविषयतायां विशेषगुण[illegible]च्छिन्नविषयतावृत्तित्वाद्व्य
विषयतान्यतमत्वरूपस्य हेत्वाभासविभाजकाश्रयासिद्धित्वस्याभावान्नाव्याप्तिः॥ विरोधिविषयताप्रयुक्तत्वदलवैय्यर्थ्यमिति॥
अथ स्वसजातीयविशिष्टेतराघटितनिवेशस्यैव विशेष्यदलस्य वैय्यर्थ्यसंभवे विरोधिविषयताप्रयुक्तत्वदलमात्रवैय्यर्थ्यकथ
नमसंगतं॥ नच ह्रदोवह्निमान्धूमादित्यादौ वह्न्यभावेऽतिव्याप्तिर्वह्न्यभावत्वावच्छिन्नायाह्रदेवह्न्यभाव इतिज्ञानीयविषयतातस्यांहे
त्वाभासविभाजकह्रदवृत्तित्वह्न्यभावत्वावच्छिन्नविषयतात्वरूपबाधत्वसत्वेनस्वपदेनवह्न्यभावत्वमुपादायतदवच्छिन्नविषयतावृ
त्तिहेत्वाभासविभाजकनिरुक्तबाधत्ववद्यत्तदवच्छिन्नाविषयकप्रतीतित्विषयतावच्छेदकंह्रदनिष्ठात्यंताभावप्रतियोगिवह्नित्वावच्छि
न्नविषयतासामान्यंतादृशवह्नित्वावच्छिन्नाविषयकप्रतीतित्विषयतावच्छेदकंयत्त्वंवह्न्यभावत्वंतदवच्छिन्नत्वस्यतस्मिन्नसत्वादतो
विशेष्यदलमावश्यकं॥ तथाचवह्न्यभा[illegible]च्छिन्नविषयकवह्न्यभाव इतिनिश्चयोत्तरजायमानह्रदोवह्निमान्वाह्नेर्व्याप्यधूमवां-
श्चेतनुमितावुभयाभावासत्वान्नातिव्याप्तिरितिवाच्यं॥ स्वावच्छिन्नवि[illegible]वृत्तित्वस्यहेत्वाभासविभाजकरूपेविवक्षणेनैव

वत्व्यभावेऽतिव्याप्तिवारणसंभवात्॥ **यदिच** स्वावच्छिन्नविषयतायांयावत्वाननुसंधानेनविरोधिविषयताप्रयुक्तत्वमात्रवैय्यर्थ्यक-
थनसंगतिरित्युच्यतेतदातुल्ययुक्त्यावह्निमान्ह्रदोनिर्वह्निरित्यादौह्रदेवत्व्यभावइतिज्ञानीयवत्व्यभावत्वावच्छिन्नविषयतायांहेत्वा
भासविभाजकासिद्धित्वसत्वाद्वत्व्यभावत्वावच्छिन्नेऽतिव्याप्तिवारणायविरोधिविषयताप्रयुक्तत्वनिवेशनसार्थक्यसंभवेतद्वैय्यर्थ्यक
थनासंगतेरिति **चेन्न**॥ ह्रदोऽभावानिरूपितप्रतियोगित्ववह्निमान्धूमादित्यादौबाधसाध्यासिध्यनात्मकेऽभावनिरूपितप्रतियो-
गित्वविशिष्टेऽतिव्याप्तिस्तत्रह्रदद्वत्व्यभावप्रतियोगीवह्निरितिबाधज्ञानीयनिरूप्यनिरूपकभावापन्नाभावनिरूपितत्वविशिष्टप्रति
योगित्वावच्छिन्नविषयतायांबाधत्वसत्वेनबाधत्वावच्छिन्नाघटितत्वस्यचाभावनिरूपितत्वविशिष्टप्रतियोगित्वावच्छिन्नेअक्षतत्वा
त्तदतिप्रसंगवारणायस्वपदग्राह्यरूपेयद्रूपावच्छिन्नविषयितासामान्यसमुक्तोभयाभावाधिकरणताप्रयोजकंतद्रूपावच्छिन्ननिरूपित
त्वयद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्येउक्तोभयाभावस्तद्रूपावच्छिन्ननिरूपितोभयाभाववत्त्वावच्छिन्न
विषयितासामान्यकर्तविशेषणमावश्यकं॥ **तथाचा**भावनिरूपितत्वविशिष्टप्रतियोगित्वावच्छिन्नविषयितासामान्यस्यप्रतिबंधकता

नवच्छेदकत्वेनोक्तोभयाभावाधिकरणत्वप्रयोजकतयातादृशरूपावच्छिन्ननिरूपितत्वस्याभावनिरूपितप्रतियोगित्वस्यासिद्धिघटित-
त्वेनयद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरमनुमितिसामान्येउभयाभावस्तद्रूपावच्छिन्ननिरूपितत्वस्यचस्वपदग्राह्याभावनिरूपि
तप्रतियोगित्वावच्छिन्नविषयितासामान्येसत्वेनोभयाभावासत्वेनतादृशप्रतियोगित्वस्यस्वपदेनगृहीतुमशक्यत्वान्नतदवच्छिन्नेऽतिव्या
प्तिः॥ तथाचह्रदोवह्निमान्धूमादित्यादौवह्न्यभावत्वावच्छिन्नविषयितासामान्येयद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमि
तिसामान्येउभयाभावस्तद्रूपावच्छिन्ननिरूपितत्वाभावप्रयुक्तोभयाभावसत्वेनवह्न्यभावत्वादेःस्वपदेनोपादानसंभवेनतदवच्छिन्ने
पूर्वोक्तरीत्याऽतिव्याप्तिवारणायविशेष्यदलसार्थक्यं॥ निर्वह्निःपर्वतोवह्निमानित्यादौघटत्ववह्न्यभावत्वावच्छिन्नविषयितासामान्येउभय
स्यैवपूर्वोक्तरीत्यासत्वेनतदभावासत्वादेवस्वपदेनघटत्ववह्नित्वाद्युपादानायोगेनतदवच्छिन्नेऽतिव्याप्तिविरहाद्विशेषणविषयिताप्रयु-
क्तत्ववैय्यर्थ्यशंकायाःसुसंगतिः॥ नचैवमपिनिर्वह्निःपर्वतोवह्निमानित्यादौवृत्तिवह्निरूपैकदेशेऽतिव्याप्तिःपर्वतवृत्तिर्वह्निरितिज्ञा
नीयवृत्तिवह्नित्वावच्छिन्नविषयतायांहेत्वाभासविभाजकासिद्धित्वस्यानाकारकज्ञानीयविषयितयोरैक्येनवृत्तित्ववान्पर्वतवृ

त्तित्ववान्वृत्तित्ववांश्चवह्निरितिज्ञानीयवृत्तित्वावच्छिन्नविषयितासामान्येऽभयाभावाधिकरणताप्रयोजकत्वसत्वेनतद्वच्छिन्ना
निरूपितत्वाभावप्रयुक्तोभयाभावसत्वेनवृत्तित्वावच्छिन्नस्वरूपेणोपादानसंभवादितितद्वारणायैवविरोधिविषयिताप्रयुक्तत्वंलसार्थक्यंसं
भवत्येवेतितद्वैय्यर्थ्यशंकाऽनुचितैवेतिवाच्यं॥वृत्तित्वावच्छिन्नेऽतिव्याप्तिवारणायस्वावच्छिन्नविषयितासामान्येऽक्तोभयाभाव
मनिवेश्यस्वावच्छिन्नविषयिताधिकरणतासामान्येएवोभयाभावोनिवेशनीयस्तथाचज्ञानभेदेनविषयिताधिकरणतायाभेदावश्यक
त्वेनासमानकालीनज्ञाननिष्ठविषयिताधिकरणतायामुभयाभावाधिकरणताप्रयोजकत्वासत्वेनवृत्तित्वावच्छिन्नविषयिताधि-
करणतासामान्येऽभयाभावासत्वेनवृत्तित्वावच्छिन्नस्यस्वपदेनोपादानायोगेनतद्वच्छिन्नेऽतिव्याप्तिविरहात्॥नचाधिकरणतायामुभया
भावनिवेशेऽसाधारण्यासंग्रहःपक्षधर्मताज्ञानासमानकालीनासाधारण्यज्ञाननिष्ठविषयिताधिकरणतायामुभयाभावाधिकरणताप्र
योजकत्वासत्वेनतद्विषयिताधिकरणतासामान्येनिरुक्तोभयोःसत्वेनस्वपदेनासाधारण्यतावच्छेदकग्रहणायोगादितिवाच्यं॥निरु-
क्तोभयाभाववत्ताद्दशाधिकरणतासामान्येपक्षधर्मताज्ञानासमानकालीनत्वासाधारण्यविषयकत्वोभयाभाववज्ज्ञानवृत्तित्वविशेषणदाने

नतत्संग्रहसंभवात्॥ केचित्तुस्वदृत्तिहेत्वाभासविभाजकस्यस्वान्यस्मिन्नसत्वंतस्यप्रतिव्यक्तिभिन्नत्वादित्यसंभवएकस्वरूपः

वच्छिन्नविषयितात्वप्रयुक्तोभयाभावप्रयोजकाभावाधिकरणतायांज्ञानवैशिष्ट्यप्रयोज्यत्वेसतिस्वावच्छिन्नाविषयकप्रतीतित्वविषयता

वच्छेदकधर्मावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वंतद्धर्मावच्छिन्नाविषयकप्रतीतित्वावच्छेदकतद्धर्मवत

मितिस्वसजातीयविशिष्टांतराघटितत्वंपरिष्करणीयं॥ तथाचवह्न्यभाववद्भूदत्वावच्छिन्नविषयितात्वप्रयोज्यंयद्वह्न्यभाववद्भूदवृ

त्तिवह्न्यभावसत्प्रतिपक्षादिविषयकनिश्चयोत्तरानुमितिसामान्यनिष्पक्षेसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणत्वंतद्भूदवृत्तिवह्न्य

भावसत्प्रतिपक्षविषयितात्वप्रयोज्यमपीतिसत्प्रतिपक्षदूदवृत्तिवह्न्यभावाद्यघटितत्वस्यवह्न्यभाववद्भूदेसत्वाल्लक्षणसमन्वयः॥अभाव

वान्वह्न्यभाववानितिनिश्चयकालीननिश्चयीयाभाववद्भूदत्वावच्छिन्नविषयितात्वप्रयुक्तत्वमादायदोषवारणायज्ञानवैशिष्ट्यप्रयोज्यत्व

विशेषणं॥ तच्चज्ञानवैशिष्ट्यनिरूप्यप्रयोजकताकत्वासाधारण्यविषयितानिष्ठप्रयोजकताकत्वाभावोभयाभाववत्तेननासाधारण्यासंग्र

हः॥ एकदेशीयनिरूप्यनिरूपकभावापन्नविषयितामादायासंभववारणायतादृशविषयितात्वव्यापकरूपावच्छिन्नत्वस्यनिवेशः॥

इत्थं च ह्रदो वह्निमान्धूमादित्यादावेकदेशावत्त्वभावत्वावच्छिन्नेऽतिव्याप्तिवारणाय विशेष्यदलसार्थक्यंपरंतु विरोधिविषयितासंसर्गावच्छिन्नविषयितानिरूपितविषयितासंबन्धावच्छिन्नविषयितानिरूपितविषयितासंबन्धावच्छिन्नविषयितानिरूपितविषयितासंबन्ध

भिचारत्वस्यापि व्यभिचारनिष्ठमेयत्वमितिज्ञानीयव्यभिचारविषयतानिष्ठप्रयोजकतामादायव्यभिचारविशिष्टमेयत्वसाधारण्यंबोध्यं॥ ग-सा-टी
बाधविशिष्टव्यभिचारादाविति॥अयोगोलकंधूमवद्वह्नेरित्यादौधूमाभाववदयोगोलकवृत्तिधूमाभाववद्वृत्तित्वक्रियावच्छिन्न
इत्यर्थः॥अतिव्याप्तेरिति॥अत्रेदंचिंत्यं॥स्ववृत्तीनिस्वविषयतावृत्तीनिवायावंतिहेत्वाभासविभाजकरूपाणितावद्रूपविशिष्टंयद्विशि
ष्टांतरंविशिष्टांतरविषयतासामान्यंवातद्घटितत्वमितिपरिष्कारएवेयमतिव्याप्तिःसंभवति॥यदिचस्ववृत्तीनिस्वविष
यतावृत्तीनिवायावंतिहेत्वाभासविभाजकरूपाणिप्रत्येकंतद्रूपविशिष्टंयद्विशिष्टांतरंविशिष्टांतरविषयत्वंवातद्घटितत्वेसतितद्रूपविशि
ष्टंयद्विशिष्टांतरंविशिष्टांतरविषयत्वंवातद्घटितंयत्स्वंतद्घटितत्वमितिरीत्यापरिक्रियतेतदानेयमतिव्याप्तिः॥बाधविशिष्टव्यभिचा
रित्ववृत्तिबाधत्वविशिष्टविशिष्टांतरबाधघटितत्वेसतिस्ववृत्तिव्यभिचारत्वविशिष्टविशिष्टांतरव्यभिचारघटितत्वसत्वात्तस्यचस्वपदेन
धर्त्तुंशक्यत्वेनतद्घटितत्वस्यबाधविशिष्टव्यभिचारेसत्वात्॥व्यभिचारघटितबाधेस्ववृत्तिव्यभिचारत्वविशिष्टविशिष्टांतरव्यभिचारघ
टितत्वसत्वेपिस्ववृत्तिबाधत्वविशिष्टविशिष्टांतरघटितत्वासत्वेनतस्यस्वपदेनोपादानायोगात्तत्रलक्षणसमन्वयः॥नन्वेवमपिस्ववृत्ति- ८५

व्या[illegible]विशिष्टविशिष्टांतरव्यभिचारघटितंयत्वंधूमव्यभिचारिवह्निमत्वादिविशिष्टंतदघटितत्व[illegible]भिचारघटितबाधेऽसत्वा-
द्धूमव्यभिचारिवह्निमान्धूमवान्वेत्यादौ धूमाभाववद्धूमव्यभिचारिवह्निमत्वावच्छिन्नरूपव्यभिचारघटितबाधाव्याप्तिर्दुर्वारेवेति
वाच्यं॥तदघटितत्वमित्यनेनतदघटितत्वस्य[illegible]हेषयकत्वाव्यापकविषयताकप्रतीतिविषयत्वस्यवाविवक्षितत्वात्
॥यत्तु प्रमेयत्वविशिष्टव्यभिचारवृत्तियावद्धेत्वाभासविभाजकरूपाप्रसिध्यातस्यस्वपदेन[illegible]विशिष्टबाध
विशिष्टव्यभिचारादिकमेवतादृशंतदघटितत्व[illegible]विशिष्टव्यभिचारेसत्वात्तत्राव्याप्तिरित्याहुस्तन्न[illegible]वृत्तिहेत्वाभासविभा
जकोपाधित्वव्यापकतावच्छेदकत्ववृत्तितात्कविशिष्टांतरघटितंयत्वमितिसवृत्तियावद्धेत्वाभासविभाजकरूपेणस्वसजातीय
विशिष्टांतरघटितंयत्वमित्यनेनविवक्षणीयमेवंचबाधत्वव्यभिचारत्वसाधारणबाधविशिष्टव्यभिचारवृत्तिहेत्वाभासविभा-
जकोपाधित्वव्यापकतावच्छे[illegible]स्वस्वपदग्राह्यप्रत्येकंबाधव्यभिचारवृत्तितात्वेऽसत्वाद्बाधविशिष्टव्यभिचारादिकंनतादृशंस्वंकिं
तुप्रमेयत्वविशिष्टबाधविशिष्टव्यभिचारादिकमेवतदघटितत्वस्यतत्राक्षतत्वात्तत्राव्याप्तिर्दुर्वारेवेति॥तदसत्॥प्रमेयत्वविशिष्टव्य

भिचारवारणायानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वसंबंधेनस्वविषयिताव्यापकप्रतिबंधकतावत्त्वरूपस्ववृत्तिहेत्वाभास
विभाजकोपाधित्वव्यापकतावच्छेदकत्वघटकविशिष्टांतरवृत्तितात्कलरूपतादृशविशिष्टांतरघटितत्वस्यस्वपदार्थेविवक्षणेनैव
बाधविशिष्टव्यभिचारवारणसंभवात्॥स्वघटकविशिष्टांतरमित्यनेनस्वविषयिताव्यापकविषयितानिरूपकतावच्छेदकस्वविष
यकप्रतीतिविषयतावच्छेदकावच्छिन्नंस्वविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नंवाविवक्षणीयंतेनस्वविषयकप्रती
त्यवृत्तिस्वविषयिता[illegible]तारूपत्वेस्वपदस्यतत्तद्व्यक्तिपरतयाप्रत्येकंबाधव्यभिचारवृत्तितात्कलरूपोपाधित्वव्याप
कतावच्छेदकत्वाभावाद्बाधविशिष्टव्यभिचारेऽतिव्याप्तिर्दुर्वारेतिशंकानवकाशः॥दोषादिग्रहेति॥दुष्टव्यवहारेनेतद्विशे
षणप्रयोजनंसंभवतीतिध्येयं॥निरुक्तविशेषणावच्छिन्नेति॥विशिष्टांतरघटितत्वविशेषणविशेषितेत्यर्थः॥इदंचफलतोस्व
पदार्थेइष्टव्यं॥व्युत्पन्नतयेति॥व्यभिचारविशिष्टमेयत्वादोदोषत्वव्यवहाराभावानुरोधेनेत्यादिः॥अन्वयितावच्छेदकेति॥दोषपदा
र्थान्वयितावच्छेदकेत्यर्थः॥व्यर्थविशेषणमिति॥दीधितियुक्तप्रयोजनासंगतिरित्यर्थः॥हृदोवह्निमान्धूमादित्यादौहृदनिष्ठत्वस्यभाव

रुदनिष्ठाभावप्रतियोगित्वादेर्धूमेसत्वात्तावत्यर्थतावि वक्षणेपि धूमेदुष्टत्वव्यवहारसंभवादाश्रयासिध्यादीति॥संबंधत्वेनसंबंधस्य विशिष्टबुध्यनियामकत्वाद्येनकेनापीति॥दोषस्यदुष्टपदप्रतिपाद्यतावच्छेदकत्वलाभायव्याचष्टे॥तदवच्छिन्न इति॥एतल्लाभाय प्रकृतहेतुरित्युक्तमिति॥तथाचैकज्ञानविषयतावि शिष्टहेतुतावच्छेदकवत्संबंधेनदोषवत्वमेवतादृशव्यवहारनियामकमितिभावः॥रुदत्वावच्छिन्नपक्षकत्वस्येति॥रुदत्वावच्छिन्नरुदनिष्ठोद्देश्यताकत्वस्येत्यर्थः॥सप्तम्यर्थउद्देश्यत्वंतत्रप्रकृत्यर्थस्यरुदस्याधेयतासंबंधेनान्वयेतद्विशेषणतापन्नंरुदत्वमपिस्वावच्छिन्नत्वसंबंधेनधर्मिपारतंत्र्येणान्वेतीतितादृशार्थलाभः॥वह्नित्वावच्छिन्नसाध्यकत्वस्येति॥वह्नित्वावच्छिन्नवह्निनिष्ठविधेयताकत्वस्येत्यर्थः॥षष्ठ्यर्थविधेयतायांप्रकृत्यर्थस्यवह्नेराधेयतासंबंधेनान्वयेतद्विशेषणतापन्नवह्नित्वस्यस्वावच्छिन्नत्वसंबंधेनधर्मिपारतंत्र्येणान्वयेतादृशार्थलाभः॥अत्रचतादृशोद्देश्यताकत्वतादृशविधेयताकत्वयोरेकत्रह्रदेभितिरित्याऽनुमितावन्वयेरुदोघटवान्भूतलंवह्निमदित्यनुमितिसाधारणतादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताकधर्मावच्छिन्नत्वस्यवह्न्यभाववद्रुदादावसत्वात्तदादायरुदेवह्निसाधनेधूमोदुष्ट

इतिव्यवहारानुपपत्तिरतोतादृशोद्देश्यताकत्वविशिष्टेतादृशविधेयताकत्वान्वयएवोपगंतव्यस्तथाचसतिविशिष्टान्वयस्थलेविधेये उद्देश्यतावच्छेदकावच्छिन्नत्वान्वयस्योत्सर्गसिद्धतयातादृशोद्देश्यताकत्वावच्छिन्नतादृशविधेयताकत्वविशिष्टानुमितिलाभेनतादृशानुमितित्वस्यदर्शितसमूहालंबनानुमितिसाधारण्याभावाज्जोक्तव्यवहारानुपपत्तिरितिध्येयं॥ननुएवमपिपर्वतेवह्निसाधनेधूमोनदुष्टइतिव्यवहारानुपपत्तिस्तादृशपक्षसाध्यहेतुकत्वान्वितानुमितिप्रतिबंधकज्ञानविषयरूपदुष्टधात्वर्थाप्रसिध्यानिरुक्तसंबंधेनतद्भावप्रत्यायनासंभवादितिचेन्न॥तत्रप्रतिबंधकत्वमात्रंदुष्टधात्वर्थउक्तरीत्याऽन्वयलभ्यतादृशपक्षसाध्यकानुमित्यन्वितस्यतत्स्यानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकधर्मावच्छिन्नविषयकज्ञानविषयप्रकृतहेतुतावच्छेदकाधिकरणसंबंधेनाभावरूपकहेतौनञ्प्रतीयतेऽप्रमत्वयस्यतुतात्पर्यग्राहकत्वमेव॥प्रतियोग्यभावान्वयीतिव्युत्पत्तावाग्रहेयथाकाशंनपश्यतीतिव्यवहारइवतादृशव्यवहारस्याप्रामाण्यमेतोपगंतव्यं॥व्याचष्टेपीति॥लक्षणस्यान्यथैवव्याचष्टइतियोजना॥ननुकिमर्थमन्यथाव्याख्यानमतआह॥अन्यथेति॥अतिप्रसंगादिति॥साध्याभाववद्वृत्तित्वविशिष्टसाधनादावित्यादिः॥ज्ञानत्वेप्रतिबंधकतानतिरिक्तवृत्तित्वरूपप्रतिबंधक

तावच्छेदकत्वलाभायाह॥ज्ञानत्वावच्छिन्नमिति॥साधनीयत्वं॥साधनवत्वंसाधनमितियावत्॥आधेयतायाश्चनियामक
तयातत्संबंधावच्छिन्नाधेयताविरहादितिभावः॥अव्याप्तिरिति॥पर्वतोवह्न्यभाववान्नित्यादौपर्वतत्वावच्छिन्ननिष्ठवह्नित्वावच्छि
न्नवत्वरूपबाधादावव्यवच्छेदकतापर्याप्तिघटितलक्षणसत्त्वान्नासंभवः॥पर्वतत्वावच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारकनिश्चय
त्वेपर्वतोवह्न्यभाववान्नित्यनुमितिप्रतिबंधकतावच्छेदकतापर्याप्तिः॥पूर्वोक्तयुक्त्येति॥सामान्यतोऽनुमितिनिष्ठप्रतिबध्यतानिरूपि
तप्रतिबंधकतानिवेशेसमूहालंबनानुमितिमादायातिप्रसंगोऽनुमितित्वव्यापकप्रतिबध्यतेत्यादिरीत्यानिवेशेतादृशप्रतिबध्यता
यादोषज्ञानीयायाअप्रसिद्धिरितिरीत्येत्यर्थः॥वस्त्वंतरमिति॥कृदादिरूपमित्यर्थः॥इत्यपीति॥पूर्वदलेतदनिवेशेकृदन्नित्यभावेऽउ
त्तरदलेतदनिवेशेकृदन्नित्यभावेइति विवेकः॥ननुकिंचिद्रूपावच्छिन्नसाध्यहेतुकानुमितित्वव्यापकत्वनिवेशेदोषोक्तावपि
प्रकृतसाध्यहेत्वोरनिवेशेदोषानुक्तेर्न्यूनतेत्यतआह॥इदमुपलक्षणमिति॥वह्निशून्येति॥देशांतरंप्रभामंडलादि॥व्याव
र्तकविशेषणेति॥वह्निमद्वृत्तित्वविशिष्टत्वपर्वतादिवृत्तित्वादिरूपेत्यर्थः॥उत्तरकालीनार्थकमंयदिति॥उत्तरपदस्योत्तरकाल

परत्वेजन्यमात्रस्यकालोपाधित्वाभावेऽनुमितौतदभेदेनसंभवतीत्युत्तरपदस्यतादृशकालत्वत्यर्थकत्वादरः॥ द्वितीयेति॥अभेदेनधात्वर्थान्वितस्वार्थबोधकपदानांद्वितीयांतत्वमित्येतदर्थकक्रियाविशेषणानांकर्मत्वमित्यनुशासनसिद्धेत्यादिः॥अग्निमिति॥अनाहार्यमानसज्ञानेवेत्यादिकल्पेत्यर्थः॥सार्थकमिति॥ज्ञप्तिरूपज्ञाधात्वर्थक्रियाविशेषणत्वसंपादनायज्ञानपदमुक्तमन्यथामानसपदेनमानसत्वव्याप्यजात्यवच्छिन्नलाभेनतदंशव्यर्थस्यात्तथाचद्वितीयायाःसाधुत्वार्थमेवज्ञानपदमितिध्येयं॥मतांतरमुपन्यस्यति॥उत्तरपदमिति॥अव्यवहितोत्तरार्थकमिति॥अव्यवहितोत्तरकालार्थकमित्यर्थः॥कालाध्वनोरत्यंतसंयोगइत्यनेनेति॥अत्यंतसंयोगविवक्षायांकालवाचकादध्ववाचकाच्चशब्दाद्द्वितीयेत्येतदर्थकेनेत्यादिः॥अधिकरणे॥अधिकरणत्ववाचकाआधेयत्ववाचकावेत्यर्थः॥अत्राधिकरणत्वमात्रेणद्वितीयात्यंतपदवैय्यर्थ्यापत्तेः किंतुसमभिव्याहृतपदार्थतावच्छेदकव्यापकतानिरूपिताधिकरणत्वेतादृशाधिकरणत्वलाभश्चमासमधीतेचैत्रइत्यादौद्वितीयार्थाधिकरणत्वप्रकृत्यर्थस्यमासस्याधेयतावदभावप्रतियोगितावच्छेदकतसंबंधेनस्वावच्छिन्नस्यभेदस्तदाश्रयधर्मवत्तासंबंधेनान्वयादेव॥तादृशधर्मश्चैत्रकर्तृकाध्ययनाधारतात्मेवंचप्रकृतेतदुत्तरमिति

द्वितीयार्थाधारत्वेऽुत्तरपदार्थस्योत्तरकालस्ययद्विषयकनिश्चयोत्तरानुमित्याधारतात्वरूपधर्ममादायतादृशसंबंधेनान्वयःसंभवति परंतुप्रयोजनाभावेनतद्विवक्षणाभावान्नात्यंतसंयोगार्थकद्वितीयासंभवतीत्याशयेनाहव्यापकत्वेति॥निर्वह्निःपर्वतोवह्निमानित्यादौवस्तुमात्रनिश्चयोत्तरानुमितिनिष्ठोभयाभावमादायवस्तुमात्रेऽतिव्याप्तिवारणायययद्विषयकनिश्चयनिष्ठविरोधिविषयिताप्रयुक्तत्वमुपात्तंतच्चव्यवहितपूर्वनिश्चयनिष्ठविरोधिविषयिताप्रयुक्तत्वमादायातिव्याप्तिंवारयितुंनसमर्थमितिनियमविशेषणंव्यर्थमित्यनेनेष्टापत्तिमाह॥अत्रचेति तत्ज्ञानानंतरमिति॥तज्ज्ञानाव्यवहितोत्तरमित्यर्थः॥प्रयोजकत्वादिति॥प्रयोजकत्वनियमादित्यर्थः॥अन्यत्र॥निर्वह्निःपर्वतोवह्निमानित्याकारकाहार्ये॥तादृशोभयाभावस्येच्छाघटितसामग्र्यभावमात्रप्रयुक्ततयाविषयिताप्रयुक्तत्वमेवनास्तिकुतोविरोधिविषयिताप्रयुक्तत्वमितिशंकते॥नचेति॥अनाहार्यस्य॥इच्छानुत्तरस्येत्यर्थस्तथाचनिर्वह्निःपर्वतोवह्निमानित्याकारकज्ञानस्यविरोधिज्ञानप्रयुक्तानुत्पत्तिकत्वेतदसत्त्वदशायामिच्छायाअसत्वेपितदुत्पत्तिरतइच्छायाएवतदुत्पत्तिप्रयोजकत्वमुपगम्यतदभावप्रयुक्तानुत्पत्तिकत्वंवाच्यमितीच्छाघटितसामग्र्यभावस्ये

वनिर्वह्नित्वविशिष्टपर्वतेवह्नित्वविशिष्टवैशिष्ट्यावगाहित्वाभावप्रयोजकत्वमितिभावः॥ विनिगमनाविरहेणपूर्वज्ञानीयविशे- गः सा० टी०
धिविषयितायाअपिप्रयोजकत्वादिति॥अत्रेदंचिंत्यं॥आहार्यज्ञानसामग्र्यभावस्यैवैकस्योभयाभावाधिकरणतावच्छे-
दकत्वकल्पनेउभयाभावाधिकरणतात्वमेकमेवप्रयोज्यतावच्छेदकंसंभवतीतिप्रयोज्यप्रयोजकभावैक्यमधिकरणताविशेषेविरोधि
विषयितायाःप्रयोजकत्वकल्पनेत्वधिकरणताविशेषत्वमेवतत्प्रयोज्यतावच्छेदकमितितदनालीढविशेषांतरेआहार्यज्ञानसामग्र्यभाव
स्यप्रयोजकत्वकल्पनेलाघवमेवविनिगमकंसंभवति॥अन्यथाऽधिकरणताविशेषेवस्तुमात्रविषयितायाःविनिगमनाविरहेण
प्रयोजकत्वंकोवारयेदिति॥वस्तुतस्तुलक्षणेउभयाभावशब्देनोभयाभावप्रयोजकीभूताभावस्यैवार्थेविवक्षणीयतयावह्नि-
मत्पर्वतादिरूपाश्रयासिद्धिविषयितायाउभयाभावेतदधिकरणत्वेवाप्रयोजकत्वाभावेप्युभयाभावप्रयोजकीभूतेतत्तद्धर्मावच्छि-
न्नप्रतियोगिकत्वावच्छेदकवैशिष्ट्यावगाहित्वाभावेप्रयोजकतायांविवादाभावेनलक्षणसमन्वयःसुघट एव॥उभयाभावप्रयोजकीभूताभावस्य- ८९
त्वप्रयोजकत्वंस्वरूपसंबंधरूपानुभयवदवृत्तित्वपर्यवसितमुभयाभावव्याप्तिरूपंवाग्रात्यमितितत्त्वं॥तादृशविशिष्टविष-

यिसासामान्यप्रयुक्तेति॥अत्रयादृशविशिष्टविषयितात्वाव्यापकविषयितात्वंतानवेशावश्यकत्वेसा
मान्यपदव्यावृत्तिःपूर्वरीत्यावसेया॥अव्यवधाननिवेशइति॥अत्राव्यवहितत्वंयदिस्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वं
सानधिकरणत्वंतदाऽलौकिकदोषज्ञानात्पूर्वंपंचक्षणेर्जायमानायामनुमितावपितत्सत्वाद्दोषविषयकलौकिकनिश्चयमादायोत्त
रत्वनिवेशव्यावृत्तिकथनेबीजाभावइतिस्वरीत्यावृत्तिरुक्तेति[illegible]तदभिप्रेतं॥उत्तरत्वंस्वाधिकरणक्षणध्वंसाधिकरणत्वंत
थाचस्वावृत्तिरुक्तिमत्वेसतिस्वाधिकरणक्षणध्वंसाधिकरणक्षणावृत्तिविशेषणकालीनत्वमनुमितौविशेषणंफलितं॥दोषविष
यकलौकिकेति॥लौकिकत्वंदोषविशेषजन्यत्वमत्रविवक्षितंतेनह्रदोवह्निमानितिप्रत्यक्षस्यविशेषणवह्निशेष्यसंन्निकर्ष
जन्यत्वरूपलौकिकत्वस्यतेनासंभवेपिनक्षतिः॥आहार्यस्यासार्वत्रिकत्वमुपेत्याहाव्याप्तेति॥वह्न्यभाववान्ह्रदोवह्निमानित्याहार्यपक्षतावच्छेदकतादिपर्याप्तिघटितोभयाभावसंभवेपिह्रदोवह्न्यभाववानितिनिश्चयोत्तरमिच्छाजन्यकेव
लह्रदोवह्निमानित्याहार्यह्रदोधूमवान्धूमव्यभिचारिवह्निमानित्याहार्यसंभवइति ध्येयं॥अत्रावच्छेदकावच्छेदेनसाध्यक

स्थलीयलक्षणंपक्षतावच्छेदकत्वविशिष्टसंयोगादिसंबंधावच्छिन्नसाध्यप्रकारकत्वघटितोभयाभावघटितंसामानाधिकरण्येनसाध्यकस्थलीयंकेवलसंयोगादिसंबंधावच्छिन्नसाध्यप्रकारकत्वघटितोभयाभावघटितंभिन्नभिन्नमेववाच्यं॥ उभयसाधारणमेकंतुनसंभवतितत्रकेवलसंयोगादिसंबंधनिवेशेऽवच्छेदकावच्छेदेनसाध्यकेसामानाधिकरण्येनबाधादावव्याप्तेर्व्यापकत्वविशिष्टसंयोगादिसंबंधनिवेशेसामानाधिकरण्येनसाध्यकेसामानाधिकरण्येनबाधादावतिव्याप्तेरितिबोध्यं॥ तादृशोभयाभावप्रयोजकविरोधिविषयितावत्वमिति॥ तादृशोभयाभावप्रयोजकतावच्छेदकतात्पर्यातिरिक्ताधिकरणधर्मविशिष्टविरोधिविषयिताधिकरणत्वमित्यर्थस्तेनपर्वतोवह्निमान्धूमादित्यादौपाषाणमयत्वविशिष्टपर्वतेनातिव्याप्तिः॥ साध्यनिष्ठाभावप्रतियोगित्वादिरूपानुपसंहारित्वेअव्याप्तिरिति॥ नन्वन्वयव्याप्तिनिवेशेसाध्याभाववद्वृत्तित्वरूपव्याप्तेरपिनिवेशात्तत्राभावांशेसाध्याभानेसाध्येऽभावप्रतियोगित्वभानस्यतुल्यविशिष्टत्वसिद्धतयातज्ज्ञानविरोधितयासाध्यनिष्ठात्यंताभावाप्रतियोगित्वरूपानुपसंहारित्वसंग्रहःसंभवतीतिचेन्न॥ साध्याभावव्यधिकरणत्वरूपव्याप्तिशरीरेप्रतियोगितासंबंधेनसाध्यस्यनिवेशादसमानप्रकारकज्ञानस्याविरोधितयातादृशानु

पसंहारित्वसंग्रहानुपपत्तेः॥ [redacted]साध्यनिष्ठाभावाप्रतियोगित्वमादिर्यस्यतच्चतदनुपसंहारित्वंचेतिविग्रहेऽनुभवेज्ञानबहुव्रीहिणाग्रंथकृताव्यवस्थापनीयसाध्याभावाव्यापकत्वविशिष्टहेत्वभावरूपानुपसंहारित्वएवाव्याप्तिर्विवक्षितेतिनदोषः॥तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नाभावतद्व्याप्यान्यतरविषयतेति॥तद्रूपावच्छिन्नविषयतानिरूपितायातद्रूपावच्छिन्नाभावत्वावच्छिन्नविषयतातद्रूपावच्छिन्नाभावव्याप्यत्वावच्छिन्नविषयतेतदन्यतरविषयतेत्यर्थः॥वह्त्यभाववद्ह्रदकालीनोवह्त्यभावव्याप्यवद्ह्रदकालीनोवापर्वतोवह्निमानित्यादौसिद्धिविषयवह्निमत्पर्वतेऽतिव्याप्तिवारणायनिरूपितत्वांतं॥वह्त्यभाववत्यांशेनमयूखकालीनपर्वतोवह्निमानित्यादौसिद्धिविषयवारणायतत्रतद्रूपावच्छिन्नेति॥तद्रूपपर्याप्तावच्छेदकताकेतितन्निरूपितवह्त्यभावत्वावच्छिन्नमयूखकालीनपर्वतोवह्निमानित्यादौसिद्धिविषयेनातिव्याप्तिः॥तद्रूपावच्छिन्नाभावस्तद्रूपावच्छिन्नरूपाभावप्रतियोगितावच्छेदकावच्छिन्नस्तेननिर्वह्निःपर्वतोवह्निमानित्यादावाश्रयासिध्यात्मकवह्निमत्पर्वतविषयतासंग्रहः॥तद्रूपावच्छिन्नाभावनिष्ठविषयतानिवेशेपर्वतोवह्निमान्द्रव्याभावादित्यादौसिद्धिविषयेतिव्याप्तिरतस्तद्रूपावच्छिन्नाभावत्वावच्छिन्नविषयतानिवेशः॥एवंतादृशाभावव्याप्यनिष्ठविषयतानिवेशेशेवाल-

साध्यैकवह्निहेतुकेसिद्धिविषयेऽतिव्याप्तिरतस्तादृशव्याप्यत्वावच्छिन्नविषयतानिवेशः॥साध्यवद्भेदश्चस्वरूपेणैवनिवेश्यः॥पक्षधर्मताज्ञा
नकालीनज्ञानीयहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावव्याप्यत्वावच्छिन्नविषयतास्वरूपेणनिवेश्यातेननासाधारण्यासं
ग्रहः॥नन्वेवंविरोधिविषयतानिर्वचनेघटःपृथिवीभिन्नइत्यादौस्वरूपतोपृथिवीत्वघटितबाधेऽव्याप्तिरतद्विषयतायाःपृथिवीभेदत्वा
वच्छिन्नाभावत्वावच्छिन्नप्रकारतानिरूपितज्ञानाभावात्॥एवंघटोनपृथिवीत्यादौघटावच्छिन्नरूपबाधेकांचनमयपर्वतोवह्निमान्धूमादित्यादौकां
चनमयत्वव्याप्यकीभूताभावप्रतियोगिधूमरूपाश्रयासिद्धौहृदनिष्ठाभावप्रतियोगिवह्निरूपबाधेचाव्याप्तिः॥एवंपर्वतत्वसामानाधिकर
ण्येनवह्नेःसाध्यत्वेपर्वतत्वसामानाधिकरण्येनवत्त्वाभावस्यहेतुत्वेपर्वतत्वसामानाधिकरण्येनसिद्धिविषयेवह्निमत्पर्वतेऽतिव्याप्तिस्त
द्विषयतायामपिनिरुक्तविरोधिविषयतात्वसत्त्वात्॥तादृशान्यतरविषयतायासुभयाभावप्रतियोगिकोयोयेनसंबंधेनयत्रयद्वगाहित्वंनि
विष्टंतत्रतेनसंबंधेनतद्वगाहिज्ञानत्वावच्छिन्ननिरूपितप्रतिबंधकतावच्छेदकत्वविवक्षयातद्विषयतायाविरोधिविषयतात्ववारणेनि
र्वह्निर्वह्निमान्धूमादित्यादावव्याप्तिस्तादृशविरोधिविषयतात्वप्रसिद्धेरतोनिरुक्तंविरोधित्वमाह॥साध्यवत्पक्षविषयतावहिर्भूतेति

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतावहिर्भूतेत्यर्थः॥पर्वतोवह्निमान्द्रव्याभावादित्यादौस्व
रूपासिद्धिविषयतायाविरोधित्वनिर्वाहायप्रकारतायांसाध्यतावच्छेदकावच्छिन्नत्वनिवेशः॥तच्चसाध्यतावच्छेदकपर्याप्तावच्छेदक
ताकत्वं॥तेनमहानसंवह्निमन्महानसीयवत्द्रव्याभावादित्यादौस्वरूपासिद्धिविषयतायानविरोधिविषयत्वात्नुपपत्तेः॥इत्थंवह्निम
द्द्रव्याभावविशिष्टपर्वतादित्यादौहेत्वसिद्धिविषयतायांविरोधिविषयतात्वनिर्वाहायतादृशप्रकारतानिरूपितविशेष्यतायांपक्षता
वच्छेदकावच्छिन्नत्वनिवेशः॥तच्चपक्षतावच्छेदकपर्याप्तावच्छेदकताकत्वं॥द्रव्यवृत्तित्वंघटवृत्तित्वंघट्यादित्यादौघटवृत्तित्वाभाव-
वद्वृत्तित्वंघटवृत्तीत्याकारकव्यभिचारज्ञानीयविषयतायानविरोधित्वानुपपत्तिः॥यद्यपितादृशविशेष्यताभिन्नत्वंनतादृशविशेष्य
तावहिर्भूतत्वंपर्वतोवह्निमानितिज्ञानीयप्रकारतायास्तादृशविशेष्यताभिन्नत्वात्सिद्धिविषयाऽतिव्याप्तेरवारणात्तथापितादृशविशे
ष्यताघटकविषयताभिन्नत्वमेवतादृशविशेष्यतावहिर्भूतत्वंतादृशविशेष्यताघटकत्वंचतादृशविशेष्यतावन्निष्ठभेदप्रतियोगितानव-
च्छेदकत्वंदर्शितवह्नित्वावच्छिन्नप्रकारतायास्तादृशविशेष्यतावन्निष्ठभेदप्रतियोगितानवच्छेदकतयाघटकविषयताभिन्नत्वाभा

वान्नसिद्धिविषयेऽतिव्याप्तिः॥ तादृशविशेष्यतावन्निष्ठभेदप्रतियोगितावच्छेदकत्वमेववाबहिर्भूतांतरविवक्षणीयमभाववद्व्यनिवेशेप्रयो
जनाभावात्॥ सिद्ध्यात्मकज्ञानीयविषयतानामपिविषयभेदभिन्नानांचालिनीन्यायेनतत्तद्व्यक्तित्वेनतादृशविशेष्यतावन्निष्ठभेदप्रतियोगितावच्छेदक
त्वात्सिद्धिविषयातिव्याप्तिवारणंदुर्घटमितिवाच्यं॥ तादृशभेदप्रतियोगितावच्छेदकतावच्छेदकोक्तोभयाभावाधिकरणताप्रयोजकता
वच्छेदकविषयतात्वक्त्वस्यविवक्षणीयतयासिद्धिविषयतायास्तत्तद्व्यक्तित्वेनतादृशभेदप्रतियोगितावच्छेदकत्वेप्युक्तोभयाभावा
धिकरणताप्रयोजकतावच्छेदकनिरूप्यनिरूपकभावापन्नविषयतात्वस्यतादृशविशेष्यतावत्सिध्यात्मकज्ञाननिष्ठभेदप्रतियोगिता
वच्छेदकतावच्छेदकत्वविरहेणसिद्धिविषयेऽतिव्याप्तिवारणात्॥ यदिचैवमपिपाषाणमयःपर्वतोवह्निमान्पाषाणमयत्वाभाववत्व
र्वतकालीनधूमादित्यादौपाषाणमयत्ववत्सर्वतरूपहेत्वसिद्धावव्याप्तिस्तद्विषयतात्वस्यतादृशविशेष्यतावन्निष्ठभेदप्रतियोगिता
वच्छेदकतावच्छेदकत्वाभावात्॥ साध्यविशिष्टपक्षविषयतांतःपातित्वपक्षेसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वाभावाप्रयोजकत्वेभ
यभावरूपंविरोधित्वंनिरुच्यदर्शितहेत्वसिद्धिसंग्रहेपर्वतोवह्निमान्धूमादित्यादौसाध्यव्याप्यहेतुमत्पक्षेऽतिव्याप्तिस्तज्ज्ञानस्यसिद्धि

विधयासमूहालंबनानुमितिप्रतिबंधकतयानद्विषयतायांपक्षेसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वाभावाप्रयोजकत्वविरहेणोभयाभावरूप
विरोधित्वानपायादिति विभाव्यतेतदातादृशविशेष्यत्वावच्छिन्नभेदप्रतियोगितानवच्छेदकत्वमेवतादृशविशेष्यतावहिर्भूतत्वं
वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नायानिरूप्यनिरूपकभावापन्नविशेष्यतायास्तादृशविशेष्यत्वावच्छिन्नभेदप्रतियो-
गितावच्छेदकत्वेपिपाषाणमयत्ववान्पर्वत इतिज्ञानीयपाषाणमयत्वविशिष्टपर्वतत्वावच्छिन्नायाहेत्वसिद्धिविषयतायास्तादृशभेदप्र-
तियोगितानवच्छेदकत्वान्नहेत्वसिद्धावव्याप्तिःसिध्यात्मकज्ञानीयवह्नित्वावच्छिन्नप्रकारतायाअवच्छेदककुक्षिप्रविष्टानामवच्छेद
कतयातादृशभेदप्रतियोगितावच्छेदकतयातदनवच्छेदकत्वाभावान्नसिद्धिविषयातिव्याप्तिरपि॥ननवेवंहेत्वसिद्धावव्याप्तिरित्यभावद्वान्वह्नेरि-
त्यादौस्वरूपसिद्धावव्याप्तिस्तद्विषयतायास्तादृशभेदप्रतियोगितानवच्छेदकत्वविरहादिति वाच्यं॥तादृशविशेष्यत्वावच्छिन्नभेदप्रति
योगितावच्छेदकत्वपक्षेसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वाभावाप्रयोजकत्वाभावस्यैवानवच्छेदकत्वांतेनविवक्षणात्॥साध्यव्याप्यहे
तुमत्पक्षविशेष्यत्वावच्छिन्नभेदप्रतियोगितानवच्छेदकत्वमपिविशेषणंदेयंतेननसिद्धिविषयेसाध्यव्याप्यहेतुमत्पक्षेऽतिव्याप्तिः॥

शैवमपिसुंदरदंडिपुरुषसाध्यकेसाध्यप्रकारकसिध्यात्मकज्ञानीयायाःसौंदर्यनिष्ठप्रकारतानिरूपितदंडत्वावच्छिन्नविषयतायाःसुंदरदंडविशिष्टपुरुषत्वरूपसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छिन्नभेदप्रतियोगितावच्छेदकतादृशपुरुषत्वावच्छिन्नप्रकारताघटकत्वाभावेनतादृशभेदप्रतियोगितानवच्छेदकतयोक्तविरोधिविषयतयानिरूप्यनिरूपकभावापन्नायास्तस्यास्तादृशोभयाभावाधिकरणताप्रयोजकत्वेनचसिद्धिविषयेऽतिव्याप्तिर्दुर्वारेवेतिचेन्न॥विशिष्टसाध्यकेतद्घटकपदार्थस्यनिरूप्यनिरूपकभावापन्नविषयतानिरूपितसाध्यप्रकारतायाएवसाध्यतावच्छेदकावच्छिन्नप्रकारतयाविवक्षितत्वादेवंपक्षतावच्छेदकावच्छिन्नविशेष्यत्वादिकमपि॥यद्वासाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबंधकतानवच्छेदकत्वंभवतादृशविशेष्यताबहिर्भूतत्वंविवक्षितंनिरुक्तसाध्यकेसौंदर्यनिष्ठप्रकारतानिरूपितदंडत्वावच्छिन्नविषयतायानिरूप्यनिरूपकभावापन्नायास्तादृशविशेष्यतावच्छिन्नप्रतिबंधकतायाअनवच्छेदकत्वान्नसिद्धिविषयेऽतिव्याप्तिः॥ननुहृदोवह्निमान्धूमादित्यादौधूमाभावविशिष्टहृदरूपस्वरूपासिद्धेर्व्याप्तेस्तदीयविषयतायाहृदत्वावच्छिन्नेएकत्रह्रदेवह्यभिरीत्याजायमानव

क्रिधूमाभावावगाहिज्ञानीयवह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्नतयातदवच्छिन्नप्रतिबंधकत[illegible]दकलविरहाद्धे
दस्यव्याप्यवृत्तितयाधूमाभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नवि[illegible]नापितादृ[illegible]प्रतिबंधक[illegible]त्वायोग
दिति वाच्यं॥साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वावच्छिन्नविषयतानिष्ठावच्छेदकताकप्रतिबंधकतानवच्छेदकत्वस्य
विवक्षितत्वात्॥तादृशनिरूपितत्वावच्छिन्न[illegible]नेरूपितत्वपर्याप्तावच्छेदकताकत्वमतोऽहोवह्निमत्वप्रकारकप्रमाविशेष्य
त्ववान्धूमादित्यादौयत्रधूमाभावस्यतादृशप्रमाविशेष्यतात्वधूमाभावत्वोभयरूपेणभानंतादृशज्ञानीयसाध्यतावच्छेदकस्वरूपसंबं
धावच्छिन्नसाध्यता[illegible]ताद्दशप्रमाविशेष्यतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्रतिबंधकतायांधूमाभाववद्ह्र
दत्वावच्छिन्नविषयतायाअवच्छेदकत्वेपिनस्वरूपासिद्धावव्याप्तिः॥[illegible]मपिघटवृत्तित्वाभाववद्वृत्तित्वंघटवृत्तिघटादित्यादौ
घटवृत्तित्वाभाववद्वृत्तित्वंघटवृत्तीत्याकारकव्यभिचारज्ञानीयविषयतायास्तादृशविशेष्यत्वावच्छिन्नप्रतिबंधकतानवच्छेदकत्व
विरहात्तादृशव्यभिचारेऽव्याप्तिरेवं पर्वतोवह्निमान्वत्यभाववत्सर्वतकालीनधूमादित्यादौवह्निमत्सर्वतरूपहेत्वसिद्धावव्याप्तिः॥

वह्निमत्पर्वतरूपहेतुसिद्धिविषयतायास्तादृशविशेष्यतावच्छिन्नसिद्धिप्रतिबंधकतायामवच्छेदकत्वात्॥ऊर्दोवत्यभाववान्ह्रदोरित्यादौ वत्यभाववद्ध्रदरूपपक्षरूपासिद्धावव्याप्तिश्चेति चेन्न॥तादृशप्रतिबंधकतावच्छेदकत्वपक्षेसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वाभावा प्रयोजकत्वोभयाभावस्यैवानवच्छेदकतांतेनविवक्षणात्॥साध्यव्याप्यहेतुविशिष्टपक्षविशेष्यतावच्छिन्नप्रतिबंधकतानवच्छेदकत्वस्यापिस्वातंत्र्येणविशेषणत्वान्नसिद्धिविषयेसाध्यव्याप्यहेतुमत्पक्षेऽतिव्याप्तिरपि॥**नन्वेवमपि**निर्वह्निर्वह्निमानित्यादिस्थलीयदोषोऽव्याप्तिस्तादृशादिद्योतकपदोत्तरच्छिन्नप्रतिबंधकत्वप्रसिद्धेरिति**चाच्यं**॥तादृशाव्याप्तेरत्रपदंतार्तिकल्पेऽस्वरसबीजत्वस्यग्रंथकृतैववक्ष्यमाणत्वात्॥**यदिन्च**विरोधिविषयतायाप्रसिद्धिनिबंधनाव्याप्तिर्नास्वरसबीजतयावक्ष्यतेकिंतूभयाभावेविरोधिविषयतायाःकृत्वाभावनिबंधनाव्याप्तिरेवेति**सूक्ष्ममीक्ष्यते**तदाप्रतिबंधकतास्थानेतादृशविशेष्यतावच्छिन्नकारणतैवनिवेश्येति**शिवं**॥**वस्तुतस्तु**निर्वह्निर्वह्निमानित्यादिस्थलीयदोषसंग्रहायात्रपदंतीतिकल्पस्यवक्ष्यमाणधर्मितावच्छेदकतयासाध्याप्रतिबंध्यप्रतिबंधकभावएवग्रंथकृन्निर्भरात्साध्यप्रकारकानुमितित्वाभावप्रयोजकतानवच्छेदकरूपविशेषितविषयताविरोधिविषयतापदेनविवक्षिताऽदोवत्यभा

वत्वानित्यादिज्ञानीयवह्न्यभावत्वावच्छिन्नप्रतियोगिताकत्वादृदृत्वाद्यवच्छिन्नविषयतानिरूपितवह्नित्वाद्यवच्छिन्नप्रकारकत्वाभाव एव प्रयोजकत्वं नतु वह्नित्वावच्छिन्नप्रकारकानुमितित्वाभाव इति वह्न्यभाववद्धूमादेर्लक्षणसमन्वयः॥ सिद्धिविषयतायास्त्वतादृशानुमितित्वाभाव एव प्रयोजकत्वान्नसिद्धिविषयेऽतिव्याप्तिः॥ ननु पर्वतो वह्निमान्वह्न्यभाववत्सर्वतकालीनधूमादिसाद्यो वह्निमत्सर्वतरूपहेत्वसिद्धावव्याप्तिस्तद्विषयतायाअनुमितित्वाभावेप्रयोजकत्वादिति शंक्यं॥ उभयाभावप्रयोजकतावच्छेदकस्यानुमितित्वाभावप्रयोजकतानवच्छेदकत्वविवक्षयाअनुमितिजनकसकलकारणसमवधानकालीनसिद्धेरेवानुमितिप्रतिबंधकतयातादृशयावत्कारणसमवधानकालीनाप्रामाण्यज्ञानानामेवसिद्धावुत्तेजकतयातादृशाप्रामाण्यज्ञानाभावविशिष्टसिद्धिविषयतात्वस्यानुमितित्वाभावप्रयोजकतावच्छेदकत्वेऽप्युभयाभावप्रयोजकतावच्छेदकसकलाप्रामाण्यज्ञानाभावविशिष्टहेत्वसिद्धिज्ञानीयविषयतात्वेऽनुमितित्वाभावप्रयोजकतानवच्छेदकत्वाक्षतेः॥ हेत्वसिद्धिज्ञानप्रतिबंधकतायांसकलकारणसमवधानासमवधानकालीनानांसर्वेषामेवाप्रामाण्यज्ञानानामुत्तेजकत्वात्॥ ननु बाधविषयतायाअपिवह्नित्वावच्छिन्नप्रकारतानिरूपितवृत्तित्वावच्छिन्नविशेष्यतायाशालीच्छानिष्ठवह्निप्रका

रकज्ञानत्वाभावप्रयोजकत्वंविशिष्टाभावप्रयोजकस्यविशेष्यवन्निष्ठविशेषणाभावप्रयोजकत्वद्विशेषणवन्निष्ठविशेष्याभावप्रयोजकता

दावरूपंतथा व्यापकाभाव[illegible]व्याप्याभावप्रयोजकतादृष्टांतेनबाधादिविषयतायामनुमितित्वाभावप्रयोजकत्वादसंभव इत्याह ॥अनाहार्यज्ञाननिष्ठानुमितित्वाभावप्रयोजकतानवच्छेदकत्वस्यैवविवक्षितत्वादिच्छादिनिष्ठानुमितित्वाभावेबाधादिविषयतायाः प्रयोजकत्वेपितादृशज्ञाननिष्ठानुमितित्वाभावेसिद्धिविषयतायाएवप्रयोजकत्वाद्बाधादिविषयतायाअतथात्वसंभवः॥आहार्यज्ञाननिष्ठानाहार्यज्ञानत्वाभावेबाधादिविषयतायाःप्रयोजकत्वेऽनुमितित्वाभावेपुनस्तत्प्रयोजकत्वादसंभवस्तद्वस्थएवेतिज्ञानेऽनाहार्यत्वनिवेशः॥द्वितीयकल्पेविषयतामात्रंनिवेश्यंनतुविरोधिविषयतापर्यंतमितिसि॥अथपूर्वकल्पेयादृशस्थलेसाध्यवत्पक्षविषयकनिश्चयोत्तरंसिषाधयिषाधीनानुमितिःकस्यापिनजातातादृशस्थलसंभवमभिप्रेत्ययथाविषयतायांविरोधित्वनिवेशाच्चोत्तरमिहितातथैवादृशस्थलेसाध्यवत्पक्षविषयकनिश्चयकालेभिन्नविषयकानुमितिसामग्रीनैपुण्यंतत्रतदुत्तरंतादृशानुमितिरेवजायतेनसाध्यवत्पक्षविषयकमानसज्ञानोत्पादइतितत्स्थलमभिप्रेत्यतत्रसिद्धिविषयेऽतिव्याप्तिवारकतयाविरोधिविषयतापर्यंतनिवेशाच्चोत्तर

भिधातुंशक्यत्वेतिनवेत्यं॥योगजधर्मानुग्रहात्सर्वदातीतानागतसर्वमनसाविशिष्यापरोक्षीकृतवतोयुक्तयोगिनःसिषाधयिषाबलादेवानुमितुसत्तावपिसततप्रसङ्गात्॥ वृत्तिरूपसाध्यविशिष्टपक्षविषयकनिश्चयत्वंवाहेतोरुत्तरत्वस्यानुमितिद्वितीयक्षणेसाध्यवत्पक्षज्ञानेसत्यन्यत्रोभयाभावात्सत्वात्सिद्धिविषयातिव्याप्त्यभावान्नतावत्सर्वंतन्निवेशव्यावृत्तिः॥ यत्रपक्षेसाध्यमस्तिहेतुर्नास्तितत्रसिध्युत्तरमनाहार्यमानसेउभयाभावोऽक्षतोयोगिज्ञानस्यनियमेनतत्रपक्षेहेतुवैशिष्ट्यावगाहित्वाभावादितिवाच्यं॥तत्रतादृशोभयाभावस्यपक्षेहेतुवैशिष्ट्याभावप्रयुक्तत्वेनस्वरूपसिद्धिज्ञानीयविषयताप्रयुक्तत्वेनवासिद्धिविषयताप्रयुक्तत्वाभावात्॥ यत्तुदोषनिश्चयव्यधिकरणानुमित्यादावुभयाभावासत्वादसंभववारणायविवक्षणीयसामानाधिकरण्यस्थानेऽसामानाधिकरण्यानित्यत्वोभयाभावोनिवेश्यस्तथाचतादृशोभयाभावसहिताव्यवहितोत्तरत्वाक्रांतईश्वरीयज्ञानेउभयाभावासत्वान्नोक्तस्थलेपिसिद्धिविषयेऽतिव्याप्तिरितिविरोधिपदमनर्थकमेव॥नचेश्वरज्ञानस्यनित्यत्वाभावःशंक्यः॥ग्रंथकृतामानसपदेनविवक्षणीयदोषविशेषाजन्यत्वरूपस्यतस्यतत्राक्षतत्वादिति केषांचित्समाधानंतसिद्धमन्नमितिन्यायग्रस्तत्वाद्धेयमेव॥यथाश्रुतविशिष्टांतरघटितनिवेशइति॥यद्रूपावच्छि

न्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्येऽभयाभावःस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंयत्तद्रूपंतद्वच्छिन्ना
घटितत्वनिवेशइत्यर्थः॥ विशिष्टांतरविषयित्वाप्रयोज्येत्यादि॥अत्रप्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणायविशिष्टांतरवि
षयित्वाप्रयोज्येति॥स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंयद्रूपंतत्तद्रूपावच्छिन्नविषयित्वाप्रयोज्येतितदर्थस्तेनप्रमेय
त्वविशिष्टव्यभिचारविषयिताप्रयोज्यायामधिकरणतायांतादृशयत्किंचिद्बाधादिविषयिताप्रयोज्यत्वाभावसत्वेपिनक्षतिः॥व्यभि-
चाराग्रहकालीनघटानुमितिनिष्ठविशेषणज्ञानादिरूपकारणांतराभावमात्रप्रयुक्तव्याप्त्यवगाहित्वाभावाधिकरणतायांविशिष्टां
तरविषयित्वाप्रयोज्यत्वसत्वात्प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिरतःस्वविषयिताप्रयुक्तेति॥स्वावच्छिन्नविषयिताप्रयुक्तेति
तदर्थः॥विषयिताप्रयुक्तत्वमात्रनिवेशेधूमत्वादिनाधूलीपटलावगाहिव्यभिचारज्ञानोत्तरघट्याद्यनुमितिनिष्ठव्याप्त्यवगाहित्वा-
भावाधिकरणतायांव्यभिचारभ्रमीयविषयिताप्रयुक्तायांधूमाभाववद्वृत्तित्वविशिष्टवत्त्वादिरूपविशिष्टांतरविषयित्वाप्रयुक्तत्वाऽ
नुपपत्तिरादाधाराधेयभाववत्त्वयोज्यप्रयोजकभावस्यानुगतरूपावच्छिन्नस्याश्रयभेदेनभिन्नत्वात्प्रमेयत्वविशिष्टव्यभिचारत्वावच्छि

न्ने ऽति व्याप्ति नादवस्थ्यमतोस्वविषयिताप्रयुक्तत्वनिवेशः॥ न च विवक्षणीयविशिष्टांतरविषयितात्व[illegible]दर्शितभ्रमीयविषयितासाधारणधर्मस्याक्षतत्वात्तद्धर्मावच्छिन्नाप्रयोज्यत्वस्यभ्रमीयविषयिताप्रयुक्ताधिकरणतायामसत्वेनदर्शितातिव्याप्त्यनवकाशादिष्टविषयितायांस्वीयत्वनिवेशोव्यर्थइतिवाच्यं॥यादृशविशिष्टांतरविषयितात्वव्यापकोयोधर्मस्तद्धर्मावच्छिन्नतादृशविशिष्टांतरविषयितानिष्ठप्रयोजकताकान्यत्वस्यवक्ष्यमाणव्यापकनाघटितसत्प्रतिपक्षसंग्रहानुरोधेनाप्रयोज्यांतेनावश्यंविवक्षणीयस्यभ्रमीयविषयिताप्रयुक्ताधिकरणतायांसत्वादृर्शितातिव्याप्तेर्दुर्वारत्वात्स्वीयत्वनिवेशोऽवश्यकः॥पर्वतोधूमाभाववानितिबाधभ्रमीयविषयिताप्रयुक्तपक्षेसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायांविशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोजत्वसत्वाद्विषयिताप्रयुक्तत्वसत्वाच्चप्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिरितिविषयितायांस्वीयत्वनिवेशइत्यपि**केचित्**॥पर्वतोवह्निमान्धूमादित्यादौपाषाणमयत्वविशिष्टपर्वतत्वावच्छिन्नविषयिताप्रयोज्यायांपक्षेसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायांविशिष्टांतरविषयित्वाप्रयोज्यत्वसत्वात्तत्पाषाणमयत्वविशिष्टपर्वतेऽतिव्याप्तिरतोविशेष्यदलमावश्यकं**तथाच** पाषाणमयोनवह्निमानितिज्ञानासमानकालीनपा-

तविषयकनिश्चयोत्तरसाध्यतद्व्याप्यानुमितावुभयाभावासत्त्वान्नतत्रातिव्याप्तिः॥ न च स्वविषयितावि-
षयतानिरूपितस्वविषयितासंबन्धेनतत्रातिव्याप्तिवारणंशंक्यं॥ साध्यवत्पक्षविषयतावहिर्भूतत्वरूपविरोधित्वस्यपाषाणम
यत्वविशिष्टपर्वतविषयतायामक्षतत्वात्॥ यद्वा उभयाभावप्रतियोगिता[illegible]कोटावित्यादिनिरुक्तरूपंविरोधित्वंनिवेश्यतेतदा
पिपर्वतत्वावच्छेदेनवह्निसाध्यकेपर्वतत्वसामानाधिकरण्येनपाषाणमयत्वाभावविशिष्टपर्वतकालीनधूमहेतुकेपर्वतत्वसामाना
धिकरण्येपाषाणमयत्वविशिष्टपर्वतत्वेनातिव्याप्तिरुभयाभावयोर्वृत्तिमत्त्वावच्छेदकत्वगाहित्वाभावा
धिकरणतायांपाषाणमयत्वावच्छेदकत्वगाहित्वाभावावगाहिज्ञानसमानकालीनपर्वतत्वसामानाधिकरण्येपाषाणमयत्वगाहिज्ञा
नीयपर्वतत्वसामानाधिकरण्येनपाषाणमयत्वविशिष्टपर्वतविषयितायास्तादृशविरोधित्वेनरूपितत्वाक्रांतायाःप्रयोजक
त्वाद्विशेषदलमावश्यकं॥ अथैवमपिविशेषदलेविरोधिविषयताप्रयुक्तत्वंव्यर्थंनिर्वक्तिःपर्वतोवह्निमानित्यत्रोभयाभावप्र
योजकीभूताभावाधिकरणतायांघटादिविषयितायुक्तस्वपदेनधर्तुमशक्यत्वाद्विशिष्टांतराघटितत्वदलेनैववारणात्॥

नेवं विशेष्यदलेतदनिवेशेनिर्वह्निः [illegible] वह्निमानित्यादौपाषाणमयत्वविशिष्टपर्वतत्वावच्छिन्नेऽतिव्याप्तिस्तद्विषयतायाः पर्वतत्वावच्छिन्नेवल्यवगाहित्वाभावाधि[illegible]भावस्येत्यादिन्यायेननिर्वह्निपर्वतत्वावच्छिन्नेवल्यवगाहित्वाभावाधिकरणतायामपिप्रयोजकत्वात्॥तन्निवेशेकेवलपाषाणमयत्वविशिष्टपर्वतविषयकनिश्चयोत्तरंपर्वतेवल्यवगाह्यनुमित्युत्पत्तौतन्निश्चयोत्तरानुमितिसामान्यनिष्ठपर्वतेवल्यवगाहित्वाभावस्यकथमपिपाषाणमयत्वविशिष्टपर्वतविषयतायाप्रयुक्तत्वविरहेणतादृशपर्वतविषयतायांसाध्यवत्सक्षविषयताबहिर्भूतत्वरूपविरोधित्वसत्त्वेपितत्रातिव्याप्त्यनवकाशः॥अथैवमपिविरोधिविषयताप्रयुक्तत्वविशेषणस्यदुष्टसाध्यातिव्याप्तिवारणप्रयोजनकत्वकथनासंगतिर्दुष्टसाध्यवत्त्वेतिव्याप्तिविरहादितिचेन्न॥घटादिमान्वह्न्यभावान्यत्वादिमांश्चपर्वतइतिज्ञानीयनिरूप्यनिरूपकभावापन्नघटादिनिष्ठविषयतायाअयुक्तयुक्त्यात्तादृशपक्षेसाध्यावगाहित्वाभावाधिकरणतायाप्रयोजकत्वेनघटत्वादेरपिसपदेनधर्तुंशक्यत्वात्तदनुधावनेऽतिव्याप्तिस्तदनुधावनेदुर्वारैव॥यत्तुस्वविषयितायाप्रयुक्तेत्यनेन [illegible] व्यापकरूपावच्छिन्नप्रयोजकताकत्वमवश्यंनिवेशनीयमन्यथाधूमव्यभिचारिवह्निमान्धूमवानित्यादौधूमव्यभिचारिव

क्रिमत्वावच्छिन्नेऽतिव्याप्तिर्विशिष्टांतरव्यभिचारविषयितात्वप्रयोज्यायांपक्षेसाध्यावगाहित्वाभावाधिकरणतायांधूमव्यभिचारिवह्निमान् धूमाभाववानितिज्ञातीयनिरूप्यनिरूपकभावापन्नस्वपदग्राह्यधूमव्यभिचारिवह्निमत्वावच्छिन्नविषयितात्वप्रयोज्यत्वाद्विशेष्यदलावच्छिन्ने तथात्वघटत्वादेःस्वपदेनग्रहणेतदवच्छिन्नविषयितात्वव्यापकघटइतिज्ञातीयविषयितासाधारणविषयितात्वावच्छिन्नप्रयोज्यत्वस्यतादृशोभयाभावप्रयोजकीभूताभावाधिकरणतायामसत्वान्नवस्तुमात्रेऽतिव्याप्तिरितितेन्न॥स्वविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकताकत्वनिवेशेपियथाश्रुतेतल्लक्षणस्यह्रदोधूमवान्वह्नेरित्यादौप्रमेयत्वविशिष्टोयोधूमाभावस्तद्विशिष्टह्रदेऽतिव्याप्तिस्तद्दशाधूमाभाववद्ह्रदरूपबाधात्मकविशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यायांह्रदत्वावच्छिन्नेपक्षेवह्निरूपहेतुमत्वावगाहित्वाभावाधिकरणतायांवह्न्यभावावच्छेदकतेनगृहीतप्रमेयत्वविशिष्टधूमाभाववद्ह्रदविषयितायाप्रयोज्यत्वात्॥नचतादृशाधिकरणतायांवह्न्यभावावच्छेदकधूमाभावावच्छिन्नरूपविशिष्टांतरविषयितायाप्रयोज्यत्वंशक्यंवह्न्यभावव्याप्यधूमाभावाप्रसिद्धेस्तदवच्छिन्नस्याप्रसिद्धेरतोविशिष्टांतरविषयितायाप्रयोज्यस्वविषयितायाप्रयोज्ययत्किंचिदधिकरणतानिरूपकोयउभयाभा

वप्रयोजकीभूताभावोविरोधिविषयितात्रयुक्तदधिकरणतावत्त्वविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यकत्वमेवेकाधिकरणताघटितंदलद्वयनिष्कृष्टार्थतयोपादेयंतथाचनोक्तातिव्याप्तिःप्रमेयत्वविशिष्टोयोधूमाभावस्तद्विशिष्टह्रदविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यनिष्ठंयत्पक्षेसाध्यावगाहित्वाभावाधिकरणत्वंतन्निविशिष्टांतरविषयितात्रयोज्यंयच्चविशिष्टांतरविषयितात्रयोज्यंपक्षेहेतुमत्तावगाहित्वाभावाधिकरणत्वंतन्निरोधिविषयितात्रयुक्तंसत्त्वविषयकनिश्चयोत्तरानुमितिसामान्यनिष्ठंधूमाभावस्यवह्न्यभावावच्छेदकतात्रहकालीनविशिष्टधूमाभाववत्तानिश्चयोत्तरंवह्निमत्तावगात्यनुमित्युत्पादादेवंसतिस्वविषयि[illegible]वच्छिन्नप्रयोज्यत्वाविवक्षणेपिधूमव्यभिचारिवह्निमान्धूमवानित्यादौधूमव्यभिचारिवह्निमत्तावच्छिन्नेनातिव्याप्तिस्तद्विषयकनिश्चयोत्तरानुमितिसामान्यनिष्ठंद्यास्यवगाहित्वाभावाधिकरणत्वंतन्निविशिष्टांतरविषयितात्रयोज्यंयच्चविशिष्टांतरविषयितात्रयोज्यंपक्षेसाध्यावगाहित्वाभावाधिकरणत्वंतन्निरोधिविषयितात्रयुक्तंसत्त्वविषयकनिश्चयोत्तरानुमितिसामान्यनिष्ठंस्वपदग्राह्यधूमव्यभिचारिवह्निमत्तावच्छिन्नविषयकनिश्चयोत्तरंतादृशवह्निमत्तावच्छिन्नेसाध्यानुमित्युत्पादादितिसुधियोविदांकुर्वंतु॥यत्किंचिद्विशिष्टांतरवि

यियात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेनेति॥ व्यभिचारविषयितात्वस्यसामान्यतोविशिष्टांतरविषयितात्वव्यापकत्वासंभवात्तत्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिरतोयत्किंचिद्विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वाभावकूटनिवेशलाभाय॥अस्यचयत्किंचिद्विशिष्टांतरविषयितात्वव्यापकप्रयोजकतानिरूपितप्रयोज्यत्वशून्यत्वनिवेशेनापिव्यभिचारघटितबाधसंग्रहःसंभवतिनादृशबाधविषयितात्वप्रयोज्यपक्षेसाध्यावगाहित्वाभावाधिकरणतानिरूपितप्रयोज्यतानिरूपकप्रयोजकतायाःकेवलव्यभिचारिसमानीयविषयितासाधारणतादृशविषयितात्वव्यापकत्वविरहादितिप्रयोजकतायांतादृशविषयितात्वव्यापकरूपावच्छिन्नत्वनिवेशोऽनर्थकइतिचेन्न॥विषयभेदभिन्नविषयितास्वरूपप्रयोजकतानांचालिनीन्यायेनतादृशविषयितात्ववन्निष्ठाभावप्रतियोगितयातादृशप्रयोजकतायाअप्रसिद्धेः॥नचतादृशविषयितात्ववन्निष्ठाभावप्रतियोगितानवच्छेदकरूपावच्छिन्ननिरूपकतायोज्यताशून्यत्वमेवनिवेशनीयमितिवाच्यं॥तादृशप्रयोजकतात्वरूपमादायतदवच्छिन्ननिरूपकताकप्रयोज्यताशून्यत्वस्यकस्यामप्यधिकरणतायामसत्वात्तादृशाधिकरणत्वाप्रसिद्धेरसंभवस्यैवप्रसंगाद्॥य

दिन्त्वस्वनिष्ठप्रयोज्यतानिरूपकत्वसंबंधेनतादृशविषयितात्वव्यापकाधिकरणतान्यत्वनप्रयोज्यांतेनविवक्षितमित्युच्यतेतदा संभ
ववारणेप्येतादृशपरंपरासंबंधस्यप्रतियोगितावच्छेदकत्वेविवादात्तथाविवक्षितुमशक्यमितितादृशविषयितात्वव्यापकरूपावच्छिन्न
प्रयोज्यत्वमेवनिविष्टमित्यवधेयं॥अत्रप्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षविषयितात्वप्रयोज्य
यामधिकरणतायांप्रतिहेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षरूपविशिष्टांतरविषयितात्वव्यापकंयत्प्रतिहेतुव्यापकताग्रह
विशिष्टयद्ग्रहत्तिप्रतिहेतुमत्पक्षविषयितात्वंतदवच्छिन्नप्रयोज्यत्वनिरूपितताश्रयत्वंप्रतिपक्षासंग्रहइतियादृशविशिष्टांतरविषयि
तात्वव्यापकोयोधर्मस्तदवच्छिन्नतादृशविशिष्टांतरविषयितानिष्ठप्रयोजकताकान्यत्वमेवाप्रयोज्यांतेनविवक्षणीयं॥एवंचसतिवह्नि
भाववज्जलादिमद्वृत्तिजलवद्धृदत्वावच्छिन्नेगंतव्याप्तिस्तद्विषयितायोज्यायांतादृशोभयाभावप्रयोजकाभावाधिकरणतायांविशिष्टांतर
वह्न्यभाववज्जलादिमत्कालीनजलवद्धृदनिष्ठविषयितानिष्ठप्रयोजकताकान्यत्वसत्वात्तद्धारणायतादृशविशिष्टविषयकनिश्चयविशिष्ट
यादृशविशिष्टविषयकनिश्चयोत्तरानुमितिसामान्यउभयाभावस्तादृशविशिष्टद्वयविषयिताशून्यप्रतीतिविषयत्वरूपंविशिष्टद्वयाघटि

तत्वं नशक्यतेनिवेशयितुं दर्शितसत्प्रतिपक्षस्य प्रतिहेतुव्यापकसाध्याभावप्रतिहेतुमत्पक्षरूपतादृशविशिष्टद्वयविषयिताशून्यप्रतीतिवि
ष यत्ताभावात्तदसंग्रहापत्तेः॥ किंतु विशिष्टांतरविषयित्वाप्रयोज्याधिकरणतायामेव प्रतिहेतुव्यापकत्वप्रकारकत्वप्रतिहेतुप्रकारकत्वो
भयाप्रयोज्यज्ञानवैशिष्ट्यप्रयोज्याधिकरणताभिन्नत्वमेवदेयमिति केचिद्वदंति॥ तदपरेनक्षमंते व्यापकसामानाधिकरण्यघटितसत्प्र
तिपक्षविषयिताप्रयोज्यायामधिकरणतायां विशिष्टांतरहेतुमत्पक्षप्रतिहेतुव्यापकसाध्याभावादिविषयिताप्रयोज्यत्वनियमेनतादृश
सत्प्रतिपक्षासंग्रहतादवस्थ्यात्॥ हेतुमत्पक्षप्रतिहेतुव्यापकसाध्याभावादिविषयिताव्यावृत्तप्रयोजकतानिवेशेचप्रमेयत्वविशिष्ट
तादृशसत्प्रतिपक्षातिव्याप्तेर्दुर्वारत्वात्॥ वस्तुतस्तु यादृशविशिष्टांतरविषयितात्वव्यापकंतादृशविषयितात्वावच्छिन्नव्यापकतावच्छेदकं
वायरूपमनाहार्यज्ञानादिवृत्तित्वादिसहिततद्रूपपर्याप्तावच्छेदकताकतादृशविशिष्टांतरविषयितानिष्ठप्रयोजकताकान्यत्वमेवाप्रयो
ज्यांतेनविवक्षणीयंसत्प्रतिपक्षप्रयोज्यायामधिकरणतायांतादृशहेतुमत्पक्षविषयितात्वपर्याप्तावच्छेदकताकत्वाभावस्यप्रयोज्यांतरवेशे
षणत्वान्नसत्प्रतिपक्षासंग्रहः॥ नन्वेवंसतिप्रमेयत्वविशिष्टासाधारण्यातिव्याप्तिःपक्षधर्मताज्ञानकालीनज्ञानवृत्तिसाधारण्यविषयिता

प्रयोज्याधिकरणतायांविशिष्टांतरासाधारण्यविषयितात्वपर्याप्तावच्छेदकताकान्यत्वसत्वात्॥यदिचपक्षवृत्त्यसाधारण्यस्यापिविशिष्टांतरत्वात्तद्विषयितात्वव्यापकरूपपर्याप्तावच्छेदकताकत्वस्येवप्रमेयत्वविशिष्टासाधारण्यप्रयोज्याधिकरणतायांसत्वान्नप्रमेयत्वविशिष्टासाधारण्येऽतिव्याप्तिरितिविभाव्यतेतदापिपक्षवृत्त्यसाधारण्येऽतिव्याप्तिर्दुर्वारेतिवाच्यं॥व्यापकसामानाधिकरण्यरूपव्याप्तिघटितस्यसत्प्रतिपक्षेपक्षवृत्तित्वविशेषितस्यैवासाधारण्यरूपतास्वीकारात्तत्रातिव्याप्तेरभावात्॥पक्षवृत्तित्वाघटितासाधारण्यस्यचविशेष्यदलविरहेणैववारणात्॥केचिन्मतेकरीत्याविशिष्टांतरविषयित्वप्रयोज्याधिकरणतायांभिन्नांतविशेषणमुपादायैवविशिष्टद्वयाघटितत्वविशेषणवारणीयातिप्रसंगोवारणीयइतिपक्षवृत्तित्वघटितासाधारण्यस्ययथाश्रुतविशिष्टद्वयाघटितत्वविरहेपिनक्षतिः॥यद्वाविशिष्टद्वयाघटितत्वंविशिष्टांतरविषयित्वाप्रयोज्याधिकरणतायांनिरुक्तभिन्नांतंवाऽनिवेद्यैवलक्षणंपरिष्कार्यतथाहि॥उभयाभावप्रयोजकाभावाधिकरणेतत्रद्वितीयमभावपदमविवक्षितार्थमेवंचव्यापकसामानाधिकरण्यरूपव्याप्तिघटितसत्प्रतिपक्षप्रयोज्यायांपक्षेसाध्यावगाहित्वाभावाधिकरणतायांपूर्वोक्तरीत्याविशिष्टांतरविषयितायाप्रयोज्यत्वसत्वेपिपक्षेसाध्याभावावगाहि

त्वाधिकरणत्वावच्छिन्नानुमितिनिष्ठायांपरामर्शीयसत्प्रतिपक्षविषयिताप्रयोज्यायांप्रतिबंधकतावच्छेदकाधिकरणताविधयादर्शितोभयाभावप्रयोजिकायांप्रतिहेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षरूपविशिष्टांतरविषयितात्वव्यापकत्वावच्छिन्नप्रयोजकताकप्रतिपक्षसंग्रहः॥वह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृदविषयिताप्रयोज्यातुल्यसाध्याभावावगाहित्वाधिकरणतायातुल्यप्रयोज्यासाध्यावगाहित्वाभावाधिकरणतासातुवह्न्यभाववज्जलादिमत्कालीनजलवद्वृदरूपविशिष्टांतरविषयितात्वव्यापकत्वावच्छिन्नप्रयोज्येवेतिनतत्रातिव्याप्तिरपि॥स्वविषयिताप्रयोज्येत्यनेनस्वविषयिताव्यापकतावच्छेदकंयत्किंचिद्धर्मज्ञानादिवृत्तित्वसहितंतद्रूपपर्याप्तावच्छेदकताकत्वंविवक्षणीयंतेनह्रदोवह्निमान्वह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृदादित्यादौतादृशविशिष्टह्रदेनातिव्याप्तिरितिचपक्षवृत्तित्वघटितसाधारण्यस्यलक्ष्यतेपिनतदसंग्रहः॥नवाप्रतिहेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षसंग्रहोपीतिध्येयं॥एतेनाथेतस्मिन्लक्षणेह्रदोवह्निमान्जलादित्यादौहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वस्यपक्षवृत्तित्वाघटितस्यैवासाधारण्यरूपतामतेतत्राव्याप्तिः॥वह्न्यभावव्याप्यतयागृहीतस्यजलादेर्वह्निमत्ताबुद्धिविशेष्येप्रकारतयाभा

नेताद्दशसमूहालंबनानुमितेःकार्यकालविधयाप्रतिबंधकत्वमतेःनुसादेनताद्दशासाधारण्यविषयकनिश्चयोत्तरानुमितिर्घटा
द्यनुमितिरेवतस्यामुभयाभावसत्वेपिपक्षधर्म[illegible]भूत्यकालेकेवला[illegible]धारण्यज्ञानस्याप्रतिबंध[illegible]दुत्तरानुमितिनिष्ठेभ
याभावेविरोधिविषयितायुक्तत्वाभावा[illegible]थानिर्वह्निःपर्वतोवह्निमानि[illegible]विशिष्टपर्वतावतिव्याप्तिप्रसंगात्
॥न[illegible]यद्विषयकनिश्चयेपक्षधर्मताज्ञानसमानकालीनत्वविशिष्टाप्तिरितिवाच्यं॥आहार्यपक्षधर्मताज्ञानकालीनासाधा
रण्यविषयकज्ञानस्याप्रतिबंधकतयोक्तदोषतादवस्थ्येनानाहार्यत्वस्यपक्षधर्मताज्ञानविशेषणत्वा[illegible]सिध्यसंग्रहप्र
संगात्॥अनाहार्यपक्षधर्मताज्ञानकालीनानाहार्यतद्विषयकनिश्चयासंभवात्॥न[illegible]नाहार्यत्वमसाधारण्यविषयकज्ञानकाली
नत्वाहार्यत्वोभयाभाववत्वरूपंग्राह्यमतोनोक्तासंग्रहइतिवाच्यं॥वह्निव्यापकीभूताभावप्रतियोगिजलंवह्निमज्जलादित्यादौस्व
रूपासिद्धिज्ञानस्योक्तोभयाभाववत्वविरहेणताद्दशस्थलीयस्वरूपासिद्धसंग्रहस्यदुर्वारत्वात्॥अत्रकेचित्॥असाधारण्यतावच्छि
न्नविषयितामात्रनिरूपकत्वानाहार्यपक्षधर्मताज्ञानाकालीनत्वोभयाभावस्ययद्विषयकनिश्चयविशेषणत्वमुपगम्योक्तस्थलीयस्वरू

प्राप्तिर्हि संग्रहस्तज्ज्ञानस्यासाधारण्यविषयितातिरिक्तहेत्वभावादिविषयितानिरूपकत्वेनतद्विषयितामात्रनिरूपकत्वाभावेनोभयाभाव-
स्याक्षतत्वात्तद्विषयितामात्रनिरूपकत्वंचतद्विषयितान्यूनत्वेसतितद्विषयितावत्वंतेननहृदकपदार्थविषयितानांनद्विष
यितातिरिक्तत्वेनतद्विषयितामात्रनिरूपकत्वस्यप्रसिद्धावपि नक्षतिः॥ नचैवंसत्यसाधारण्यासंग्रहोदुर्वारोऽसाधारण्यघटादिविष
यकनिश्चयस्यपक्षधर्मताज्ञानशून्यकालीनस्यापिनिरुक्तोभयाभावत्वेननदुत्तरानुमितावुभयाभावस्यविरोधिविषयिताप्रयुक्तत्व
विरहादितिवाच्यं॥जातिमान्वह्न्यभाववानितिनिश्चयवारणायाव्यापकविषयितान्यूनत्वनिवेशावश्यकतयातादृशनिश्चयस्या
तथात्वादितिपूर्वपक्षसमाधानाडंबरोनिरवकाशः॥ निरवकाशश्चार्थैवमयसाधारण्यविषयिताप्रयोज्यायामधिकरणतायां
नियमेनविशिष्टांतरहेतुमत्पक्षविषयिताप्रयुक्तत्वेनविशिष्टांतराघटितत्वविरहेणतदसंग्रहोदुर्वारः॥ यत्तुविशिष्टांतरविषयिता
यांहेतुमत्पक्षविषयिताभिन्नत्वंहेतुमत्पक्षविषयितांतःपातित्वासाधारण्यविषयिताभिन्नत्वोभयाभावोवानिवेशनीयः॥ नन्वजलव्याप
कवह्न्यभावादावतिव्याप्तिःशंक्यातत्स्थलस्यत्वादितिनोक्तदोषइतितन्न॥ एवंसतिधूमाभाववत्पर्वतकालीनपर्वतपक्षकवह्निसाध्य

कधूमहेतुकेप्रमेयत्वविशिष्टधूमवत्सर्वतरूपाश्रयासिद्धावतिव्याप्तिर्विशिष्टांतरीभूतधूमवत्सर्वतरूपाश्रयासिद्धिविषयितायांनिरुक्तो
भयाभावासत्वात्॥ [illegible]मसाधारण्येऽव्याप्तिवारणायविशिष्टांतरविषयितानिष्ठप्रयोजकतायांज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यवि
षयितात्वानवच्छिन्नत्वोभयाभावोनिवेशनीयोहेतुमत्पक्षविषयितानिष्ठप्रयोजकताचनोक्तोभयाभाववतीकिंतुदोषांतरविपरीता
साधारण्यादिविषयितानिष्ठप्रयोजकतैवतन्निरूपितप्रयोज्यत्वाभावस्यस्वविषयिताप्रयोज्याधिकरणतायांसत्वान्नासाधारण्येऽव्या
प्तिः॥ [illegible]वमपिकांचनमयद्रव्यवह्निमाज्ज्वलादित्यादौकांचनमयत्वव्यापकीभूताभावप्रतियोगिज्वलादेराश्रयासिद्धित्वस्यग्रंथक
ताव्यवस्थापनात्प्रमेयत्वविशिष्टायांतस्यामतिव्याप्तिर्विशिष्टांतरीभूतताद्दशज्वलत्वावच्छिन्नविषयितानिष्ठप्रयोजकतायामुक्तोभयाभावा
सत्वेनदोषांतरविषयितानिष्ठप्रयोजकतायाएवोभयाभाववत्वात्तन्निरूपितप्रयोज्यत्वाभावस्यस्वविषयिताप्रयोज्याधिकरणतायामक्ष
तत्वादिति [illegible]वाच्यं॥ ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितात्वाश्रयासिद्धिसाध्यासिद्धिविषयितात्वान्यतमानवच्छिन्नत्वोभयाभा
वस्यैवनिरुक्तोभयाभावपदेनविवक्षणेनानुपपत्त्यभावा[illegible]प्रतिहेतुभावकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षादेरपि

नासंग्रहस्तत्रापिविशिष्टांतरप्रतियोगिकसक्षावविषयितानिष्ठप्रयोजकतायामुभयाभावासत्वेनावैशिष्यांतरस्य दितत्वात्तेः॥ ननैवमपि प्रमेयत्वविशिष्टवह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृत्तित्वावच्छिन्नेऽतिव्याप्तिर्विशिष्टांतरतादृशद्रव्यविषयितानिष्ठप्रयोजकतायामुभयाभावासत्वादिति चेन्न॥ तादृशविशिष्टविषयकनिश्चयविशिष्टतादृशविशिष्टविषयकनिश्चयोत्तरानुमितावुभयाभावस्यातद्रूपविशिष्टद्वयाघटितत्वरूपविशिष्टद्वयाघटितत्वविशिषणेनतस्यवारणीयत्वात्॥ विशिष्टद्वयाघटितत्वशरीरेचसत्प्रतिपक्षघटकदलद्वयविषयिताभिन्नत्वंदेयंतेननसत्प्रतिपक्षासंग्रहः॥ ननैवंसतिद्रव्यवृत्तिमान्वह्न्यभाववज्जलादिमद्वृत्तिजलाभावादित्यादौतादृशजलवद्वृत्तिरूपस्वरूपासिद्धावव्याप्तिस्तस्यावह्न्यभाववज्जलावच्छिन्नजलवद्वृत्तिरूपविशिष्टद्वयघटितत्वादिति चेन्न॥ तादृशविशिष्टद्वयविषयितयोर्ज्ञानवैशिष्ट्याप्रयोज्याधिकरणत्वप्रयोजकतयाविशेषणीयत्वात्॥ स्वरूपासिद्धिघटकदलद्वयविषयितयोर्ज्ञानवैशिष्ट्याप्रयोज्यहेतुवैशिष्ट्यावगाहित्वाभावाधिकरणत्वप्रयोजकतयातद्भावविरहेणस्वरूपासिद्धावव्याप्तिविरहादित्याहुः॥ केचित्तुअसाधारण्येऽव्याप्तिवारणायविशिष्टांतरविषयितायामसाधारण्यविषयिताप्रयोज्याधिकरणताप्रयोजकत्वासाधारण्यविषयिताभिन्नत्वोभयाभावोनिवेश्योहेतुमत्सप्र-

विषयितायामुक्तोभयसत्वेनोभयाभाववतीदोषांतरविपरीतासाधारण्यविषयितैतदप्रयोज्यत्वस्यस्वविषयितायांप्रयोज्याधिकरणतायांसत्वा
दसाधारण्यलक्षणसमन्वयः॥ नचैवमपिदोषद्वैमानजलादित्यादौप्रमेयत्वविशिष्टबाधेऽतिव्याप्तिर्विशिष्टांतरकेवलबाधविषयितायांप
क्षधर्मताज्ञानकालीनबाधासाधारण्योभयविषयकसमूहालंबनात्मकज्ञानीयासाधारण्यविषयितायाप्रयोज्याधिकरणतायोगत्वेननि-
रुक्तोभयाभावविरहेणोभयाभाववतीव्यभिचारविषयितैवतदप्रयोज्यत्वस्यस्वविषयितायाप्रयोज्याधिकरणतायांसत्वात्॥असाधारण्यस्य
विशिष्टांतरत्वेपितद्विषयित्वाप्रयोज्यत्वस्यपक्षधर्मताज्ञानासमानकालीनबाधज्ञानोत्तरज्ञाननिष्ठपक्षेसाध्यवैशिष्ट्यावगाहित्वाभावाधिक
रणतायामक्षतत्वादितिवाच्यं॥स्वविषयितायामपिनिरुक्तोभयाभावोनिवेशनीयः॥ साधारण्यविषयितायाप्रयोज्याधिकरणतानिरूपित
त्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयाभाववतीयाविशिष्टांतरविषयितानिष्ठप्रयोज्यत्वनिरूपितप्रयोज्यत्वाभावएवाप्रयोज्यां
तेनविवक्षणीयः॥ यंचासाधारण्यस्थलीयप्रमेयत्वविशिष्टबाधेनातिव्याप्तिर्विशिष्टांतरकेवलबाधविषयितानिरूपितप्रयोज्यता-
यामसाधारण्याविषयकबाधज्ञानानंतरोत्पन्नानुमितिनिष्ठसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतानिरूपितायामसाधारण्यवि

षयिताप्रयोज्याधिकरणतानिरूपितत्वाभावेनतदभावप्रयुक्तोभयाभावकत्वात्तन्निरूपितप्रयोज्यत्वाभावस्यप्रमेयत्वविशिष्टबाधविषयिताप्रयोज्याधिकरणतायामभावात्॥ननुचयत्रासाधारण्याप्रसिद्धिस्तत्रपर्वतोधूमवान्वह्नेरित्यादौव्यभिचारेऽव्याप्तिरितिवाच्यं॥भ्रमप्रमासाधारणनिरूप्यनिरूपकभावापन्नासाधारण्यविषयितायाएवनिवेशात्॥धूमव्यापकाभावप्रतियोगीवह्निरित्याकारकज्ञानीयविषयितासादायतत्रलक्षणगमनसंभवात्॥ननुवंनिवेशेयत्रासाधारण्यमप्रसिद्धमथचासाधारण्यपक्षधर्मत्वदोषाणांसमूहालंबनमेवजातंतत्रप्रमेयत्वविशिष्टदोषेऽतिव्याप्तिःकेवलदोषविषयितानिष्ठप्रयोजकतायांनिरुक्तोभयाभावासत्त्वात्तादृशोभयाभाववतीविपरीतदोषविषयितानिष्ठप्रयोजकतैवतन्निरूपितप्रयोज्यत्वाभावस्यप्रमेयत्वविशिष्टदोषविषयिताप्रयोज्याधिकरणतायांसत्वादसाधारण्यस्यचाप्रसिद्धत्वात्तस्यविशिष्टांतरत्वासंभवेनतद्विषयितानिष्ठप्रयोजकतायामुभयाभावसत्त्वेयंनिस्तारादितिवाच्यं॥सामानाधिकरण्येनसाध्यकेऽवच्छेदकावच्छेदेनसाध्यकेचलक्षणभेदवदगत्याऽसाधारण्यप्रसिद्ध्याप्रसिद्धिस्थलीयलक्षणयोरपिभेदस्वीकारेणासाधारण्यप्रसिद्धिस्थलीयलक्षणएवप्रयोजकतायामुभयाभावनिवेशेनानुपपत्त्यभावात्॥ननुवंमपिवह्निव्यापकीभूताभावप्रतियोगिज

लंवह्निमज्जलादित्वादौमेयत्वविशिष्टवह्निव्यापकीभूताभावप्रतियोगिजलदृत्तित्वत्यभावरूपबाधेऽतिव्याप्तिर्दुर्वारा विशिष्टांतरतादृश
जलदृत्तित्वविशिष्टवत्त्यभावत्वावच्छिन्नविषयितानिष्ठप्रयोजकतायामवच्छेदककुक्षिप्रविष्टानामवच्छेदकत्वानंगीकारनयेऽसाधारण्यवि
षयिताप्रयोज्याधिकरणतानिरूपितत्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयवत्त्वेनोभयाभावविरहाद्विपरीतदोषादिविषयितानिष्ठ
प्रयोजकतायाएवतथात्वात्॥ननुविशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नेत्यनेनविशिष्टांतरविषयितात्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वंविवक्षणीयंतथाचनिरुक्तस्थलेतादृशंरूपंतादृशजलत्वावच्छिन्नविषयितात्वमपितदवच्छिन्नप्रयोजकतायामसाधारण्यविषयितात्वानवच्छिन्नत्वाभावप्रयुक्तनिरुक्तोभयाभाववत्त्वेनतन्निरूपितप्रयोज्यताशून्यत्वस्यस्वविषयिताप्रयोज्याधिकरणतायामसत्त्वान्नप्रमेयत्वविशिष्टनिरुक्तबाधेऽतिव्याप्तिरितिवाच्यंतथापिह्रदोवह्निमान्धूमादित्यादौप्रमेयत्वविशिष्टबाधेऽतिव्याप्तिर्विशिष्टांतरकेवलबाधविषयितानिष्ठप्रयोजकतायावह्निव्यापकीभूताभावप्रतियोगिजलह्रदोवत्त्यभाववानितिज्ञानीयासाधारण्यविषयिताप्रयोज्याधिकरणतानिरूपितत्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयवत्त्वेनविपरीतबाधादिविषयितानिष्ठप्रयोजकतायाए

वतथात्वादितिचेन्न॥असाधारण्यविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकताकाधिकरणतानिरूपितत्वस्यैवनिरूपितत्वांतेनविवक्षित त्वादुक्तविशिष्टांतरविषयितायांतादृशाधिकरणतानिरूपितत्वविरहेणोभयाभावस्याक्षतत्वाद्॥यद्येवमप्यसाधारण्यविषयितात्वस्या तिप्रसक्ततयाज्ञानदृत्तित्वविशिष्टस्यैवतस्यप्रयोजकत्वंतस्यचासाधारण्यविषयितात्वव्यापकत्वाभावात्तादृशरूपावच्छिन्नप्रयोजकताका धिकरणत्वाप्रसिद्धिरितिविभाव्यतेनदासाधारण्यविषयितात्वव्यापकविषयिताशून्यज्ञानदृत्तित्वविशिष्टासाधारण्यविषयितात्वव्यापक रूपावच्छिन्नत्वमवविवक्षणीयंशून्यांतोपादानात्प्रमेयत्वादिनाऽसाधारण्यतावच्छेदकावगाहिज्ञानीयविषयितासाधारणविषयितात्व व्यापकत्वस्यप्रयोजकतावच्छेदकविषयितायेसत्वेपिनक्षतिरितिवदंति॥तदुभयमपिनयुक्तं व्यतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षरूपविशिष्टांतरविषयितायांनिरुक्तोभयाभावविरहेणतादृशीविषयितादोषांतरविषयितेवस्तु विषयितायोज्यायामधिकरणतायांतदप्रयोज्यत्वस्याक्षतत्वात्प्रमेयत्वविशिष्टतादृशसत्प्रतिपक्षाऽतिव्याप्तेर्दुर्वारत्वादित्यादिपूर्वपक्ष समाधाननत्वंडनकोलाहलश्चेत्यलंबहुना॥दोषज्ञानविषयविषयकज्ञानप्रतिबध्यानार्यज्ञानप्रसिद्धिस्थलेदोषमुक्त्वातदप्रसिद्धि

स्थले ऽव्याप्तिमाह एवमिति॥ दीधितिकृतापर्वतत्वावच्छेदेन वह्न्यभावस्यपक्षतावच्छेदकघटकत्वेऽव्याप्तिरुद्धतानत्वन्यत्रेत्याशयेनाह एवमिति॥ तज्ज्ञानस्य॥ पर्वतत्वसामानाधिकरण्येन वह्न्यभावज्ञानस्येत्यर्थः॥ अप्रतिबंधकतयेति॥ तज्ज्ञानस्यपर्वतत्वावच्छेदेन वह्न्यवगाहिज्ञानप्रतिबंधकत्वेपितादृशावगाहितायानिर्वाहिपर्वतत्वावच्छिन्नेवह्न्यवगाहितात्वव्यापकतयाप्रकृतेऽनुपयोगादिति भावः॥ नन्वित्यादि॥ पर्वतत्वावच्छेदेनवह्न्यभाववत्त्वस्य॥ पर्वतत्वव्यापकस्वरूपसंबंधेनवह्न्यभाववत्त्वस्य॥ स्वरूपसंबंधरूपप्रयोज्यप्रयोजकभावनिवेशएवोक्ताव्याप्तिरितितमनिवेश्यप्रकारांतरेणाव्याप्तिमुद्धरतांमतमनुपन्यस्यदूषयति॥ यत्तिति॥ विरोधिविषयकयद्रूपेति॥ तादृशयद्रूपावच्छिन्नविषयकेत्यर्थः॥ अत्रयद्रूपावच्छिन्नविरोधिविषयताकनिश्चयेनुक्तेवह्न्यभावत्वावच्छिन्नएकदेशेतिव्याप्तिर्निरूप्यनिरूपकभावापन्नतद्रूपावच्छिन्नविरोधिविषयताकनिश्चयोत्तरानुमितावुभयाभावसत्वादतोविरोधिविषयकयद्रूपयकेत्युक्तं॥ तथाचैकदेशविषयितायाविवक्षणीयविरोधिविषयितानतिरिक्तवृत्तित्वविरहान्नातिव्याप्तिः॥ नचैकदेशवारणायत्वावच्छिन्नविषयतात्वव्यापकविरोधिताकयद्रूपावच्छिन्नविषयताकनिश्चयेत्यादिरीत्याविवक्षणीयंविरोधिविषयतायां

यद्दिषयतात्यापकत्वविवक्षणेविषयतात्वनिवेशेगौरवाद्विरोधित्वस्यवत्त्यभावत्वाद्यवच्छिन्नविषयतात्वव्यापकत्वाभा वान्नैकदेशेऽति ग॰सा॰टी॰
व्याप्तिरितिवाच्यं॥तथासतिसाधनसमानाधिकरणसाध्याभावरूपव्यभिचारेऽव्याप्तिस्तज्ज्ञानेतुल्यवित्तिवेद्यतयाभासमानसाध्याभाव
वद्वृत्तिसाधनतावच्छेदकावच्छिन्नविषयितायाएवविरोधितयाविरोधित्वउक्तव्यभिचारविषयितात्वव्यापकत्वाभावात्॥एवंघटोऽवृत्तिरित्यादौ-
घटावच्छिन्नात्मकबाधाव्याप्तिस्तत्रापितज्ज्ञानेतुल्यवित्तिवेद्यतयाभासमानवृत्तित्ववद्वृटविषयितायाएवविरोधित्वेनतादृशबाध
विषयितात्वव्यापकत्वस्यविरोधित्वेऽसत्वात्॥**नचैवंतत्रवस्तुमात्रेऽतिव्याप्तिर्दुर्वारेवेति**॥ननुवह्नौवह्निमान्धूमादित्यादौस
र्वत्रैववस्तुमात्रेऽतिव्याप्तिसंभवात्तत्रेत्यनेननिर्वह्निर्वह्निमानित्यत्रैववस्तुमात्रेऽतिव्याप्तिकथनमसंगतं॥[illegible]परिहारे
त्यर्थकतथावस्तुमात्रेसर्वत्रैवातिव्याप्तिरिष्टेतिवाच्यं॥तथासतिविरोधिविषयितायोज्यत्वविशेषणनिवर्तनीयवस्तुमात्रातिव्याप्तितादवस्थ्य
मूचकदुर्वारेत्यस्यवैय्यर्थ्यापत्तेरितिचेन्न॥सामानाधिकरण्येनसाध्यकस्थलीयलक्षणावच्छेदकावच्छेदेनसाध्यकस्थलीयलक्षणयोःपू
र्वक्रीत्याभिन्नत्वेनसामानाधिकरण्येनसाध्यकस्थलीयलक्षणस्यसर्वत्रनोदासीनेऽतिव्याप्तिः सामानाधिकरण्येनसाध्यकउभयाभाव १०६

प्रतियोगिकोटावित्यादिविरोधित्वस्यसामानाधिकरण्येनसाध्याभावज्ञानीयविषयितायामपिसत्वेनोदासीनविषयकविरोधिविषयकसा
मानाधिकरण्येनसाध्याभावनिश्चयोत्तरानुमितिसामान्यउभयाभावासत्वादतस्तस्याप्युदासीनेऽतिव्याप्तिरपेक्षितेत्यभिप्रायेणनिर्वह्निर्व
ह्निमानित्याद्याहार्यस्थलबोधकंतत्रेत्युपन्यस्तमित्थंचाहार्यस्थलेऽउदासीनेऽतिव्याप्तेर्विरोधिविषयिताप्रयुक्तत्वसार्थक्यप्रदर्शनायोप
न्यस्ततयासेवातिव्याप्तिरिदानीमपितदवस्थेतिसूचनायदुर्वारैवेत्युक्तमपिसंगतं॥अत्रप्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवा
रणायविरोधिविषयित्वानतिरिक्तवृत्तिविशिष्टांतरविषयित्वाव्यापकस्वविषयिताव्यापकोभयाभावप्रयोजकाभावत्वरूपविशिष्टांतरा
घटितत्वंदेयं॥यस्तुविरोधित्वमन्यथानिरुच्यलक्षणमुपवर्णयतितन्मतमुपन्यस्यदूषयति॥यत्तिति॥निरुक्तसाध्यहेतुवैशिष्ट्या
वगाहीति॥साध्यतावच्छेदकावच्छिन्नसाध्यतद्व्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नहेतुवैशिष्ट्यावगाहीत्यर्थः॥विशेषणेत्यादि
॥अत्रविशेषणविशेष्यतावच्छेदकभावानापन्नविरुद्धकोटिद्वयप्रकारकैकधर्मिविशेष्यकज्ञानत्वंधर्मितावच्छेदकतान्यत्वावच्छे
दकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगितावृत्तिप्रतियोगिताकाभावत्वावच्छिन्नधर्मितावच्छेदकता

नात्मप्रकारतानिरूपितत्वस्वावच्छेदकावच्छिन्ननिरूपितविरोधिविषयतानिरूपितत्वस्वनिरूपितविशेष्यतावच्छेदकतापर्याप्त्यनुयोगि
तावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिताद्यत्तित्वस्वसामानाधिकरण्येनचतुष्टयसंबंधेनप्रकारताविशिष्टविशेष्यतावत्वं॥ अभावीयप्रतियोगितायांपर्याप्तिप्रतियोगिताद्यत्तित्वंस्वनिरूपितावच्छेदकतात्वावच्छिन्नत्वसंबंधेन॥ एवमग्रेविशेष्यतायांपर्याप्तिप्रतियोगिताद्यत्तित्वमपिस्वनिरूपि[illegible]त्वावच्छिन्नत्वसंबंधेनबोध्यं॥ तेनान्यत्रविशेषणविशेष्यत[illegible]भावापन्नयोरेवव
ह्निनदभावयोर्निर्वह्निःपर्वतोवह्निमानितिज्ञानेपर्व[illegible]रत्वेपिनपक्षेसाध्यवैशिष्ट्यावगाहितादृशनिश्चयाप्रसिद्धिः॥ प्रथमसंबं
धनिवेशाद्ध्रदोवह्निमान्शैवालादित्यत्रह्रदोवह्निमान्वह्निव्याप्यशैवालवांश्चेतिसमूहालंबनात्मकज्ञानीयशैवालनिरूपितविशेष्यतायां
उक्तत्रितयसंबंधेनवह्नित्वावच्छिन्नप्रकारताविशिष्टत्वेपिन[illegible]प्रसिध्यातत्रत्यदोषाव्याप्तिः॥ तत्रस्वपदार्थप्रकारता
यांधर्मितावच्छेदकनानात्मकतत्स्यनिवेशाद्वह्निमान्ह्रदोव[illegible]भाववद्ध्रदकालीनजलवानित्यादौद्रव्यभावत्वावच्छिन्ननिरूपितह्रदत्व
वच्छिन्नविशेष्यतायांनिरुक्तसंबंधचतुष्टयेनवह्नित्वावच्छिन्नप्रकारतावत्वेपिनसंशयान्यतादृशज्ञानाप्रसिद्धिः॥ स्वावच्छेदकावच्छि

न्न प्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितत्वनिवेशेपर्वतोवह्निमान्महानसीयवह्न्यभावादित्यादौसंशयान्यतादृशज्ञानाप्रसिध्याव्यभिचारेऽव्याप्तिरतस्तत्रत्वावच्छेदकतापर्याप्त्यवच्छेदकेत्यादिनिवेशः॥महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वे ज्ञाभावप्रतियोगितावच्छेदकतायामहानसीयत्ववह्नित्वोभयपर्याप्तत्वेपितद्व्यक्तित्वेनवह्नित्वनिष्ठतद्व्यक्तित्वावच्छेदेनवह्नित्वमात्रेपिपर्य
तेःसावच्छेदकतापर्याप्तावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितत्वनिवेशेतत्रैव
वह्नित्वावच्छिन्नप्रकारतावैशिष्ट्यादृशमहानसीयवह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतायास्तादृशमभूहालंबनेसत्ता
त्तादृशसंशयान्यज्ञानाप्रसिध्याव्यभिचारेऽव्याप्तिरतोतादृशपर्याप्तिप्रतियोगितादृन्नित्वमभावीयप्रतियोगितायांनिविष्टंतथाचतादृश
वह्निनिष्ठतद्व्यक्तित्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगितायांनिरुक्तसंबंधेनमहानसीयवह्न्यभावीयप्रतियोगित्वासत्वान्नदोषः
॥निर्वह्निःपर्वतोवह्निमानित्यादौपक्षेसंशयान्यतादृशज्ञानाप्रसिद्धिवारणायतत्रैवाग्निप्रकारतानामपिधर्मितावच्छेदकतानात्मकत्व
निवेशः॥द्वितीयसंबंधनिवेशाद्दक्षःकपिसंयोगीकपिसंयोगाभावादित्यादौनसंशयान्यतादृशज्ञानाप्रसिध्याव्यभिचारेऽव्याप्तिः॥तृती

यसंबंधनिवेशात्पर्वतोऽवृत्तिईत्यादित्यत्रपर्वतोऽवृत्तिईत्यव्यापकावृत्तित्वसमानाधिकरणद्रव्यवांश्चेतिसमूहालंबनेहेत्वंशेव्याप्तासामानाधिकरण्यघटकवृत्तित्वनिष्ठवृत्तित्वतावच्छिन्नप्रकारतातद्विशिष्टावृत्तित्वनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतावत्त्वेपिन संशयान्यतादृशज्ञानाप्रसिद्धिः॥चतुर्थसंबंधनिवेशात्पर्वतोवह्न्यभाववानित्यादौवह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायाःपर्वतोवह्निमानितिविभिन्नज्ञानीयवह्नित्वावच्छिन्नप्रकारताविशिष्टत्वेपिनपक्षेसंशयान्यतादृशज्ञानाप्रसिद्धिः॥ननुवेवमपिपर्वतोवह्न्यभाववत्सर्वतकालीनवह्निमानित्यादौसंशयान्यतादृशज्ञानाप्रसिद्धिस्तादृशज्ञानेनिरुक्तचतुष्टयसंबंधेनवह्नित्वावच्छिन्नप्रकारताविशिष्टायावह्न्यभावत्वावच्छिन्नप्रकारताविशिष्टायावापर्वतत्वावच्छिन्नविशेष्यतायाःसत्वादितिचेन्न॥प्रथमसंबंधप्रविष्टधर्मितावच्छेदकतानात्मकत्वस्थानेऽवच्छेदकतानात्मकत्वस्यैवनिवेशाद्वह्न्यभावस्यसाध्यतावच्छेदकोटिप्रविष्टत्वेनतद्विषयतायास्तथात्वाभावात्॥ननुचैवंसत्येकधर्मावच्छिन्नविशेष्यकत्वनिवेशस्थानीयतृतीयसंबंधनिवेशनंव्यर्थंपर्वतोऽवृत्तिईत्यादित्यत्रहेत्वंशेव्याप्तिविशिष्टहेतुज्ञानीयप्रकारतावच्छेदकत्वेनतादृशसमूहालंबनज्ञानीयवृत्ति

त्वावच्छिन्नप्रकारतायाअवच्छेदकत्वानात्मकत्वविरहेणैवतादृशस्थलेसंशयान्यतादृशज्ञानाप्रसिध्यभावादितिवाच्यं॥परामर्शात्मकज्ञानेहेत्वंशे व्याप्तिघटकसामानाधिकरण्यस्योपलक्षणतयैवभानस्वीकर्तृमतेतादृशवृत्तित्वप्रकारतायाअवच्छेदकत्वानात्मकत्वस्याव्याहृतत्वादितिदिक्॥वह्निव्याप्यवान्वह्निव्याप्यव्याप्यवांश्चह्रदोवह्न्यभाववानित्याहार्यज्ञानोपगमेनेति॥अथाहार्यसमूहालंबनस्यमतद्वयसिद्धत्वेभ्रमान्यवृत्तियदीयविषयितेत्यादिविवक्षायामप्यसंभवोभ्रमान्यसमूहालंबनात्मकज्ञानीयवह्न्यभाववद्ह्रदत्वाद्यवच्छिन्नविषयितायाःपक्षेसाध्यावगाहिह्रदोवह्निमान्वह्न्यभाववांश्चेत्याद्याहार्यसमूहालंबनात्मकज्ञानवृत्तित्वात्समूहालंबनासमूहालंबनरूपसमानाकारज्ञानीयविषयितयोर्भेदाभावात्॥शेषंसार्थक्यानुपपत्तिश्च॥भ्रमान्यवृत्तिवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयितायाह्रदोवह्निव्याप्यवान्वह्न्यभाववांश्चेत्याहार्यसमूहालंबनतादृशनिश्चयावृत्तित्वविरहात्॥नचाभ्युपगमेनेत्यस्यस्वमतेऽभ्युपगमेनेत्यर्थस्तथाचयत्रिमतेआहार्यसमूहालंबनास्वीकारान्नासंभवशेषवैय्यर्थ्यइतिवाच्यं॥तथासतिसमूहालंबनमादायैवासंभवसंभवाद्विशिष्टवैशिष्ट्यावगात्याहार्यज्ञानमादायासंभवप्रदर्शनेबीजाभावप्रसंगात्॥एवंघटाद्युदासीनेऽतिव्याप्तिवारकतयासामा

न्यपदस्यावश्यकत्वंप्रदर्श्यसंभवसंगमनेबीजाभावश्चसामान्यपदासत्वेपिसमूहालंबनासमूहालंबनज्ञानीयविषयितयोर्भेदाभावे
नयत्किंचिद्विषयिताया अध्याहार्यसमूहालंबनतादृशनिश्चयावृत्तित्वविरहाद्॥नचयत्नुमताभिप्रायकत्वमाहार्यसमूहालंबन
स्यवक्तुंशक्यं॥अत्रमान्यवृत्तियदीयविषयितासामान्यंतादृशनिश्चयावृत्तीतिविवक्षायांतन्मतेदर्शितदिशाःसंभवस्यैवसंभवेनच
क्राभिधानस्यतन्मतेदोषत्वकथनासंगतेश्चेतिचेदत्रकेचिदभ्युपगमेनेत्यस्यस्वमतेऽभ्युपगमेनेत्यर्थः॥विशिष्टवैशिष्ट्यावगाह्याहार्य
ज्ञानमादायासंभवप्रदर्शनंचमतद्वयेपितत्संभवप्रदर्शनायस्वमतेआहार्यसमूहालंबनस्वीकारेपियत्तितिमतेतदस्वीकाराद्भाव्यद्
त्तीत्यादिविवक्षायामसंभवाभावान्नग्रंथकाररीतिविरुद्धत्वदूषणसंगतिरितिवदंति॥वस्तुतस्तुमतद्वयेप्याहार्यसमूहालंबन
त्तीत्यभ्युपगमेप्युदासीनघटादावतिव्याप्तिवारणायस्वरूपावच्छिन्नविषयितासामान्यंतादृशनिश्चयावृत्तीतिविवक्षयावक्ष्याप्यसा
ध्यकेरूढपक्षकेवह्न्यभाववद्ध्रदादावतिव्याप्तिवारणेनशेषवैयर्थ्यासंभवयोःशक्योपपादकतयासर्वेपिग्रंथःसुसंगतएव॥नचैवं
सत्येकविशिष्टेऽपरावगाह्याहार्यस्यसर्वमतसिद्धत्वेनेतादृशाहार्याभ्युपगमेनेत्येतदभिनवस्वीकारार्थकमसंगतमतोऽभ्युपगमेने

तिवाक्यस्वरसात्मूहालंबनाद्धर्म्यंशेमतत्वविरहान्नस्येवाभिनवाभ्युपगमइत्यर्थवंयुक्तंतथाचनग्रंथसंगमनमितिवाच्यं॥तत्तद्भावान्यतरधर्मितावच्छेदककतत्तद्भावान्यतरप्रकारकज्ञानस्याहार्यत्वप्रसिद्धावपितत्तद्व्याप्यधर्मितावच्छेदककतत्तद्भावप्रकारकज्ञानस्याहार्यत्वंनकविदप्युक्तमतोनस्यसर्वमतसिद्धत्वप्रत्युतैवतादृशाहार्याभ्युपगमेनेत्युक्तिः॥अन्यदृत्तियदीयविषयितासामान्यंतादृशनिश्चयावृत्तितदीयविषयितायाविवक्षणेननिर्वाहेपीति॥अत्रेदंचित्यंयत्तिमतेऽहोधूमव्यापकवह्निसमानाधिकरणधूमवान्यटादित्यादौवत्यभाववद्धूदेःतिव्याप्तिःशेषदलनिवेशेपिदुर्वारानहिवत्यभाववद्धूदनिश्चयोत्तरानुमितौपक्षेदर्शितसाध्यावगाहनंसंभवतिधर्मिणिधूमादिमत्ताबुद्धिंप्रतिवत्यादौधूमव्यापकत्वग्रहस्यधर्मिणिवत्यभाववद्धूदग्रहयोश्चद्वयोरेवैकविशिष्टापरत्वादिनाकार्यकालविधयाप्रतिबंधकत्वात्॥यदिचशेषदलेनवत्यभाववद्धूदादेरवारणेपिनक्षतिरनाहार्यज्ञानीयतद्विषयितायाधूमव्यापकत्वांशेआहार्येपक्षेनिरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयेवर्तमानतयाविरोधित्वानिर्वाहेणवनदतिव्याप्तिवारणात्॥नत्वाहार्यात्मनोवह्न्यव्याप्यधूमवत्तानिश्चयस्यवत्यभाववत्ताग्रहेप्रतिबंधकत्वंयेनानाहार्यज्ञानीयवत्य

भाववद्भूदविषयितादर्शिताहार्यनिश्चयेनवर्तेतेतिविभाव्यतेतदावत्यभाववद्भूदातिव्याप्तिवारकतयाशेषसार्थक्यंवर्णयतःशिरसिशेष

वैय्यर्थ्यदूषणपरिहाणनिक्षेपः॥ननुशेषदलेऽनुमितिनिषेधयाभावेतदधिकरणतायांवाज्ञानवैशिष्ट्यप्रयोज्यत्वासाधारण्यविषयितायप्र

योज्यत्वोभयाभावोनिवेशनीयस्तथाचनिरुक्तस्थलेवत्यभाववद्भूदविषयकनिश्चयस्यवक्रियाव्याप्यानुमितौज्ञानविशिष्टज्ञानत्वेनैवप्रति

बंधकतयातदुत्तरानुमितावुभयाभावस्यनिरुक्तोभयाभावविरहान्नवत्यभाववद्भूदत्वावच्छिन्नेतिव्याप्तिरितिवाच्यं॥एवमपिव

क्रियाव्याप्याभाववान्हृदोवक्रियाव्यवानित्यादौवत्यभाववद्भूदत्वावच्छिन्नेऽतिव्याप्तिर्दुर्वारेत्याहार्यसमूहालंबनाभावाद्भ्रान्यत्वेसति

द्विषयितायासादृशनिश्चयाद्यत्तित्वान्निरुक्तशेषदलसत्वाच्चेतिवक्ष्यमाणदूषणदानानौचित्यमेवेति॥उक्तपूर्वपक्षेस्वयंसमाधा

नमाह॥परेतिनि॥वत्यादिविशिष्टेति॥वक्रियावच्छिन्नप्रकारताकेत्यर्थस्वरूपाच्चवक्रियावच्छिन्नप्रकारतानिरू

पितसमवायसंबंधावच्छिन्ननिरवच्छिन्नधर्मितावच्छेदकतासंबंधेनवक्रियावच्छिन्नप्रकारताकानाहार्यतत्सुरुचीयबुद्धिप्र

तिवत्यभावत्वावच्छिन्नप्रकारतानिरूपितसमवायसंबंधावच्छिन्ननिरवच्छिन्नधर्मितावच्छेदकतासंबंधेनवत्यभावत्वावच्छि

न्नप्रकारताकतत्पुरुषीयनिश्चयत्वेनप्रतिबंधकत्वंचैत्रीयरूदोवत्व्यभाववा नितिज्ञानोत्तरंमैत्रीयरूदोवह्निमानितिज्ञानोत्पत्त्याऽभय
त्रतत्पुरुषीयत्वनिवेशः॥नचपुरुषभेदेनप्रतिबध्यप्रतिबंधकभावेधर्मितावच्छेदकधर्मनिवेशोपेक्षयालाघवविरहःशंक्यःपुरुष
पेक्षयाधर्मणामानंत्यात्तद्भेदेनप्रतिबध्यप्रतिबंधकभावएवगौरवात्॥निरूपितत्वसंबंधेनरूढत्वविशिष्टेवह्निसामान्याभाववत्ताज्ञानो
त्तरंसमवायसंबंधेनरूढत्वविशिष्टेवह्निबुद्ध्युत्पत्त्यासमवायेनरूढत्वविशिष्टेवत्व्यभावबुद्ध्युत्तरंनिरूपितत्वसंबंधेनरूढत्वविशिष्टे
वह्निबुध्युत्पत्त्याचोभयत्रसमवायसंबंधावच्छिन्नधर्मितावच्छेदकतानिवेशः॥जातिमान्वत्व्यभाववानितिज्ञानोत्तरंरूदोवह्निमानितिबु
द्धेरूदोवत्व्यभाववानितिनिश्चयोत्तरंजातिमान्वह्निमानितिबुद्धेश्चोत्पत्तौउभयत्रधर्मितावच्छेदकतायांनिरवच्छिन्नत्वनिवेशः॥जातिमा
न्वत्व्यभाववाञ्जातिमान्वह्निमानितिज्ञानयोश्चव्यर्थत्वेप्रतिबंधकप्रतिबध्यभावऊह्यः॥रूदोवत्व्यभाववानितिज्ञानोत्तरंरूदोघटवान्
व्यंवह्निमदितिज्ञानस्यरूदोघटवान्द्रव्यंवत्व्यभाववदितिज्ञानोत्तरंरूढोवह्निमानितिज्ञानस्यचोत्पत्तौउभयत्रकेवलधर्मितावच्छेदकतायाः
संबंधत्वमुपेक्ष्यतद्विशेषस्यसंबंधत्वादरः॥स्वनिरूपकत्वस्वभिन्नावच्छेदकत्वनिरूपकत्वोभयसंबंधेनावच्छेदकताविशिष्टान्यत्वरूपा

वच्छेदकताद्यानिरूपकत्वविशेषितविशेष्यतानिरूपितत्वेनापिनिरुक्तावच्छेदकतानिरूपी यातेनसुंदरद्रव्यत्वावच्छेदेनवह्न्यभाववत्ताज्ञानोत्तरंद्रव्यत्वसामानाधिकरण्येनवह्निमत्ताज्ञानोत्पत्तावपिनक्षतिः॥अथद्रव्यत्वसामानाधिकरण्येनवह्निमत्ताबुद्धिंप्रतिद्रव्यत्वसामानाधिकरण्येनवह्न्यभाववत्ताज्ञानस्यप्रतिबंधकतावारणायधर्मितावच्छेदकव्यापकत्वविशिष्टसंसर्गकबुद्धेरेवप्रतिबंधकत्वस्यापेक्षितव्यतयाधर्मितावच्छेदकभेदेनप्रतिबंधकताभेदस्तन्त्रतयावश्यकइतिचेन्न॥धर्मितावच्छेदकावच्छेदेनविशिष्टबुद्धेःसंसर्गीभूतधर्मावच्छेदेनभासंतनत्वन्यव्यापकत्वमितिस्वीकारेधर्मितावच्छेदकमनिवेश्याधिकरणनिष्ठात्यंताभावप्रतियोगितानिरूपितत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितप्रतियोगितानिष्ठावच्छेदकतानिरूपितावच्छेदकतानिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितायास्वरूपत्वनिष्ठावच्छेदकतातन्निरूपितायास्वरूपादिनिष्ठसांसर्गिकविषयतातच्छालिनिप्रतिबंधकत्वोपगमसंभवात्॥इत्थंचद्रव्यावह्निमान्धूमादित्यादौवह्न्यभाववद्द्रव्यत्वकदोषज्ञानोत्तरज्ञाननिष्ठोयःप्रतिबध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रकारतानिरूपितद्रव्यत्वनिष्ठधर्मितावच्छेदकतासंबंधनयोद्रव्यत्वनिरूपितसंबंधित्वाभावस्तत्रप्रतिबंधकज्ञानीयवह्न्यभावत्वावच्छिन्नप्रकारता

निरूपितत्वनिष्ठधर्मितावच्छेदकतात्मकविषयतायाः प्रयोजकत्वाल्लक्षणसमन्वयएवमेवव्यभिचारादावूह्यः॥निर्वह्निर्वह्निमानित्यादौवत्यभावनिष्ठवत्यभावादीलक्षणमुपपादयतिएवंचेति॥तद्देशोत्यत्रदेशपदंधर्मितावच्छेदकपरं॥तद्वच्छेदकतावच्छेदकत्वेति॥तद्वच्छेदकताधर्मितावच्छेदकावच्छिन्नत्वेतद्वच्छेदकत्वंचधर्मितावच्छेदकइतिबोध्यं॥ननुनिरुक्तसंबंधावच्छिन्नप्रतियोगिताकेच्छाविरहाधिकरणनावैशिष्ट्यस्यवह्नित्वावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकतायांनिवेशोवत्यभावनिष्ठताद्दशधर्मितावच्छेदकतायाएवाप्रसिद्धिरिच्छासत्वएवनिर्वह्निर्वह्निमानित्याहार्यज्ञानोदयात्तदीयधर्मितावच्छेदकतायाइच्छाविशिष्टत्वात्॥इच्छाविरहदशायांचतादृशज्ञानस्येवानुत्पत्तेरितिकथंनिर्वह्निर्वह्निमानित्यादौलक्षणसमन्वयइत्याशंक्यकल्पांतरमाह तादृशेति॥निरुक्तसंबंधावच्छिन्नप्रतियोगिताकेच्छाविरहस्येच्छाकार्यप्रतिबंधकज्ञानेसतादाहविशेषणताविशेषधर्मितावच्छेदकताघटितेति॥ननुनिरुक्तधर्मितावच्छेदकतासंबंधेनवह्निमत्ताज्ञानंप्रतिनिरुक्तधर्मितावच्छेदकताप्रत्यासत्यावत्यभाववत्ताज्ञानेनिश्चयत्वेनप्रतिबंधकत्वेधर्मितावच्छेदकमनिवेश्यवत्यभाववत्ताज्ञानेनिश्चयत्वंदुर्वचंतथाहिवत्यभाववत्ताज्ञानेनिश्चयत्वंनता

वह्न्यभावाभावप्रकारकत्वसतिवह्न्यभावप्रकारकत्वंरूपेवह्निमानितिज्ञानंप्रतिमहानसंवह्न्यभावाभाववद्रूपेवह्न्यभाववानिति-
ज्ञानस्यप्रतिबंधकत्वानुपपत्तेः॥नापिवह्न्यभावनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितावह्न्यभावा
भावनिष्ठप्रकारतातच्छून्यत्वसतिवह्न्यभावप्रकारकत्वंदर्शितज्ञानीयवह्न्यभावाभावादिप्रकारतायामहानसंवह्न्यभाववदितिज्ञानीय
वह्न्यभावप्रकारतानिरूपितविशेष्यतावच्छेदकंयन्महानसत्वंतद्वच्छिन्नविशेष्यतानिरूपितत्वानपायात्तस्यैवासंग्रहात्तदवस्था
त्वं॥नापितादृशवह्न्यभावाभावप्रकारताशालित्वतादात्म्योभयसंबंधेनवह्न्यभावज्ञानविशिष्टान्यत्वं॥महानसोवह्न्यभावाभाववान्न
वाऽरूपेवह्न्यभाववानितिज्ञानासंग्रहात्॥नापिस्वावच्छिन्नविशेष्यतानिरूपितवह्न्यभावाभावप्रकारताभून्यत्वस्वावच्छिन्नविशेष्यता
निरूपितवह्न्यभावप्रकारताकत्वोभयसंबंधेनकिंचिद्धर्मविशिष्टत्वंनिरुक्तनिर्णयत्वस्यदर्शितसमूहालंबनसाधारण्येपितद्विशिष्ट
स्यधर्मितावच्छेदकतासंबंधेनमहानसत्वेपिसत्वान्महानसंवह्निमन्नवेतिविशिष्टबुध्यनुपपत्तेरतआहाधिकमन्यत्रानुसंधेय-
मिति॥अयंभावः प्रतिबंधकतावच्छेदककोटौनिश्चयत्वमनिवेश्यवह्न्यभावसंशयोत्तरंवह्निविशिष्टबुद्धुत्पत्तिर्निर्वाहायप्रति

बंधकतावच्छेदकनिरुक्तधर्मितावच्छेदकतासंबंधेनप्रत्यासत्तिघटकीभूतवत्त्वभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतायाश्चेदवत्त्व
भावाभावप्रकारत्वानिरूपितत्वंदेयंतथाचतादृशविशेष्यतानिरूपितधर्मितावच्छेदकतासंबंधेनवत्त्वभाववत्ताज्ञानत्वेनैवप्रतिबंध
कत्वंसंशयेसमुच्चयवैलक्षण्यायप्रकारतात्वानिरूपितैकैकविशेष्यतास्वीक्रियतइतिसंशयोत्तरंविशिष्टबुद्ध्युपपत्तिः॥नच्चसमुच्चया
विषयस्यकोट्योर्विरोधस्यसंशयविषयतयैववैलक्षण्यसिद्धेरनिरूपितैकविशेष्यतायाअकृतायाःस्वीकारोनयुक्तइति
वाच्यं॥विरोधोपस्थितिंविनापिविशेषदर्शनकोटिस्मरणधर्म्यादिस्मरणसहकृतसंशयत्वानुभवसिद्धतयानिखिलसंशयानांविरोध
विषयकत्वासंभवेनसमुच्चयव्यावर्तनेसंशयेविलक्षणविशेष्यतायाआवश्यकत्वादतएवकचिद्विरोधभानस्यापितत्रयोज
कांधीनत्वादित्यत्रदीधितिकृताकचिदित्युक्तं॥संशयेकोट्योःसंसर्गतयाविरोधभानस्वीकारेतादृशविरोधविषयतायासमुच्चय-
वैलक्षण्यानुपपत्त्यैवसंशयेस्वीकारात्किमपरंद्वयतिरिक्तविशेष्यतया॥अथनिखिलसंशयेषुप्रकारताद्वयनिरूपितैकविशेष्यत्वमपि
नसंभवति॥नीलपर्वतत्वंधर्मितावच्छेदकीकृत्यवत्त्वभावंशुद्धपर्वतत्वंधर्मितावच्छेदकीकृत्यवत्त्वभावाभावंवह्निंवाउद्दिश्यवाहमानस्यसं

शयस्यतथात्वायोगात्॥तत्रवत्त्यादिप्रकारतानिरूपितविशेष्यतायानेत्यानवच्छिन्नत्वेनतदवच्छिन्नवत्त्यभावप्रकारतानिरूपितविशे
ष्यताभिन्नत्वात्॥तत्रवत्त्यादिप्रकारतानिरूपितविशेष्यतायानेत्यावच्छिन्नत्वोपगमेनीलपर्वतत्वंधर्मितावच्छेदकीकृत्यदर्शितकोटि
द्वयमवगाहमानस्यसंशयस्यतनोवैलक्षण्यानुपपत्तेः॥नचनीलपर्वतोवह्निमान्नीलपर्वतोवत्त्यभाववानित्याकारकसमूहालंबनव
न्नीलपर्वतोवत्त्यभाववान्पर्वतोवत्त्यादिमानितिज्ञानमपिनिर्णयएवेतिवाच्यं॥तथासतिकार्यकालेपर्वतत्वावच्छेदेनवत्त्यादिमत्ता
निर्णयस्यप्रतिबंधकस्यसत्वान्नीलपर्वतत्वावच्छेदेनवत्त्यभावादिविशिष्टबुद्ध्यनुत्पत्तेरितिचेन्मैवं॥दर्शितसंशयेष्वुभयप्रकारता
निरूपितैकविशेष्यताकिंनुतस्यापर्वतत्वावच्छिन्नत्वेनवत्त्यादिप्रकारतानिरूपितत्वंनेत्यविशिष्टपर्वतत्वावच्छिन्नत्वेनचवत्त्यभा
वप्रकारतानिरूपितत्वमितिविशेषः॥नीलपर्वतोवत्त्यभाववान्नवेतिसंशयेचविशेष्यतायाएकरूपेणैवोभयप्रकारतानिरूपितत्व
मितितत्तस्यवैलक्षण्यनिर्वाहः॥यदिचसंशयसमुच्चययोर्वैलक्षण्यायोभयप्रकारतानिरूपितमेकविशेष्यत्वमतिरिक्तमास्तां
संशयेपरंतुतत्रप्रत्येकप्रकारतानिरूपितविशेष्यताद्वयसत्वेपिबाधकाभावस्तत्रयोजकसामग्र्याअपितत्रसत्वात्॥नचतदवच्छि

न्नंप्रतिसंशयसामग्र्याःप्रतिबंधकत्वकल्पनान्तत्वयोजकसामग्र्येवनास्तीतिवाच्यं॥तत्रसंशयसामग्र्याःप्रतिबंधकत्वेमानाभावात्॥
नचसंशयसमुच्चयवैलक्षण्यान्यथानुपपत्त्यैवतत्स्वीकारइतिशंक्यं॥संशयव्याहृत्तविषयतायाःसमुच्चयेऽभावेपिसंशयनिष्ठवैलक्ष
णविषयतायास्तत्राभावेनैवतस्यसंशयवैलक्षण्यनिर्वाहात्संशयव्याहृत्तविषयितारूपमेवतत्रवैलक्षण्यमनुभूयतइतितुशपथैक
निर्णयमितिविभाव्यतेतदास्तुसंशयेऽतिरिक्तविषयत्वाकल्पनमस्तुचोभयप्रकारतानिरूपितविशेष्यत्वाद्वयंकिंतुरज्जुत्वव्यव
वर्तनायसंशयीयविशेष्यतयोरवच्छेद्यावच्छेदकभावःस्वीक्रियतेतथाचवह्न्यभावाभावप्रकारतानिरूपितविशेष्यत्वानवच्छिन्न
वह्न्यभावादिप्रकारतानिरूपितविशेष्यतानिरूपितधर्मितावच्छेदकतासंबंधेनवह्न्यभाववताज्ञानत्वेनप्रतिबंधकतेतिनकोपिशं
कावसरइति॥अथैवमपिवह्न्यभावाभाववतिह्रदेवह्न्यभावप्रकारकमित्यप्रामाण्यज्ञानस्यैवह्रदोवह्न्यभाववानितिज्ञानप्रति
बंधकतायामपेक्षकत्वंनतुवह्न्यभावाभाववतिघटेवह्न्यभावप्रकारकमित्यप्रामाण्यज्ञानस्येतिधर्मितावच्छेदकनिवेशोदुर्वारएवे
[illegible]न्न॥[illegible]भावाभाववद्वृत्तित्वप्रकारतानिरूपितायावह्न्यभावप्रकारतानिरूपितविशेष्यतानिष्ठविशेष्यतातद्वच्छेदक

तावच्छेदकत्वसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावाधिकरणतावि शिष्टधर्मितावच्छेदकतायाएवप्रतिबंधकतावच्छेदकसंबंधत्वोपगमेनतादृशाप्रामाण्यग्रहाभावस्यविशेषणताविशेषधर्मितावच्छेदकतांघटितसामानाधिकरण्यसंबंधेनप्रतिबंधकविशेषणत्वोपगमेनतादृशज्ञानवकाशेनधर्मितावच्छेदकनिवेशावश्यकत्वादितिदिक्॥पक्षतेत्यादि॥पक्षतासाध्यहेतुसंबंधनिवेशनमाश्रयासिद्धिसाध्याप्रसिद्धिहेत्वसिद्ध्यादेःसंग्रहार्थं॥अत्रचेति॥प्रतिबंधकतांछेदकतेति॥तानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकज्ञानीयप्रतिबंधकताव्यक्तिभिन्नत्वोभयाभाववत्तादृशग्रहप्रतिबंधकतावच्छेदकधर्मवतोपर्वतीयवह्निमान्धूमादित्यादौपाषाणमयत्वविशिष्टपर्वतेनातिव्याप्तिः॥इत्यभिप्रायेति॥अभिप्रायइत्यनेन नास्वरसत्वहीजंदूक्तयुक्त्यावत्तद्धर्मावच्छिन्नभेदकूटावच्छिन्नभेदस्यातिरिक्तत्वेघटाभावाभावत्वस्याप्यनेकघटेषुसंबंधकल्पनामपेक्ष्यतादृशाभावत्वविशिष्टस्यातिरिक्तधर्मिणएवकल्पयितुंयुक्तत्वेनखाभावाभावस्यस्वरूपत्वसिद्धांतभंगइति॥अधिकरणेतिछेदकेति॥तत्तद्धर्मावच्छिन्ननिरूपिततत्त्वेत्यादिः॥अधिकरणानां॥विषयितानां॥विकासकतया॥परिचार्यकतया॥तथाचतत्तद्विषयितान्यतमवि

षयितानिरूपकतावच्छेदकधर्मवत्त्वमेवलक्षणंविषयितायांतत्तद्धर्मावच्छिन्ननिरूपितत्वंपरिचायकमात्रंतेननतत्तद्धर्मवत्त्वमात्रस्यैवलक्षणत्वसंभवेशेषंवैयर्थ्यशंकानवकाशइतिभावः॥ ॥विदुषांकंठभूषायेरघुनाथेननिर्मिते॥संन्यायरत्नेसामान्यनिरुक्तिःपूर्णतामगात्॥ ॥इतिमीमांसान्यायपंचास्यश्रीनन्दपंचार्यशिष्यस्यपर्वतेसुपनामकरघुनाथस्यकृतौन्यायरत्नाभिधायांगदाधरीयंचवादटिप्पण्यांसामान्यनिरुक्तिःसंपूर्णा॥ ॥अथपंचलक्षणी॥ ॥नसंभवतिनोसत्तुमर्हतीति॥अत्रसंपूर्वकभूधातोरुसत्तियोग्यत्वरूपमर्थमभिसंधायोक्तमुसत्यर्हत्वंनास्तीति॥व्याप्तिनिश्चयश्चनिषेद्धुमशक्यःसिद्ध्यसिद्धिभ्यांव्याघातात्॥नचोसत्तियोग्यत्वाभावोपिवक्तुमशक्यःकिंमतेधर्म्यप्रसिद्धेरितिवाच्यं॥व्याप्तिविषयकत्वसंशायान्यत्वज्ञानत्वानांप्रत्येकंप्रसिद्धानामेकजन्यतावच्छेदकत्वाभावस्यैवविवक्षितत्वात्॥व्याप्तिविषयकत्वसंशायान्यत्वज्ञानत्वदृत्तिसमुदायत्वंजन्यतावच्छेदकतापर्याप्तयनवच्छेदकमितिपरमार्थः॥नच्चसामान्यतोजन्यतावच्छेदकेसंशयान्यत्वस्यवक्तुमशक्यत्वाद्व्याप्यंशेसंशायान्यत्वंवक्तव्यंतच्चव्याप्यभावनिष्ठप्रकारत्वानिरूपितव्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यताकत्वरूपंचार्वाक

मतेऽप्रसिद्धमेवेतिवाच्यं॥वाक्यभावाप्रकारकत्वस्यैवतदर्थत्वात्॥अथवापक्षतायंथोक्तत्रितयसंबंधेनव्याप्तिविषयिताविशिष्टविषयिताभून्यत्वंविवक्षणीयंतच्चघटज्ञानादौप्रसिद्धमितिनकश्चिद्दोषः॥प्रतीक्षांविधायेति॥प्रतीक्षाभविष्यत्कालकर्तव्यत्वप्रकारकज्ञानानुकूलव्यापारःसचव्याप्तिग्रहोपायश्चवक्ष्यतइत्येवंरूपः॥तत्प्राथम्यइति॥व्याप्तिस्वरूपनिरूपणस्यप्राथम्यइत्यर्थः॥तस्यव्याप्तिस्वरूपनिरूपणस्य॥व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वमिति॥औपयिकत्वंव्याप्तिग्रहोपायप्रतिपादनघटकोपायविषयकप्रतिपत्तिप्रयोजकत्वं॥प्रतिपत्तिश्चव्याप्तिग्रहजनकव्यभिचारज्ञानाभावसहचारज्ञानयोर्व्याप्तिग्रहजनकत्वप्रकारिका॥प्रयोजकत्वंचजनकज्ञानेजनकताघटकीभूतजन्यतावच्छेदकविशिष्टज्ञानस्यहेतुतयाजन्यतावच्छेदकीभूताव्यभिचारनिश्चयत्वसहचारज्ञानत्वयोर्ज्ञानेघटकीभूताव्यभिचारसहचारज्ञानयोर्हेतुतयापरंपरयाजनकत्वरूपंबोध्यं॥ननुप्रामाण्यव्यवस्थापनस्याप्रमाणसाधर्म्येणेत्यादिग्रंथेनसमाप्ततयासमारब्धेतिकथंयुज्यतआसमाप्तेरेवसमारब्धत्वव्यवहारादतआह॥अनिष्पन्नत्वादिति॥अपरिसमाप्तेरित्यर्थः॥अप्रमाणसाधर्म्येणेत्यादेःपरमतनिराकरणपरत्वात्समारब्धेतियुज्यतइतिशेषः॥अनिष्पन्नत्वादित्यस्यानं

तरंतन्निष्पत्तिरवश्यंसंपादनीयेतिसूचनायेतिशेषइतिकेचित्॥अनिष्पन्नत्वादित्यत्रपंचम्यर्थोज्ञानज्ञाप्यत्वंतस्यसमारब्धत्वेऽन्वय॥निष्पन्नत्वमतीतकृतिविषयत्वंकृतावतीतत्वंचस्वोत्पत्त्यधिकरणक्षणवृत्तिकृतिजन्यक्रियाजन्यफलानुकूलव्यापारानुकूलत्वप्रतियोगित्वोभयसंबंधेनवर्तमानध्वंसविशिष्टत्वं॥द्वितीयादिद्विचरमीयकार्यस्याद्यसिद्धत्वव्यवहारवारणायप्रतियोगित्वनिवेशः॥अनेककृतिसाध्यकार्यस्यकतिपयकृतिक्षणेसिद्धत्वव्यवहारवारणायद्वितीयसंबंधनिवेशः॥एतेनपरीक्षायांसमारब्धत्वविशेषणप्रयोजनंसूचितं॥तच्चप्रामाण्यपरीक्षायाःप्रामाण्यसाधकयुक्तिप्रदर्शनेनसिद्धत्वज्ञानवतःप्रवृत्त्यनुदयेनतत्प्रतिबंधकसिद्धत्वज्ञाननिवर्तनेनतन्निवृत्तिश्चसिद्धत्वघटकातीतत्वयहनिवर्तनद्वारातन्निवर्तनंचपरीक्षाविषयककृतिध्वंससमानकालीनपरीक्षाविषयककृतिविषयत्वरूपसमारब्धत्वघटकपरीक्षाविषयककृतिध्वंससमानकालीनत्वज्ञानस्योक्तसंबंधद्वयेनवर्तमानध्वंसप्रतियोगित्वात्तत्वज्ञानेप्रतिबंधकतया॥नचोक्तसंबंधेनोक्तध्वंसवत्त्वज्ञानेआद्यत्वनिश्चयस्यकथंप्रतिबंधकत्वमितिशंक्यं॥आद्यत्वस्योक्तसंबंधेनोक्तध्वंसवत्त्वाभावव्याप्यतयातदभावव्याप्यवत्त्वाज्ञानविधयैवप्रतिबंधकत्वात्॥नचैकमात्रकृतिजन्यफलानुकू

लकृतावुक्तोभयसंबंधेननादृश्यध्वंसवत्वाघवयोःसमावेशेनसामान्यव्याप्तिभंगइतिवाच्यं॥तथापिप्रामाण्यपरीक्षाद्यकृतित्वस्यतादृशकृतावभावेनविशेषव्याप्तेरव्याहतत्वात्॥इत्थंचसमारब्धत्वविशेषणाधीनकृतिविशेष्यकाद्यत्वज्ञानेजातेवनिरुक्तसंबंधेनतादृशध्वंसवत्वज्ञानानुत्पादेननदुष्टतादिज्ञानानुत्पादःसंभवतिनान्यथेति॥व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थाप्रयोजकत्वज्ञानार्थकारणीभूतेतिविशेषणंवक्तव्यंतच्चान्यथासिद्धमितिशंकतेयद्यपीति॥प्रामाण्यव्यवस्थापकत्वकथनमिति॥व्यवस्थानिश्चयःसचानुमानधर्मिकस्तथाचव्यवस्थापकत्वंप्रामाण्यानुमितिप्रतिबंधकत्वरूपासिद्धिज्ञानविघटकत्वं॥आवश्यकत्वंसफलत्वं॥प्रामाण्यव्यवस्थापकत्वविशिष्टव्याप्तिग्रहोपायप्रतिपादननिष्फलत्वलाभायतद्विशेषणं॥नचतल्लाभःकिमर्थमितिशंक्यं॥तल्लाभस्यव्याप्तिनिरूपणस्यत्वंनावश्यकत्वलाभार्थत्वादित्याशयेनसमाधानमाहतथापीतिकेचित्॥कारणीभूतांतापादानएवोक्तरीत्यालब्धस्यापिप्रामाण्यव्यवस्थापनजनकत्वस्यधर्मिज्ञानेनव्याप्तिग्रहोपायप्रतिपादनजन्येव्याप्तिनिरूपणेलाभोभवतिनान्यथेतिपुनःकारणीभूतांतविशेषणमित्याशयेनाह॥तथापीत्यपरे॥हेतुत्वावच्छेदकंहिभूतांतेनग्रंथेनव्याप्तिग्रहोपायप्रतिपाद

नस्यावश्यकत्वसूचनंग्रंथकर्तुरभिप्रेतंतत्रादिकुलदेवतानमस्कर्तुमर्हत्वेविघ्नाभावसूचनायस्वानुमतिसूचनंस्पष्टीकृतमित्याह॥ग्रंथतात्पर्यविषयइत्याहतथापीतिभवतित्यादिनाऽऽकांक्षितत्वमित्यंतेनभूतांतोक्तीर्दिङ्मात्रमतिसूचनंस्पष्टीकृतमित्याहुः॥प्रथमतस्तदेवोचितमिति॥विशेषणविशिष्टविशेष्यजनकत्वग्रहेधर्मिपारतंत्र्येणविशेषणजनकत्वस्यापिग्रहादुभयजनकेनिरूपणीयेविशेष्यमात्रजनकव्याप्तिस्वरूपनिरूपणस्यप्राथम्यमनुचितमित्याशंक्याविरहाद्व्याप्तिस्वरूपनिरूपणस्यैवप्राथम्यमुचितमितिभावः॥ननुव्याप्तिस्वरूपंनिरूपयतीत्येवव्याप्तिस्वरूपनिरूपणमारभतइतिकिमर्थमुक्तमर्थाबाधेप्यधिकलेखनस्यायुक्तत्वादित्यतआह॥प्रथमतइति॥निरूपयतीत्यसंगतमिति॥निरूपयतीत्यत्रारब्धार्थकृतोनिरूपणस्यसाध्यत्वारव्यविषयतासंबंधेनान्वयस्यशब्दखंडेभिश्चैर्व्यवस्थापितत्वात्पूर्वपक्षाभिधानजनकछतेःसिद्धांतकथनपर्यवसितनिरूपणसाध्यकत्वाभावादितिभावइतिकेचित्॥अपरेतुव्याप्तिस्वरूपंनिरूपयतीत्यत्रव्याप्तिस्वरूपविषयकज्ञानानुकूलव्यापारानुकूलवर्तमानकृतेरेववाक्यार्थतयाअत्रोच्यतइत्यादिनाप्रतिपादितत्वेनव्याप्तिस्वरूपत्वात्तद्विषयकनिरूपणानुकूलछववर्ती

मानकालीनत्वाभावेननिरूपयतीतिवाक्यार्थबाधादितिभावइत्याऽऽः॥आरभतइत्युक्तमितिति॥व्याप्तिस्वरूपनिरूपणमित्यादिः॥परमतनिराकरणपूर्वकव्याप्तिस्वरूपविषयकज्ञानानुकूलव्यापारोव्याप्तिस्वरूपनिरूपणपदार्थोद्वितीयार्थोविषयत्वंआंऽपूर्वकरभुधातोश्चाधरूतिरर्थेआरब्धातार्थश्चाश्रयत्वंवर्त्तमानकालश्चकालत्यधात्वर्थेऽन्वयस्तथाचपरमतनिराकरणपूर्वकस्वमतसिद्धव्याप्तिस्वरूपविषयकज्ञानानुकूलव्यापारानुकूलवर्तमानाधरूतिमान्मणिकारइतिवाक्यार्थः॥आधरूतेश्चस्वरूपनिरूपणविषयकत्वनियमात्सिद्धांतसिद्धव्याप्तिनिरूपणस्याधरूतिविषयत्वंतथाचोक्तंपूर्वपक्षाभिधानतत्खंडनयोस्तदारंभकत्वमितिति॥आरंभकत्वमाधरूतिविषयत्वमितिभावः॥केचित्तुव्याप्तिस्वरूपनिरूपणमारब्धत्वान्निरूपणपदार्थःपूर्ववदेवद्वितीयार्थउद्देश्यत्वंसामग्रीमेलनसाध्यकरूतिदशायामपिघटमारभतइतिव्यवहारात्॥तत्त्वसिद्धांतकथनसाध्यकत्वाभाववत्त्वमपिपूर्वपक्षाभिधानकृतौसिद्धांतसाध्यकतत्कथनजनकरूतौचाव्याहतंपरमतनिराकरणपूर्वकत्वविशिष्टसिद्धांतकथनमुद्दिश्यैवपूर्वपक्षाभिधानतत्खंडनयोरारब्धत्वात्॥तदारंभणरूपतेति॥निरूपणोद्देश्यकरूतिविषयतेत्यर्थइत्याऽऽः॥अथपरमतनिराक

रणपूर्वकसिद्धांतकथनंयदिनिरूपणंतत्र॥न्वेत्यादिपूर्वपक्षाभिधानस्यनिरूपणत्वानुपपत्त्याव्याप्तिस्वरूपनिरूपणमारभतेनन्वित्यादि
नित्रतृतीयार्थभेदान्वयस्यक्लेशेनैवोपपाद्यतापत्तिः॥एवंपक्षधर्मतानिरूप्यतइत्यत्रापिपक्षधर्मतानिरूपणमारभ्यतइत्यस्यैववक्तव्य-
तापत्तिःपक्षतायंथेपिप्रथमतःपूर्वपक्षस्यैवाभिधानात्॥यदिचनिरूपणंपूर्वपक्षनिरूपणसिद्धांतनिरूपणसाधारणंकथंचिन्नि
रुच्यपक्षतामणिःसंगम्यतेतदाप्रकृतेपिनिरूपयतीतिकथंनोक्तंदीधितिकृतेतिचेन्न॥अपठितपूर्वग्रंथानामेकमपिसमग्रंपठनीय
मितीच्छावतांझटितिनन्वित्यादिग्रंथाध्ययनेप्रकृतार्थनिरूपणमारभ्यतइत्युक्तंनिरूपयतीत्युक्त्यानुनारंभोलभ्यतेकतिपयलक्षणवि
चारोत्तरमपिनिरूपयतीतिव्यवहारसंभवात्॥पक्षतायंथेतुव्याप्तिनिरूपणानंतरमित्यभिधानादेवपक्षतानिरूपणारंभलाभादारभ्य
तइतिनोक्तमितिविभावनीयंसूक्ष्मबुद्धिभिः॥नन्वित्यादिमूलेव्याप्तिज्ञानइत्यत्रसप्तम्यर्थोविषयतंतत्रानुमितिजनकता
विशिष्टज्ञानस्यान्वयेजनकतायाअप्यवच्छेदकतयाऽन्वयः॥व्याप्तिपदार्थश्चपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितहेतुतावच्छे
दकावच्छिन्नप्रकारतानिरूपितप्रकारतारूपविलक्षणविषयताश्रयश्चमरव्याप्तिपदंचव्याप्तिपदार्थतावच्छिन्नेलाक्षणिकंत

त्रसमभिव्याहृतपदार्थविशेषणधर्मव्याप्यधर्मप्रकारकजिज्ञासाविषयस्तथाचानुमितिजनक तावच्छेदकनिरुक्तविषयताश्रयज्ञानीयविषयताश्रयव्याप्तिपदार्थतव्याप्यधर्मप्रकारकजिज्ञासाविषयाभिन्नोव्याप्तिपदार्थइतिबोधोज्ञेय:॥ननावदित्यत्रभेदबोधोपयुक्तप्रतियोग्यनुयोगिवाचकपदाभावादाहृगादाधर्यंव्याप्तिरिति॥तथाचव्याप्तिपदाव्यभिचरितत्व पदयो:सत्वान्नकाचिक्षतिः॥अत्रव्याप्तिपदार्थस्यपक्षत्वेऽव्यभिचरितत्वभेदस्यसाध्येऽप्रसिद्धेर्दुरुक्तव्यस्तत्रचकेवलान्वयि-न्यभावादित्यभिहितकेवलान्वयिरूपभावप्रतियोगित्वरूपहेतुरसिद्धःस्यादपिचव्याप्तिपदस्यांतेनिविष्टत्वात्तदर्थस्यपक्षत्वमनुप पन्नमुद्देश्यवाचकपदस्यपूर्वनिपातनियमोक्तेः॥याश्चायुक्तत्वादित्याशंक्याव्यभिचरितपदार्थस्यपक्षत्वमाहतथाचेति॥अव्यभि चरितपदार्थइति॥अत्राव्यभिचरितत्वस्यादुपलक्षणत्वेऽपसिद्धान्तसंभवाद्व्यभिचरितत्वपदस्यतत्प्रतियोग्यत्वरूपा-नुगतधर्मावच्छिन्नपरत्वमंगीकृत्याव्यभिचरितत्वपदार्थस्यपक्षत्वानुसरणं॥नचाननुगतमेवपक्षतादोषकमस्तीतिवाच्यं॥एक धर्मावच्छिन्नस्यव्याप्तित्वनिराकरणेप्यन्यधर्मावच्छिन्नस्यव्याप्तित्वशंकानिराकरणात्तत्तद्धर्मावच्छिन्नप्रतियोगितापरतायास्तस्य

स्यवक्तव्यतयासङ्कुचरितइतिन्यायातिक्रमापत्तेर्वाक्यभेदापत्तेश्च॥ननुत्रोच्यतइत्यादिनावक्ष्यमाणव्याप्तिभेदसाधनेसिद्धसाधनंसाध्याभाववदवृत्तित्वादिभेदसाधनेबाधइत्यतआहनानुमितिजनकज्ञानविषयइति॥तथाचानुमितिजनकज्ञानविषयत्वस्याव्यभिचरितत्वपदार्थेपरैःस्वीकारान्नसिद्धसाधनबाधावितिभावः॥अथैवमपिवह्न्यभाववदवृत्तित्वकालीनपर्वतोवह्निमानित्यादावनुमितिजनकज्ञानविषयत्वस्यानुमितिजनकतावच्छेदकविषयत्वस्यचाव्यभिचरितत्वपदार्थेसत्वाद्बाधोदुर्वारः॥नचधर्मितावच्छेदकतानात्मकत्वस्यविषयताविशेषणत्वान्नबाधइतिवाच्यं॥तथापिसाध्याभाववदवृत्तिहेतुकेऽनुमितिजनकज्ञानीयधर्मितावच्छेदकतानात्मकविषयतायाअपितत्रसत्वेनबाधस्यदुर्वारत्वात्॥नचतत्रापिव्याप्तिपदार्थधर्मितावच्छेदकतयैवसाध्याभाववदवृत्तित्वस्यभानान्नबाधइतिवाच्यं॥एवमपिसामानाधिकरण्येनतादृशवृत्तित्वाभावावगाहिज्ञानमादायबाधस्यदुर्वारत्वात्॥अथभ्रमान्यवृत्तित्वस्यतादृशविषयतायांनिवेशान्नदोषइतिचेत्सत्यं॥तथापिसाध्याभाववदवृत्तित्वकालीनपक्षकस्थलेधर्मितावच्छेदकप्रकारकज्ञानविधयाऽनुमितिजनकज्ञानीयतादृशविषयत्वस्यतत्रसत्वाद्बाधस्यानिरा

करणात्॥ननु अनुमितित्वावच्छिन्नजन्यतानिरूपितजनकतापर्याप्तनिवेशान्न दोष इति चेन्न असति सिद्धसाधनापत्तेस्तथात्वे अनु-
मितिं प्रति परामर्शत्वेन हेत्वेकलिंगकानां हेतुत्वे परस्परजन्यानुमितौ व्यभिचारापत्त्या तत्तल्लिंगकपरामर्शविशिष्टानुमितिं प्रति तस्य
तस्य हेतुतायाः वक्तव्यतया तत्र अनुमितित्वस्य जन्यतावच्छेदके निवेशस्य निष्प्रयोजनकतया अनुमितित्वावच्छिन्नजन्यतानिरूपि
तजनकतावच्छेदकविषयत्वस्य मतद्व्येऽभिचरितत्वपदार्थस्य सत्त्वात्॥नच एवं अनुमितित्वावच्छिन्नजन्यतायाः अप्रसिद्धत्वादेव
न असिद्धसाधनावकाश इति वाच्यं॥तथा सति अनुमितित्वावच्छिन्नं प्रति अकस्मिकतापत्तेः॥नच एतद्दोषवारणायैव अनुमितित्वस्य जन्य-
तावच्छेदके निवेश इति शंक्यं॥एतद्दोषवारणाया अनुमितिग्रंथे ज्ञानत्वेन कारणतायाः ग्रंथकृताभ्युपेतत्वात्॥अस्तु वा असिद्धसाध-
नाभावस्तथापि बोधोऽस्त्येव अनुमितित्वावच्छिन्नजनकतावच्छेदकविषयत्वाप्रसिद्धेः॥नच ज्ञानत्वविषयत्वयोरवच्छेदकत्वे
निगमकाभावो ज्ञानत्वस्य स्वरूपतोऽवच्छेदकतायां लाघवस्यैव तत्त्वात्॥अत्रोच्यते जन्यतावच्छेदककोटावनुमितित्वनिवे
शआवश्यकोऽन्यथा परामर्शकालीनानामनंतानामनुमित्यनात्मकानां परामर्शजन्यत्वकल्पनापत्तेः॥नचानुमितित्वस्य जन्य

तावच्छेदकत्वकल्पनयानौ[illegible]मितिवाच्यं॥अनंतानुमितिभिन्नज्ञानेषुजन्यत्वसंबंधकल्पनापेक्षयाऽनुमितित्वस्यतदवच्छेदकत्वक
ल्पनाया[illegible]यत्वात्॥अथानुमितित्वेनकार्यतावच्छेदककोटौनिवेशयितुंशक्यंतथासत्यनुमितित्वेतदवच्छेदकत्वस्यसमवायेतद
च्छेदकतावच्छेदकत्वस्यचकल्पनाप्रसंगात्॥नचानंतज्ञानेषुजन्यत्वकल्पनंतदपेक्षयापिगुरुभूतमितिवाच्यं॥अनुमितित्वाव्य
वहितोत्तरत्वयोर्द्वैर्मधर्मितावच्छेदकभावेविनिगमनाविरहेणगु[illegible]णभावहयकल्पनापत्तेः॥मैवंफलमुखगौरवस्य
दोषत्वात्॥यद्वा॥अनुमितित्वावच्छिन्नत्वस्थानेज्ञानत्वानवच्छिन्नत्वस्यैवनिवेशनीयतथानपूर्वोक्तदोषः॥धर्मितावच्छेदक
कारकज्ञानीयजन्यतायाज्ञानत्वेनैवावच्छेदात्॥अथैवमपिहेत्वधिकरणवृत्त्यभावत्वेनतादृशवृत्तित्वाभावस्यभानसंभवेनोक्तवि
षयतायामतद्वयएवतत्रसत्वेनबाधइतिचेन्न॥पक्षविषयतानिरूपितहेतुविषयतानिरूपितत्वस्यापितत्रनिवेशात्॥नन्वेवमपि
यत्रावृत्तिभेदःसाध्यतेआधेयत्वंहेतुस्तत्रपक्षविषयतानिरूपितहेतुविषयतानिरूपितविषयतायाअपिसत्वेनबाधोवर्ततएव॥न
चाव्यभिचारपदार्थत्वसामानाधिकरण्येनैवसाध्यसिद्धिरुद्देश्यतिसांप्रतं॥तथासतिसाध्यवद्भिन्नेत्यादेर्व्यर्थत्वानिराकरणापत्तेः॥

यादृशांकुरविशेषानुमितिः कस्यापिनाभूत्तदभाववदवृत्तित्वस्याप्यव्यभिचरितत्वपदार्थतयातत्रसाध्यस्यमतद्वयसिद्धेः सिद्धसाधनापत्तेश्च॥ **मैवं** पक्षविषयतानिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नविषयतानिरूपितानुमितिजनकतावच्छेदकविषयतानाश्रयत्वस्यैवाप्रयोजकत्वात्॥ **नच** हेतुमदवृत्तित्वस्यस्वरूपसंबंधेनाभावांशे भानादवृत्तित्वविषयताहेतुतावच्छेदकस्वरूपसंबंधावच्छिन्नेतिसांप्रतंपक्षविषयतानिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नविषयतातवद्विषयतानिरूपितत्वपर्याप्तस्यविवक्षणीयतयापक्षस्यात्रप्रकारत्वेनहेतोश्चतदंशेविशेष्यत्वेनहेतुविषयतायांतादृशसंबंधावच्छिन्नविषयतात्वेनपक्षविषयतानिरूपितत्वविरहात्॥ **अथवा** चरमविषयतायांस्वरूपसंबंधावच्छिन्नत्वनिवेशेऽसंभवेप्ययंदोषोवारणीयः॥ **अथैवमपि** वह्यभाववदवृत्तिहेतुकेऽनुमितिजनकज्ञानीयतादृशविषयतायाअपितत्रसत्वाद्बाधइतिचेन्न॥ हेतुतावच्छेदकावच्छिन्नविषयतानिरूपितत्वस्यापिविषयतायांविशेषणदानात्॥ **अथैवमपि** साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकस्यव्याप्तिलभतेहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितविषयतायाअपितत्रसत्वाद्बाधइतिचेन्न॥ तादृशविषयत्वपर्याप्-

त्यभावस्यविवक्षितत्वात्॥इत्थंचानुमितिनिष्ठ[illegible]वच्छिन्न[illegible]निरूपितजनक[illegible]भूतधर्मितावच्छेदकतानात्म
कपक्षविषयतानिरूपितहेतु[illegible]वच्छिन्नहेतुतावच्छेदक[illegible]संबंधावच्छिन्नविषयतानिरूपितस्वरूपसंबंधावच्छिन्नवि
षयतात्रयभेदःसाध्यइतिनकश्चिद्दोषइतिसंक्षेपः॥निरुक्तपक्षेनिरुक्तसाध्यस्यसाध्यतायांतद्धिनेत्यादिनाप्रतिपादितसाध्याभा
भावदृष्टान्तित्वादिभेदपंचकस्यहेतोरसिद्धिरतःपर्यवसितमाह॥अनुमितिजनकत्वमिति॥अव्यभिचारपदार्थवि
च्छिन्नहेतुविषयता॥अव्यभिचार[illegible]रजन्यन्तीतिविषयत्वेनसंकेतविषयधर्मावच्छिन्नहेतु[illegible]र्थः॥अत्रकेचि
ज्ज्ञेयत्वंवाच्यत्वाव्यभिचारीतिव्यवहारानुरोधेनसाध्यतावच्छेदकनिष्ठहेतुसमानाधि[illegible]करण्य[illegible]तेयोगितानवच्छेदक
त्वस्याप्यव्यभिचारपदार्थत्वावश्य[illegible]हेतु[illegible]दानेऽव्यभिचारपदार्थावच्छिन्नसाध्यतावच्छेदकनिष्ठविषयतायटितध
र्मावच्छिन्नत्वाभावस्यसिद्धांतिमतेऽनुमितिजनकतायामभावाद्बाधइतिदुपात्तमित्याहुः॥अरे,वमपहेतुलक्षणसामान्य
तोकेवलान्वयित्वेनसाध्यतावच्छेदकविषयताव्याप्तिर्दुर्घटाविशिष्यधूमत्वादिनाहेतुविवेशेपिधूमसाध्यतावच्छेदकानुमि

तिजनकतायांबाधोदुर्वारएव॥अनुमितिजनकतात्वसामानाधिकरण्येनसाध्यसिद्धेरुद्देश्यत्वेआलोकादिलिंगकानुमितिजनकतायांधूमविषयताघटितसाध्यस्यमनइत्येपिसत्वात्सिद्धसाधनंलिंगमेदंपिकारणतैक्यमनतेव्यापकसामानाधिकरण्यज्ञानस्यैथक्येहेतुतासादायार्थानिरुपक्षतानिरुक्तकतायांनिरुक्तसाध्यपर्यवसानमादायार्थांतरंचेत्तिचेन्न॥हेतुविषयतेत्यनेनानुद्देश्यविशेष्यविशेषणतापन्नधर्मप्रकारत्वस्यविवक्षितत्वात्॥अवच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यत्वाच्चनदर्शितदोषावकाशः॥तच्चप्रकारत्वंधर्मितावच्छेदकतापन्नपदार्थीयत्वेनसामानाधिकरण्यविशेषणतापन्नपदार्थीयत्वेनचविशेषणीयंतेनवह्न्यभाववद्वृत्तिधर्मत्वावच्छिन्नपक्षकानुमितिजनकतायांवह्न्यभाववद्वृत्तिधूमत्वावच्छिन्नहेतुकानुमितिजनकतायांचनबाधः॥नचैवमपिसामानाधिकरण्येनसाध्याभाववद्वृत्तित्वाभावावगाहिज्ञाननिष्ठजनकतायांबाधइतिवाच्यं॥अव्यभिचारपदार्थावच्छिन्नहेतुविषयतायाभ्रमान्यवृत्तित्वेनविशेषणीयत्वात्॥यद्वा॥अव्यभिचारपदार्थतावच्छेदकावच्छिन्नायाअव्यभिचारपदार्थमात्रवृत्तिविषयनातन्निरूपितत्वहेतुविषयतायांनिवेश्यंमात्रपदार्थांतर्भावाच्चनसाध्यसमानाधिकरणवृत्तिहेतु

तावच्छेदकपर्यंतस्य व्याप्तित्वमनेवत्यभाववदवृत्तिहेतुकानुमितिजनकतायांबाधः॥अथनिरुक्तपक्षसाध्यरूपार्थः कथंमूलवाक्यादवगत इतिचेल्लक्षणयेवेतिब्रूमः॥ननुतद्धिनेतिमूलमपार्थकंतत्पदसन्निहितपूर्वाव्यभिचरितत्वबोधनात्तत्रचसाध्याभाववदवृत्तित्वादिभेदस्यबाधादित्याशंक्याह॥तदव्यभिचरितत्वमिति॥तथाचसाध्याभाववदवृत्तित्वस्यतत्पदार्थविशेषणत्वेनबाधइतिभावः॥नचैवमपितत्पदंव्यर्थमितिशंक्यं॥तथासतिसाध्याभाववदवृत्तित्वत्वादीनांविशेषधर्मत्वलाभेनतदवच्छिन्नभेदकूटस्यहेतोरप्रजकतालाभान्न्यूनतापत्तेरितिदिक्॥स्यादेतद्भेदानुयोगिज्ञानंपदांतरसुपलभ्येनतदेवननथाचतत्पदस्यैवतथात्वंवक्तव्यंनथाचनदृर्वोक्तदोषावकाशइत्यतआह॥व्याप्तिरिति॥तथाचताद्दशव्याप्तिपदसत्वान्नदोषइतिभावः॥अनुषंगेनेति॥अनुषंगोवाक्यांतरेस्वाकूर्पपठितेश्रुतस्यपदस्यस्वघटकत्वेनानुसंधानं॥अनाद्दशपदानुसंधानमध्याहारइतिविवेकः॥ननुत्रसाध्याभाववदवृत्तित्वभेदकूटस्यहेतुत्वेऽव्यभिचारविशिष्टवैशिष्ट्यावगाहिबोधजनकतायांताद्दशहेतुमत्यांनिरुक्तसाध्यासत्वाद्व्यभिचारइत्यतःपर्यवसितहेतुमाह॥तथाचेति॥अत्रापिहेतुपदस्योक्तपूर्ववदेवअन्यदपिपूर्ववद्बोध्यं॥

घटितेति॥एतच्चपर्याप्तिनिवेशासू नायतन्निवेशेसाध्यहेतोरप्रसिद्ध्यापत्तेः॥विशेषेत्यादि॥ननु तंत्रेत्यविशेषाभावकूटस्य तत्सामान्याभावसाधकत्वंनसंभवतीतिचेन्नमतेतदभावान्नैवं॥व्याप्यवृत्तिप्रतियोगिकाभावकूटस्यतत्रेविवादाभावात्॥ननु कूटरूपहेतुरसिद्ध इत्याशंक्याह॥तत्रेति॥केवलान्वयीत्यादिमूलेकेवलान्वयिपदंनवास्तवकेवलान्वयिपरमभावादित्यस्य साध्याभाववद्वृत्तित्वाभावपरतयातत्रतादृशाभावाद्यंसंभवात्॥यदितत्रेनज्ञातपरंतदातादृशकेवलान्वयित्वाक्रांतेधूमाहेतादृशा भावासत्वेपक्षेव्यभिचारः स्यादित्याह॥तेनेतरभिन्नेकेवलान्वयिपदस्यकेवलान्वयित्वग्रहकालीनानुमितिजनकज्ञानपरत्वभ भावपदस्यचसाध्याभाववद्वृत्तित्वविषयत्वाभावपरत्वंचावलंब्याचष्टे॥साध्येति॥इत्थंचकेवलान्वयिनिरूप्यनिरूपकभा वापन्नतादृशविषयत्वग्रहसंभवान्नव्याहतिरितिभावः॥अत्यंताभावघटितव्याप्त्यभिप्रायेणात्यंतान्योन्याभावघटि तद्विविधकेवलान्वयिग्रहेत्यासः॥अथात्यंताभावाप्रतियोगित्वान्योऽन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयि त्वग्रहोनात्यंतान्योन्याभावघटितव्याप्तिग्रहेप्रतिबंधकोभवितुमर्हतस्तत्संसर्गकविशिष्टबुद्धौतदभावप्रकारकज्ञानस्याप्रतिबंधक

त्वात्॥साध्यप्रतियोगित्वतदवच्छिन्नप्रतियोगित्वसंसर्गकव्याप्तिज्ञानस्यैवलाघवेनानुमितिहेतुतयातादृशप्रतियोगितासंसर्गक
व्याप्तिज्ञानेनिरुक्तकेवलान्वयित्वग्रहयोरप्रतिबंधकत्वादितिचेन्न॥साध्येऽत्यंताभावाप्रतियोगित्वज्ञानेऽभावेपिप्रतियोगितया-
साध्याभावावगाहनस्यतुल्यवित्तिवेद्यतामनसिद्धत्वात्तदवगाहिज्ञानस्यव्याप्तिग्रहप्रतिबंधकत्वावश्यकत्वमित्यभिप्रायात्॥य
द्वाप्रतियोगितासंसर्गावच्छिन्नप्रतियोगितासंसर्गेणसाध्यतावच्छेदकावच्छिन्नाभावप्रकारकाभावत्वावच्छिन्नविशेष्यकग्र
हत्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावप्रकारकाभावत्वावच्छिन्नविशेष्यकग्रहदशायामि
त्यस्यैवविवक्षितत्वात्तयोश्चतादृशव्याप्तिग्रहप्रतिबंधकत्वात्॥नचदर्शितग्रहयोरभावत्वसामानाधिकरण्येनतादृशाभावप्र-
कारकत्वतादृशग्रहयोर्नव्याप्तिग्रहविरोधित्वंसामानाधिकरण्येनग्राह्यबुद्धौसामानाधिकरण्येनतदभावग्रहस्याविरोधित्वा
त्॥अभावत्वावच्छेदनतादृशाभावप्रकारकत्वेचाहार्यत्वापत्तिरभावांशेसाध्यस्यैवभानादितिवाच्यं॥साध्यतावच्छेदकसंबंधाव
च्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायाएवप्रतियोगितावच्छेदकसंबंधतयातेनसंबंधेनाभावांशेसाध्यस्याभानेनाहा-

र्यत्वानवकाशात्॥ननुकेवलान्वयिन्यभावादित्यनेनकेवलान्वयित्वयहकालीनानुमितिजनकज्ञानवृत्तित्वमभावेलब्धंतत्रवि- ग·पं·टी·
शिष्टस्योपलक्षितस्यवाहेतुत्वंविशिष्टस्यहेतुत्वेस्वरूपासिद्धिर्ज्ञानवृत्तित्वविशिष्टस्यानुमितिजनकतायामभावादुपलक्षितस्यहेतुत्वे
साध्याभाववदवृत्तित्वविशिष्टवैशिष्ट्यबोधजनकतायांनादृश्यज्ञानवृत्तित्वोपलक्षितसाध्याभाववदवृत्तित्वविषयत्वाभावसत्वे- १२३
नसाध्यस्यचासत्वेनव्यभिचारइत्यतःपर्यवसितहेतुमाहेवंचेति॥आदिपदेनव्यभिचारपरिग्रहः॥दीधितावव्याप्यवृत्तिसा
ध्यकसंदेहावितिं॥अथात्रसत्संदव्यर्थं॥नचतदनुपादानेसंयोगसाध्यकगगनहेतोरव्याप्यवृत्तिसाध्यकहेतुत्वाक्रांततयोत्स
र्गसिद्धस्यतदवच्छेदनाव्याप्तिरूपविधेयान्वयस्यबाधःस्यादतोवृत्तिमदर्थकंतदुपात्तमितिवाच्यं॥द्रव्यत्वादीनांसंयोगेनदृथिवीत्वा
दिव्याप्यतावारणायहेतुतावच्छेदकसंबंधेनवृत्तिमत्वस्यनिवेशनीयतयातदभावादेवान्वयाबाधात्॥मैवंद्वितीयलक्षणे
हेतुतावच्छेदकसंबंधेनवृत्तिमत्वस्योक्तयुक्त्याऽवश्यकतयातदटितलक्षणाव्याप्तेरपरिहारात्तद्व्यावर्तनायतदटितलक्षणाव्याप्तेरेवविवक्षि
तत्वात्संयोगीसत्वादित्यादावव्याप्यवृत्तिसाध्यकत्वरूपोद्देश्यतावच्छेदकाक्रांतेद्वितीयलक्षणाव्याप्तेरभावात्तत्र्याप्तिम १२३

र्थकस्यावश्यकत्वाच्च॥ननु तथापि संयोगाभावसाध्यकगुणत्वहेतावुद्देश्यतावच्छेदकाक्रांतेलक्षणासत्वविरहादसंगतिरितिवाच्यं॥अव्याप्यवृत्तिसाध्यकेत्वस्याव्याप्यवृत्तिसाध्यंयस्मिन्तदव्याप्यवृत्तिसाध्यकंतस्मिन्सन्वृत्तिमान्योहेतुरित्यर्थकरणादुणत्वादेश्चसाध्यनिरूपकाधिकरणवृत्तितानिरूपकाधिकरणवृत्तित्वविरहात्॥अथैवमपि संयोगाभावसाध्यकद्रव्यत्वहेतावुद्देश्यतावच्छेदकाक्रांतद्वितीयलक्षणासत्वेसंगतिर्दुर्वारेवेतिचेदत्रकेचित्॥अव्याप्यवृत्तिसाध्यकेत्वस्यनव्याप्यवृत्तिरव्याप्यवृत्तिरितिव्युत्पत्तानिरवच्छिन्नवृत्तिकान्यसाध्यकहेतावित्यर्थस्तथाचसंयोगाभावस्यगुणादौनिरवच्छिन्नवृत्तिकत्वेनतदव्याप्यवृत्तिविरहान्नतत्साध्यकहेतोरुद्देश्यतावच्छेदकाक्रांतत्वमितिवदंतितदसत्॥जन्यज्ञानविषयत्वस्यविषयतासंबंधेनजन्यज्ञानस्यवासाध्यतायांहेतौनिरुक्ताव्याप्यवृत्तिसाध्यकेद्वितीयलक्षणासत्वेनासंगतेस्तथापिदुर्वारत्वात्॥वस्तुतस्तु॥अव्याप्यवृत्तिसाध्यकेत्वत्राव्याप्यवृत्तित्वंस्वसमानाधिकरणत्वस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्वप्रतियोगिकत्वैतत्त्रितयसंबंधेनकिंचिदभावविशिष्टत्वरूपंविवक्षितंसंयोगाभावस्यस्वसमानाधिकरणत्वस्वप्रतियोगिकत्वैतदुभयसंबंधेनसंयोगरूपाभावविशिष्टत्वात्तत्साध्यकहेतोरव्याप्तेःस्वसमाना

धिकरणभेदप्रतियोगितावच्छेदकत्वनिवेशः॥ तच्चावच्छेदकत्वंसाध्यतावच्छेदकसंबंधावच्छिन्नंग्राह्यंतेनसंयोगाभावादेरपिसंयो गसमानाधिकरणाभावप्रतियोगितानिरूपितकालिकसंबंधावच्छिन्नावच्छेदकत्वेपिनक्षतिः॥ स्वप्रतियोगिकत्वनिवेशेआकाशाभावविशिष्टद्रव्यत्वसाध्यकपृथिवीत्वहेतोःसंग्रहस्यादतस्तन्निवेशः॥ स्वसमानाधिकरणत्वानिवेशेद्रव्यत्वाभावमादायतद्विशिष्टद्रव्यत्वसाध्यकपृथिवीत्वहेतोःसंग्रहःस्यात्तत्रचाव्याप्तिर्हादतस्तन्निवेशः॥ उक्ताव्याप्यवृत्तित्वविशिष्टाधिकरणवृत्तित्वमेवव्याप्यवृत्तिसाध्यकत्वमतोरूपवान्जलपरमाणुत्वादित्यादौयथाश्रुते ऽव्याप्यवृत्तिसाध्यकत्वरूपोद्देश्यतावच्छेदकाक्रांतेअव्याप्तेरसत्वेपिनक्षतिस्तल्लाभश्चाव्याप्यवृत्तिसाध्यंयस्मिन्नद्व्याप्यवृत्तिसाध्यकंतस्मिन्नित्यादिविग्रहाल्लेयः॥ उक्ताव्याप्यवृत्तित्वशरीरघटकसामानाधिकरण्यसंबंधेनस्वविशिष्टस्यस्वाधिकरणैकसत्वेनतत्रजलपरमाणुत्वादेरसत्वान्नक्षतिः॥ अथवादिवाक्यार्थविकल्पस्थलेयथाकाममेवविकल्पितार्थोपन्यासःसंभवतिनचतत्सौवापर्योपन्यासेनियोगपर्यनुयोगोस्तितथाचदीधितिकृतांपूर्वपूर्वलक्षणपरित्यागबीजकथनंकिमितिचेदत्रवदंति॥ दीधितिकृतांयोवापर्यलक्षणानांबीजकथनेनतात्पर्यंचेनभवदीयशंकावकाशःस्यात्किंतुप्रथ

मादिलक्षणेऽव्याप्यवृत्तिसाध्यकादिस्थलेऽव्याप्त्यादिदोषानभिधानेनमणिकारीयन्यूनतायाअवतरणव्याजेनपरिहारएवेति॥तेनचप्रथमलक्षणएवाव्याप्यवृत्तिसाध्यकाव्याप्तिर्नद्वितीयादिलक्षणेपीत्यपिसूचितंभवति॥केचित्तुलक्षणपंचकस्यैककर्तृकत्वाभावेनलक्षणपंचकस्यावतरणासंगतिमाशंक्यमणिकृताव्युत्क्रमेणलक्षणोपन्यासःकिमर्थंनकृतइतिशंकायामधुरेणसमापयेदितिन्यायेनपरिजिहीर्षयालक्षणचतुष्टयेदोषंप्रदर्श्यसाध्यवदव्याप्यवृत्तिलक्षणस्यमधुरत्वमेवदर्शितंनलक्षणपंचकंपूर्वपूर्वदूषणेनावतारितमितिसमाधानमाहुःतदसत्॥एवंसतितृतीयलक्षणस्यप्रथमतोपन्यासेबीजाभावस्तदवस्थएव॥अव्याप्तिमिति॥अथव्याप्यवृत्तिसाध्यकेइत्यंघटादित्वादित्यादावपिविशिष्टाभावमादायाव्याप्तिसंभवेनासंभवदुद्भावनमनुचितोनाव्याप्तिः॥नचघटवन्नित्यज्ञानत्वादित्यादौलक्षणसमन्वयान्नासंभवइतिवाच्यं॥तत्रापिनित्यज्ञानान्यत्वविशिष्टाभावमादायाव्याप्तेः॥यदिचनित्यज्ञानान्यत्वविशिष्टघटोपिनित्यज्ञानेस्वीक्रियतेतथापिव्याप्यवृत्तिसाध्यकेपिक्वचिदव्याप्तिसंभवेनतदुपेक्षानिबंधना॥नचसाध्याभावयदन्यसाध्यतावच्छेदकावच्छिन्नाभावपरतयानविशिष्टाभावमादायदोषइतिवाच्यंतथासतिसाध्याभाववत

दस्यसाध्याभावीयनिरवच्छिन्नाधिकरणपरतांस्वीकृत्याव्याप्तेरपिशक्यवारणत्वात्॥ननुचयथाश्रुताभिप्रायकताशक्यतेवक्तुमसंभव

स्येवप्रसंगात्॥अत्रेदंसमाधानंप्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैवानुमितिहेतुतयाऽभावो शेसाध्यस्यप्रतियोगितासंसर्गए

वनिवेशनीयस्तत्रचस्वलक्षणोक्तरीत्यासाध्यविशेषणीभूतसाध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वेनैवप्रतियोगितासत इति

किंचिद्धर्मविशिष्टसाध्यस्याभावमादायनदोषः॥एतेनाथात्रनाव्याप्तिसंभवोगुरुधर्मावच्छिन्नसाध्यकाव्याप्तिवारणायसाध्याभाव

पदेनसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्यैवाभावस्यविवक्षणीयतयातत्रव्यापकतायांप्रतियोगिवैय्यधिकर

ण्यनिवेशेनसंयोगाभावस्यलक्षणघटकत्वात्तादृशद्रव्यत्वाभावमादायलक्षणसंगमनादित्याशंक्यतादृशस्थलस्यहेतुतावच्छेदकसंबंधा

नुयोगिनिष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदककलरूपकेवलान्वयिसाध्यकत्वेनतत्राव्याप्तेरिष्टत्वात्साध्याभावपदे

नतादृशाभावविवक्षायानिष्प्रयोजनकत्वात्तथाविवक्षणेपिमिश्रलक्षणोक्तदिशा[illegible]ताशरीरेप्रतियोगिवैय्यधिकरण्यनि

वेशावश्यकतयासंयोगाभावस्यलक्षणघटकत्वाद्व्याप्तिरस्येवेतिसमाधानंहेयंयथाश्रुतलक्षणवाक्यलभ्यएवार्थेदूषणदानाद्

त्॥ आशंक्येति॥ साध्यवत्ताग्रहविरोधितानियामकसंबंधेनैवसाध्याभाववत्तायानिवेशनीयतयानिरवच्छिन्नदैशिकविशेषणतायास्तथात्वेऽव्याप्तिविरहादव्याप्तेरहेत्वनुक्तेऽव्याप्तिमाशंकेतीत्युक्तिरितिकेचित्॥ गादाधर्यांकपिसंयोगीति॥ संयोगस्यान्याभावस्य इत्येसर्वावादृतत्वात्कपिपदं॥ ननु दीधित्युक्ततत्पुरुषपक्षेऽसंगतः कर्मधारयपक्षेलाघवादधिकरणभेदेनाभावभेदानभ्युपगमाच्चेत्याशंकायामाह साध्यवद्भिन्नोयः साध्याभाववानित्यादि॥ अभेदेति॥ एतच्चगुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमंगीकृत्यतेनसाध्यवद्भिन्नवृत्तित्वापेक्षयाऽभेदेनसाध्यवद्भिन्नविशिष्टसाध्याभाववद्वृत्तित्वगुरुत्वेनाभावभेदकतयानतदवच्छिन्नाभावरूपलक्षणवाक्यार्थाप्रसिद्धिः॥ साध्याभावांशवैय्यर्थ्यमिति॥ तद्वैय्यर्थ्यंचतद्घटितधर्मस्यावच्छेदकत्वासंभवादितरभेदानुमानासंभवेनानुमितिलक्षणघटकत्वासंभवात्तदुपोद्घातसंगत्यानिरूपणासंभवादितिभावः॥ अथात्रव्याप्यतानवच्छेदकत्वप्रयोजकव्यर्थविशेषणघटितत्वंनसंभवतिस्वसमानाधिकरणव्याप्यतावच्छेदकधर्मनिरूपितस्वघटितस्यैवतस्यनीलधूमत्वादौदृष्टत्वात्प्रकृतेचसाध्यवद्भिन्नाधिकरणवृत्तित्वपर्याप्तावच्छेदकताकाभावादन्यएवसाध्याभावघटितस्

पर्याप्तावच्छेदकताकोऽभावइतितच्छरीरेसाध्याभावाघटितरूपावच्छिन्नाभावस्यानिवेशादेतल्लक्षणेगुरुधर्मस्याभावप्रतियोगितावच्छेदकतावश्यकत्वाच्च॥ननुचस्वसमानाधिकरणेत्यादिनियमस्यनिर्बीजत्वंशंक्यंप्राचीनमतेसाध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकस्यैवव्याप्तित्वाद्गुरोस्तादृशसामानाधिकरण्यावच्छेदकत्वाभावात्॥नवीनमतेचहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितव्याप्तेर्गुरुधर्मघटिततादृशावच्छेदकत्वत्वावच्छिन्नाभावाप्रसिद्धेरेवबीजत्वादितिचेन्न॥साध्याभावांशस्याव्याप्तिवारकत्वरूपसार्थकत्वाभावएववैय्यर्थ्यपदेनविवक्षितः॥यद्यव्याप्यादृत्तिसाध्यस्यापिलक्षणघटकताभ्युपेयतेतदाऽभावाधिकरणविशेषणतयाप्रमेयत्वादिनिवेशेपिवैय्यर्थ्याभावःप्रसज्येत॥यद्दपिसाध्यसामानाधिकरण्यावच्छेदकरूपस्यव्याप्तित्वासंभवरूपंसमानाधिकरणेत्यादिनियमेबीजमुपन्यस्तंतदपिनसंभवतितत्रस्वरूपसंबंधरूपावच्छेदकत्वनिवेशस्यदूष्यत्वात्॥गुरुत्वमेवतादृशावच्छेदकत्वाभावेबीजंनतुस्वसमानाधिकरणेत्यादिव्यर्थविशेषणघटितत्वमित्यस्यैववक्तुमुचितत्वाच्च॥अन्यथाकंबुग्रीवादिमत्त्वस्यापिव्याप्यतावच्छेदकत्वापत्तेर्दुर्वारितादृशप्रयोजकत्वसमानाधिकरणेत्यादिव्यर्थविशेषणघटितत्वस्यतत्राभावात्॥स्व

समानाधिकरणव्याप्यतावच्छेदकधर्मघटितस्यैवव्याप्यतावच्छेदकतोक्तिस्तुतस्यसार्थक्यव्यापकताभिप्राया यच्च नवीनमतेबाजमुक्तंतदपिनविचारसहंतन्मतेहेतुसमानाधिकरणाभावप्रतियोगितायामुभयाभावस्यैवनिवेशनीयतयायुरुधर्मघटितरूपावच्छिन्नाभावस्याप्रसिद्धिसंपादकाभावस्यव्याप्तिशरीरेऽनिवेशात्॥ केचित्तु व्यभिचारस्याभावोत्यव्यभिचरितत्वशब्दप्रतिपाद्यस्तथाचाव्यावर्तकसाध्याभावघटितस्यव्यभिचारपदार्थत्वसंभवएवतद्भावस्याव्यभिचारपदार्थत्वंसंभवतितदेवतुनव्यभिचारशरीरेसाध्याभावांशस्यव्यर्थत्वेनतद्घटितस्यव्यभिचारपदार्थत्वासंभवात्॥ नच्चसाकल्यलक्षणमेवैतस्यापिपरिभाषयाऽव्यभिचरितत्वपदप्रतिपाद्यत्वमास्तांकृतंतत्तुरुषाश्रयणेनेतिवाच्यं॥ यौगिकत्वसंभवेपरिभाषानुसरणस्यान्याय्यत्वादिति वदंति॥ तदपरे नक्षमंते॥ तद्बीजंतुसिद्धांतेपिकचित्साध्याभाववद्वृत्तित्वस्यव्यभिचारपदार्थत्वसंभवात्तादृशस्थलेसाध्यवद्भिन्नांशवैय्यर्थ्यदुर्वारंकचित्साध्याभाववत्यांशवैय्यर्थ्ययथाघटत्वाभावादौसाध्येकचित्साध्याभावांतवैय्यर्थ्ययथाघटत्वभेदादौसाध्ये॥ एवंचसतिव्याप्तेरपिस्थलभेदेननानात्वापत्तिः॥ नचेष्टापत्तिःकेवलान्वयिनिसाध्यसामानाधिकरण्यस्यव्याप्तित्वसंभवेनकेवलान्वयिन्यभावादितिन्न

थासंगतेः॥अपिचइदंविशिष्टसत्ताद्यंजातेरसादावव्याप्तिवारणायसाध्यवद्भिन्नवृत्तिसाध्याभाववन्निरूपिताधेयतासामा न्येयत्संबंधावच्छिन्नत्वधर्मावच्छिन्नत्वोभयाभावनिवेशस्यावश्यकतयातादृशोभयवत्तादृशाधे [illegible] व्यभिचारपदा र्थोवाच्यस्तत्रवृत्तिसाध्याभाववत्तांत्यर्थदुर्वारमुक्तोभय [illegible] साध्यवद्भिन्ननिरूपिताधेयत्वसामान्यस्यैवव्यभिचारपदार्थ त्वसंभवात्॥अत्रकेचित्॥साध्यवद्भिन्नश्चासौसाध्याभावश्चसाध्यवद्भिन्नसाध्याभावइतिकर्मधारयएवोचितस्तत्रचसाध्यवत्संस्व प्रतियोगिकत्वसामानाधिकरण्योभयसंबंधेनकेवलसामानाधिकरण्यसंबंधेनसाध्यवत्वनिवेशोघटाभावादीनांसाध्यवदन्यत्वविरहे णैवलक्षणाघटकतयासाध्यपदंव्यर्थंस्यादितिस्वप्रतियोगिकत्वनिवेशः॥अथप्रक्षालनाद्धीतिन्यायप्राप्तान्नदेयमेवेतिचेन्न॥स्व सामानाधिकरण्यमात्रस्यपरंपरात्वेनसंबंधत्वविरहात्स्वसामानाधिकरण्यविशिष्टप्रतियोगित्वस्यैवसंबंधतयातत्सार्थक्यात्॥न चासमवायिकारणतादृविध्यानुरोधेनसामानाधिकरण्यस्यसंबंधतायाआवश्यकत्वमितिवाच्यं॥स्वसमवायि [illegible] त्वात्मकसामा नाधिकरण्यस्यतदनुरोधेनसंबंधत्वस्वीकारेपिसकलसामानाधिकरण्यानां [illegible] भावात्॥अथवाऽभावभिन्नंभावत्वादित्यादा

वभावमात्राधिकरणकाभावस्याधिकरणस्वरूपत्वपक्षेसर्वस्यैवाभावस्यसामानाधिकरण्यसंबंधेनसाध्यवत्त्वात्तदन्याभावाप्रसिद्धेः-
स्वप्रतियोगिकत्वनिवेशस्तन्निवेश्योप्यप्रसिद्धिरितितुनशंक्यं॥तन्नि[illegible]साध्यसामानाधिकरण्यावच्छेदकस्वप्र।तियोगिकस्य
संसर्गतयानिवेशफलकत्वात्॥अभावभेदाभावस्याभावस्वरूपत्वेप्यभावभेदप्रतियोगिकत्वावच्छेदेनतत्सामानाधिकरण्यानभ्युपग
मात्तस्यनिरुक्तसंबंधेनसाध्यवद्भिन्नत्वाक्षतेः॥एतेनसाध्यसामानाधिकरण्यघटकवृत्तित्वंयदियेनकेनचित्संबंधेननिवेश्यतेतद
वह्निमान्धूमादित्यादौवह्न्यभावादेरपिकालिकसंबंधेनसाध्यवद्वृत्तितयासाध्यवदन्याभावाप्रसिद्धिरतःस्वरूपसंबंधेनैवतन्नि-
वेश्यंतथाचपर्वतत्वात्मकाभावमादायसाध्यपदसार्थक्यसंभवेस्वप्रतियोगिकत्वंव्यर्थं॥नच्चस्वप्रतियोगिमत्ताग्रहविरोधितानियामक
संबंधेनैवसाध्यवद्वृत्तित्वंवक्तव्यमितिवाच्यंकालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादौतादृशेनका
लिकेनसाध्यवद्वृत्तित्वाप्रसिद्धेरितिनिरस्तं॥अखंडाभावघटकतयासार्थक्यसंभवाच्च॥साध्यसामानाधिकरण्यंचसाध्यतावच्छेद-
कावच्छिन्नसामानाधिकरण्यंतेनविशिष्टसत्तावान्नात्मत्वादित्यादौसत्ताभावस्यैवसाध्यवदन्यत्वेपिनक्षतिः॥संयोगीद्रव्यत्वा

दित्यादेरव्यवृत्तित्वविशिष्टाभावमादायैवलक्षणंसंगमनीयं॥ यत्तु स्वप्रयोगिकत्वसामानाधिकरण्योभयसंबंधेनसाध्यवदन्याभाव-
निवेशोमहानसीयवत्त्वभावस्यादृशसाध्यप्रतियोगिकत्वंनतत्सामानाधिकरण्यंयादृशसाध्यसामानाधिकरण्यंनतत्प्रतियोगिकत्वमि
त्युक्तोभयसंबंधेनसाध्यवद्भिन्नत्वेनलक्षणघटकतापत्तिः॥ नच स्वाश्रयप्रतियोगिकत्वावच्छिन्नसामानाधिकरण्योभयसंबंधेन
साध्यतावच्छेदकवदन्यत्वस्यैवनिवेशनीयतयाननस्यलक्षणघटकतेतिवाच्यं॥ तथासतिसाध्यवदन्याभावस्यलक्षणघटकतयामू
लास्वारस्यंस्यादितितन्न॥ साध्यसामानाधिकरण्यावच्छेदकस्वप्रतियोगिकत्वस्यसंसर्गतयानिवेशाउक्तदोषाभावादित्याङ्गुरुदुद्धु॥
संयोगेनद्रव्यस्याव्याप्यवृत्तितापक्षेनिरुक्तसंबंधेनसाध्यवदन्याभावाप्रसिद्ध्यापत्तेः॥ विरुद्धधर्माध्यासेनेति॥ अध्यासोवर्तमानतो
॥ अयंभावः कपिसंयोगाभावत्वंस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकाव्याप्यवृत्तिधर्मसमानाधिकरणंव्याप्यवृत्तित्वाव्याप्य
वृत्तित्वसमानाधिकरणत्वाद्यन्नैवंतन्नैवमित्येवंव्यतिरेक्यनुमानेनभेदसिद्धिरिति॥ यद्वा योव्याप्यवृत्तिताऽव्याप्यवृत्तितावच्छेदकयद्धर्म
वान्स्ववृत्तिभेदप्रतियोगितावच्छेदकधर्मसमानाधिकरणतद्धर्मवान्यथारूपादिरित्येवमनुमानंद्रष्टव्यं॥ यद्यपिव्याप्यवृत्तिताऽव्याप्य

वृत्तिनावच्छेदकसत्तात्ववत्संसत्तायामस्तितत्रसाध्यस्याभावाद्व्यभिचारस्तथापियद्धर्मेभावाद्वृत्तित्वस्यविवक्षितत्वान्नदोषः॥ भेदकाभावेनेति॥ उक्तहेतोराकाशाभावत्ववृत्तित्वाभावेनेत्यर्थस्तथाचहेतोःपक्षधर्मताविरहान्नभेदसिद्धिरितिभावः॥ नचोक्तहेतोःपक्षवृत्तित्वाभावेपिगगनाभावत्वंव्यक्तिरूपवृत्तिघटवृत्तिवृत्तित्वेसतिघटान्यवृत्तिवृत्तिभावावृत्तिधर्मत्वात्पटत्वाभावघटत्वाभावान्यतरत्ववदित्यनुमानेनाकाशाभावस्यापिधिकरणभेदेनभेदसिद्धिरित्याशंक्याह॥अतएवेति॥अभावेसाध्यीयत्वंनयेनकेनचित्संबंधेनानिष्प्रसंगात्किंत्वनुयोगितारूपविलक्षणसंबंधेनतथाचाभावत्वनिवेशोव्यर्थइत्यगत्याऽभावपदमेवतादृशानुयोगितारूपसंबंधलाभायेतिवक्तव्यंतथाचविलक्षणानुयोगितासंबंधेनसाध्यीयत्वनिवेशव्यावृत्तिरभावमात्रस्याधिकरणभेदेनभेदपक्षेपिघटेवित्याशयेनाह॥अथवेति॥साध्यीयपरं॥लक्षणयासाध्यविशिष्टबोधकं॥यद्यप्यनुयोगितविशेषरूपाभावत्वस्याभावाभावत्वात्तत्रावश्यंवक्तव्यमन्यथाघटाभावाभावोघटइतिघटेःभावत्वव्यवहारोनस्यादित्यंचाभावपदस्यानुयोगितविशेषविशिष्टेशक्तत्वाद्यद्यप्यस्तुतार्थकत्वेपिसाध्यपदस्यार्थवत्संभवाल्लाक्षणिकत्वमनुचितं॥तथापिसाध्याभावेत्यत्रतत्पुरुषत्वात्तदर्थपदेलक्षणाश्रया

वश्यकत्वात्साध्यपदस्य विलक्षणानुयोगिनासंबंधेन साध्यविशिष्टे लक्षणायाआवश्यकत्वेतेनैव निर्वाहेऽभावपदार्थविवक्षायाअनुयोगइति भावः॥ अभावीयविलक्षणानुयोगिनेति॥ केवलानुयोगितासंबंधेन साध्यीयपरत्वेवह्निमान्धूमादित्यादौतादृशसमवायवृत्तित्वस्यधूमेसत्वाद्व्याप्तिःस्यादतोविलक्षणेति॥ साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितानिरूपितत्वतदर्थः॥ अथाभावपदाल्लक्षणतादृशविलक्षणानुयोगितालाभइतिचेद्भावपदसमभिव्याहृतपदांतरस्यविलक्षणानुयोगितयास्वार्थविशिष्टबोधकत्वस्यव्युत्पत्तिसिद्धत्वादन्यथासंयोगोघटाभावइतिव्यवहारापत्तेः॥ नन्वभाववाचकपदसमभिव्याहृताभावपदत्वभावभिन्नार्थकत्वान्नायमतिप्रसंगइतिवाच्यं॥ तथापिविषयिताघटत्वाभावाभावइतिव्यवहारापत्तेर्दुर्वारत्वात्॥ कृदादिवृत्तिप्रमेयत्वादिमतीति॥ अथास्मिन्लक्षणेसाध्यवत्तायहविरोधितानियामकसंबंधेनैवसाध्यवद्भिन्नवृत्तिसाध्याभाववत्तायाअन्वेतिवेशनीयतयावह्निसाध्यकेतादृशनदेशिकविशेषणतासंबंधेनप्रमेयत्ववतोऽप्रसिद्धत्वेननतदादायासंभवइतिचेन्न॥ दैशिकविशेषणतायास्वरूपतयैवसंसर्गतात्वरूपसंबंधेनतादृशेनप्रमेयत्ववत्तादायासंभवसंगतेः॥ नन्वतथापिनासंभवःसंभवतिवि

षयितासंबंधावच्छिन्नप्रतियोगिताकघटाभावादौसाध्येपटत्वादौतादृशेनविषयितासंबंधेनसाध्यवद्भिन्नवृत्तिनः कस्यापिहेत्वधिकरणेऽसत्वाल्लक्षणसमन्वयसंभवादिति वाच्यं॥ विषयितासंबंधावच्छिन्नप्रतियोगिताकाभावस्यविषयितायावृत्तिनियामकतयाऽभावप्रतियोगितानवच्छेदकतेनाप्रसिद्धातत्साध्यकानुमानासंभवादित्यभिप्रायात्॥ नच्चतथापिकालिकसंबंधावच्छिन्नप्रतियोगिताकघटाभावेसाध्येआत्मत्वादौलक्षणसमन्वयस्तादृशेनकालिकेनसाध्यवद्भिन्नवृत्तेःकस्यापिहत्वधिकरणेऽभावादितिकथमसंभवइतिवाच्यं॥ विषयितकालिकादिसंबंधावच्छिन्नप्रतियोगिताकाभावस्यतत्संबंधावच्छिन्नाधिकरणत्वाभावरूपत्वात्तत्तत्संबंधस्यैवसाध्यवत्ताग्रहविरोधिज्ञानविषयतयाप्रमेयत्वादिकमादायासंभवसंगमनात्॥ वस्तुतस्तुभावत्वाग्रहेभावानवच्छेदकत्वज्ञानस्यस्वरूपसंबंधेनैवविरोधित्वमितिकूटघटितग्रंथकृदुक्तमताभिप्रायेणेदमितितत्त्वं॥ अन्यथेति॥ अथप्रतियोगितानवच्छेदकतयावासाध्यविशिष्टस्यैवाभावस्यलक्षणेनिवेशनीयतत्केवलव्यतिरेकिणिसाध्येतत्प्रतियोगितायास्तन्निरूपितानुयोगितायावा[illegible]

यावत्संसर्गतयाभानमावश्यकमितिप्रयोजनांतरान्वेषणंकुतइतिचेदत्रकेचित्॥साध्यत्वस्यप्रतियोगितावच्छेदकत्वसंभवात्ता ग॰सं॰टी॰
ध्यतावच्छेदकनिवेशानमनुचितमित्यभिप्रेत्यतन्निवेशस्यप्रयोजनांतरान्वेषणमित्याकुस्तदसत्साध्यत्वस्यप्रकृतानुमितिविधेय
त्वरूपस्यानुपस्थितिदशायामप्यनुमितेरानुभविकतयासाध्यत्वनिवेशासंभवान्महानसीयवह्न्यभावमादायलक्षणासत्वप्रसंगाच्च॥
नचसाध्यतावच्छेदकत्वनिवेशेपिपूर्वदोषतादवस्थ्यं**शंक्यं**॥तत्परिचितवह्नित्वादीनांविशिष्टेवनिवेशात्॥**अपिच**विशिष्टस
त्तावान्जात्यधिकरणत्वादित्यादौसाध्यत्वावच्छिन्नाभावस्यजात्यादावेववर्तमानतयाऽतिव्याप्तेः॥**नच**प्रमात्मकानुमितिर्विधेयत्व
मेवसाध्यत्वमितिवाच्यं॥एवंसतिसाध्यतावच्छेदकावच्छिन्नत्वनिवेशापेक्षयागौरवायत्तेः॥**वस्तुतस्तु**प्रतियोगितायाप्रकारत
यानिवेशेपिसाध्यतावच्छेदकावच्छिन्नत्वंनिवेश्यमित्यभिप्रेत्याह्याप्तिवारकतयापितस्यसार्थक्यप्रकाशनमभिप्रेत्यवाप्रयोजनांत
राभिधानमितिध्येयं॥अधिकरणभेदेनाभावभेदेत्याह॥**दृथिवीत्वाभावद्रव्यत्वाभावान्यतरेति**॥एवमुत्तरत्रापिस्थलांतरानु
सरणेबीजंबोध्यं॥**अव्याप्त्यापत्तेरिति**॥**अथ**त्राभावाभेदपक्षेऽसंसर्गएववक्तव्यःकुत्रापिलक्षणगमनाभावात्॥**नचैतदूष** ५३०

वानेतत्वादित्याद्योतद्भमनंशंक्यं॥तत्रापिविशिष्टाभावोभयाभा[illegible]स्याप्तेःसत्वात्॥नचविषयि[illegible]टसाध्यकेनिलक्ष[illegible]लक्षणसमन्वयःसंभवतीतिवाच्यं॥तत्रापिनित्यज्ञानान्यत्वविशिष्टाभावमादायाप्तेः॥नचनित्यज्ञानान्यत्वं विशिष्टघटोपिनित्यज्ञानेवर्ततेघटांशेनित्यज्ञानान्यत्ववैशिष्ट्यप्रकारकत्वस्यैवतत्रप्रयोजकत्वादितिवाच्यं॥तथापि[illegible]न्यबोधविषयतावि शिष्टघटाभावस्यहेत्वधिकरणेबाधात्नहितादृशोपिघटस्तत्रवर्ततइतिशक्यंवदितुंतथासतिघटस्यपटपदवाच्यत्वंस्यात्॥नचेच्छायास्तादृशघटत्वएवयमापत्तिर्नज्ञानस्येतिवाच्यं॥ज्ञानेच्छयोःसमानविषयकत्वनि[illegible]इच्छायास्तद्वत्वनियमात्॥ज्ञानत्वेनरूपितेनवाज्ञानरूपोःशक्तिरूपस्येच्छावद्विनिगमनाविरहेणवक्तव्यत्वाच्चेतिचेन्न॥संकेत[illegible]र्थोपस्थितिप्रयोजकतयादृष्टत्वेनतत्सजातीयेच्छेवशक्तिपदार्थोनतुज्ञानमितिज्ञानस्यतादृशघटत्वेविबाधकाभावादित्यभिप्रायात्॥वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नत्वेनप्रतियोगितावि शेषणत्वएकव्यक्तिसाध्यकेलक्षणसमन्वयान्नासंभवइतिकेचित्॥अथसाध्यतावच्छेदकावच्छिन्नाभावनिवेशेपिमहानसीयवह्न्यभाववारणमशक्यंतस्यसाध्यतावच्छेदकवह्नित्वावच्छिन्नप्र

तियोगिताकत्वात्॥ नच साध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वनिवेशात्तादृशाभाववारणसंभव इतिवाच्यं॥ तथापि महानसीय त्वविशिष्टवह्नित्ववतोऽभावमादायदोषावारणात्॥ नच तादृशाभावोगुरुधर्मावच्छिन्नप्रतियोगिताकतयाऽप्रसिद्ध इतिवाच्यं॥ एतल्लक्षणेगुरुधर्मस्यप्रतियोगितावच्छेदकत्वावश्यकतादन्यथासाध्यवद्भिन्नवृत्तिसाध्याभाववद्वृत्तित्वस्यसाध्यवद्भिन्नवृत्तित्वापेक्षयागुरुतयातदवच्छिन्नाभावरूपलक्षणवाक्यार्थाप्रसिद्ध्यापत्तेरितिचेदत्रवदंति॥ उपलक्षितधर्मावच्छिन्नाभावविशिष्टधर्मावच्छिन्नाभावयोर्वैलक्षण्यायविशिष्टधर्मावच्छिन्नाभावीयप्रतियोगितावच्छेदकताविशिष्टप्रतियोगिकसंबंधावच्छिन्नाविशेषणविशेष्योभयपर्याप्तावाउपलक्षितधर्मावच्छिन्नप्रतियोगितावच्छेदकताकेवलसंबंधावच्छिन्नाविशेष्यमात्रपर्याप्तावेत्यवश्यकुक्षिनिक्षिप्तत्वाच्चप्रकृतेमहानसीयत्वोपलक्षितधर्मावच्छिन्नाभावस्यहेतुमत्त्वसत्त्वेनतद्विशिष्टावच्छिन्नाभावस्यहेतुमतिसत्त्वेपितस्यविवक्षितीयसाध्यतावच्छेदकतासंबंधावच्छिन्नसाध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वविरहेणानुपपत्त्यभावादितिदिक्॥ कालिकसंबंधेनद्रव्यत्वाभावेति॥ अत्रद्रव्यत्वंतादाधेकरणत्वपरंतेनकालि

कसंबंधेनद्रव्यत्वाभाववत्त्वावुद्देश्यस्वरूपसंबंधेनैवतदभाववत्त्वाज्ञानस्यविरोधितयातेनसंबंधेनद्रव्यत्ववत्त्वोऽप्रसिद्धत्वेपिनक्षतिः
॥अथवाभावाभावसाधारणदेशिकविशेषणत्वाभिप्रायकमिदं॥नचैवंसाध्यत्वाव्यापकत्वं हविरोधितानियामकसंबंधेनसाध्याभाववत्व
निवेशोव्यर्थइतिवाच्यं॥मतद्व्यसाधारण्यानुरोधेनतन्निवेशात्॥साध्यतावच्छेदकसंबंधेनसाध्यवत्ताज्ञानंप्रतीत्यादि॥-
साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रकारताशाल्यनाहार्यज्ञानसामान्यंप्रतियादृशसंबंधेनसाध्य
तावच्छेदकधर्मावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभाववत्तावच्छिन्नवत्तावगाह्यनाहार्यप्रामाण्यज्ञानानास्कं
दितनिश्चयसामान्यंप्रतिबंधकंतादृशसंबंधेनत्यर्थस्तेनपर्वतःसंयोगेनवह्निमान्कालिकसंबंधावच्छिन्नवह्न्यभाववत्तावच्छिन्न
प्रतियोगिताकाभाववांश्चेतिसमूहालंबनात्मकसाध्यवत्ताज्ञानविशेषंप्रतिकालिकसंबंधेनवह्न्यभाववत्ताज्ञानस्यकालिकसं
बंधेनप्रतिबंधकत्वेपिवह्निमान्धूमादित्यादौनाव्याप्तिः॥एवंचसाध्यतावच्छेदकसंबंधनिवेशस्यापिसार्थक्यमन्यथास्वरूपसंबंधे
नसंयोगसंबंधावच्छिन्नवह्न्यभाववत्ताज्ञानस्यसाध्यवत्ताज्ञानसामान्यांतर्गतसमवायेनसाध्यवत्ताज्ञानंप्रत्यप्रतिबंधकत्वाद्देशि

कविशेषणतायाअपिसंग्रहानुपपत्तेः॥ नचैवमपिनानाधर्मितावच्छेदककसाध्यवत्ताज्ञानसाधारणेकप्रतिबध्यतायाअभावेनदेशि
कविशेषणतायाअसंग्रहस्तदवस्थएवेतिवाच्यं॥ सर्ववह्न्यभाववदितिनिश्चयीयप्रतिबध्यतायाएवतथाविधायाःप्रसिद्धेः॥ प्रत
न्तलक्षणेसर्वत्वावच्छिन्नविशेषकत्वेनैवनिश्चयस्यविशेषणीयत्वात्॥ यद्वास्वसमानधर्मितावच्छेदककत्वेनसाध्यवत्ताज्ञानेव
शेषणीयंस्वंप्रतिबंधकनिश्चयइतिदिक्॥ यत्तुसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रकारताघ
टितधर्मावच्छिन्नप्रतिबध्यतानिवेशेनोक्तसमूहालंबनमादायदोषवारणसंभवात्साध्यवत्ताज्ञानसामान्यनिवेशोऽनुचितः
प्रकारतायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशेपर्वतोवह्न्यभावत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभा
ववानितिज्ञाननिष्ठायाःकालिकसंबंधावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारताशालिनिश्चयनिरूपितप्रतिबध्यतायाःप्रतियो
गित्वसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रकारताघटितधर्मावच्छिन्नतयाकालिकसंबंधस्यापिसंग्रहापत्त्यावह्निमान्धूमादित्यादा
वव्याप्त्यापत्तिरतस्तदुपात्तं॥ साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य[illegible]तायामनेवंशेवह्निमत्वप्रकारकनिश्चयविषयोधूमादित्यादौ

साध्याभावत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावत्वेनसाध्यवत्ताज्ञानंप्रतिकालिकसंबंधेनसाध्याभाववत्ताज्ञानस्यप्रतिबंधकतयाकालिकसंबंधसंग्रहापत्तिरतस्तन्निवेशः॥ननुचैवमपिसंयोगेनवह्निमान्पर्वतोवह्न्यभावत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभाववानित्याकारकज्ञानंप्रतिसंयोगेनवह्निविशिष्टेपर्वतेकालिकसंबंधेनवह्न्यभाववत्ताज्ञानस्यप्रतिबंधकतयाकालिकसंबंधसंग्रहोदुर्वारएवतादृशज्ञानीयप्रतिबध्यतायांधर्मितावच्छेदकविषयितावि धयासंयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रकारितायाअवच्छेदकत्वादितिवाच्यं॥सर्वत्वावच्छिन्नविशेष्यकवह्न्यभावप्रकारताशालिज्ञाननिरूपितप्रतिबध्यतावच्छेदककोटौधर्मितावच्छेदकविष यतायाअनिवेशेनोक्तदोषाभावान्निवेशेपिवानवह्नित्वावच्छिन्नप्रकारतात्वेनकिंतुधर्मितावच्छेदकतात्वेनैवनिवेशातांवाविशिष्यैवफलेच्छानामुत्तेजकत्वपक्षेत्राप्यधर्मितावच्छेदकभेदेनप्रतिबध्यप्रतिबंधकभावभेदस्यावश्यकत्वात्तथापिनक्षतिःधर्मितावच्छेदकतानात्मकत्वेनप्रकारतायाविशेषणीयत्वादितिन दसत्तु॥एवंसतिइत्थंनियामकसंबंधास्याभावप्रतियोगितावच्छेदकत्वेप्रतियोगितासंबंधेनवह्नेःसाध्यतायांवह्निध्वंसत्वहेतावव्याप्तेर्दुर्वारतापत्तेस्तत्रसाध्याभाव-

त्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नवत्ताबुद्धिंप्रतिकालिकसंबंधेनसाध्याभाववत्ताज्ञानस्यप्र
तिबंधकतयाकालिकसंबंधसंग्रहस्यदु[illegible]नीयप्रतिबध्यतायांप्रतियोगितासंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रकार-
ताया अवच्छेदकत्वात्॥ यदि च साध्यतावच्छेदकसंबंधा[illegible]रूपावच्छिन्नेपर्याप्तातादृशरूपविशिष्टसाध्यतावच्छेदकसंबंध
पर्याप्तावच्छेदकता[illegible]तायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंदर्शितप्रतिबध्यता[illegible]कोटिप्रविष्टप्रकारताचन-
साध्यतावच्छेदकसंसृष्टप्रतियोगितात्वविशिष्टप्रतियोगित्वसंबंधावच्छिन्नाऽपितुप्रतियोगि[illegible]संबंधावच्छिन्नत्वविशिष्टप्रतियोगि
त्वावच्छिन्नेतिनोक्तदोषः॥ एतेन निरवच्छिन्नविशेषण[illegible]पिसंयोगवत्ताधीविरोधिज्ञानवि[illegible]क्षणेसाध्यवद्भिन्नवृ
त्तित्वविशेषणंव्यर्थमितिनचेत्यग्निमशंकायाअनुत्थितिर्मूलावच्छिन्नत्वविशिष्टसमवायसंबंधेनकपिसंयोगवत्ताज्ञानंप्रतिमूला
वच्छिन्नविशेषणतासंबंधेनकपिसंयोगाभाववत्ताज्ञानस्यप्रतिबंधकतयातादृशसंबंधेनकपिसंयोगाभाववत्तायादृक्षेऽसत्वात्त-
द्विशेषणवैय्यर्थ्यानवकाशादितिपरास्तमितिविभाव्यतेतदापिविपरीतज्ञानानुकूलस्यप्रतिबध्यतावच्छेदकत्वेप्रति

बध्यतावच्छेदकोभयप्रकारकत्वनिवेशप्रयोजकत्वेवैरहेणदर्शितप्रकारत्वावच्छिन्नत्वस्यप्रतिबध्यतायांनिवेशासंभवात्॥कालिक
विशेषणतयावत्त्वभाववान्देशिकविशेषणतयावत्त्वभाववानितिज्ञानविशिष्यतःकालिकसंबंधेनवत्त्वभाववानितिज्ञानस्यवह्नि
मत्ताभावंप्रतिबध्नतिछेदकधर्मदर्शनविधयाप्रतिबंधकत्वात्कालिकसंबंधसंग्रहोवह्निसाध्यकस्थलेदुर्वारइतिप्रतिबंधकदिशिनिश्च
यसामान्योपादानं॥एवंचस्वप्रकारकत्वनिश्चयतादीनामपिसार्थक्यमित्यलंबहुना॥केचित्विति॥साध्यात्मकस्वभावनिरू
पितेत्यस्यसाध्यनिरूपितेत्येवार्थःसाध्येस्वभावत्वकथनमसंभावनावारणायेतिभ्रमेणशंकतेनन्देति॥भ्रमंनिराकरोति॥तत्रेत्या-
दिना॥लाघवमनुरुध्यपूर्वकल्पेवक्ष्यमाणदोषंचावेक्ष्याहसाध्यतावच्छेदकसंबंधेनवृत्तिमत्साध्यनिरूपितेति॥तादृशप्र
तियोगितावच्छेदकयत्संबंधेनसाध्यवह्निन्नवृत्तित्वमभावस्यति॥तथाचसाध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकयत्संबं
धेनसाध्यवह्निन्नवृत्तिर्यःसाध्याभावस्तस्यतेनसंबंधेनयदधिकरणंतद्वृत्तित्वाभावोव्याप्तिरितिसमुदितार्थःपर्यवसितः॥अथैवमपिकालि
कसंबंधेनसर्ववान्कालत्वादित्यादौसाध्याभावस्ययःकालिकसंबंधावच्छिन्नाभावस्तस्यसर्वंतःपातितयासाध्यतावच्छेदकसंबंधेनव

त्तिमत्साध्यस्वरूपतया कालिकसंबंधस्यापि तथात्वेन तादृशसंबंधेन साध्यवद्भिन्नेजन्यकालेवर्तमानस्यसाध्याभावस्याधिकरणेमहाकाले हेतोः सत्वादव्याप्तिरेवंदिक्कृतविशेषणतयासर्वसाध्यकेमहादिक्त्वहेतौविषयितासंबंधेनसर्वसाध्यकेनित्यज्ञानत्वहेतौदिक्कृतविशेषणतांविषयितांचादायाव्याप्तिर्दुर्वारा॥ नन्वतादृशयद्यत्संबंधेनेतिवक्तव्यंप्रकृतेतादृशायावद्दलगतदैशिकविशेषणतासंबंधेनहेतुमतिसाध्याभावासत्वादितिशंक्यं॥ तथासतिग्रंथकृतावश्यमाणस्वनिष्ठत्वविशेषणप्रयोजनासंगतेरितिचेन्न॥ जन्यानांमहाकालमहादिवृत्तितायाः [illegible]तुकालदिक्त्वे॥ विषयितासंबंधोनाभावप्रतियोगितावच्छेदकोनवातेनसाध्यत्वमितिमतेनैवंतत्परिष्कारकरणात्॥ अथैवमपिगगनाभावत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावेविशेषणताविशेषणसाध्येआत्मत्वहेतावव्याप्तिस्तादृशसाध्यस्यकालवृत्तित्वविशिष्टगगनाभावाभावसमनियतनयातदभिन्नत्वेननदभावस्यकालवृत्तित्वविशिष्टगगनाभावरूपतयादैशिकविशेषणतायाअपिसाध्यनिरूपितसाध्याभावनिष्ठप्रतियोगितावच्छेदकसंबंधतयातेनसंबंधेनगगनाभावात्मकसाध्याभावस्यसाध्यवद्भिन्नेवर्तमानस्यात्मनिसत्वात्॥ नन्वसाध्यनिरूपितसाध्याभावनिष्ठप्रतियोगिताव्यक्तिर्येनरूपेणयेनसंबं

धेनावच्छिन्नातेनरूपेणतेनसंबंधेनसाध्यवद्भिन्नवृत्तेःसाध्याभावस्यतेनरूपेणतेनसंबंधेनयदधिकरणंतद्वृत्तित्वाभावोव्याप्तिरिति विवक्षितंकालवृत्तित्वविशिष्टगगनाभावत्वावच्छिन्नायाःसाध्यनिरूपितप्रतियोगितायाअवच्छेदकीभूतदेशिकविशेषणतासंबंधेनकालवृत्तित्वविशिष्टगगनाभावत्वावच्छिन्नाधिकरणत्वस्यसत्वान्नाव्याप्तिरितिवाच्यं॥एवंसतिप्रतियोगितान्तर्गतनिष्ठत्वविशेषणवैय्यर्थ्यापत्तेः॥दर्शितस्थलेकालिकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावनिष्ठप्रतियोगितायांदैशिकविशेषणतासंबंधस्यावच्छेदकत्वेपितादृशप्रतियोगितावच्छेदकरूपेणतादृशप्रतियोगिताश्रयीभूताभावस्यसाध्यवद्भिन्नवृत्तेर्व्यतिरेकिमात्रस्यकालिकसंबंधावच्छिन्नाभावोव्याप्यवृत्तिरितिमतेप्रसिद्धावपितस्याधिकरणभेदेनभिन्नत्वावश्यकतयात्सन्यवृत्तेरव्याप्त्यनवकाशादितिचेन्न॥स्वावच्छेदकावच्छिन्नानधिकरणनिरूपितस्वावच्छेदकसंबंधावच्छिन्नाधेयतावच्छेदिकायायाप्रतियोगितातद्दन्यत्वस्यसाध्याभावनिष्ठप्रतियोगितायांनिवेशेनसर्वसामंजस्यात्॥विशिष्टसत्वाभावसाध्यकेविशिष्टसत्वावच्छिन्नप्रतियोगितायाविशेष्यमात्रवृत्तितयास्वावच्छेदकावच्छिन्नानधिकरणनिरूपितस्वावच्छेदकसमवायसंबंधावच्छि

न्नाधेयतावच्छेदकत्वेपिविशिष्टसत्ताधिकरणत्वरूपसाध्याभावनिष्ठप्रतियोगितैवतादृशीतितादृशप्रतियोगितावच्छेदकस्वरू
पसंबंधेनविशिष्टसत्ताधिकरणत्वरूपसाध्याभाववद्वृत्तित्वमादायैवतत्साध्यकेगुणत्वहेतोर्लक्षणसमन्वयइतिशिवं॥अथै
वमपिकालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावेसाध्येअत्यन्ताव्याप्तेरस्यैवतादृशसाध्यस्ययोव्यधिकरण-
संयोगसंबंधावच्छिन्नप्रतियोगिताकाभावोयद्यतादृशसाध्यगगनोभयत्वावच्छिन्नाभावस्तयोर्गगनाभावात्मकसाध्याभावस
मनियतत्वेनतद्भिन्नतयादेशिकविशेषणतासंबंधस्यलक्षणघटकत्वात्॥नच्चतादृशाभावयोःसाध्याभावसमनियतत्वे
पितयोःकेवलान्वयितयादेशिकविशेषणतासंबंधावच्छिन्नप्रतियोगिताकतद्भावस्याप्रसिद्ध्यासाध्यात्मकत्वान्नदेशकवि
शेषणतायाःसाध्यनिरूपितप्रतियोगितावच्छेदकत्वमितिवाच्यं॥साध्येतत्प्रतियोगित्वनिर्वाहायगगनेगगनाभावाभावत्वमि
वतद्भावत्वस्यापियुक्तिसिद्धत्वात्॥मैवं॥अभावविरहात्मत्वंप्रतियोगित्वमितिमतेनतदावश्यकत्वेपिप्रतियोगित्वस्यसंबं
धरूपत्वेतदनावश्यकत्वात्समवायसंबंधावच्छिन्नप्रमेयाभावाभावस्यसत्तास्वरूपत्वंवदतांग्रंथकृतांप्रतियोगित्वस्यप्रकृतलक्ष

णेस्वरूपसंबंधस्यैवादरणीयत्वात्॥ अथैवमप्यभावत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावेदेशिकविशेषण-
तयासाध्यात्मत्वादायव्याप्तिस्तत्रसाध्यस्ययः कालिकसंबंधावच्छिन्नाभावस्तस्ययादेशिकविशेषणतासंबंधावच्छिन्नाभावस्तस्य
साध्यरूपतयादेशिकविशेषणतायाअपिलक्षणघटकत्वात्॥ नच दर्शितीभावस्यसाध्यरूपत्वेपितदीयप्रतियोगितानस्वनिष्ठ
साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभावस्यैवस्वपदार्थत्वादितिवाच्यं॥ साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्या
भावस्यनिरवलाभावरूपतयाकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावनिष्ठप्रतियोगितायाअपिस्वनिष्ठत्वासंतेः॥ नच्चकालि
कसंबंधावच्छिन्नप्रकृतसाध्याभावस्यदेशिकविशेषणतानित्यमात्रवृत्तितयासर्वदेशासंग्राहकत्वेननतस्यसाध्यतावच्छेद-
कसंबंधावच्छिन्नसाध्याभावत्वंकल्प्यतेकिंतुसर्वदेशसंग्राहकत्वंगनाभावादीनां॥ व्यतिरेकिणस्तथात्वेनिरुक्तसाध्याभावस्यकालि
काव्याप्यवृत्तितापत्तेरितिवाच्यं॥ व्यतिरेकिणःकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यकेवलान्वयितयानित्यमात्रवृ
त्तितायाअसिद्धेर्गगनाभावादिवृत्तस्यापिसर्वदेशसंग्राहकत्वाविशेषात्साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभावत्वावश्यकत्व

दितिचेन्न॥व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासादभावभेदवादिनांमतेव्यतिरेकिप्रतियोगिककालिकसंबंधाव
च्छिन्नाभावस्याधिकरणभेदेनभेदात्सर्वदेशसंयाहकत्वासिद्धेरितिबहुतरमूहनीयं॥अथास्मिन्लक्षणेतादात्म्यसंबंधेन
घटसाध्यकेघटत्वहेतावव्याप्तिस्तत्रसाध्यीभूतघटनिरूपितघटभेदात्मकसाध्याभावनिष्ठप्रयोगित्वात्प्रसिद्धेः॥घटभेदाभाव-
स्यघटत्वस्वरूपत्वात्॥यदिचघटभेदाभावस्यघटत्वरूपत्वद्घटस्वरूपत्वमपिस्वीक्रियतेतादात्म्यसंबंधेनघटवत्तायाघटभे
दाभावप्रतीतिनियामकत्वाच्चनातिप्रसंगइत्युच्यतेतदाघटभिन्नंघटत्वाभावादित्यादावव्याप्तिर्घटत्वात्मकसाध्याभावनि
ष्ठप्रतियोगितावच्छेदकसमवायसंबंधेनघटत्वात्मकसाध्याभावस्यसाध्यवद्भिन्नवृत्तित्वात्तेनसंबंधेनघटात्मकसाध्याभावाधि
करणेकपालेहेतोर्वृत्तेः॥यदिचसाध्यनिरूपितयादृशसाध्याभावनिष्ठप्रतियोगितावच्छेदकयत्संबंधेनसाध्यवद्भिन्नवृत्तित्वं
यादृशसाध्याभावस्यवर्त्ततेतेनसंबंधेनतादृशसाध्याभाववत्वंनिवेशनीयंसमवायस्यघटत्वसाध्याभावनिष्ठप्रतियोगितावच्छेदकत्वाभावान्नतमादायाव्याप्तिरित्युच्यतेतदाघटभेदस्यघटत्वाभावसमनियतत्वेनतदभिन्नत्वोपगमेनघटत्वस्यतत्र

तियोगित्वव्यवस्थापनस्य निष्फलत्वापत्तिर्घटत्वस्य घटभेदप्रतियोगित्वाभावेपि घटात्मकसाध्याभावमादाय घटभेदसाध्यकेपटत्वा
दौलक्षणगमनसंभवादिति चेदत्र ब्रूमः॥तादात्म्यसंबंधेन घटस्य साध्यत्वस्थले घटतादात्म्यस्यैव साध्यत्वोपगमकर्तृप्राचीनमते
नैवैतत्परि[illegible]घटभेदाभावस्य घटत्वमात्रस्वरूपलेपिक्षतिविरहात्॥अस्तु वा तादात्म्यसंबंधेन घटादेः साध्यत्वं तथा-
पि क्षतिः साध्यनिरूपितस्वनिष्ठप्रतियोगित्व[illegible]त्वान्यतरावच्छेदकसंबंधस्यैव विवक्षणादित्यलं॥ननु साध्यनिरू-
पितस्वनिष्ठप्रतियोगितावच्छेदकसंबंधेन साध्याभाववत्वनिवेशे लक्षणे साध्याभा[illegible]व्यर्थं तदनिवेशेस्वपदस्य साध्यवद्भिन्न
वृत्तित्वरूपेण गगनाभावपरिचायकत्वेपि गगनाभावादिनिष्ठप्रतियोगितायां साध्यनिरूपितत्वाभा[illegible]ध्यनिरूपित
प्रतियोगितायां गगनाभाववृत्तित्वाभावेन स्वनिष्ठसाध्यीयप्रतियोगितावच्छेदकसंबंध[illegible]संबंधघटकतया साध्या-
भावप्रतियोगिकत्वाभावेन तादृशपरंपरायाः साध्याभावातिरिक्तवस्तुसंबंधतायाअसंभवादिति[illegible]योगमूलकपरंपरासंबं
धविवक्षाभिमानेनशंकतेन[illegible]ति॥दर्शितविशिष्टस्य साक्षात्संबंधत्वमेवविवक्षितंनतुपरंपरात्वमितिसमाधातुंशंकते साध्य

निरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबंधेनसाध्याभाववत्त्वमित्यत्रद्विधानिविष्टसाध्याभावघटित[illegible] ग्रंथांतरेणाभिधा
यसाध्याभाववत्त्वनिवेशसार्थक्यंस्पष्टयति॥ पदार्थस्यद्विधानिवेशेनेति॥साध्यनिरूपितसंबंध[illegible]साध्यव
द्भिन्नदृष्टांतसाध्याभाववद्दृष्टांतत्वरूपलक्षणघटकतयाचेत्यर्थः॥निवेशेत्यंतंनिवेशोध्रौव्येहेतु[illegible]यनिरूपित[illegible]नष्ठ
प्रतियोगिता[illegible]संबंधरूपविशिष्ट[illegible]वृत्तित्वांशेगगनाभावप्रतियोगिकत्वाभावेपिविशिष्टघटकविशेष्यांशेदेशिकवि
शेषणतारूपेगगनाभावप्रतियोगि[illegible]त्वस्यासत्त्वात्तथासाध्याभाववत्त्वानिवेशेगगनाभावमादायासिःस्यादेवेतिभावः॥वस्तुत-
स्तुपरंपरासंबंधनिवेशेपि[illegible]यसंबंधावच्छिन्नमहानसीयत्वावच्छिन्नाभावमादायवह्निमान्धूमादित्यादा[illegible]व्याप्तिवारणाय
साध्यतावच्छेदकसंबंधावच्छिन्नसाध्य[illegible]दकावच्छिन्नाभावनिवेशआवश्यकएवेतिनसाध्याभावपदवैयर्थ्यं॥केचित्तुसाध्यनिरूपितत्वा[illegible]
॥साक्षात्संबंधनिवेशेपिसाध्याभावपदंव्यर्थंतयाहेसाध्याभाववत्त्वमनिवेश्यसाध्यनिरूपितत्वनिष्ठप्रतियोगितावच्छेदकसंबंधेन
साध्यवद्भिन्नवृत्तिपदार्थवत्त्वमेवनिवेश्यंतत्पदस्यविशेष्यं।केपरत्वनियमेनयत्सदार्थव्यक्तिस्तत्पदे[illegible]दनीयंसेव्यक्तिस्तत्पदे

नोपादेयातथाचगगनाभावव्यक्तेस्तन्निष्ठप्रतियोगिताव्यक्तेःसाध्यनिरूपितत्वहेतुरूपदेनोपादानासंभवाद्गगनाभावमादाया-
व्याप्यत्वकेरित्याशंकतेनचेति॥लक्षणवाक्येस्वपदंपरित्यज्यसाध्याभावपदंनिवेश्यंसाध्याभावपदस्यतुव्यक्तिपरत्व
नियमाभावादभावांतरवारणायसाध्याभावत्वनिवेशआवश्यकइत्याशयेनसमाधानमाहस्वार्थस्येति॥स्वपदार्थत्व
नस्वपदार्थस्येत्यर्थइत्यर्थः॥यादृशसंबंधेनप्रकृतसाध्यवतिवृत्तिसाध्याभावोनवर्तत इतिअथयादृश
संबंधेनयस्यसाध्यवन्निरूपितयत्संबंधावच्छिन्नवृत्तित्वाभाववान्तादृशाभावइत्यर्थेसत्ताभावसाध्यकेसमवायासंग्रहःसाध्य
वन्निरूपिततत्संबंधावच्छिन्नवृत्तित्वसिद्धेः॥यदिचतादृशसाध्याभावनिष्ठसाध्यवन्निरूपितवृत्तित्वंयत्संबंधावच्छिन्नमि-
त्यर्थस्तदाऽयमात्माज्ञानादित्यादौसाध्याभावेसाध्यवद्वृत्तित्वाप्रसिद्धिः॥यदिचसाध्याभावनिष्ठयत्संबंधावच्छिन्नवृत्तित्वंसाध्यवद
निरूपितनिरूप्यत्वविशिष्टसत्ताभावसाध्यकेसमवायसंग्रहस्तिचेन्न॥यत्संबंधावच्छिन्नतादृशसाध्याभावनिरूपितत्वविशिष्टाधिक
रणत्वाभावःसाध्यवद्वृत्तिरित्येतादृशार्थविवक्षणेलघुत्वेनतत्रैवतादृशसाध्याभावत्वविशिष्टाधिकरणत्वाभावनिवेशान्न

विशिष्टसत्ताभावसाध्यकसमवायसंग्रहः॥ननु वैवक्षणेपिशब्दज्ञानान्यतरत्वसाध्यकेनित्यज्ञानत्वहेतौविषयितासंबंधावच्छि
न्नतादृशसाध्याभावत्वविशिष्टाधिकरणत्वाभावस्यसाध्यवतिशब्देवृत्तेर्विषयितासंबंधसंग्रहादव्याप्तिरितिवाच्यं॥साध्यवद्वृत्तिरि
त्यनेनसाध्यव्यापकइतिविवक्षणात्॥नचतथाप्ययमात्माशब्दज्ञानान्यतरस्मादित्यादौकालिकसंबंधावच्छिन्नतादृशसाध्याभा-
वाधिकरणत्वाभावस्यसाध्यव्यापकत्वात्कालिकसंबंधमादायातिव्याप्तिरेते- शब्दज्ञानान्यतरत्वसाध्यकेनित्यज्ञानत्वहेतौविषयि
तासंबंध [illegible] संबंधावच्छिन्नाधेयतासंबंधावच्छिन्नप्रतियोगिताकः प्रकृतसाध्यवतोऽन्योन्याभावः साध्यवद्भिन्नवृत्ति
साध्याभाववर्तनेयद्वाप्रकृतसाध्यवत्त्वावच्छिन्नानुयोगिताकभेदप्रतियोगितायांयेनसंबंधेनतादृशसाध्याभावोऽवच्छेदकः॥यद्वा
यत्संबंधावच्छिन्नतादृशसाध्याभावनिष्ठावच्छेदकताकप्रतियोगितासाध्यवतिदेशिकविशेषणतयानवर्तनेतेनसंबंधेनेतिवि व
क्षणमध्यपास्तमुक्तस्थलेतादृशकालिकसंबंधमादायातिव्याप्तेरितिवाच्यं॥साध्यवद्वृत्तिरित्यनेनसाध्यव्यापकत्वेसतिसाध्यव्याप
त्वस्यविवक्षणात्॥साध्यव्याप्यत्वविवक्षणेनैवशब्दज्ञानान्यतरत्वसाध्यकेविषयितासंबंधव्यावर्तनोपेनित्यत्वसाध्यकेमहाकाल-

मात्रवृत्तिहेतोः कालिकसंबंधव्यावर्तनायसाध्यव्यापकत्वनिवेशोऽवश्यकः॥ **अत्रेदं ध्येयं** निरुक्तसंबंधपरिचायकरूपस्यापिव्यापकत्व व्याप्यत्वघटितत्वेनपूर्वनिरुक्तसंबंधपरिचायकरूपापेक्षयालाघवाभावादलं वाग्जालेनयुक्तिर्विचारणीयेवेति॥ **इत्यनेनेति**॥ तदंतवाक्येनत्यर्थः॥ **अनवच्छिन्नवृत्तिकत्वरूपेति**॥ तथाचतादृशवृत्तित्वलाभायेवसाध्यवद्भिन्नीयत्वंनतुलक्षणघटकंमत्रेसाध्यवद्भिन्नईश्वरेतितुस्वरूपकीर्तनमात्रंनतुतदंशस्यलक्षणघटकत्वाभिप्रायेणतादृशवृत्तित्वनिवेशोतदंशस्यव्यर्थत्वादिति **ध्येयं**॥ **तथासतीति** स्वमतेतादृशज्ञानत्वाभावाभावस्यविरुद्धधर्माध्यासभियाऽतिरिक्तत्वस्वीकारेणाधिकरणभेदेनभेदान्नाव्याप्तिरितिभावः॥ ईश्वरेनित्यसुखंस्वीकारेनिरुक्तज्ञानत्वाभावेसाध्येसुखंव्यभिचारीतिसत्ताभावसाध्यकस्थलांतरानुसरणं॥ **दीधितौ** कर्मादि॥ **वेति** गुणादाविनिवक्तव्येकर्मादाविनिद्रव्यकर्मेतिसूत्रानुसारिविभागापेक्षमिति **ध्येयं**॥ **गादाधर्यांविनिगमनाविरहेपीति**॥ **अथैवं** कपिसंयोगाभावाऽधिकरणभेदाद्भिन्नोऽधिकरणभेदेप्यभिन्नइतिसिद्धांतावतापिकपिसंयोग्येतद्वृक्षत्वादित्यादावव्याप्तिर्दुर्वारेति॥ न॥ व्याप्तिखंडनेनतात्पर्यंकिंतुमानाभावादितिपंक्त्यर्थसूचनएवेति **वाच्यं**॥ यतस्तादृशपंक्त्यर्थोऽधिकरणभेदेनाभावभेदएवमाना

भावस्तत्र दूषणंचाशक्यमितिचेन्न॥ यथाश्रुतग्रंथार्थोनविवक्षितः किंत्ववधारणाऽगर्भएवेतिसूचयितुमधिकरणभेदेनाभावभेदो व्यवस्थापितः॥ **वस्तुतस्तु** साध्यवद्भिन्नवृत्तित्वस्थानेऽव्याप्यवृत्तेरनेकवृत्तिर्योऽभावस्तद्भिन्नत्वरूपविशेषणप्रक्षेपेऽव्याप्तिवारणमपिसुकरमित्यभिप्रेत्याधिकरणभेदेनाभावभेदोव्यवस्थापित इतिहृदयं॥ **अत्रेदंचिंत्यं**॥ प्रतियोगितासंसर्गककपिसंयोगत्वावच्छिन्नप्रकारप्रमां प्रतिगुणविधयास्वविषयकलौकिकप्रत्यक्षंप्रतिविषयविधयाचककपिसंयोगत्वावच्छिन्नाभावस्यतादात्म्यसंबंधेनकारणत्वेकल्पनीयेकारणतावच्छेदकत्वंयदिकपिसंयोगाभावत्वस्यतदागौरवंस्यादितिकपिसंयोगाभावनिष्ठतद्व्यक्तित्वमेवकारणतावच्छेदकंवाच्यंतथाचाधिकरणभेदेनाभावभेदतद्व्यक्तित्वस्यकारणतावच्छेदकत्वंनसंभवतीत्यधिकरणभेदेप्यभावाभेदएवस्वीकर्तुमुचितइति॥ [illegible]ल्यंसाध्याभाववतिसाध्यंचबाध्यमित्यत्रविधेयाविमर्शादहृदबोध्यमित्यस्येति॥ वास्तवतयेतिवास्तवत्वमवश्यापादेयविशेषणांतरावारणीयप्रयोजनकत्वंतथाचवह्निमान्पर्वतान्यत्वादित्यादौयत्किंचिद्धूमवत्पर्वतादौहेतुत्वभावसत्वेपिसकलसाध्याभाववन्निष्ठाभावान्नेदंप्रयोजनंवास्तवमितिभावः॥ **तत्प्रदर्शनस्येवोचितत्वादिति**॥ **नन्वेतद्रूपग**

गनोभयवानेतद्दोषादित्यादौसाध्येसाकल्यविशेषणनि[illegible]संभवतितथाहिसाध्येसाकल्यनिवेशेप्रतियोगिव्यधिकरणेतद्रूपत्वावच्छिन्नाभावमादायातिव्याप्तिःसाध्याभाववति[illegible]साकल्यविशेषणेपिदुर्घटतन्निवेशेचप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसकलसाध्याभावाप्रसिद्धेवनातिव्याप्तिरितिचेन्न॥साध्येसाकल्यविशेषणदानेतद्रूपगगनान्यतरत्वावच्छिन्नाभावमादायातिव्याप्तेर्दुवारतयासाध्यतावच्छेदकावशिष्टसाध्यसाद[illegible]धिकरण्यस्यतोदृशत्वविवक्षयाऽन्यथैववातत्रातिव्याप्तेर्वारणीयत्वान्तत्रयोजनस्यवास्तवत्वविरहात्॥किंचनिरुक्तसाध्य[illegible]वदवृत्तित्वावच्छिन्नाभावत्वापिसाध्येसाकल्यविशेषणासत्वेलक्षणघटकतयासाध्याभाववतिसाकल्यदानेनाप्यतिव्याप्तिवारणसंभवात्॥साध्यतावच्छेदकातिरिक्तोयोव्यासज्यवृत्तिधर्मइति॥अथात्रसाध्यतावच्छेदकातिरिक्तोयोधर्मस्तदनवच्छिन्नप्रतियोगितानिवेशेनैवोपपत्तौव्यासज्यवृत्तित्वनिवेशोव्यर्थइतिचेन्न॥व्यासज्यवृत्तित्वानिवेशेसाध्यतावच्छेदकातिरिक्तत्वेनबहूनांधर्माणांनिवेशेगौरवापत्तिरतोधर्मसंकोचार्थंतन्निवेशः॥यदिचसाध्यतावच्छेदकातिरिक्तधर्मनिष्ठावच्छेदकत्वनिरूपकत्वसामान्याभावनिवेशान्नबहुधर्मनिवेशापत्तिरि

तविभाव्यतेतदाऽखंडाभावसंपादकत्वेव्याप्यवृत्तित्वनिवेशवैयर्थ्यं॥ननुव्याप्यवृत्तिलाघटितस्यलक्षणस्यसंभवेतद्घटितगुरुलक्षणारंभोऽन्याय्यइतिवाच्यं॥साध्येसाकल्यस्यमूलोक्तस्यसार्थक्यायैवतद्घटितलक्षणारंभात्॥यत्तुव्याप्यवृत्तित्वंविहायनिरुक्तसामान्याभावनिवेशेप्रमेयवह्निमान्धूमादित्यादावगतिस्तत्रप्रमेयवह्नित्वस्यगुरुतयाऽनवच्छेदकत्वेनवह्नित्वाभावस्यैवलक्षणघटकत्ववक्तव्यंतत्तुनघटतेतदीयप्रतियोगितायांसाध्यतावच्छेदकातिरिक्तवह्नित्वावच्छिन्नत्वादितितदसद्गुरुधर्मावच्छिन्नसाध्यकहेतोर्हेतुतावच्छेदकसंबंधानुयोगिनिष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदककलरूपकेवलान्वयिसाध्यकत्वेनतत्राव्याप्तेरिष्टत्वादवेदितत्वात्॥गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेतदवच्छिन्नसाध्यकानुमानमेवनास्तीत्यभिप्रायस्यवक्तुंशक्यत्वाच्च॥अतएवलाघवेनसाध्यतावच्छेदकावच्छिन्नाभावनिवेशौचित्यवर्णनंसंगच्छतेऽन्यथा निवेशेगुरुधर्मावच्छिन्नसाध्यकाव्याप्तेरपरिहारात्साध्यतावच्छेदकावच्छिन्नत्वेनसाध्यतावच्छेदकावच्छिन्नाभावकूटरूपावच्छिन्नप्रतियोगितावक्षणीयतयालाघवानवकाशादितिदिक्॥तल्लक्षणसंगतेरिति॥अथतत्रूपघटोभयाभावप्रतियोगि

व्यधिकरणस्यसंभवाद्बलवेवाव्याप्तिरितिचेन्न॥ अन्तरेवतादृशाभावप्रतियोगितावच्छेदकसंभवादुभयत्वावच्छिन्नप्रतियोगिताकाभावस्यगुरुधर्मावच्छिन्नप्रतियोगिताकतयाऽप्रसिद्धत्वादित्याहुः॥ यद्वा साध्यवद्भिन्नवृत्तितावच्छेदकधर्मावच्छिन्नत्वाभावस्यसाध्यनिष्ठप्रतियोगितायांनिवेशेतत्रलक्षणसमन्वयसंभवादित्यभिप्रायः॥ साध्याभावाधिकरणयावन्निष्ठसप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमितिफलितार्थइति॥ यद्यप्युक्तफलितार्थेहेत्वभावेसकलसाध्याभाववन्निष्ठत्वविवक्षणेकेवलान्वयिधूमत्वव्याप्यवह्निर्वह्नित्वादित्यादौदीधितिकृतावक्ष्यमाणाव्याप्त्यसंगतिस्तथापियथाश्रुताभिप्रायेणप्रतियोग्यनधिकरणतावद्यावत्साध्याभाववन्निष्ठाभावप्रतियोगित्वमितिकिंचित्परिष्काराभिप्रायेणवावक्ष्यमाणाव्याप्तिःसंगमनीयाआत्ममहाकालेति॥अत्रमहत्परिमाणादानेधूमसाध्यकेऽतिव्याप्तिःकुतोनोक्तेतिशंकास्याज्जन्यमात्रस्यकालेनाधितयाव्यभिचारनिरूपितत्वेनापिसाध्यत्वलाभात्॥ महत्परिमाणदानेतुमहत्त्वाभावत्वेनकालत्वाभावबोधनाज्जन्यमात्रस्यकालत्वाभावज्ञानेनतादृशशंकानुदयान्नतद्दृष्यसाधारण्यायसिद्धस्थलोपेक्षेतिबोध्यं॥असंभवोऽव्याप्तिर्वेति॥एकज्ञानविषयत्वा

दीनांसंसर्गत्वानभ्युपगमेआत्मभिन्नज्ञानवदन्यत्वादित्यादौलक्षणसंभवादुक्तमव्याप्तिर्वेति॥**अस्मदीयफलितार्थस्येति**॥यद्य

येतादृशलिङ्गपरामर्शव्याप्तित्वव्याप्तेर्विशिष्यैकार्थसमवायरूपानुमितेरतःसकलसाध्याभाववन्निष्ठस्वावच्छेदकावच्छिन्नाधिकरणवृ

त्तित्वविशिष्टनिरूपिताधिकरणतानिरूपकाभावीयहेतुतावच्छेदकावच्छिन्नप्रतियोगित्वंव्याप्तिरित्येववक्तव्यंतथाचहेतुतावच्छे

दकावच्छिन्नवैयधिकरण्यनिवेशानुयोगः॥**दुर्वारश्चेति**प्रतिभाति**तथाहि**सकलसाध्याभाववन्निष्ठभेदप्रतियोगितावच्छेदक-

ता**च्छेदकहेतुतावच्छेदकावच्छिन्नत्वविशिष्टप्रतियोगित्वरूपलिताथतात्पर्यान्नानुपपत्तिरित्यवधेयं॥**अनेकशेषत्व**

रूपसाकल्यस्येति॥**अत्रानेकत्वंव्यासज्यवृत्तिधर्मपर्याप्त्यधिकरणत्वं**॥व्यासज्यवृत्तित्वंचैकत्वपर्याप्त्यवच्छेदकधर्मावच्छिन्ना

पर्याप्तिकत्वरूपमेकत्वविरुद्धत्वंस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वतादात्म्येतदुभयसंबंधेनकिंचिद्धर्मविशिष्टत्वंव-

स्त्वन्यदेतत्॥**अशेषत्वं**समभिव्याहृतपदार्थतावच्छेदकधर्मव्यापकीभूतायोऽनेकत्वव्यासज्यवृत्तिधर्मभिन्नोधर्मस्तदर्थत्वाधिक

रणत्वंबोध्यं॥**भेदहेतुरिति**गुणान्यत्वभेदादित्यादावित्यर्थः॥**स्वस्मिन्नेवेति**घटभेदरूपहेतुभेदत्वेनगगनाभावएवगगन

भावस्य वृत्तिमत्वमित्यर्थः॥यद्वि घटभेदभे[illegible]भावस्यकेवलान्वयित्वंतदा घटभेदे घटभेदइति॥ निरितिध्येयं॥कालिकसंबंधावच्छि[illegible]प्रतियोगिताकेवल[illegible]भाव[illegible]इति॥अत्रवल्यभावपदंवल्यभावान्यत्वविशिष्टवल्यभा[illegible]प्रतियोगिताया[illegible]वच्छेदकावच्छिन्नत्वविशेषणसत्वेपिनक्षति[illegible]विशिष्टवल्यभावाभावप्रतियोगितायांवल्यभावत्वस्यावच्छेदकत्वंभवत्वतुशंक्यत्वान्नतिता[illegible]विशिष्टाभावस्यवल्यभावरूपदेशकालवृत्तित्वानुपपत्तेः॥प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वेसतीकालवृत्तिताव[illegible]च्छेदकत्वादितिध्येयं॥सकलशब्दस्यव्यापकत्वार्थकतयेति॥सकलशब्दस्यव्यापकत्वपरतयेत्यर्थस्तत्परत्वंतच्छब्दबोधत्व[illegible]पेमानसबोधमादायनिर्वहतीतिबोध्यं॥यद्व्यापकत्वंसकलशब्दस्यशक्यतावच्छेदकंवेतिपक्षद्वयेप्यनुगतिंतदेवप्रतिभानि॥तथाहिसकलघटारूपवंतःसकलघटनेष्टथिवीत्वमित्यादौघटव्यापकत्वप्रतीत्यापत्तेरितरथासकलशब्दस्यशक्यश्चेतिकर्मधारयविवरणानुपपत्तेः॥एतेनसकलशब्दार्थव्यापकत्वउत्तरार्थतावच्छेदकघटत्वस्यनिरूपितत्वेनान्वयोव्यापकत्वस्यानुरूपेणथिवीत्वयोरन्वयइतिनिरस्तं॥पदार्थ[illegible]विशेषण-

तयोपस्थितस्यव्यापकतान्वयस्यैकविशेषणतयेत्यादिव्युत्पत्तिविरुद्धत्वात्॥व्यापकत्वस्यरूपान्वयित्वेरूपवंतइतितद्धितेनरूपवत्त्वस्यविशेषणानांवृत्तिर्नेष्टस्यचविशेषणयोगेनेत्यभियुक्तवचनादेतिदिक्॥देयमेवेति॥तथाचतद्विशिष्टहेत्वभावत्वस्यैवव्यापकतावच्छेदकत्वंविवक्षणीयंनिरुक्तस्थलेतादृशसंयोगाभावत्वस्यस्वदोषज्ञानसंभवान्नातिव्याप्तिः॥नन्वेवमेतद्वृक्षत्ववान्कपिसंयोगादित्यादावतिव्याप्तिस्तत्रस्वप्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वभावस्याप्रसिद्धातादृशहेत्वभावत्वस्वदोषज्ञानसंभवादतआह नदेयमेववेति॥तद्दानएतद्वृक्षत्ववान्कपिसंयोगादित्यादावुक्तातिव्याप्तिवारणायस्वाधिकरणत्वाभावस्यैवेत्यादिना॥ज्ञाब्द्बोधस्यापिकथंचिदिति॥साध्यवत्पदार्थेसाध्यवत्तावच्छिन्नप्रतियोगिताकोभेदेनान्यपदार्थैकदेशेभेदेऽन्वीयमानेधर्मिपारतंत्र्येणसाध्यस्यस्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनान्वयःस्वीक्रियतेएवमन्यपदार्थेनदवन्निरूपितात्वकोभेदेनवृत्तित्वेऽन्वीयमानेधर्मिपारतंत्र्येणान्यस्यनिरूपितत्वसंबंधेनान्वयःस्वीक्रियतेएवंवृत्तित्वपदार्थेवृत्तित्वप्रतियोगिताकात्वकोभेदेनवृत्तित्वेऽन्वीयमानेधर्मिपारतंत्र्येणवृत्तित्व

कत्वसंबंधेनान्वयःस्वीकार्यइतिव्यामेःशाब्दबोधः॥ नचाभेदेनैकविशेषितापरपदार्थघटितधर्मावच्छिन्नाभावाद्भेदेनैकपदार्थतावच्छेदकविशेषितापरपदार्थघटितधर्मावच्छिन्नाभावोऽन्यएवप्रतियोगितावच्छेदकभेदादितिकथंनिरुक्तान्वयइतिवाच्यं॥समनियताभावान्यत्वेऽपिघटेदण्डधर्मावच्छिन्नाभावयोर्भेदविरहात्॥ अप्रमाणत्वादिति॥अयंभावः॥तत्रकंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिकभेदाभानोपगमेतस्यनीलघटेपिसत्वेनतादृशवाक्यस्याप्रामाण्यापत्तिरतोऽन्वयितावच्छेदकंकंबुग्रीवादिमत्त्वावच्छिन्नत्वस्यैवप्रतियोगितायांभानमभ्युपेयंतस्यचाप्रसिद्धत्वात्संसर्गीशुक्लत्वमादायतादृशवाक्यस्याप्रामाण्यंसंपादनीयंतथासतिपटइत्यादेःप्रामाण्यानिर्वाहइति॥ तद्विशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितेति॥कंबुग्रीवादिमत्त्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितावच्छेदकतात्वापेक्षयाघटत्वघटिततादृशावच्छेदकतालघुतयातादृशावच्छेदकत्वस्यान्याभावाप्रसिद्धिरतःकूटनिवेशः॥अतएवत्रयसंबंधावच्छिन्नप्रतियोगितानिरूपितंपारिभाषिकावच्छेदकत्वंप्रत्यापनीयतेनसंबंधेनसंबंधितंप्रतियोगित्वंचयदिविवक्ष्यतेतदासमवायेनप्रमेयगगनंनास्तीत्यादावगतिः॥समवायेनगगनत्वविशिष्टसंबंधिनोऽप्रसिद्धेः॥ यदिचतत्रत्यंसंबंध

नैवैकत्वं [illegible] नास्तीतिस्यात्॥गुणान्यत्वविशिष्टसत्तावच्छिन्नप्रतियोगितानिरूपितनिरुक्तपारिभाषिकावच्छेदक त्वस्यसत्त्वेदादितिचेदत्रकेचित्तु॥येननयेनसंबंधेनस्वविशिष्टसंबंधित्वंप्रसिद्धंप्रत्येकंतत्तत्संबंधावच्छिन्नत्वसंबंधित्वप्रतियोगि त्वयोर्निवेश्यतेतदाभावकूटरूपमेवव्यापकतावच्छेदकत्वंपारिभाषिकावच्छेद्यत्वशरीरंनिवेशनीयं॥यदिचविषयितासंबंध घटितंव्यापकतावच्छेदकत्वंकबुद्ध्यादिमत्वनिरूपितंघटत्वेदुर्घटंतदातत्संबंधातिरिक्ताएवप्रसिद्धसंबंधाग्राह्याइतिचेदंति॥परे तु॥यत्संबंधावच्छिन्नप्रतियोगितानिरूपितपारिभाषिकावच्छेदकत्वंग्राह्यंतेनैवसंबंधित्वंप्रतियोगित्वंचग्राह्यं॥नचैवंसमवायेनप्रमेय गगनसंबंधेत्वाप्रसिद्धिरितिवाच्यं॥समवायेनतादृशगगनसंबंधित्वंहि॥यदधिकरणानुयोगिकत्वसंबंधाप्रतियोगित्वतत्संबं धप्रतियोगित्वोभयाभावःप्रमेयत्वविशिष्टगगनेवर्ततेनत्वमेवतच्चघटादौप्रसिद्धं॥नचैवं [illegible] तन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रति योगितानवच्छेदकत्वंदुर्वचमितिवाच्यं॥तन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वंहितन्निष्ठाभावीयप्र तियोगितासामान्येसमवायावच्छिन्नत्वसमवेतनिष्ठत्वयद्धर्मावच्छिन्नत्वंतन्त्रित्वावच्छिन्नाभावस्तत्त्वमिवक्षितत्वादितिवदंति

संबंधज्ञानस्यविशिष्टबुद्धावनपेक्षितत्वादिति॥तत्प्रकारक[illegible]द्धिप्रतिबंधकतज्ज्ञानस्यहेतुत्वा[illegible]कूटज्ञानानपेक्षणादिति भावः॥ननुतादृशप्रतियोगितासंबंधावच्छिन्नसाध्यसंबंधवन्निष्ठप्रकारतानिरूपितभेदनि[illegible]॥नरूपितविशेष्यताशालिबोधजनकत्वप्रकारतानिरूपितायावाक्यनिष्ठेच्छीयविशेष्यतातच्छाब्दत्वतादृशतात्पर्यज्ञानस्यैवसाध्य[illegible]बोधप्रतिहेतुतयातस्यचतादृशसंबंधप्रकारतात्वकत्वज्ञानाभावेतदनुपपत्तिरितिचेन्न॥साध्यसंबंधविशिष्टसंबंधनिष्ठाभावीयतत्तत्प्रतियोगितावच्छेदकताभाव[illegible]र्वच्छिन्नप्रतियोगितासंबंधावच्छिन्न[illegible]संबंधविशिष्टनिष्ठ[illegible]रतानिरूपितभेदनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनकत्वनिष्ठप्रकारतानिरूपितइच्छीयविशेष्यतासंबंधेनसाध्यसंबंधविशिष्टप्रकारकवाक्यविशेष्य[illegible]तादृशबोधहेतुतयातस्यचतादृशसंबंधप्रकारकत्वाभावेनतादृशसंबंधज्ञानाभावेपिनतदनुपपत्तिः॥शाब्दबोधसंबंधतात्पर्यज्ञानंनहेतुःकिंतुप्रकरणज्ञानमेवेतिमतान्तरमाहुरेकेतिकेचित्॥अनियतसंबंधस्य[illegible]तादृशबोधहेतुत्वाभिप्रायेणेदमुक्तंसंबंधस्यनियतत्वान्ननज्ञानापेक्षेत्यपरे॥यद्यपिप्रतियोगितानांतत्तद्व्यक्तित्वेननिवेशेतत्तत्प्रतियोगिताव्यक्त्य

वच्छेदकत्वाभावकूटवद्भावच्छिन्नत्वेनपर्यवसेतंतत्रनकंबुग्रीवादिमत्वस्यसंबंधःकंबुग्रीवादिमत्वप्रतियोगिकपदार्थघटितत्वात्-
थापितत्तत्तदधिकरणतादृशकूटवद्भावच्छिन्नत्वेनसंबंधतयाविवक्षितंसामानाधिकरण्यघटकाधिकरणत्वांशस्यकंबुग्री
वादिमत्वप्रतियोगिकतयातद्घटितस्यनिरुक्तकूटवद्भावच्छिन्नत्वस्यकंबुग्रीवादिमत्वसंबंधत्वनिर्वाहः॥ यद्वास्वविशिष्टसंबंधि
निष्ठाभावीयप्रतियोगितावच्छेदकतदधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदकूटवद्भावच्छिन्नत्वमेवसंबंधउ
भयावृत्तित्वपर्यंतमुपलक्षणंकंबुग्रीवादिमत्वप्रतियोगिकपदार्थघटितत्वसंबंधत्वनिर्वाहइतिध्येयं॥ तदधिकरणावृत्ति
त्वरूपमिति॥ तदन्विताधिकरणवृत्तित्वाभावरूपमित्यर्थः॥ तदन्वयश्चाधिकरण्यपदार्थघटकत्वेपिनक्षतिः॥ इदंचसमा
नमधिकरणंयस्यससमानाधिकरणस्तस्यभावःसामानाधिकरण्यंसाध्यस्यसामानाधिकरण्यंसाध्यसामानाधिकरण्यंनसाध्य
सामानाधिकरण्यं साध्यासामानाधिकरण्यमितिव्युत्पत्तिमभिप्रेत्यतादृशव्युत्पत्तौसमानाधिकरणंयस्येत्यत्रयत्पदोत्तरष-
ष्ठ्याआधेयत्वमर्थःसमानपदस्याधेयतानिरूपकमर्थःअधिकरणपदार्थःसएवसमानपदार्थैकदेशाधेयतायांषष्ठ्यर्थाधेयतायाअ

न्वयः समानपदार्थस्याधिकरणपदार्थेऽभेदेनान्वयस्तथान्वयनिष्ठाधेयतानिरूपकाभिन्नमधिकरणमितिविग्रहवाक्याद्बोधः समानाधिकरणेतिसमासवाक्येआधेयतानिरूपकाऽधिकरणनिरूपिताधेयतावान्लक्षणयाऽधिकरणपदार्थः समानपदंतादृशार्थेलक्षणातात्पर्यग्राहकमेवसमानाधिकरणपदोत्तरभावप्रत्ययेनतादृशाधेयत्वंबोध्यतेसाध्यस्यसामानाधिकरण्यमित्यत्रसाध्यपदोत्तरषष्ठ्यर्थआधेयत्वंतस्यसामानाधिकरण्यपदार्थघटकाधेयतायामन्वयस्तादृशसाध्यसामानाधिकरण्यपदार्थस्यनञर्थेऽभावेऽन्वयइतिसाध्यनिष्ठाधेयतानिरूपकाधिकरणनिरूपितवृत्तित्वाभावःसाध्यासामानाधिकरण्यपदार्थः॥ **तदनधिकरणवृत्तित्वस्येति**॥समानमेवसामानंसाध्यस्यसामानंनभवतीतिसाध्यासामानंतदधिकरणंयस्यससाध्यासामानाधिकरणस्तस्यभावःसाध्यासामानाधिकरण्यमितिविग्रहेसमानपदार्थआधेयतानिरूपकंतदेकदेशाधेयतायांसाध्यपदोत्तरपञ्चम्यर्थाधेयतायाअन्वयः नञर्थोभेदवान्तदेकदेशेभेदप्रतियोगितयासमानपदार्थान्वयस्तथाचसाध्यनिष्ठाधेयतानिरूपकभेदवान्साध्यासामानपदार्थःसाध्यासामानमधिकरणंयस्येतिबहुव्रीहावधिकरणपदार्थआधेयतानिरूपकंतदेकदेशाधेयतायांयत्पदोत्तरषष्ठ्यर्थाधेयतायाअन्वयस्तथाचयनिष्ठाधेयतानिरूपकंसाध्यनिष्ठाधेयतानिरूपकभिन्नमितिविग्रहवाक्यार्थःसमानवाक्येसाध्यानधिकरणवृत्तिर्लक्षणयाऽधिकरणपदार्थःसाध्या

समानपदं तादृशलक्षणात्पर्यग्राहकं भावप्रत्ययेन तादृशवृत्तित्वं बोध्यत इति साध्याधिकरणवृत्तित्वं साध्यसामानाधिकरण्यपदार्थ इति केचित्॥ परे तु साध्यपदं साध्याधिकरणलक्षकं समानपदस्याभिन्नमर्थः भावप्रधानोनिर्देशः यद्वा अभिन्नत्वंतदर्थस्तथाचसाध्यसमानमित्यस्य साध्याधिकरणाभिन्नत्वमित्यर्थस्तत्रसाध्यसमानंनभवतीति व्युत्पत्त्यानञोऽभावबोधकतया साध्याधिकरणाभेदाभाववान् साध्याधिकरणभिन्नपर्यवसितो साध्यसामानपदार्थः अधिकरणत्वादिवद्भेदप्रतियोगिकाभावरूपस्यत्वस्यवृत्त्यभावधर्मकत्वात्मकतादात्म्यरूपस्यवाऽभेदस्यापिसंबंधिकेनभेदेन वृत्तित्वेनवाघटितनथासंबंधिकत्वान्नञोमध्यनिवेशस्यापिसाधुत्वाविघटकत्वात्तादृशार्थकसाध्यसामानपदेनाधिकरणपदस्यबहुव्रीहौभावप्रत्ययेचसाध्याधिकरणवृत्तित्वंसाध्यसामानाधिकरण्यपदाद्बुध्यतइतिवदंति॥वक्ष्यमाणलक्षणाभेदइति॥साध्यवैय्यधिकरण्यानधिकरणतद्रूपलक्षणार्थाभेदइत्यर्थस्तत्रापिसाध्यस्यविअधिकरणंयस्यसतासाध्यव्यधिकरणस्तत्स्वभावः साध्यवैय्यधिकरण्यमितिवियद्वैविपदस्याधिकरणंभेदश्चखंडशस्यार्थः अव्ययानामनेकार्थत्वात्पञ्चम्यंतसाध्यपदार्थान्विताधिकरणस्यभेदेतस्याश्चाधेयतानिरूपकरूपाधिकरणपदार्थेऽधिकरणपदार्थैकदेशाधेयतायांयत्पदोत्तरषष्ठ्यर्थाधेयत्वस्यान्वयेयन्निष्ठाधेयतानिरूपकंसाध्याधिकरणभिन्नमितिवियद्वाक्याद्बोधः॥समासेतुसाध्याधिकरणभिन्न

वृत्तिर्लक्षणया ऽधिकरणपदार्थः पूर्वपदे तात्पर्यग्राहके भाव प्रत्ययेन तादृशत्वं बोध्यत इति साध्या नधिकरणवृत्तित्वं साध्यवैय्यधिकरण्य पदार्थः॥पौनरुक्त्यापत्तिरिति कश्चित्पाठः॥भिन्नकर्तृकमप्येकं लक्षणं वाक्यद्वयेनोपन्यस्य तोमणिकृत इतिशेषः॥स्वानधिकरणाधिकरणार्थकत्वइति॥ असमानाधिकरणपदे नसमानमसमानमसमानमधिकरणं यस्य तदसमानाधिकरणमितिविग्रहे समानपदार्थस्याधेयतानिरूपकस्य भेदविशिष्टरूपस्य नञर्थैकदेशे भेदेन्वयः तथाचाधेयतानिरूपकभिन्नमसमानपदार्थः अधिकरणपदार्थआधेयतानिरूपकं तदेकदेशाधेयतायां षष्ठंतयत्पदार्थस्य यनिष्ठत्वस्यान्वयस्तथान्वयनिष्ठाधेयतानिरूपकाधेयतानिरूपकभिन्नमितिविग्रहात्पर्यः यद्यप्यसमानपदेनाधेयतानिरूपकसामान्यभेदोनविवक्षितुंशक्योऽप्रसिद्धत्वात्तथापिसमानपदस्याधेयताविशेषनिरूपकलक्षकत्वादधिकरणविशेषभिन्नमेवतत्पदेनविवक्षितमेनल्लाभायैवस्वानधिकरणेत्यत्रस्वपदमुपात्तं॥समासेतुस्वाधिकरणरूपाधिकरणविशेषभिन्नाधिकरणकंलक्षणयाऽधिकरणपदार्थः असमानपदंतात्पर्यग्राहकमितिस्वानधिकरणाधिकरणकमसमानाधिकरणपदार्थः॥तदधिकरणानधिकरणकत्वपरतयेति॥ असमानाधिकरणेत्यत्रनञ्व्यस्यासेनसमानानधिकरणेतिशब्दकृत्यनयासमानंनअधिकरणंयस्येतिव्युत्पत्तौयदधिकरणमधिकर

णविशेषभिन्नमितिविग्रहवाक्यार्थः समासवाक्येयदधिकरणनिष्ठभेदप्रतियोग्यधिकरणत्वं तल्लक्षणयोत्तरपदार्थः पूर्वपदंतात्पर्यग्राहकमि
तितदधिकरणानधिकरणकमसमानाधिकरणपदार्थइतिकेचित्॥असमानाधिकरणमित्यत्रनसमानाधिकरणंयस्यसाध्यस्येतिव्युत्पत्तिस्तत्र
चसमानपदार्थशैवालाद्यधिकरणेयत्पदार्थसाध्याधिकरणभेदोविधेयोनतुसमानपदार्थभेदोसाध्याधिकरणेविधेयइतिनञ्व्यस्तसंविनाप्यु
क्तार्थलाभइत्यन्ये॥परेतुनसमानमधिकरणंयस्यसाध्यस्येतिव्युत्पत्तौयत्पदार्थसाध्यस्यसमानपदार्थेऽधिकरणेऽन्वयस्तादृशाधिकरण
विशेषितनञर्थभेदस्याधिकरणपदार्थशैवालाधिकरणरूपेऽन्वयइतिस्वीकारान्नञ्व्यस्तसंविनेवदर्शितार्थलाभः संभवतीतिवदंति॥
यदधिकरणानधिकरणकंसाध्यंतत्वानधिकरणत्वस्यव्याप्तित्वेपीति॥पद्यप्ययमर्थोनसाध्यासामानाधिकरण्यानधिकरण
त्वमितिलक्षणवाक्यालभ्यतेकिंतुसाध्यमसमानाधिकरणंयस्यतत्वानधिकरणत्वमितिविग्रहवाक्यादेवतथापितस्यतादृशलक्षणवा
क्यतात्पर्यविषयत्वान्नासंगतिर्लक्षणवाक्यतात्पर्यविषयीभूतार्थस्यैवलक्षणत्वस्यान्यत्रोक्तत्वाल्लक्षणवाक्यजन्यशाब्दबोधविषयीभूत
तार्थस्तूत्तरलक्षणार्थोभिन्नइतितद्धृदयं॥ गौरवंचेति॥इदमुपलक्षणं॥असर्वज्ञदुर्ज्ञेयतापिद्रष्टव्या॥साध्यनिष्ठेति॥साध्येऽसामाना

धिकरण्यंस्वाधिकरणयत्किंचिद्यक्तिवृत्तित्वाभावोयस्यतत्साध्यासामानाधिकरण्यमितिव्युत्त्याभावप्रधाननिर्देशात्साध्यनिष्ठासामा
नाधिकरण्यलाभइतिकेचित्॥असामानाधिकरण्यप्रतियोगित्वस्यसामानाधिकरण्यएवसत्वाद्व्यभिचारिणिवन्ह्यादिहेतुकेऽति व्या
प्तिरतआहतत्प्रतियोगित्वंचेति॥ननुवह्निमान्धूमादित्यादौपर्वतसंयुक्तत्वपर्वतासंयुक्तत्वाभावाभावप्रतियोग्याधेयताक
त्वस्यपर्वतादौसत्वाद्दोषइत्याशंक्याबच्छेदकत्वंविवक्षयतिसाध्येति॥तादृशावच्छेदकत्वस्यायोगोलकवृत्तित्वत्वेपर्याप्तत्वादतिव्याप्तिः
रतोनिरुपितत्वसंबंधेनयदवच्छेदकमितिं॥समवायित्वंसमवायानुयोगित्वंस्वरूपसंबंधेनहेतुः॥साध्यतावच्छेदकसंबंधावच्छिन्न
त्वविवक्षणेपिसमवायेनवृत्त्यप्रसिध्याऽव्याप्तेर्दुर्वारत्वात्समवायेनहेतूपेक्षा॥समवेतत्वासमवेतत्वोभयाभावमादायतादृशप्रतियोगित्व
प्रसिद्धेरवच्छेदकाधिकरणाप्रसिध्युद्भावनं॥ननुसाध्यनिष्ठाभावप्रतियोग्यधिकरणकत्वमेवविवक्षणीयंप्रतियोगितायचसाध्यतावच्छेदक
संबंधावच्छिन्नाधेयतासंबंधावच्छिन्नत्वेनविशेषणीयासत्तायांसमवायावच्छिन्नाधेयतयाव्यधिकरणंसंबंधेनसामान्याभावसंभवा
न्नदोषः॥नचवन्ह्यादौसंयोगावच्छिन्नाधेयतासंबंधेनपर्वतहृदोभयाभावमादायतत्प्रतियोगितायाःपर्वतेसत्वाद्व्याप्तिरिति वाच्यं॥व्याप्त

ज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगितायाविवक्षणीयत्वादत आह ॥ वन्हिमान् धूमादित्यादाविति ॥ अयोगोलकीयेति ॥ अथम

द्यानसीयवन्व्यादौपर्वतवृत्तित्वाभावसत्वादव्याप्तिसंभवेऽयोगोलकीयवन्हिपर्यंतानुधावेनेकंबीजमितिचेद्धूमवान् वन्हेरित्यादौहृदादिवृत्तित्वा

भावमादायाप्तिव्यापकीभूतायद्यद्यक्तिवृत्तित्वाभाववत्साध्यंतत्तद्वृत्तित्वानधिकरणत्वंयदिविवक्ष्यतेतदावन्हिमान्धूमादित्यादौयावंतिहेतुमंति

तत्तद्व्यक्तिवृत्तित्वाभावकूटमपिसंभवतीतिज्ञापयितुमित्यवेहि ॥ साध्यनिष्ठाधेयत्वेति ॥ वैशिष्ट्यव्यासज्यवृत्तिधर्मातिरिक्तधर्मावच्छिन्नाधेय

ताधिकरणभेदेनभिन्नैवनतुत्वावच्छेदकधर्मैक्ये ऽधिकरणभेदेप्यभिन्नेतिमतानुसरणाद्वन्हिनिष्ठसंयोगसंबंधावच्छिन्नाधेयत्वानिरूपकाधिकरणे

गुणादौहेतुतावच्छेदकसंयोगसंबंधेनवृत्त्यप्रसिद्धावन्हिमान्धूमादित्यादावव्याप्तिरितिपूर्वपक्षानवकाशइतिध्येयं ॥ दर्शितदिशाऽधेयत्वभेदेपिय

त्किंचिदाधेयतानिरूपकत्वाभावमादायप्रसक्ताव्याप्तिशंकांसाध्यनिष्ठाधेयतात्वरूपसामान्यधर्मपुरस्कारेणसाध्यनिष्ठाधेयतायाअनिरूपकत्वंनविशेषणघटकतानुयत्किंचिदाधेयतात्वेनेतिदीधित्याशयंप्रकटयन्वारयति ॥ अनिरूपकत्वमिहेति ॥ अनिरूपकत्वंनविशेषणघटकाधेयत्व

मित्यर्थः ॥ आधेयतात्वावच्छेदेनेति ॥ साध्यनिष्ठाधेयतात्वरूपसामान्यधर्मविशेषितमित्यर्थइतिकेचित् ॥ परेतुपद्याधेयतावच्छेदकभे

देनैवाधेयत्वनिरूपकत्वयोर्भेदस्तदा **निरूपकत्वं**॥ अनिरूपकत्वप्रतियोगिनिरूपकत्वं॥ **आधेयतात्वावच्छेदेन**॥ आधेयतात्व **व्यापकं**॥ तथाच साध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नभेदोनिवेश्यइतिपर्यवसितं॥ अत्रव्याप्यत्वंस्वाश्रयाश्रयत्वसंबंधेनव्यापकत्वंतु स्व निरूपिताधेयतात्वसंबंधेनग्राह्यंतेनाधेयतात्वनिरूपकत्वयोर्वैय्यधिकरण्येपिनक्षतिः॥ **नचधूमवान्**वन्ह्यधिकरणत्वादित्यादौद्रव्यत्वावच्छि न्नाधेयतानिरूपकत्वसाध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नभेदस्यगुणादावेवसत्वादतिव्याप्तिरिति **वाच्यं**॥ तादृशाधेयतात्वव्याप्यत्वस्य यन्निरूपकत्वविशेषणत्वात्तादृशाधेयतात्वव्याप्यत्वंचसाध्यानुयोगिकत्वविशिष्टस्वाश्रयाश्रयत्वसंबंधावच्छिन्नप्रतियोगिताकतादृशाधेयतात्वाभाव वत्त्वंस्वनिरूपितवृत्तित्वसंबंधेनावृत्तित्वं॥ **यदिचावच्छेदके**त्येवाधिकरणभेदेनैवाधेयताभेदस्तदासाध्यनिष्ठाधेयतानिरूपकंयद्यत्तद्भेदकूटमे वनिवेश्यंसाध्यनिष्ठेत्यादिग्रंथस्याप्यत्रैवतात्पर्यमितिवदंति॥ अव्याप्यवृत्त्यधिकरणतायाअव्याप्यवृत्तित्वमनेन व्याप्यवृत्तिव्यभिचारिण्यतिव्याप्तिरभावेप्रतियोगिवैय धिकरण्यादित्यवधेयंगौरवमित्यालोच्याह॥ **अथवेति**॥ अप्रसिद्धेरनोहेत्वधिकरणताभावस्येति॥ एतेनद्र व्यनियामकेनव्यधिकरणेनवासंबंधेनहेतुतात्पर्येऽव्याप्तिर्वारणमधिकरणत्वनिवेशनप्रयोजनमितिवर्णयंतोजगदीशाःप

रात्ता: ॥ यस्यलीयाव्याप्तिवारणायव्यापकताघटितपरिष्कारारंभस्तत्रैवसत्ताबान्द्रव्यत्वादित्यादावधिकरणत्वनिवेशप्रयोजनसंभवेनदुपेक्षायानि
र्बीजत्वादिति **ध्येयं**॥ **पूर्वनिपातितस्यैवनञ्** इति अत्रयद्यप्यंताभावार्थकेननञ्उत्तरपदार्थाभावेविद्यमानंयदव्ययंतत्समस्यतइत्यर्थकेन अव्ययं
विभक्तीत्यादिसूत्रेणसिद्धोव्ययीभाव: **यदिवा** सुबंतेननञ्समस्यतेइत्यर्थकेननञितिसूत्रेणसिद्धत्पुरुषोवाश्रियतेउभयथापिनञएवपूर्वनिपातस्तस्यै
वाव्ययमितिनञितिचप्रथमांतपदप्रतिपाद्यत्वेनसमासशास्त्रेप्रथमांतशब्दप्रतिपाद्यमुपसर्जनसंज्ञंस्यादित्यर्थकेनप्रथमानिर्दिष्टंसमासउपसर्जनमितिसू
त्रेणोपसर्जनसंज्ञत्वादुपसर्जनंपूर्वमितिपाणिनिनाऽभिधानादिति **भाव:**॥ **प्रत्ययानुपपत्तेरिति**॥ तथाचागत्यादृषोदरादिगणपाठकल्पनयाऋषो
दरादीनियथोपदिष्टमित्यनेनैवनिरुक्तप्रयोगाणांसाधुत्वमुपपादनीयमिति **भाव:**॥ **केचित्तु** घटानधिकरणत्वमित्यादावधिकरणपदमेवघटाधिकरण
लाक्षणिकंघटपदंतुतात्पर्यग्राहकमाकांक्षानिर्वाहकं॥ आगमविकरणशब्दादिवत्॥ एवंसतिनप्राथमिकसमासासंभवःअसमानाधिकरणपदत्वयदधिकर
णानधिकरणत्वरूपार्थस्यदीधित्युक्तस्यनसमानमसमानमित्याद्यधिकरणविशेषार्थकसमानपदस्यनञाप्राथमिकसमासमभ्युपैववक्तव्यत्वाच्च॥ **नच** घटपद
मेवघटाधिकरणलाक्षणिकमधिकरणपदंतात्पर्यग्राहकमितिकुतोनस्यादिति **वाच्यं**॥ नञ:उत्तरपदार्थभेदबोधकत्वव्युत्पत्तिभंगापत्तेरितिनअधिकरणमन

धिकरणमितिदर्शितव्युत्पत्तेरेवविवक्षितार्थलाभसंभवेनत्रोमध्यनिवेशोऽप्रामाणिकएवेतिवदंति॥साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपेति॥इदमुपलक्षणंसाध्यनि[illegible]ताधिकरण्यप्रतियोगित्वरूपस्याप्यर्थस्यलाभःसंभवतितथाहिसाध्येऽधिकरणानधिकरणत्वंयदधिकरणवृत्तित्वाभावोयस्यतत्साध्याधिकरणानधिकरणत्वभावप्रधानन्यायत्वलाभस्तद्भावश्चसाध्यपदोत्तरनत्राबोध्यतइतिसाध्यनिष्ठासामानाधिकरण्यसंबंधित्वाभावलाभःसंबंधश्चप्रतियोगित्वमेवेति॥परेतुसाध्यनिष्ठाधेयत्वानिरूपकत्वस्यसाध्यवद्भिन्नत्वस्यवाव्यापकीभूतोयोऽभावस्तत्प्रतियोग्यधिकरणतासामान्यकत्वरूपोऽर्थःसाध्यानधिकरणानधिकरणत्वशब्दात्प्रतिपादयितुंशक्यतेतथाहिसाध्यानधिकरणमनधिकरणंयस्येतिव्युत्पत्तिस्तत्रसाध्यानधिकरणमित्यस्यसाध्यनिष्ठाधेयत्वानिरूपकंसाध्यवद्भिन्नंवार्थःअनधिकरणंयस्येत्यत्राधिकरणपदंमन्यपदार्थहेत्वधिकरणलाक्षणिकंयस्येतितात्पर्याद्दकं॥अथवाऽधिकरणपदमाधेयताविशेषनिरूपकरूपाधिकरणेलाक्षणिकंतदेकदेशाधेयताविशेषेयस्येतिषष्ठ्यंतार्थहेतुनिष्ठतस्यान्वयोभावप्रधाननिर्देशाच्चानधिकरणमित्यनेनहेत्वधिकरणत्वाभावलाभइत्थंचोद्देश्यतावच्छेदकव्यापकत्वमसतिबाधकेविधेयेभा

सत इति व्युत्पत्तिबलाद्धेत्वधिकरणत्वाभावरूपे विधेये साध्यानधिकरणत्वरूपो हेत्वयतावच्छेदकधर्मः प्रतीयत इति वदंति॥ यथा संभवमिति नानाव्यक्तिसाध्यकहेतुत्वसामानाधिकरण्येनेत्यर्थः॥ अवच्छेदकावच्छेदेनान्वये बाधकमाह॥ तनेति॥ यद्यपि शब्दवान्गगनत्वादित्यादावपि नाव्याप्तिस्तथापि येविवक्षणीयमिथोव्यधिकरणहेत्वृत्तिसाध्यतावच्छेदककरूपाव्यक्तिसाध्यकत्वशरीरनिविष्टमिथःपदत्रयोजनंनतत्रेतितत्त्यागः॥ वक्ष्यमाणरीत्या॥ एकसाध्यव्यक्तिनिष्ठाधेयत्वेत्यादिरीत्या॥ अतएवाधेयाधिकरणसाध्यकेसर्वत्रेतिवक्ष्यतीति॥ अत्रसर्वत्रेत्यस्यानुक्तौपूर्वोक्तसामानाधिकरण्येनान्वयभ्रमःस्यादित्याशयइतिकेचित्॥ अत्रसर्वत्रेतिवक्ष्यतीत्यर्थस्तथाचाधेयावच्छेदकावच्छेदेनाधेयविवक्षितत्वेऽत्रापिसर्वत्रेतिपठेदित्यपरे॥ मिथोव्यधिकरणहेत्वृत्तिसाध्यतावच्छेदककइति॥ यद्यपिमिथोव्यधिकरणंपरस्परानधिकरणवृत्तित्वंभूतत्वाभावभूर्तत्वाभावान्यतरवान्गुणत्वादित्यादेरप्युद्देश्यतावच्छेदकाक्रांततथातत्राव्याप्तिरूपविधेयाभावेनबाधापत्तेः॥ नापिपरस्परानधिकरणाहेत्वृत्तित्वंतत्रैकमनस्त्वहेतोरसंभवादेः॥ एतेनपरस्परानधिकरणहेत्वधिकर

णवृत्तित्वमपिनिरस्तं॥ तथापियत्किंचित्साध्यानधिकरणहेत्वधिकरणवृत्तिरतिव्याप्तिदोषः॥अधिकरणानिरूपकता-
च्छेदकस्यैवेति॥अत्रजगदीशमथुरानाथौविशिष्टसत्तागुणवृत्तिरितिधीःप्रमैवविशिष्टसत्तावान्गुणइतिधीरप्रमेवेतिस्वानु
भवानुसारेणकल्पयंतीविशिष्टसत्तात्वंगुणनिष्ठाधिकरणतानिरूपकतानवच्छेदकमपिगुणनिरूपिताधेयतावच्छेदकंभवत्ये
वेतिमन्येनेगदाधरास्त्वविशेषणदर्शितधीद्वयस्याभ्रमात्वंमन्यंतेविशिष्टसत्तात्वस्यगुणनिरूपिताधेयतावच्छेदकत्वंनक्षमं
नइतिध्येयं॥ नानाव्यक्तिकेतिवोक्तमिति॥अन्येवमप्यत्रसर्वत्रेतिपदंकिमर्थं॥ उच्यते॥अपिनिर्वाहादथसर्वत्र
त्वनुक्तोद्वितीयस्यैवैकल्पिकस्यार्थस्यैकाभिन्नएवनानाधिकरणसाध्यकोव्याप्तिरितिभ्रमःस्यादतःसर्वत्रेतिपदेन
तत्सूचनार्थं॥ एवंसतिकेवलान्वयिनिव्यतिरेकिणिचेतिभवानंदादीनांव्याख्यानमितिचेन्न॥एवंसतिनानाव्यक्तिकइतिपूर्वग्रंथे
पिसर्वत्रेतिवक्तव्यंस्यादन्यथाप्रथमलक्षणीयद्वितीयवैकल्पिकार्थस्याव्याप्तेस्तत्रसत्वेनतदकथनंस्यात्॥मैवंनाना
व्यक्तिसाध्यकेचेतिचकारेणकेवलान्वयिनोपिसमुच्चयात्सर्वत्रेतितत्रानुक्तावपिन्यूनताविरहात्॥नन्वत्रापिसर्वत्रेतिस्थानेचका

रूपत्वाकेवलान्वयिसाध्यकसमुच्चयः,तोनकृतः वैरूप्यस्यान्याप्यत्वादितेशंकरमुपायस्योपायांतराद्रूपकत्वात्॥अथनानाव्यक्ति
केत्यस्यस्थानेनानाधिकरणकेतिकुतोनोक्तइत्यंदथचीत्वादित्यादौलक्षणस्याव्याप्तेर्विरहेपियथासंभवमव्याप्तौतात्पर्यस्यव
लुंशक्यत्वादितिचेन्न॥पूर्वलक्षणेसाध्याधिकरण्यादाद्यदाप्तेः॥नैवयोक्तं किंतुसाध्यनानात्वमित्याशयेनदृष्टंनानाव्यक्तिसा
ध्यंहेतुस्तदपिएतद्वृत्तियावद्धर्मसाध्यकेव्यभिचारेणयथाऽतंनप्रयोजकमितिमिथोइत्यादिरीत्याभावेकंतदनुसृतमि
तिध्येयं॥नहेतुनिवेशः॥यत्किंचित्सदार्थवदित्युक्तोतृणादिमत्त्वान्यथाख्यातेरेकसामानाधिकरण्याभावस्यधूमादावक्षत
त्वात्तद्दोषतादवस्थ्यमतोहेतुनिवेशः॥धूमेपनेदधिकरणंकृत्वामेतिप्रतीतेरधिकरणभेदेनकृशधूमनिष्ठातिरिक्ताधिकरण
तायामेवपर्वतावच्छिन्नत्वभानमुपगम्यवारणसंभवात्तावच्छिन्नत्वविशिष्टतादृशाभावनिरूपितविलक्षणाधिकरणतास्वीका
रोव्यर्थइत्यभिप्रायेणाह॥अभावाधिकरणतायामेवेति॥यद्यपिपूर्वकल्पेविशिष्टाधिकरणतानिवेशोव्यर्थःसर्वभौमन
तिविशिष्टातिरिक्तत्वाद्धेत्वधिकरणावच्छिन्नविशिष्टानधिकरणत्वनिवेशादेवाव्याप्तेवारणसंभवात्तथापिमतद्वयसाधारण्ये

ननन्निवेशो बोध्यः॥ **परस्परेति**॥ यथारूपनिष्ठायांतदधिकरणतायांस्वावयवोनावच्छेदकस्तथाधूमनिष्ठतदधिकरणतायांपर्वतोनावच्छेदक इत्यर्थः॥ **कालेपाधितयेति**॥ कालत्वेनेत्यर्थः॥ **एतेनपर्वतस्यतादृशानावावच्छेदकत्व इदानीमित्यादिप्रतीतिरेवनियामिकेति**॥ दृपर्वत[illegible]त्यादिप्रतीतिरितिसूचितं॥ **वैलक्षण्यमिति**॥ अखंडोपाधिरूपमितिशेषः॥ [illegible]वैलक्षण्यमाशंक्यनिराकुरुते॥ **नचेति**॥ **व्यभिचारिणीति**॥ महाकालभिन्नोघटत्वादित्यादावित्यर्थः॥ **नच**महाकालावच्छेदेनमहाकालान्यवृत्तित्वाभावस्यमहाकालवृत्तिसंयोगसंबंधावच्छिन्नतादृशाधिकरणत्वाप्रसिद्ध्यैवनातिव्याप्तिरितिशंक्यं॥ महाकालपरिमाणनिष्ठतादृशाधिकरणतायांमहाकालस्यकालिकसंबंधेनवृत्तित्वेनाप्यवच्छेदकत्वसंभवात्समवायावच्छिन्नाधिकरणतायांकालिकसंबंधावच्छिन्नत्वप्रसिद्धेर्लाघवाच्च॥ **कालिकव्याप्यवृत्ती[illegible]र्पीति**॥ आकाशत्वइदानीमात्मत्वसामानाधिकरण्यंननदानीमितिप्रत्ययाभावादितिभावः॥ **यद्यपिव्याप्यवृत्तावित्यस्यसामानाधिकरण्यइतिक्लीबविशेषणत्वात्क्लीबत्वमपेक्षितमितिव्याप्यवृत्तिनीत्येववक्तुमुचितं**तथापिव्याप्यवृत्तिपदेव्याप्यानिरवच्छिन्नावृत्तिर्यस्येतिविग्रहात्तृतीयादिषुभाषितपुंस्कंपुंवद्भा

लवस्येति सूत्रेण तृतीयादिविभक्तेः परतः पुरुषसाधारणप्रवृत्तिनिमित्तकशब्दस्य पुंवद्भावविधानात् सङ्ख्ये व्याप्यवृत्तिशब्दप्रवृत्ति निमित्तस्य निरवच्छिन्नवृत्तित्वस्य पुरुषसाधारण्यान्नपुंवद्भावानुपपत्तिरिति ध्येयं॥ दैशिकसंबंधेनात्मत्वानधिकरणेति॥ एतेन कालिकसंबंधातिरिक्तसंबंधेन तस्यावच्छेदकताभावः सूचितः॥ [illegible]पत्तिरिति॥ तत्कालावच्छिन्नत्वस्य तदन्यकालावच्छेदेन तद्वृत्त्यभावप्रतियोगित्व[illegible]द्वृत्त्यभावप्रतियोगित्वापत्तेरित्यर्थ इति केचित्॥ वस्तुतस्तु काशत्वमिहात्मत्वसमानाधिकरणमितिप्रतीतिविरोधात्काशानभिधेयत्वात्मात्मत्वसमानाधिकरणमिहनेतिप्रतीतिरप्यनुभवसिद्धा तत्र प्रथमप्रतीतौ कालिकसंबंधावच्छिन्नत्वरूपं कालविधयावच्छेदकत्वं यदभासते तदानीमितिप्रतीत्यापत्तेरिति भावः॥ धूमाद्यंतरसंयुक्तेति॥ यद्यपि सावयवसंयुक्तधूमादौ नादृशाभावानधिकरणत्वसंभवात् हेतुपदस्य तद्धेतुपरत्वं युक्तं तथापि धूमवान्वह्नेरित्यादौ पर्वतीयवह्नौ तादृशाभावानधिकरणत्वाभावान्नव्याप्तेर्वारणाय हेतुतावच्छेदकावच्छेदकाधिकरणत्वविवक्षणावश्यकतया युक्तं तद्धेतुपरत्वं हेतुपदस्य॥ ननु हेतुपदस्य तद्धेतुपरत्वे व्याप्तस्तत्तद्व्यक्तिरूपता

पत्यानकस्यापितद्व्यक्तित्वस्याननिप्रसक्तंधूमत्वमितिधूमत्वस्यव्याप्यतावच्छेदकतंनस्यान्नेष्टापत्तेर्धूमत्वावच्छिन्नहेतुका
नुमित्यलाभापत्तेर्धूमादित्यादिन्यायप्रयोगासांगत्यापत्तेश्चेत्तत आह॥ एवंचेतिकेनाप्यनुमेयेति॥ अन्यतमत्वादिनेत्यर्थः॥ धू
मत्वादिकमवच्छेदकमिति॥ तावत्तत्तद्व्यक्तित्वस्यावच्छिन्नाननिप्रसक्तस्यधूमत्वादेर्व्याप्यतावच्छेदकतंनिराबाधंतावद्यो
गीनांस्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबंधेनभेदविशिष्टस्यतुतत्तद्व्यक्तित्वरूपस्यान्यप्रत्यासत्याज्ञा
तुंशक्यत्वान्नदुर्ज्ञेयतापीतिभावः॥ अथैवमपिसत्तावान्समवायेनप्रमेयादितिप्रयोगानुपपत्तिरसमवेतस्यनिरुक्तव्याप्य
घटकत्वेनप्रमेयत्वस्यसमवेतप्रमेयनिष्ठतत्तद्व्यक्तित्वान्यतमत्वावच्छिन्नाननिप्रसक्तत्वविरहादितिचेन्न॥ तादृशा
न्यतमत्वावच्छिन्नाननिप्रसक्तत्वेतत्तद्व्यक्तित्वसंबंधहेतुतावच्छेदकसंबंधप्रतियोगिनियद्धर्मविशिष्टवर्तमानाभावप्रतियोगित्वा
यामनवच्छेदकंनत्वस्यविवक्षितत्वात्॥ अनुगतव्याप्तिंवदतांमतमाह॥ यत्तिति॥ हेतुतावच्छेदकसंबंधेनस्वानुयोगिनोयदधि
करणमिति॥ स्वपदमधिकरणतासामान्यपरंतथाचहेतुतावच्छेदकसंबंधेनस्वानुयोगिनोयदधिकरणंतदनवच्छिन्नायायास्वात्मिकाधिकरणतातत्तद्

न्यसाध्यसामान्याधिकरण्याभावाधिकरणतावच्छिन्नत्वमित्यर्थलाभेन धूमवान्वह्नेरित्यादौ तत्तद्घटादिनिष्ठाधिकरणताश्रयानुयो- ग्यं
न्यनवच्छिन्नाधिकरणतासामान्यभेदस्यस्वीकारेऽपि नातिव्याप्तिः॥ अथोसत्तिकालधूमेनवह्निमत्संयुक्तत्वमितिप्रतीतिसि
द्धाभावाधिकरणतानादायधूमादावव्याप्तिवारणायस्वानुयोग्यधिकरणानवच्छिन्नत्वमितिस्वानुयोग्यधिकरणनिष्ठावच्छेद
कतायांहेतुतावच्छेदकसंबंधावच्छिन्नप्रत्ययनिवेश्यतानिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकाप्रत्यया अधिक
रणतानदन्यायासाध्यसामानाधिकरण्याभावाधिकरणतानद्वितीयक्षणलक्षणमस्तुहेतुतावच्छेदकसंबंधेनस्वानुयोग्य-
धिकरणांशस्यवक्तव्यत्वमितिचेन्न॥ तथासतिहेतुतावच्छेदकसंबंधावच्छिन्नातीतानागतदेशकालांतरीयावच्छेद
कतानामपिलक्षणेनिवेशापत्तेर्गौरवात्॥ किंचवह्निमान्द्रव्यत्वादित्यादावव्याप्तिस्तत्रासमवेतत्वस्याधिकरणतायाहेतुतावच्छे
कसंबंधावच्छिन्नावच्छेदकताकान्यत्वात्समवेतेचसाध्यसामानाधिकरण्याभावाधिकरणतायाअसत्वेनहेतुतावच्छेदकसंबंधा
वच्छिन्नावच्छेदकतान्याधिकरणतान्यत्वाच्चाधिकरणतायाअप्रसिद्धेः॥ न॥ संत्तिक्षणविशिष्टद्वयेगुणसमवा १७२

वेतत्वमितिप्रतीत्योत्पत्तिक्षणविशिष्टद्रव्यावच्छेदेनसत्तावत्समवेतत्वाभावाधिकरणतायागुणादौप्रसिद्धात्स्याएवहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकतांकान्याधिकरणतान्यसाध्यसामानाधिकरण्याभावाधिकरणतात्वात्तद्भिन्नत्वस्यहेतोसत्ताद्रुक्षणसमन्वयःसंभवतीतिवाच्यं॥स्वानुयोग्यधिकरणांशनिवेशेयुक्तक्षणविशिष्टपर्वतेधूमेनवह्निमत्संयुक्तत्वमितिप्रतीतिसिद्धसाध्यसामानाधिकरण्याभावाधिकरणतामादायाव्याप्तेर्वारणायतादृशप्रतीतेरुत्पत्तिक्षणविशिष्टपर्वतावच्छेद्यत्वाभावविषयकत्वसंवोपगमात्तत्समशीलोत्पत्तिक्षणविशिष्टद्रव्येत्याद्याकारकदर्शितप्रतीतेरप्युत्पत्तिक्षणविशिष्टद्रव्यावच्छेद्यत्वाभावविषयकतयातादृशाधिकरणतान्यसाध्यसामानाधिकरण्याभावाधिकरणतायाःसत्तावान्द्रव्यत्वादित्यादावप्रसिद्धेरितिहेतुतावच्छेदकसंबंधेनस्वानुयोग्यधिकरणांशनिवेशः॥तत्रेवंस्वानुयोगित्वविशेष्यतयाहेतुतावच्छेदकावच्छिन्नस्यनिवेशायहेतुपदंहेतुतावच्छेदकावच्छिन्नपरमित्युक्तमन्यथाद्रव्यंविशिष्टसत्वादित्यादावव्याप्त्यापत्तेःसत्तानिष्ठद्रव्यत्वसामानाधिकरण्याभावाधिकरणतायाःस्वानुयोग्यधिकरणगुणाद्यनवच्छेद्यत्वविरहेणस्वपदेनोपादानासंभवात्॥उक्तदोषस्येति॥उत्पत्तिकालेधूमेनवह्निमत्संयुक्तत्वमितिप्रतीतिसिद्धधूमनिष्ठसाध्यसामानाधि-

करण्याभावाधि[illegible]रणतादाया[illegible]तेरित्यर्थः॥हेतुतावच्छेदकसंबंधावच्छिन्नत्वनिवेशेनापीति॥अपिनाविलक्षणदेशविधयाऽव
च्छेदकत्वनिवेशेनाप्युक्तदोषपरिहारः कर्तव्य मितिसूचितं॥अत्रेदं बोध्यं॥साध्यसामान्याधिकरणनिष्ठावच्छेदकतायां हेतुतावच्छेदक
संबंधावच्छिन्नत्वनिवेशेहेतुतावच्छेदकसंबंधेनस्वानुयोग्यधिकरणत्वनिवेशोव्यर्थः॥स्वतन्त्रावच्छिन्नायाःसाध्यसामानाधिकर
ण्याभावाधिकरणतायाहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकतायाएवहेतुयोग्याधिकरणनिष्ठत्वेनतादृशां
स्वतन्त्रत्ववैरहेणतामादायदोषाभावात्॥नचैवंरूपनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायाअपिस्वानुयोग्य
धिकरणनिष्ठहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकान्यत्वेनादायस्वतन्त्रसाध्यसामानाधिकरण्याभावाधिक
रणतायाअप्रसिद्धिरितिवाच्यं॥साध्यशून्ये हेतुतावच्छेदकसंबंधेनयोवृत्तिमान्तन्निष्ठसाध्यसामानाधिकरण्याभावाधिकरणता
याःस्वानुयोग्यधिकरणनिष्ठहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकत्वेनस्वपदेनोपादानासंभवात्तस्याःस्वतन्त्रसाध्यसामानाधिकरण्याभावाधिकरणतात्वेनोपादानसंभवात्॥यत्तुस्वानुयोगिनोयदधिकरणमित्य

त्रयद्यदधिकरणमितिवक्तव्यमन्यथाद्रव्यंसत्तादित्यादौसत्तानिष्ठद्रव्यत्वसामानाधिकरण्याभावाधिकरणतायाःस्वानुयोग्यधिकरणं
यद्द्रव्यंतदनवच्छिन्नत्वेनतदन्यत्वाभावादतिव्याप्तेस्तथाचहेतुतावच्छेदकसंबंधेनस्वानुयोग्यधिकरणत्वानिवेशोवह्निमान्धूमादि
त्वादौकालिकसंबंधेनस्वानुयोग्यधिकरणध्वंसादिनिष्ठहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकतायाअप्रसिद्धेर्धूमावयवावच्छिन्नसाध्यसामानाधिकरण्याभावाधिकरणतायाःस्वपदेनोपादानासंभवेनतादृशंयत्वंतदन्यत्वेनाव्याप्तिप्रसंगइतितन्निवेशइतिचेन्न॥स्वानुयोग्यधिकरणतावन्निष्ठहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकत्वसामान्याभावरूपस्वानुयोग्यधिकरणानवच्छिन्नत्वनिवेशेनद्रव्यंसत्तादित्यादावतिव्याप्तिवारणाद्यद्यदितिनिवेशानावश्यकत्वात्॥यद्यपिहेतुतावच्छेदकसंबंधेनेतितृतीयांतंस्वानुयोग्यधिकरणंशेनान्वेतिकिंतुस्वानुयोग्यधिकरणानवच्छिन्नेत्यत्रावच्छेदकतायामेवेतिनतृतीयार्थमितितदपिन॥तथासतिरूपादिनिष्ठनिरुक्ताधिकरणतायांधूमादिप्रसिद्धनिरुक्ताधिकरणतानाभेदस्याक्षततयातद्द्रव्यत्वेनधूमादौलक्षणसमन्वयादितिग्रंथविरोधादिति॥साध्यवत्त्वंचोपलक्षणविधयेति॥तथाचयदुपलक्षितनिरूपितसमवा

यादेरवच्छेदकतावटकसंबंधत्वंतस्योपलक्षणतयाऽवच्छेदकत्वमितिसिद्धांतलक्षणेवक्ष्यमाणरीत्यासाध्यस्योपलक्षणतयाऽवच्छेदकत्वविवक्षायांसाध्योपलक्षितेत्यधिकरणप्रतियोगिकनिरूपितत्वसंबंधावच्छिन्नसाध्याधिकरणनिष्ठावच्छेदकताकवृत्तित्वतावच्छिन्नप्रतियोगिताकाभावोसाध्यसामानाधिकरण्याभावपदेनविवक्षणीयः॥ यद्वास्वावच्छिन्ननिरूपकताकत्वसंबंधावच्छिन्नसाध्यनिष्ठावच्छेदकत्वानिरूपितवृत्तित्वनिष्ठप्रतियोगिताकाभावोतत्पदेनविवक्षणीयःसाध्यविशिष्टाधिकरणवृत्तित्वाभावप्रतीतौचसाध्यस्याधिकरणांशेभासमानस्यधर्मिधारतंत्र्येणवृत्तित्वरूपप्रतियोग्यंशेभाननियमात्तादृशप्रतीतिविषयाभावस्यानर्थत्वान्ननमहायोत्पत्तिकालीनघटोगंधवान्पृथिवीत्वादित्यादावव्याप्तिः॥ननुगंधानधिकरणोत्पत्तिकालविशिष्टपृथिव्यांपृथिवीत्वेनगंधवत्समवेतत्वमितिप्रतीतिर्यथोत्पत्तिकालविशिष्टपृथिव्यवच्छेदेनपृथिवीत्वेगंधविशिष्टनिरूपितसमवेतत्वमवगाहतेतथाधूमनिष्ठपर्वतवृत्तितानवच्छेदकनितंबधूमासमानकालादिविशिष्टपर्वतधूमेनवह्निमत्संयुक्तत्वमितिप्रतीतिरपितादृशविशिष्टपर्वतावच्छेदेनवह्निमत्संयुक्तत्वाभावमवगाहतइतितद्विषयाभावमादायाव्याप्तिः॥यदिचविशेष्यस्यपर्वता

दः प्रतियोग्यवच्छेदकतया विशिष्टस्यतस्यनाभावावच्छेदकत्वमितितादृशाभावोधूमादावसिद्ध इत्युच्यतेतदाशुद्धपृथिव्याअपिप्रति
योग्यवच्छेदकतया विशिष्टपृथिव्या अभावावच्छेदकत्वासंभवेननादृशाभावोपिपृथिवीत्वादावसिद्ध इत्यधिकरणांशेसाध्यस्योप
लक्षणतयाऽवच्छेदकत्वनिवेशोनिरर्थक इत्यभिप्रायेणशंकते॥ नचैवंधूमादाविति॥ एवंविशेष्यस्यप्रतियोग्यवच्छेदकत्वेपिकिं
चिद्रूपेणाभावावच्छेदकत्वे॥ अनवच्छेदकत्वादिति॥ अवच्छेदकघटकीभूतविशेषणविशेष्ययोरवच्छेदकतयाभानेतयोरवच्छे
द्याधिकरणाधिकरणत्वंनियामकमन्यथाह्रदविशिष्टपर्वतेधूमेनवह्निमत्संयुक्तत्वमितिप्रतीत्यापत्तेरेवंचधूमवृत्तितानवच्छेदकदे
शकालयोरवच्छेद्याधिकरणधूमानधिकरणत्वाद्धूमादौतादृशाभावासिद्धिर्नतमादायाव्याप्तिरुत्पत्तिक्षणपृथिव्योःपृथिवीत्वस्यनि
त्यतयाऽवच्छेद्याधिकरणतदधिकरणत्वसंभवेनोत्पत्तिक्षणविशिष्टपृथिव्यांपृथिवीत्वेनगंधविशिष्टसमवेतत्वमितिप्रतीतिसंभवा
दधिकरणांशेसाध्यस्योपलक्षणतयाऽवच्छेदकत्वविवक्षणंसार्थकमितिभावः॥ नचैवमिति॥ एवंविशिष्टस्यावच्छेदकत्वेविशेषण
विशेष्ययोरुभयोरेवावच्छेद्याधिकरणाधिकरणत्वस्यनियामकत्व इत्यर्थः॥ इत्यादिरप्यर्थ इति॥ आदिपदेननादृशप्रतीतेरवच्छेद्यत्वाभावा

वगाहित्वमपि नवनीतसूचितं॥ हेत्वधिकरणमात्रावच्छिन्नेति॥अथ हेत्वधिकरणमात्रावच्छिन्नत्वस्य हेत्वधिकरणा- गदाधरी
न्यानवच्छिन्नत्वसहितहेत्वधिकरणावच्छिन्नत्वरूपत्वे केवलान्वयिनीदंवाच्यंज्ञेयत्वादित्यादावव्याप्तिर्हेत्वधिकरणान्याप्रसिद्धेः॥अ
तएवहेत्वधिकरणनिष्ठावच्छेदकतान्नावच्छेदकत्वानिरूपकत्वसहितहेत्वधिकरणनिष्ठावच्छेदकतानिरूपकत्वंतदित्यपिनसर्वस्याअव्य
वच्छेदकतायाहेत्वधिकरणनिष्ठत्वान्नदन्यावच्छेदकतायास्तत्राप्रसिद्धत्वात्॥ननुहेत्वधिकरणनिष्ठदेशविधयाऽवच्छेदकतान्यावच्छे
दकत्वानिरूपकत्वादिकमेवतदितिनोक्तस्थलेऽव्याप्तिरितिवाच्यं॥एवंसतितथासतीत्यादिनावक्ष्यमाणातिव्याप्त्यसंभवोगोरूपनिष्ठाधिक
रणतायामप्ययोगोलकरूपेनधूमवत्संयुक्तत्वमिदानींरूपेनधूमवत्संयुक्तत्वमितिप्रतीतिभ्रमसंभवोगोलकात्पत्तिकालावच्छिन्नता
वगाहनात्तादृशाधिकरणतायाअप्रसिद्धेः॥एतेनत्वावच्छेदकतान्यापकहेत्वधिकरणताकत्वमेवतदितिनिरस्तं॥यदिचगगनादिनिष्ठा
धिकरणतेवतादृशीत्युच्यतेतदावह्निमान्धूमादित्यादावपितस्याएवप्रसिद्धत्वात्तत्रैवसंबंधांतरेणवर्तमानइतिग्रंथविरोधइतिचेन्न
॥तादृशग्रंथस्ययथाश्रुताभिप्रायकत्वात्॥वस्तुतस्तु॥हेत्वधिकरणनिष्ठदेशविधयाऽवच्छेदकतान्यहेतुतावच्छेदकसंबंधावच्छि १५५

न स्वानुयोगिनिरूपिताधिकरणतानवच्छेदकनिष्ठावच्छेदकताकंयद्यत्वंतत्तद्भिन्नसाध्यसामानाधिकरण्याभावाधिकरणतावद्भिन्नत्वमितिनिष्कर्षोविवक्षितइत्यंचरूपनिष्ठाधिकरणतायाःस्वानुयोगिनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणत्वाधसिद्ध्यास्वपदेनोपादानायोगेनसंबंधांतरणेतिग्रंथसंगतिर्धूनवत्यादिनिष्ठाधिकरणतायाहेतुतावच्छेदकसंयोगसंबंधावच्छिन्नस्वानुयोगिनिरूपिताधिकरणनानवच्छेदकोत्पत्तिकालस्वावयवादिनिष्ठावच्छेदकतानिरूपकतयास्वपदेनोपादानसंभवाल्लाघव्याप्तिर्वक्ष्यमाणातिव्याप्त्यभावोवेतिध्येयं॥अवच्छेदकांतरानवच्छिन्नेति॥किंचिन्निष्ठावच्छेदकत्वानिरूपितहेत्वधिकरणनिष्ठावच्छेदकताकेत्यर्थः॥अत्राङ्कुरित्वस्वरसस्तद्बीजंतुरूपनिष्ठवह्निमत्संयुक्तत्वाभावाधिकरणतावच्छेदकतायांपर्वतनिष्ठायामपिपर्वतत्वस्यावच्छेदकतयाऽवच्छेदकांतरानवच्छिन्नहेत्वधिकरणनिष्ठावच्छेदकत्वाप्रसिद्ध्याऽसंभवः॥अवच्छेदकांतरनिष्ठविलक्षणावच्छेदकतानिवेशेपितत्तद्वांतरकालावच्छिन्नपर्वतादेस्तत्तत्क्षणत्वकल्पनापक्षयातत्तद्वांतरकालस्यक्षणत्वसंभवेनोत्पत्तिक्षणनिष्ठावच्छेदकतायामप्यवच्छेदकांतरानवच्छिन्नत्वाक्षतेरव्याप्तिर्वेति॥यद्वितिति॥अयोगोलकइतितृणा

दिनिष्ठाधिकरणतायामुभयाभावसत्तादितिव्याप्तेःसामान्यपदं॥ पृथिवीरूपादित्यादावितिं॥ यद्यपि धूमवान्वह्नेरित्यादावप्ययोगोलकीयवह्निनिष्ठताद्दशाधिकरणतायाव्याप्यवृत्तितयाऽतिव्याप्तिसंभवस्तथापि धूमाधिकरणतदनधिकरणसाधारणैकवह्निसंभवमभिप्रेत्यैतावदनुधावनं॥ ननुशुद्धसत्तायांनत्तद्व्यक्तिवृत्तित्वासत्वेपिव्यासज्यवृत्तिधर्मवत्त्वीकारसंभवाद्गगनादिवद्व्यवृत्तित्वेप्येकत्वसंभवादतआहेवमितिं॥ नकेवलमनुगतधर्ममात्रोच्छेदःकिंतन्यदपीत्याहेवमितिकेचित्तु॥ ननुविशिष्टसत्तानिष्ठतद्व्यक्तित्वानुपस्थितिदशायांनानुमितिरनुभवसिद्धेयतआहेवमितिं॥ द्रव्यवृत्तित्वाभाववद्वृत्तेरेवेतिं॥ तद्बोधकसमानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारसत्तादितिभावः॥ अतींद्रियसाध्यकेतिदीधितावतींद्रियसाध्यकमेकमपरंचातींद्रियहेतुकमितिव्यभिचारिद्वयंप्रतीयतइत्याशयेनाहं॥ इदंगुरुत्वेतिं॥ ननुगुरुत्वविशिष्टवृत्तित्वाभावस्यातींद्रियतादवावृत्तित्वप्रतियोगिकतयाऽतींद्रियत्वेपिगुरुत्वोपलक्षितवृत्तित्वाभावस्यजलपृथिव्यन्यतरवृत्तित्वाभावात्मकस्यनतथात्वंलक्षणेसाध्योपलक्षिताधिकरणवृत्तित्वाभावस्येवनिविष्टत्वादतआहाथवेतिं॥ केचिदितिविशेषरूपेणसंसर्गतास्वीकारेअस्वरसः॥ अत्रेतिपरि

कारस्यपंथानोद्दष्टव्याइत्यनेनान्वितं॥स्वनिष्ठेति॥धूमांतरसंयुक्तस्वावयवेत्यादियुक्तरीत्याऽव्याप्तेःस्वनिष्ठत्वनिवेशः॥गगनभिन्नंघटत्वादित्यादेःस्वनिष्ठसाध्यवद्वृत्तित्वसामान्याभावात्प्रमिद्धे हेतुतावच्छेदकसंबंधावच्छिन्नतादृशवृत्तित्वनिवेशःसमवायेनधूमाभिन्नस्वावयवस्यस्वाधिकरणतावत्सामान्यांतर्गतस्यस्वनिष्ठतादृशाभावानवच्छेदकत्वविरहाद्व्याप्तिवारणायस्वाधिकरणसंबंधावच्छिन्नत्वनिवेशःसत्ताधिकरणद्रव्यस्यतन्निष्ठतादृशवृत्तित्वाभावानवच्छेदकत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वव्याप्तिवारणायस्वाधिकरणपदं॥हेतुतावच्छेदकसंबंधेनयत्स्वाधिकरणमिति॥अत्रसाध्यवद्वृत्तित्वेहेतुतावच्छेदकसंबंधनिवेशोव्यर्थः॥नन्वसंयोगेनधूमवत्पर्वतरूपकालेऽयोगोलकीयवह्नेःस्वाधिकरणायोगोलकावच्छेदेनवकालिकवृत्तेःसत्त्वेऽपिदेशस्यावच्छेदकत्वात्तथाचायोगोलकाद्यवच्छेदेनधूमवद्वृत्तित्वसामान्याभावसत्त्वादतिव्याप्तेर्हेतुतावच्छेदकसंबंधनिवेशइतिवाच्यं॥सामानाधिकरण्यनिरूपकमेवतदवच्छेदकमन्यत्तदभावावच्छेदकमितिग्रंथछलंमतंतथाचसामानाधिकरण्यनिरूपकस्यायोगोलकस्यतदभावावच्छेदकत्वमव्याहतमन्यथाहेतुतावच्छेदकसंबंधनिवेशेपिसंयोगेनधूमसाध्यकेकालेकेनदेशेहेतुत्व

तिप्रसंगस्य दुर्वार... देः परंतु हेतुतावच्छेदकसंबंधेन हेत्वधिकरण... च्छेद्यहेतु... वच्छेदकसंबंधावच्छिन्नसाध्यवद्वृत्तित्वाभाव... ग.पं.दी.
वच्छिन्नस्वरूपलक्षणघटकपदार्थोपरि... तिपदपदार्थविशेषणविशेष्यभावव्यत्ययेनेदं लक्षणं छलमिति ज्ञापनायैवनदुपादा
नमिति ध्येयं॥ अत्र हेतुभेदेनव्याप्तिभे... दुदस्त... साध्यवद्वृत्तित्वाभावघटितलक्षणांतरमाह॥ हेतुतेति॥ महानसायोगोलकसा-
धारणदीर्घदंडादिरूपवस्तुहेतूभयाधिकरण... महानसादेः साध्यवद्वृत्तित्वाभा... च्छेदकत्वाद्धूमवान्वह्नेरित्यादा... तिव्याप्तेः सामान्य
पदं॥ केवलान्वयिन्यात्मभिन्नंज्ञानवदन्यत्वादित्यादौ च घटत्वप्रकारकप्रमा... यत्व घटत्वाभावादिरूपनदधिकरणकत्वस्य हेतावभा
वात्छलहेतुनिवेशः॥ तद्वस्तुतावच्छिन्नाभयाधिकरणकधर्मवत्वनिवेश... ॥ ...त्तिः॥ उभयाधिकरणत्वनिवेशप्रयोजनंस्व
यंवक्ष्यते॥ अधिकरणतायांहेतु... च्छेदकसंबंधावच्छिन्नत्वानिवेशाद्धूमवत्कपालसमवेतध्वंसाप्रतियोग्यवद्वृत्तित्वाभावसत्त्वात्तदुभयाधि
करणकपालस्यतदवच्छेदकत्वेपिधूमादीनाव्याप्तिः॥ अत्रचयन्निष्ठसाध्यवद्वृत्तित्वाभा... च्छेदकत्वंतन्निष्ठहेतुतावच्छेदक
संबंधावच्छिन्नतन्निष्ठाधेयतानिरूपकत्वसहिततत्संबंधावच्छिन्नयद्धर्मावच्छिन्नाधिकरणताव्यापकंनद्धर्मवत्वस्यैवव्याप्तित्व १५७

संभवा[illegible]तुतावच्छेदकसंबंधेनयद्दानमदित्यनावदनर्थकमेवपरंतुहेतुतावच्छेदकसंबंधेनयद्दानमुभयाधिकरण
प्रसिद्धिस्तद्वत्त्वेवयत्तदेनात्यमितिसूत्रकारायैतदुक्तिरितिबोध्यं॥हेत्वधिकरणावच्छिन्नतदधिकरणनावदन्यत्वनिवेशएवदी
धितिकारोक्तदोषभंजकोनतुतदवच्छिन्नस्ववृत्त्यन्यत्वनिवेशइत्याशयेनाह॥अथवेति॥हेत्वधिकरणावच्छिन्नस्ववृत्ति
कान्यत्वस्यानहेतुतावच्छेदकसंबंधावच्छिन्नतत्सनवच्छिन्नत्वनिवेशएवभंजकमते॥इत्यादीति॥विदुषांकंठभूषायेरघुना
थेननिर्मितेसंज्ञालेसंपूर्तिमगमत्पंचलक्षणी॥ ॥इतिमीमांसान्यायरत्नदीधितिव्याख्याचार्यशिष्यस्यपर्व
तीयनारायणभट्टकृतायांतत्त्वचिंतामणिदीधितिव्याख्यायांन्यायरत्नाभिधायांसाभीमग्रंथेपंचलक्षणीसमाप्ता॥
॥ ॥अथदुष्टशलक्षणी॥ ॥साध्यप्रतियोगिकाभावस्त्वादि॥अत्रेदंबोध्यं॥साध्यप्रतियोगिकाभा
वनिवेशस्यशंकाबीजत्वेव्याप्यवृत्तिधर्मावच्छिन्नाभावोनलक्षणघटकोगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वविशिष्टाभावोपी
ति॥साध्यतावच्छेदकापर्याप्तेति॥साध्यतावच्छेदकतापर्याप्तिस्यवृत्तिधर्मावच्छिन्नापर्याप्तिकेत्यर्थस्तेनद्रव्यत्वनिष्ठाभे

दकतायाउभयपर्याप्तत्वैकपर्याप्तत्वाभावात्तत्रेपिनक्षतिः॥ इदंतत्साधनाधिकरणधर्मावच्छिन्नाभावसंग्रहाय॥ यत्तुतन्मदेय
मेव नच्चतदनिवेशेसाध्याधिकरणधर्मावच्छिन्नाभावस्यलक्षणएवतेनव्यधिकरणधर्मावच्छिन्नाभावमादायसंभवोनिव्याप्तिरि
तिवाच्यं॥तस्यलक्षणेपक्षतेपसंभवातिव्याप्तेःप्रागेवोक्तत्वादितितन्न॥व्यधिकरणधर्मावच्छिन्नाभावमात्रीक्षत्यप्रथमतो
हानसाध्यवद्व्यभावमादायलक्षणाव्याप्तिवारणार्थंसाध्यतावच्छेदकापर्याप्तेत्यादिपरिष्कृतेततोःप्रसिद्धावुद्भावितायांव्यधि
करणधर्मावच्छिन्नाभावंस्वीकृत्यशंकायाःकृतत्वात्तादृशशंकायामेवासंभवातिव्याप्तेःपूर्वमुक्तत्वात्॥एतेनावच्छेदकतायां
साध्यतावच्छेदकपर्याप्तावित्यस्यसाध्याधिकरणधर्मावच्छिन्नायायाप्रतियोगितातदन्यत्वस्यनिवेशनीयतयाकूटसंकोच
चार्थमेवतन्निवेशइतिनिरस्तं॥उक्तरीत्यासाध्याभावसंग्रहायैवसार्थक्यसंभवात्॥ प्रमेयत्वविशिष्टा यांसेनि॥प्रमेयत्वा
नवच्छिन्नेत्यर्थः॥ननुसाध्याभावपदेनसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावविवक्षणेवह्निमान्धूमादित्यादौतार्णा
र्णादहनोभयाभावमादायाव्याप्तिर्व्यासज्यवृत्तिधर्मानवच्छिन्नतत्स्वप्रतियोगितात्वविशेषणत्वेवह्निधूमोभयसाध्यकेतदन्य

तराभावमादायलक्षणसमन्वयेपितादृशोभयसाध्यकव्यभिचारिणितमादायातिव्याप्तिः॥ साध्यतावच्छेदकानवच्छिन्नत्वव्यावृत्त्यर्थं वृत्तिधर्मावच्छिन्नत्वोभयाभावस्यप्रतियोगितायाविशेषणत्वेगौरवमतआह॥ साध्यतावच्छेदकापर्याप्तसाध्यवृत्तिधर्मनिष्ठेत्यादि॥ ननुवैतत्कल्पेवाच्यत्वसाध्यकेघटाभावस्यापिलक्षणघटकतान्मूलक्षतिंसौदंडमतानुधावनंनिबर्हजमितिचेन्न॥ तादृशानुधावनस्यप्रमेयसाध्यकस्थलाभिप्रायकत्वात्॥ वाच्यत्वसाध्यकेसमवायितयावाच्यत्वाभावप्रदर्शनंसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशाभिप्रायेणेतिध्येयं॥ यद्वासाध्यवृत्तिधर्मनिष्ठेत्यनेनयत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणंसाध्यवदित्यत्रविवक्षितंतेनैववाच्यत्वसाध्यकेनघटाभावोलक्षणघटकइतिबोध्यं॥ साध्यवृत्तिधर्मनिष्ठत्वेनेति॥ अत्रयत्पर्याप्त्यधिकरणधर्मविशिष्टसाध्यमित्युक्तौप्रमेयसाध्यकेगगनत्वेनप्रमेयसामान्याभावसंग्रहानुपपत्तिरतोऽधिकरणमितिसाध्यवदितिच॥ ननुवंविवक्षणेसमवायितयावाच्यत्वाभावोलक्षणघटकोनस्यादतआह वस्तुतस्त्विति॥ अत्रेदंबोध्यंयत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणमित्यत्राधिकरणंसाध्यतावच्छेदकसंबंधेनवक्तव्यंतथाचसमवायित्वेनवाच्यत्वाभावस्यलक्षणघटत्वंसंभवति॥ एवंसतिवाच्यत्वसाध्य

केघटाभावो पेक्षणंसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशकल्याभिप्रायेणेति॥ नन्वथेत्यादिग्रंथस्ययदिकूटघटित लक्षणाभिप्रायकत्वंदीधितिकृतोऽभिमतंतदादूषणेसंदर्भविरोधःस्वानभिप्रेतस्यैवदूषणीयत्वादतःसंदर्भशुद्धिमाह॥ व्यधिकरणेति॥ तथाचार्थेतिग्रंथस्यकूटघटितलक्षणाभिप्रायकत्वेदीधितिकृताभिमतंतन्नदूषितंप्रतियोग्यसिद्धेरितिग्रंथोवतारकत्वमेवन स्यदुष्टत्वान्नस्वाभिमतंतन्नदूषितमितिनसंदर्भविरोधइतिभावः॥ तत्सदबोद्धव्यत्वेति॥ तत्सदजन्यबोधविषयतेत्यर्थः॥ यद्घ्यंशद्घ्यादियद्घ्यंशेयद्घ्यभिविशेष्यकत्वा वच्छेदेनयस्यप्रकारतायन्निष्ठप्रकारताकत्वमथवायद्घ्यंशेयन्निष्ठविशेष्यतानिरूपितेत्यर्थः॥ नचयश्चास्यप्रकारतायांतद्घ्यभिकारकत्वविशिष्टत्वंतोपगमादिति॥ तन्निष्ठप्रकारतानिरूपितविशेष्यतायाएवविशेष्यतासंबंधेनतत्प्रकारकत्वविशिष्टाधिकरणतायांतंत्रत्वादिति भावः॥ अथतत्सदबोद्धव्यत्वप्रकारकत्वविशिष्टेच्छाधिकरणत्वस्यतत्सदवाच्यत्वव्यवहारविषयत्वंस्वीकृत्यपटोघटपदवाच्यइतिव्यवहारवारणेपिपटेघटपदवाच्यत्वमितिव्यवहारापत्तिर्दुर्वारेतिविशिष्टस्य शुद्धविशेष्यानतिरेकितयाघटपदबोद्धव्यत्वप्रकारकत्वविशिष्टेच्छारूपेघटपदवाच्यत्वपदार्थेपटवृत्तितायाअक्षतत्वादितिचेन्न॥

तादृशप्रतीत्याघटपटवाच्यत्वावच्छेदेनैवपटवृत्तित्वस्यविषयीकरणात्तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैवतदाधेयता
वच्छेदकतोपगमाद्घटपटवाच्यत्वतत्पटवृत्तितावच्छेदकत्वाभावेनविषयबाधात्॥स्वपर्याप्तिवच्छेदकावच्छिन्नपर्याप्तिकत्वस्वाव-
च्छिन्नत्वोभयसंबंधेनधर्मविशिष्टान्यत्वंव्यधिकरणधर्मावच्छिन्नत्वमित्यभिप्रायेणशंकतेनचेति॥विशिष्टाभावीयप्रतियोगि-
तायाविशेषणांतर्भावेणपर्याप्तोमानाभावः॥नचविशिष्टाभावोपलक्षितभावयोर्वैलक्षण्यानुपपत्तिरेवप्रमाणमितिवाच्यं॥विशिष्ट
भावीयप्रतियोगितायाविशेषणसाधारण्योपगमेनैवनिर्वाहादित्याशयेनसमाधत्ते॥यतइति॥विशेष्यांशमात्रइति॥विशेष्यां-
शमात्रवृत्तिधर्मावच्छिन्नइत्यर्थस्तेनविशेषणसाधारण्येपिनक्षतिः॥ननुघटपटोनास्तइतिप्रतीतिःकेवलोभयत्वेनावच्छेदकत्वम
वगाहतेतथासतियत्किंचिदुभयवृत्तितादृशप्रतीत्यनुदयापत्तेरतोघटत्वसमानाधिकरणपटत्वसमानाधिकरणद्वित्वंवच्छेदक
त्वमवगाहतइतिवक्तव्यंतत्रचद्वित्वसमानाधिकरणयटत्वंपटत्वंवेतिविनिगमनाविरहात्प्रतियोग्यंशोभासमानत्वाद्घाघटत्वपटत्वयो
रप्यवच्छेदकत्वावगाहनौचित्याच्चयाणामेवावच्छेदकत्वप्रसक्तौतेषांचैकधर्मावच्छिन्नापर्याप्तिकत्वरूपविरुद्धाश्रयत्वाद्विरुद्धोभय

धर्मावच्छिन्नाभावद्वयघटपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वंस्यादितिशंकते॥यद्यपीतिसमाधत्तेतथापीति॥स्वानंत्र्येणापीति॥प्रतियोगिनिष्ठविशेष्यतानिरूपितप्रकारतायोज्यत्वमवच्छेदकतायांस्वातंत्र्यमयंभावः॥घटत्वेनघटपटोभयंनास्तीत्यत्रघटत्वद्वित्वधर्मितावच्छेदकत्वेद्वित्वधर्मितावच्छेदकत्वेनापरंच व्यधिकरणत्वेनतत्रप्रथमावच्छेदकतायास्तद्भावीयप्रतियोगिविशेषणतापन्नत्वावच्छिन्नावच्छेदकतात्वरूपेणघटत्वपटत्वद्वित्वेतत्त्रितयपर्याप्ततानद्वयावच्छेदकंतत्त्रित्वंद्वित्वीयावच्छेदकत्वस्यघटत्वमात्रपर्याप्ततयातद्वयावच्छेदकंघटत्वनिष्ठतद्वयक्तित्वंतथाचप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकतात्र्यापकावच्छेदकताकपर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणतयैवाभावस्यविरोधाद्घटपटोभयाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकतात्र्यापिकायाघटत्वपटत्वद्वित्वेतत्त्रित्वनिष्ठाघटपटोभयवद्भूतलनिष्ठप्रतियोगितासिद्धघटपटोभयत्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकतापर्याप्त्यवच्छेदकतातत्पर्याप्तिकायातादृशत्रितयनिष्ठानिरूपकतावच्छेदकतातत्कायातादृशोभयनिष्ठाधेयत्वरूपानिरूपकतातन्निरूपिताधिकरणताघटपटोभयाधिकरणेवर्तनइतिनतादृशोभयत्वावच्छिन्नाभावस्यकेवलान्वयित्वं॥

घटत्वेन घटपटोभयं नास्तीतिप्रतीतिविषयाभावप्रतियोगितावच्छेदकतापर्याप्तिसम्बन्धावच्छेदकतायास्तादृशत्वित्वघटत्वनिष्ठतद्युक्तित्व
योः सत्वेन घटत्वेन घटपटोभयवदितिप्रतीतिविरहेण तादृशावच्छेदकताव्यापकावच्छेदकतापर्याप्तिकावच्छेदकताकनिरू
पकताया अप्रसिद्धत्वेन विरोधिनोऽभावात्तादृशाभावस्यकेवलान्वयित्वमिति॥ एकदेशिमतानुयायिनस्तयति॥ अथ विषय
तायाविषयस्वरूपत्वेपि घटादिरूपविषयतायाविषयतात्वेनैवस्वरूपसंबंधेन घटादिवृत्तित्वंनघटत्वादिनेतिघटत्वादिनाविषयत्वनास्तीतिप्रतीतिविषयाभावइवसमवायित्वेनस्वरूपसंबंधेनवाच्यत्वाभावस्यघटादावावश्यकत्वात्तादृशाभावस्यलक्षणघ
टकत्वसंभवेमूलस्यमतविशेषपरतयालापनमनुचितं॥ ननुतथापिमूलोक्तंव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वंनसं
बन्धसमवायित्वस्यप्रतियोगितासमानाधिकरणत्वादितिवाच्यं॥ प्रतियोग्यंशेप्रकारीभूतधर्मावच्छिन्नायाप्रतियोगिनिष्ठाधेय
तायाःइनच्छेदकसम्बन्धस्यतादृशधर्मावच्छिन्ननिरूपकताकाधेयत्वाभावस्यवाप्रतियोगितायाव्यधिकरणत्वपदार्थत्वात्समवायित्वादो-
षतादृशविषयतासम्बन्धावच्छिन्नाधेयतानवच्छेदकत्वस्यतादृशविषयतात्वावच्छिन्ननिरूपकताकाधेयत्वाभावस्यचसत्वात्तदव

च्छिन्नाभावस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वासंभवेरितिचेन्न॥अथेत्यादिग्रंथस्यकूटघटितलक्षणाभिप्रायकतयाव्याख्यात्वात्तत्रचसाध्याभावेसाध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वविशेषणस्यावश्यकतयासमवायितयावाच्यत्वाभावस्यविषयतायाविषयस्वरूपतेसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतयातदन्यत्वविरहात्॥ननुतत्रापिसमानाधिकरणधर्मेसाध्यतावच्छेदकव्यापकत्वविशेषणस्यावश्यकतयातस्यापिलक्षणघटकत्वंसंभवतीतिचाच्यं॥समानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिताभेदस्यसाध्याभावीयप्रतियोगितायांनिवेशकल्पेतदनावश्यकत्वात्॥इयतइति॥यद्यपिप्रमेयसाध्यकसंयोगाद्यवच्छिन्नसमवायित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावःसुलभस्तथापिवस्तुगतिमनुरुध्येदं॥वह्निलेनेति॥अथैतादृशाभावप्रदर्शनंकिंस्वरूपसंबंधेनप्रमेयसाध्यकउतसमवायसंयोगाभ्यांवानाद्यो निर्वह्नाविसंगतेःस्वरूपेणतादृशाभावस्यकेवलान्वयित्वात्॥नांत्यःसंयोगसमवायादिसंबंधावच्छिन्नाभावस्यगुणसामान्यादौवर्तमानतयावह्निलेनेत्यसंगतेरितिचेन्न॥संयोगादिनाप्रमेयसाध्यकेजलत्वादिहेतुकेसंयोगादिनाप्रमेयसामान्याभावस्यगुणादौसत्वेपिसाधनसामानाधिकरण्याभ

वाद्वह्नित्वेनेतिसंगतं॥ नचजलइत्येववक्तुमुचितंननिर्वह्नाविनिश्चांक्यं॥जलत्वगुणत्वसत्वादिहेतुकस्थलसाधारण्येनतदुक्तेः॥ वस्तुतस्तुकूटघटितलक्षणेभावानांदैशिकविशेषणतयाशक्तित्वस्यव्यवस्थापितत्वात्स्वरूपसंबंधेनप्रमेयसाध्यकस्थलाभिप्रायकमेवेदमितिध्येयं॥ वह्निभिन्नत्वेनेत्यादि॥ननुवह्निभिन्नत्वेनवह्निगगनान्यतराभावीयप्रतियोगितायावह्निभिन्नत्वेनवह्न्यभावीयप्रतियोगित्वाभिन्नतयावह्निमात्रनिष्ठत्वासंभवात्कथंतस्याःसाध्यतावच्छेदकसमनेय्यत्वमितिचेन्न॥अव्याप्तिवारणायसाध्यतावच्छेदकसंबंधावच्छिन्नाधेयतानिरूपितप्रतियोगित्वेनसमनेय्यत्वस्यविवक्षणीयतयातेनरूपेणतादृशप्रतियोगितायावह्निमात्रनिष्ठत्वादेतदनिष्प्रसंगात्॥ वस्तुतस्तुनायमाभासोऽवतरतिविषयितयावह्नेःसाध्यकएवतथात्वेतत्रवह्निभिन्नत्वेनवह्निगगनान्यतराभावीयप्रतियोगित्वंवह्निभिन्नत्वेनवह्न्यभावीयप्रतियोगित्वयोरैक्याभावात्॥ एतेनघूर्दकल्पेतादात्म्यसंबंधेनतथ्यकस्थलानुरोधेनसाध्यतावच्छेदकसंबंधावच्छिन्नसंबंधितायाविवक्षणाऽवश्यकत्वेनदर्शितप्रतियोगितायाःसमनाधारण्यंपिनक्षतिः॥ विषयितासंबंधेनप्रमेयमात्रसाध्यकइति॥ इदमत्रचिंत्यं॥ संयोगेनप्रमेयसाध्यकेष्वप्रसि

द्धिसंभवात्तावत्सर्थनानुधावनंव्यर्थं॥ नचतत्रसंयोगेनगगनत्वेनप्रमेयसामान्याभावस्तथेतिशंक्यं॥तस्यहेतुसामानाधिकरण्याभाव
त्॥दृत्यनियामकसंबंधेनगगनस्यसंबंधत्वात्॥नचदृत्वनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वमताभिप्रायेणेदमितिवा
च्यं॥विषयितायाअपितथात्वेनतत्संबंधावच्छिन्नाभावप्रदर्शनासंगतेरितिपरंतुविषयितायादृत्तिनियामकत्वमताभिप्रायेणेदमि
त्यवधेयं॥घटत्वादिनावत्त्वभावादिरेवेति॥हेतुसामानाधिकरण्यघटकदृत्तीसंबंधनिवेशनमभिप्रेत्येदंजन्यानांकालत्वानंगी
करणेनवातेनवह्निसाध्येऽस्मदाद्यनाधिकरणधर्मावच्छिन्नवत्त्वभावस्यकालिकसंबंधेनहेतुसामानाधिकरण्येपिनक्षतिः॥अ
थयमात्मेति॥अथायमात्माज्ञानाद्दित्वादावात्मत्वसामान्याभावचारणायप्रतियोगितायांसाध्यतावच्छेदकानवच्छिन्नत्वमेवोप
देयं॥नचैवमपिद्रव्यत्वाभावमादायदोषइतिवाच्यं॥साध्यनिष्ठत्वस्यापिनिवेशात्॥नचात्मत्वेनेष्टतद्व्यक्तिवावच्छिन्नाभाव
मादायाव्याप्तिरितिवाच्यं॥साध्यतावच्छेदकानवच्छिन्नत्वमित्यनेनसाध्यदृत्तिधर्मानवच्छिन्नत्वस्यविवक्षणात्॥यत्सर्यत्यधिक
रणधर्मविशिष्टाधिकरणंसाध्यवत्तन्निष्ठावच्छेदकताकान्यत्वस्यतदर्थत्वान्नप्रमेयसाध्यकेतादृशाभावाप्रसिद्धिः॥[illegible]लो

भाभ्यां समवेतसामान्याभावस्यतादृशस्यप्रसिद्धेरेवंचसाध्यनिष्ठत्वंनदेयमेव॥ एतेनप्रतियोगितायांसाध्यनिष्ठत्वनिवेशोविशिष्टसत्तावांजातेरित्यादावतिव्याप्तिरितिनिरस्तंतादृशद्रव्यत्वाभावमादायतद्वारणादितिचेन्न॥ हेतुसामानाधिकरण्यविशेषणापेक्षणाच्चोक्तदोषात्॥ यत्तु स्वव्यधिकरणधर्मावच्छिन्नत्वमेवप्रतियोगितायांदेयंतच्चावच्छिन्नत्वसामानाधिकरण्योभयसंबंधेनधर्मविशिष्टान्यत्वरूपमेवस्वविशिष्टेतिनदेयमितिनगौरवावकाश इतितन्न॥समवेतयताभावैक्यमतेऽतिव्याप्तेर्नधूमाभावस्यघटत्वेनवह्न्यभावाभिन्नतयावह्निरूपप्रतियोगिसामानाधिकरण्य मादायातिव्याप्तेः॥ नचयत्सामानाधिकरण्यनिवेशेपिसमवेतयताभावैक्यमतेऽतिव्याप्तेरेतल्लक्षणेवक्ष्यमाणनयान्नोक्तमितिवाच्यं॥ तथापिलक्षणद्वयानुरोधेनयत्सामानाधिकरण्योक्तेर्लक्षणांतरत्वाच्चनक्षतिः॥ एतेनयत्सामानाधिकरण्यमपहायप्रतियोगितायांगगनावच्छिन्नत्वनिवेशोपिसमाहितः॥ नतत्राव्याप्तेर्वारणंतत्फलमिति॥ यद्यपिवह्निसाध्यकेपिचरमक्रियात्मकाभावस्यलक्षणघटकीभूतस्यस्वविशिष्टहेत्वधिकरणाप्रसिद्धेरव्याप्तेर्वारणंसंभवतितथापिमहाकालानुयोगिकधूमसंयोगस्यधूमांशेवृत्तिनियामकतायाअग्रेग्रंथकृताप्रतिपादनान्महाकालएवतादृशाभावविशिष्टहेत्व

धिकरणसंभवतीतिनतत्राव्याप्तिरितिध्येयं॥ दृष्टिव्याद्यदृष्टद्रव्येति॥तादृशादृष्टद्रव्यातिरिक्तेद्रव्यमात्रेवपरिभाषितस्तेनयत्किंचि
दृष्टद्रव्यातिरिक्तत्वंसकलद्रव्यसाधारण्येपिनक्षतिः॥द्रव्यंविशिष्टसत्तादित्यादौद्रव्यत्वसामान्याभावस्यकालेदैशिष्ट्यसंभवात्त्वदै
शिष्ट्यसंबंधानिवेशादेतावदनुधावनं॥यदित्यादिविशेषणस्थानेदमसाधारणप्रयोजनमितिशंकतेयद्यपीति॥नन्वेकार्थसम
वायसंबंधेनकालस्यजातौवैशिष्ट्यसंभवान्नाव्याप्तिः॥नचपरंपरासंबंधानांसंबंधत्वनिराकरणान्नेदंयुक्तमि
तिशंक्यं॥असमवायिकारणद्वैविध्यानुरोधेनसमवायैकार्थसमवायान्यतरसंबंधेनसत्तावत्त्वंभावत्वंतदभावोऽभावत्वमितिभावा
भावोक्षणानुरोधेनचतस्यविशिष्टबुद्धिनियामकत्वसंबंधतायाआवश्यकत्वात्तदतिरिक्तकज्ञानविषयत्वादिरूपपरंपराणा
मेवसंबंधतायानिराकरणादतआह॥सत्तावानिति॥केचित्तुकपिसंयोगात्मकाभावस्यप्रतियोगिवैयधिकरण्याघटितव्याप
कतानिवेशकल्पेलक्षणघटकत्वंनसंभवतीत्यतोतत्कल्पेपिदोषदानायाहसत्तावानिति॥अथप्रतियोगिवैयधिकरण्याघटि
तव्यापकत्वकल्पेसाध्यवन्निष्ठतांशेस्वरूपसंबंधनिवेशावश्यकतयाऽपिसंयोगात्मकाभावस्यसाध्यवत्तिस्वरूपसंबंधेनास-

ताद्य[illegible]संभवत्येवान्यथासत्ताभावीयप्रतियोगित्वावच्छिन्नाभा[illegible]स्यापिकालिकसंबंधेन साध्यवत्तिसत्वात्तस्यापिलक्षणघटकत्वानुपपत्तिः॥ **नन्व**स्वप्रतियोगिमत्ताया हविरोधितानियामकसंबंधेनसाध्यवद्वृत्तित्वंनिविष्टमि त्यभिप्रायेणेदमिति**वाच्यं**॥एवंसतिप्रतियोगिवै[illegible]धिकरण्याघटितव्यापकत्वकल्पेपर्य[illegible]काभावमादायदोषवारणायसामा नाधिकरण्यघटकवृत्तौस्वरूपसंबंधनिवे[illegible]त्वंप्रदर्श्यनानास्थानेसंबंधनिवेशप्रयुक्तगौरवोद्भावनस्यासंगत्यापत्तेरितिचेन्न॥साध्यवत्ताया हविरोधितानि[illegible]संबंधेन[illegible]ध्यवद्वृत्तित्वनिवेश॥॥अभिप्रायेणास्वरसस्यगौरवोद्भाव[illegible]संगतेरित्याहुः॥साध्यसामानाधिकरण्यघटकवृत्तौस्व[illegible]संबंधावच्छिन्ननिवेशेनताभावनाशायाव्याप्तिविरहेप्यात्मवृत्तित्वविशिष्टसत्ता भावमादायाव्याप्तेर्बोधात्॥**व्यभिचार**विरोधीति॥व्यभिचाराभावव्याप्येत्यर्थः॥इहहेतावुपाधिर्नेहहेतावुपाधिरितिव्यवहारप्रयोजकसंबंधस्यविशिष्टबुद्धिनियामकत्वमभावप्रतियोगित्वावच्छेदकंचदर्शितं॥**अव्याप्यत्वस्य**॥अव्याप्यत्वंचाभावत्वसंबद्धत्वंतेनात्मत्वाभावाभावत्वात्मन्यात्मनोवृत्तित्वेपिनक्षतिः॥यावत्यदृश्यासाधारणप्रयोजनंनास्तीत्यभिप्रा

येणात एवेति यंथभवतारयति। नन्विति॥एतेनसाध्यतावच्छेदकावच्छिन्नेत्यादिदूषणस्यव्यावृत्तेः [illegible] ग·च·टी·
येत्यादिजगदीशानामुपरिवक्ष्यमाणंदूषणमेतन्मतेनिरवकाशं॥स्वव्यापकतत्कत्वमिति॥अत्रस्वव्यापकत्वंस्वसमानाधिकरण
प्रतियोग्यवृत्तेर्भेदप्रतियोगितानवच्छेदकत्वंभेदे प्रतियोग्यवृत्तित्वनिवेशाद्यासज्यवृत्तिधर्मावच्छिन्नसाध्यकसाध्याभावीयप्र
तियोगितायाः प्रत्येकवृत्तितयातत्रोभयत्वावच्छिन्नप्रतियोगिताकभेदस्यसत्वेपिनसाध्यतावच्छेदकव्याप्यप्रतियोगितायाअपसिद्धि
॥अतएवभूततत्मूर्तत्वोभयत्वावच्छिन्नप्रतियोगितायाअपिसाध्यतावच्छेदकव्याप्यत्वात्तन्निरूपकाभावस्यलक्षणघटकत्वनिर्वा
हः॥यद्यपेतत्कल्पेस्वविशिष्टत्वनिवेशेप्रयोजनाभावेनयावद्द्वित्वाधिकरणजलपरमाणौकेनापिसंबंधेनभूतत्वमूर्तत्वोभयाभावा
सत्वान्नतादृशाभावस्यविवक्षणीयप्रतियोगिसामानाधिकरण्यमितिनातिव्याप्तिस्तथापिनित्यात्मपरमूर्तनादिवृत्त्यधित्वमित्य
भिमानेनेदमितिध्येयं॥अथवाभूततत्वमूर्तत्वोभयघटकभूतत्वंबहिरिंद्रियग्राह्यविशेषगुणरूपमेवेतिनक्षतिः॥व्याप्यत्वंघटकस
बंधेनप्रतियोगिसामानाधिकरण्यनिवेशानासंभवादिति॥प्रतियोगितायांसाध्यतावच्छेदकव्यापकत्वस्यस्वरूपसंबंधेनव १६४

सत्वात्तादृशप्रतियोगिनाकस्यवत्त्याद्यभावस्य [illegible] संबंधेनप्रतियोगिसामानाधिकरण्याभावात्संयोगेनवत्त्यादिसाध्यकेधूमादिहेतावव्यभिचारिभावः॥ **पर्वतभिन्नभेदस्यति॥** अथप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसामानाधिकरण्यनिवेशोऽसंभवःकुतोनोक्तः॥ **नचप्रमेयसाध्यकेपक्षभिन्नभेदस्यसाध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविरहेणघटत्वपटत्वाभ्यांप्रमेयसामान्याभावमादायलक्षणसमन्वयःसंभवतीतिवाच्यं॥** तत्रापिहेत्वधिकरणवृत्तितावच्छेदकसंबंधावच्छिन्नाभावस्यतेनसंबंधेनहेत्वधिकरणप्रतियोगिसामानाधिकरण्यासंभवात्॥ **अत्रकेचित्॥** प्रतियोगितायांनादात्म्यसंबंधावच्छिन्नत्वदानेप्रमेयसाध्यकलक्षणगमनान्नासंभवोऽभिहितः॥ **वस्तुतस्तु** विषयितासंबंधस्यवृत्तिनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेप्रमेयसाध्यकभूतलत्वादिहेतुकेलक्षणसमन्वयःसंभवतितत्रविषयित्वातिरिक्तसंबंधावच्छिन्नाधिकरणवृत्तितावच्छेदकत्वात्॥ **वक्ष्यमाणस्थलांतरिति॥** घटत्वाभाववद्भेदादिलाभाद्धेत्वसिद्धिरित्यर्थः॥ **अतिव्याप्तिरिति॥** पूर्वक्षणसंबंधित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायेत्यादिः॥ **नास्माकंदोषइति॥** पूर्वमतेपिसमत्वादितिभावः॥ यद्वा [illegible] प्रतियोगिताकाभावस्वावच्छेदकादवच्छिन्नसामानाधि

करण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वेभयाभा[illegible]रा प्रतियोगिताश्र[illegible]नाधि[illegible]रण्येऽप्रतियोगिसामानाधिकरण्यमि

त्यनेनस्वमतेविवक्षणीयत्वात्सूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वाच्छिन्नप्रतियोगिनायाअतादृशत्वान्नास्माकंमतेऽतिव्याप्तिरित्यभि-

प्रायः॥भावरूपप्रतियोगिसामा[illegible]धिकरण्यमिति॥साध[illegible]संबंधेनेतिक्वचित्पाठःसमानादिकः॥व्यभिचारिणिसंबं-

धेनाभावस्यसूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यस्यातिव्याप्तिवारणायभावरूपप्रतियोगिनिवेशसा-

र्थक्येपिसाध्यतावच्छेदकसंबंधेनेत्यस्यव्यर्थत्वात्॥नचतदनिवेशेव्यभिचारिणिमहाकालभिन्नःकालत्वादित्यादौकेषामभावानांका-

लिकसंबंधेनप्रतियोगिसमानाधिकरणत्वात्तेषांकालवृत्तित्वस्वीकारेऽनंगनाभावस्यापितथात्वेऽनंगनादीनांकालावृत्तित्वेपी

श्वरज्ञानभिन्नंगुणत्वादित्यादौसर्वेषामेवाभावानांविषयितासंबंधेनप्रतियोगिसमानाधिकरणत्वात्तन्निवेशोऽवश्यकइतिवाच्यं॥भा

वात्मकानांकालभेदेश्वरज्ञानभेदाभावानांभावरूपप्रतियोगिसमानाधिकरण्याभावात्॥नन्वतादृशाभावानांमहाकालेश्वरज्ञान

भिन्नाभावानांकालसंबंधेनकालत्वादिरूपवत्त्वस्वीकारात्तत्सिध्यतेवतेभावःप्रतियोगीतिवाच्यं॥तथापिसर्वत्रव्यभि

त्वारिण्येतद्रूपध्वंसाभावस्य यावदंतर्गतस्यभावरूपप्रतियोग्यभिचारिण्येवातिव्याप्तिवारणस्यतुकरत्वात्॥ यत्किंचिद्रूपावच्छिन्नसाध्यवत्तानिवेशेच सत्तावानिति॥ नन्वेवंवह्निमान्धूमादित्यादौमहानसीयवह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकमहानसीयवत्त्वभावमादा याव्याप्तिसंभवेसत्तासाध्यकानुधावननिवेशजमितिचेदत्रकेचित्॥ यत्किंचिद्रूपेसाध्यता[illegible]त्वनिवेशोमहानसीयवत्त्वभाव स्योक्तस्थलेनलक्षणघटकत्वमितिनसत्तानुधावनमित्याहुः॥ वस्तुतस्तु साध्यतावच्छेदकावच्छिन्नत्वनिवेशस्यविशिष्टसत्तासा ध्यकजातिहेतौव्यावृत्तेःपूर्वमुक्तत्वात्[illegible]परिहृतत्वाच्च॥ मैरुक्तेतिध्येयं॥ ननुतथाविधविशेष्यतातेनेति॥ वि शेषरूपेणसंसर्गतास्वीकारेऽभिचारिणिसाध्यद्रव्यत्वयोगिकस्वरूपसंबंधस्यापि[illegible]तयातत्संबंधेनवान्वयाभावस्य व्यभिचारनिरूपकाधिकरणेप्रतियोगिसामानाधिकरण्याभावादभावेयावत्तंव्यर्थंस्यादितिभावः॥ ननुसंबंधसामान्येनधूमंप्रतिधूमा न्यद्यत्समवेतंतदन्यप्रमेयस्यापि[illegible]संबंधेनव्यापकतयातद्भावस्यसंयोगसंबंधावच्छिन्नधूमनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छि न्नव्यापकतावघटकसंबंधसामान्ये[illegible]संयोगेनायोगोलकादौप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरितिचेन्न॥ स्वरूपसंबंधाव

च्छिन्नप्रतियोगिताकतादृशप्रमेयाभावस्यसर्वत्रवाच्यत्वाभावादिरूपतादृशप्रमेयस त्वेनाप्रसिद्धतयासंयोगादिसंबंधावच्छिन्नाभाव
स्यचधूमत्व[illegible]त्वसंभवेनाप्रसिद्धेः॥यत्वित्यादि॥विशिष्टसत्तासाध्यकेचभिचारिणिगुणान्यत्वद्रव्यत्वाभावप्रतियोगिनांसाध्य
वद्गुणादिनिष्ठभेदप्रतियोगितावच्छेदकतयानंतानांलक्षणघटकतासंभवतीतिसत्ताद्यभावसादायातिव्याप्तिरतोसाध्यतावच्छेदकावच्छि
न्नेति॥एतन्मतेतदनिवेशेनलाघवादिति॥ननुभेदस्यतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वरूपस्यनिवेशान्नलाघवाव का
शात्॥नचभेद[illegible]डोपाधिरितिमतेनेदमितिवाच्यं॥एवंसत्यपिवह्निमांधूमादित्यत्रसाध्यव्यापकत्वेनाभिमतद्रव्यत्ववाच्यत्वादेर
पिसाध्यवन्निष्ठोयोद्रव्यत्वंतताभावादिस्तस्यापित्वावच्छिन्नभिन्नभेदस्वरूपत्वेन[illegible]तेयोगितावच्छेदकत्वेनसाध्यव्यापकत्वस्य
वाप्रसिद्धेःसाध्यवन्निष्ठाभावीयायातादात्म्यसंबंधावच्छिन्नप्रतियोगि[illegible]साध्यव्यापकत्वस्यनिवेशनीयत्वात्
॥अत्रकेचिद्भेदत्वमनुयोगितानिवेशएवंचसाध्यवद्वृत्तितावच्छे[illegible]दशानुयोगितानिरूपकतानवच्छेदकत्वरूपव्यापकत्वस्यैव
निवेश्यत्वान्नसाध्यव्यापकाप्रसिद्धिः॥नचैवंलाघवानवकाशोदत्वाद्यभावीयप्रतियोगित्वावच्छिन्नाभावेविद्यमानोयोघटत्वाभावादि

भेदस्याधिकरणस्वरूपत्वात्। तेन रिक्ततया साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्यवस्त्वभावप्रतियोगितायांदुर्घटत्वाद्व्यापकतायाघटकसंबंधावच्छिन्नायासाध्यवद्वृत्तितावच्छेदकाभावत्वनिरूपकतातदनवच्छेदकत्वपर्यंतविशेषणस्यकरणात्॥अथैवंभूतेव्यधिकरणधर्मावच्छिन्नावच्छेदकताकभेदमादायव्यापकत्वासिद्धिवारणायस्वव्यधिकरणधर्मानवच्छिन्नावच्छेदकतायाएवनिवेशनीयतयानलाघवावकाशइतिचेन्न॥तत्तेनेदस्यस्वान्याधिकरण्येनवच्छेदकत्वेननिवेशनसमानाधिकरण्यधर्मावच्छिन्नावच्छेदकतायाकालसंतानाभावाभ्युपगमएतन्मतेऽपिस्वव्यधिकरणधर्मानवच्छिन्नत्वनिवेशस्यकर्तव्यत्वात्॥यत्तुविशिष्टपर्याप्तयेतिघटत्वघटोभयत्वावच्छेदेनपर्याप्तयेत्यर्थः॥शुद्धघटस्येति॥घटत्वावच्छेदेनतत्पर्याप्तिनाधिकरणादित्यर्थः॥लक्षणघटत्वापातादिति॥अथपर्वतत्वात्मकाभावस्यलक्षणघटकतेपिनक्षतिस्तस्यव्यापकताघटकस्वरूपसंबंधेपूर्वक्षणवृत्तित्वविशिष्टसाभावरूपप्रतियोगिसमानाधिकरणत्वादितिचेदत्रकेचित्॥घटत्वाभाववान्यमेयत्वादित्यनुमितौघटत्वात्मकाभावस्यनादृशप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तेर्वारणायप्रतियोगिसामानाधिकरण्यघटकतायांव्यधिकरणधर्मावच्छिन्नप्रतियोगितायांव्यधिकरणधर्मावच्छिन्नवृत्तितानिरूप

कत्वस्य यादृशप्रतियोगिताकाभावे त्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वाभावस्ता दृशत्वरूपस्यत्वाभावत्वानवच्छिन्नत्वस्यवानिवेशनीयत्वात्॥ नच्च तत्र घटत्वाभावप्रकारकभ्रमाभावमादायातिव्याप्तिवारणंसंभव निजन्यभ्रमायाः प्रतियोगिवैय्यधिकरण्याघटितव्यापकत्वासंभवात्भासामान्याभावस्यचव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक स्यैवप्रसिद्धेस्तस्यप्रतियोगिसामानाधिकरण्यावश्यकत्वात्॥ नच्च तत्र घटभिन्नस्य दात्यसंबंधेनसाध्यव्यापकतयातद्भेदस्य ताघटकतादात्यसंबंधेनघटेप्रतियोगिसामानाधिकरण्यविरहेणनातिव्याप्तिरितिवाच्यं॥ प्रतियोगितायाः प्रतियोगि स्वरूपत्वेघटभिन्नभेदीयप्रतियोगितायाव्यापकतानदुरुक्तादित्याहुः॥ अत्रेदंबोध्यं॥ प्रतियोगितायाः प्रतियोगिस्वरू पत्वेगवाभावमादायलक्षणद्वयसाधारण्यावद्वेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यनिवेशात्तेदानासंगतिस्तस्य लक्षणघटकत्वासंभवाद्भूमाभावस्यलक्षणघटकताभावेनजलादिहृदीत्यादियंथानुपत्तिश्चेतिप्रतियोगितायाः प्रतियोगिस्वरूपत्वं नानुमतंग्रंथकर्तुरितिघटभिन्नभेदस्याप्युक्तस्थलेलक्षणघटकत्वंदुर्वारं॥ वस्तुतस्तुवक्ष्यमाणरीत्याव्यापकतावच्छेदकप्रति

योगितायां भेदानवच्छिन्नत्वविशेषणावश्यकतयानघटभिन्नभेदस्यलक्षणघटकत्वमित्यवधेयं॥ हेतुसामानाधिकरण्यघट
काभावीयवृत्तावर्पाति॥अथैवमपिघटत्वेनवर्तमानाभावाभावमादायाव्याप्तिर्दुर्वारैव॥नचसमनियताभावाभावस्यतस्य
घटत्वेनवत्व्यधिकरणत्वाभावाभिन्नतयावत्व्यधिकरणवृत्तिप्रतियोगिसामानाधिकरण्यंसंभवत्येवेतिवाच्यं॥तन्मतेधूमवा-
न्वह्नेरित्यादौवक्ष्यमाणातिव्याप्तिवारणाययद्यत्प्रतियोगिताकाभावाइतिनिवेशस्यावश्यकत्वात्॥अत्रकेचित्॥भावप्रतियो
गिकत्वरूपस्यभावभिन्नस्यैवतादृशविशेषणनविवक्षितत्वाद्घटत्वादिनापर्वतत्वाभावाभावस्यातथात्वान्नदोषः॥नचैवंसति
पर्वतावृत्तित्वावच्छिन्नाभावस्यलाघवेनपर्वतत्वात्मकस्यसाध्यवतिदेशिकविशेषणतयावृत्तित्वविरहेणलक्षणघटकत्वापत्ते
रितिवाच्यं॥भावमात्रप्रतियोगिकत्वस्यतदर्थत्वान्निरुक्ताभावस्यपर्वतावृत्तिपर्वतत्वाभावादिप्रतियोगिकत्वात्॥नचतथापि
पर्वतावृत्तिजातित्वावच्छिन्नाभावस्यलाघवेनपर्वतत्वात्मकस्यलक्षणघटकत्वंदुर्वारमितिवाच्यं॥भावभिन्नत्वविशेषणसाध्यवृत्ति
र्योयस्तत्प्रतियोगिप्रतियोगिकान्यत्वस्यविवक्षणान्नकोपिदोषइत्याहुः॥परेतुपर्वतत्वाभावत्वावच्छिन्नप्रतियोगितायाःसामा

न्याभावीयप्रतियोगितायाः प्रतियोगितावच्छेदकधर्मस्वरूपत्वमितिजगदीशोक्तरीत्यापर्वतत्वाभावत्वस्वरूपत्वात्तदवच्छिन्नाभाव एव पर्वतत्वस्वरूपो घटत्वेनपर्वतत्वाभावाभा[illegible]तियोगितायाअतिरिक्तयात्तदवच्छिन्नाभावोनपर्वतत्वस्वरूपइतितस्यदैशिकविशेषणतयासाध्यव[illegible]त्तित्वान्नतादृशप्रतियोगितायाव[illegible]मितितादृशाभावस्यलक्षणघटकत्वमेवनास्तीतिपूर्वपक्षएवायंनावतरतीतिवदंति॥[illegible]धकरण्यप्र[illegible]च्छिन्न[illegible]स्येति॥प्रतियोगि[illegible]धकरण[illegible]कत्वावच्छिन्नपर्याप्तिशून्यत्वस्येत्यर्थस्तेनवत्यादिनिष्ठप्रतियोगि[illegible]त्तिप्रतियोगितास्यांघटाभा[illegible]वत्यादिनिष्ठप्रतियोगितानांव्यापकतावच्छेदकत्वानुपपत्तिर्वह्निनिष्ठप्रतियोगित्वेनवह्नितदन्योभयाभावीयप्रतियोगितावच्छेदकत्वंतादृशोभयत्वांतर्भविनैवपर्याप्तं॥केचित्तुसमानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिताप्रतियोगितावच्छेदकरूपाव्यधिकरणधर्मावच्छिन्नप्रतियोगिताचातिरिक्तापवंचात्रसामानाधिकरण्यमभेदस्त[illegible]तियोगि[illegible]तदवच्छेदकतोयोगवःसामानाधिकरण्येनानवच्छेदकत्वमितिनकोपिदोषइतिवदंति॥गौरवादिति॥ननु[illegible]तियोगितावच्छेद[illegible]वच्छिन्नानधिक

रणत्वघटकावच्छिन्नत्वाधिकरणत्वादौ तत्तत्संबंधावच्छिन्नत्वस्य तादृशतादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वंसाध्यव
त्तस्तादृशतादृशप्रतियोगितावच्छेद[illegible]त्वाभावकूट[illegible]तन्मतनिवेशनीयतयानेतन्मतेगौरवमितिचेन्न॥तन्मतेसाध्यवन्निष्ठभेदप्र
तियोगितावच्छेदकतावच्छेदकलाभावस्यानुगतस्यैवनिवेशनीयत्वात्॥**वह्निसंयोग्यादीति**॥**यद्यप्यत्र**तत्तत्संयोगाभावःसर्वत्रैवलक्षण
घटकइससंभवएववक्तुमुचितस्तथापिसाध्यसमानाधिकरणनिष्ठेनव्यापकतावच्छेदकप्रतियोगिताविशेषणत्वएतद्रूपवा
नेतद्रूपादिसंसर्गेणसमन्वयस्तादृशप्रतियोगिताकाभावस्यहेतुमतिप्रतियोगिसामानाधिकरण्यनियमादित्यभिप्रायः॥सा
ध्यतावच्छेदकसंबंधेनप्रतियोग्यधिकरणत्वनिवेशोत्वाह॥**कालःसंयोगीति**॥**[illegible]न्यादिमात्रवृत्तीति**॥भावानांस्वरू
पसंबंधोऽभावानांदैशिकविशेषणतासंबंधश्चविलक्षणएवंचवाच्यत्वसाध्यकेघटत्वादिनावाच्यत्वाभावमादायलक्षणसमन्व
यइतिमात्रपदंतथाचजात्यभावसाध्यकेव्यभिचारिणिदैशिकविशेषणतायाव्यापकताघटकत्वाभावेघटत्वादिनावाच्यत्वाभावमा
दायानिव्याप्तिस्तेपिसाध्यवत्प्रकारकप्रमाभावमादायातिव्याप्तिवारणंभवतीतिमात्रपदस्यार्थः॥**प्रतियोग्यधिकरणसाध्य**

वतोऽप्रसिद्धिरिति॥ अथ घटादिभिन्नत्वेन [illegible]वीयप्रतियोगितायाघटादिमात्रवृत्तितायाअन्यत्वोक्तत्वाद्दृशपदेनतादृशप्रतियो गिताश्रयानधिकरणत्वंसाध्यवतोऽस्त्येवेतिकथमप्रसिद्ध्यभिधानं॥ घटभिन्नत्वेनघटगगनान्यतरावीयप्रतियोगि तायास्तादृशप्रतियोगित्वाभिन्नत्वेबाधकाभावात्तादृशप्रतियोगितायाघटमात्रवृत्तित्वासंभवस्तुनशंक्यस्तथाप्यप्रसिद्धेरभावा द्॥ अत्रकेचित्॥ अप्रसिद्धिरित्यस्यादृशप्रतियोगिताश्रयानधिकरणंसाध्यंतत्तादृशसमानाधिकरणधर्मावच्छिन्नप्रतियो गितायाअप्रसिद्धिस्तथाचासंभवोघटभिन्नत्वेनघटाभावस्यापिलक्षणघटकत्वात्तस्यावद्वेत्वधिकरणेषुप्रतियोगिसामानाधि करण्याभावाद्॥ नन्वसमनियताभावैक्यमतेतस्यघटत्वादिनावत्त्वभावाभिन्नतयावह्निरूपप्रतियोगिसामानाधिकरण्यसंभवइ तिचान्यं॥ समनियताभावैक्यमतेऽतिव्याप्तिरित्यन्यत्प्रतियोगिताकाइत्यादिविवक्षणावश्यकत्वादित्याहुः॥ अपरेतुया दृशयादृशप्रतियोगिताश्रयानधिकरणंसाध्यंतत्तादृशतादृशप्रतियोगितावच्छेदकताभावकूटनिवेशेघटत्वादिवच्छिन्नप्रतियो गितावच्छेदकत्वाभावनिवेशेगोरवात्प्रतियोगित्वनिष्ठायासमानाधिकरणतयावच्छेदकतातन्निरूपकप्रतियोगित्वावच्छिन्नप्रतियो

गितेवयादृशप्रतियोगितेत्यनेनोपादेयतावच्छेदकावच्छिन्नादृशप्रतियोगितायाअप्रसिद्धिर्घटभिन्नत्वावच्छिन्नप्रतियोगितायाअयुपादानासंभवादितिवदंति॥ननुसमनियताभावैक्यमतेप्रतियोगितावच्छेदकविशिष्टत्वस्यव्याहतिरसंगतैवतन्मतेगोत्वाभावादीनांगोत्वत्वेनप्रमेयसामान्याभावाभिन्नतयासर्वत्रप्रमेयत्वप्रतियोगिसामानाधिकरण्यसंभवात्साध्यतावच्छेदकेत्यादिविशेषणस्यैववैय्यर्थ्यात्॥नचतदनैक्यमताभिप्रायेणैवतद्विशेषणमितिवाच्यं॥तदनैक्यमताभिप्रायेणप्रविष्टसाध्यतावच्छेदकेत्यादिदलप्रविष्टप्रतियोगितावच्छेदकविशिष्टत्वव्याहत्तेस्तदैक्यमताभिप्रायेणकथनंस्यायुक्तत्वादितिचेन्न॥समनियताभावैक्यमतेपिसाध्यतावच्छेदकेत्यादिविशेषणव्याहतिःसंभवतिकथमितिचेन्न॥तदैक्यतुल्ययुक्त्याऽतिव्याप्तिवारणायचयद्यत्प्रतियोगिताकायावंतोऽभावाःस्वावच्छेदकसंबंधेनप्रतियोगिसमानाधिकरणाइतिविवक्षायाआवश्यकत्वात्॥सत्तावान्जातेरित्यादौसंयोगादिनाघटाभावस्यताद्दशावच्छेदकसंबंधेनतत्रगतस्यावद्वेत्वधिकरणांतःपातिगुणादौसंयोगेनप्रतियोगिसामानाधिकरण्याभावात्साध्यतावच्छेदकेत्यादिविशेषणस्यावश्यकत्वादिलवेहि॥फलतःसाध्यवदिति॥वह्निसाध्यकेमहानसीयवह्न्यभावीयप्रतियोगितावच्छिन्नस्यसाध्य

वसंबद्धत्वसामान्याभावविरहेणतादृशाभावीयप्रतियोगितावच्छेदकत्वापत्तिवारणायचकिंचिदिति॥ **नन्वत्र**सा
मान्यपदंव्यर्थं॥ **नच**तदनुपादानेवह्निसाध्यकेवह्निसामान्याभावीयप्रतियोगित्वावच्छिन्नचकिंचिन्महानसीयवह्नेः साध्यत्वद्य
किंचित्यनतासंबद्धत्वंनवह्निसामान्याभावीयप्रतियोगितायाव्यापकतावच्छेदकत्वानुपपत्तेस्तदावश्यकमितिवाच्यं॥तादृ
शप्रतियोगितायाः [illegible] द्रव्यत्वाभावभादायेवलक्षणसमन्वयसंभवात्॥ **अत्रकेचित्**॥सामान्यपदानु
पादानेवह्न्यभावइत्याद्यभावीयानेकप्रतियोगिताभेदकूटनिवेशापत्तेर्गौरवात्कूटसंकोचार्थंसामान्यपदोपादानाद्॥ **नच**तथास
तितादृशज्ञानकाभावानांलक्षणघटकतापत्तेस्तेषांप्रत्येकंप्रतियोगिसामानाधिकरण्यनिवेशेगौरवमितिवाच्यं॥अनुयोगिन्येक
मात्रवृत्तिस्वरूपनिवेशादित्याद्युक्तदिशा॥ **तथासति**गवाभावस्थेतिग्रंथासंगतेर्जलादिवृत्तिलविशिष्टत्वादिग्रंथस्यासंबद्ध
दुर्वारत्वात्॥तादृशग्रंथानुरोधेनैवसामान्यपदोपादानमित्यस्यैववक्तुंशक्यत्वाच्च॥ **वस्तुतस्तु**॥वाच्यंज्ञेयत्वादिलाद्यसत्ताभावी-
य प्रतियोगितायाअपिसमवायेनव्यापकतावच्छेदकत्वापत्तिस्तत्वतादृशप्रतियोगितायाःस्वपदेनोपस्थितेरुपस्थितस्यसाध्य

वद्द्रव्यगुणकर्मरूपव्यक्तिसंबद्धत्वनियमात्समवायेनसामान्यादिसंबद्धत्वाप्रसिद्धेरत्यन्ताद्यभावीयप्रतियोगित्वावच्छेदकपदेनोपादेयत्वात्तदन्यत्वस्यावद्द्रव्यप्रतियोगितायामक्षतत्वात्सत्ताभावस्यापिलक्षणघटकतयातस्यचव्याप्यवृत्तिधर्मावच्छेदकावच्छिन्नाधिकरणसामान्याद्यंतर्भावेणप्रतियोगिसामानाधिकरण्याभावाद्व्यासेर्वारणायव्यापकतायाघटकसंबंधावच्छिन्नत्वावच्छिन्नाधिकरणतासामान्येसाध्यवद्यत्किंचिद्धर्म्यसंबद्धत्वमेवनिवेशनीयंतत्रचसामान्यपदानुपादानेऽधिकरणतायाअधिकरणस्वरूपत्वेद्रव्यादिसाध्यकेव्यापकत्वावच्छेदकप्रतियोगितायाअप्रसिद्ध्यापत्तेरित्यत्वाभावीयप्रतियोगित्वावच्छिन्नाधिकरणतायामहानसादिरूपायाःसाध्यवद्यत्किंचित्सर्वतासंबंधत्वादतःसामान्यपदोपादानं॥ अथैवमपिइत्यत्वाभावीयप्रतियोगितायाःसंयोगेनव्यापकतावच्छेदकत्वापत्तिःसंयोगसंबंधावच्छिन्नतद्वच्छिन्नाधिकरणत्वाप्रसिद्धातस्याःस्वपदेनोपादानासंभवात्तथासतितादृशप्रतियोगिताकाभावस्यावद्द्रव्यत्वाधिकरणगुणादौनादृशसंयोगेनप्रतियोगिसामानाधिकरण्याभावात्सत्तावान्जातेरित्यादावव्याप्तिर्दुर्वारेवेतिवाच्यं॥ यादृशसंबंधावच्छिन्नाधिकरणतासामान्येयादृशप्रतियोगित्वावच्छिन्ननिरूपकताकत्वसाध्यवद्यत्किंचिद्धर्म्यसंबंधत्वोभयाभाव

स्तदन्यत्वमेवतेनसंबंधेनव्यापकतावच्छेदकत्वमित्यस्यविवक्षणादितिदिक्॥आत्मत्वादेरन्यतरत्वादिति॥ विषयतासंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वप्रकारकयत्किंचित्वाभावस्यप्रतियोग्यसमानकालीनखंडकालेप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरितिहेतुकोटौमहेत्युक्तं॥कारणत्वादीति॥आदिपदेनपरमार्थसत्वपरिग्रहस्तत्कालसंबंधरूपत्वाद्॥अद्दत्तित्वप्रवादानुरोधेनाह॥नित्येति॥अत्रापिकालान्यत्वप्रकारकयत्किंचित्वाभावस्यज्ञानभेदप्रकारकयत्किंचित्वाभावस्यचप्रतियोग्यसमानकालीनेखंडकालेप्रतियोग्यविषयकत्वेनप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरतोमहेतौश्वरेतिचोपात्तमितिध्येयं॥इदंनित्यज्ञाननित्यत्वेसतिसविषयकत्वादिति॥अथनित्यत्वाभावीयप्रतियोगितायाविषयितासंबंधघटितव्यापकतावच्छेदकत्वंनसंभवतिसाध्यवतिनित्यज्ञानेतत्कर्तृकविषयितासंबंधेनसत्वात्तेनसंबंधेनस्वप्रतियोग्यनधिकरणसाध्यवत्तोऽप्रसिद्धत्वाद्॥विषयितासंबंधेनसाध्यवत्तिज्ञानासंबद्धस्वविशिष्टसामान्यकप्रतियोगितायाअप्रसिद्धत्वाच्च॥एतेनज्ञानेच्छयोःसमानविषयकत्वनियमाङ्गीकारेपदजन्यबोधविषयत्वविशिष्टतीरत्वावच्छिन्नाधिकरणताज्ञा

नेनस्वीकर्तुंशक्यतेतथासतितीरेगंगापदशक्तिरेवस्यादेवंनित्यज्ञानान्यत्वविशिष्टघटत्वावच्छिन्नाधिकरणतापीतिस्वीकारेपिन
निस्तारःसाध्यवद्यत्किंचिदित्यादिपरिष्कारस्यावश्यकत्वात्तत्रचघटत्वाद्यनंतभेदनिवेशेगौरवेणलाघवेनप्रतियोगितायाप
वस्वपदेनोपादेयतयातादृशतीराभावीयप्रतियोगितायानित्यज्ञानान्यत्वविशिष्टघटाभावीयप्रतियोगितायाश्चविशेषीतीरभूतघ
टमात्रनिष्ठतयातद्वच्छिन्नस्यनित्यज्ञानासंबद्धत्वविरहात्॥ अत्रकेचित्॥ प्रतियोगिवैय्यधिकरण्याघटितव्यापकत्वाभि
प्रायकमिदंतथाचसाध्यवन्निष्ठोयोव्यधिकरणधर्मेणविषयितयाप्रतियोगित्वावच्छिन्नाभावस्तत्प्रतियोगितायांसामानाधिकर
ण्येनानवच्छेदकत्वरूपंविषयितयासाध्यव्यापकतावच्छेदकत्वंनित्यज्ञानत्वाभावीयप्रतियोगितायामक्षतं॥ नचतादृशप्र-
तियोगितायांसामानाधिकरण्येनावच्छेदकत्वाप्रसिद्धिःशंक्यासामानाधिकरण्यावच्छेदकत्वोभयाभावस्यैवनिविष्टत्वात्॥ प्रति
योगिवैय्यधिकरण्यघटितव्यापकत्वकल्पेतुनित्यज्ञानान्यत्वस्वनिष्ठतद्व्यक्तित्वोभयविषयकंजन्यज्ञानंपक्षस्तन्निष्ठतद्व्यक्तित्व-
साध्यंतद्व्यक्तिनित्यज्ञानान्यतरत्वंहेतुस्तत्रतद्व्यक्तित्वनित्यज्ञानान्यत्वाभावप्रतियोगिनिर्विषयितासंबंधेनव्यापकतयातेनसं

बंधेनतादृशाभावयोःप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिवारणायत्वेनत्वेनेतिवीप्साआवश्यकीस्याद्ः॥ वस्तुतस्तुनित्यंज्ञा- नमित्यत्रनित्यत्वविशिष्टंज्ञानत्वमेवसाध्यत्वेनविवक्षितंवैशिष्ट्यंचस्वरूपसंबंधावच्छिन्नस्वरूपसंबंधावच्छिन्नसाध्यतावच्छेदकसंबंधेनतथाचसाध्यवृत्तिविषयकसर्वविषयकज्ञाननिष्ठोयोघटाभावीयप्रतियोगि तावच्छिन्नस्वविषयितासंबंधावच्छिन्नप्रतियोगिताकोऽभावस्तत्प्रतियोगितानवच्छेदकत्वस्यनित्यज्ञानत्वानावीयप्रतियोगिता यच्छेदकत्वाच्चनदोषइतिकेचिदपिक्षतिरितिसुधियोविभावयंतु॥समनियताभावैक्यंघटत्वादिनाद्रव्यत्वाभावस्यघटत्वादिनावच्छि भावाभिन्नतयासाध्यतावच्छेदकसंयोगसंबंधेनवह्निरूपप्रतियोगिसामानाधिकरण्यसंभवमाशंक्याह॥घटवृत्तित्वविशिष्ट द्रव्यत्वादिनेति॥हेतुसामानाधिकरण्यसंपत्तयेघटवृत्तित्वविशिष्टेति॥उभयाभावघटितेति॥स्वप्रतियोगितावच्छेदकवि शिष्टप्रतियोगिकत्वहेत्वधिकरणयत्किंचिद्धर्म्यनुयोगिकत्वसामान्याभावत्वसाध्याधिकरणसंबंधसामान्यकत्वरूपेत्यर्थः॥ अव्याप्तेरिति॥नन्वभावपदस्यपूर्वोक्तभावभिन्नार्थकत्वाद्घटत्वाभावसाध्यकेऽव्याप्तिरितिचेन्न॥तथासतिकपिसंयोगात्म

काभावमादायस्वविशिष्टत्वविशेषणव्याहत्यसंगतेः॥ [illegible]त्यादौवह्न्याद्यनुमितिःसंभवतीत्यनआह॥एवमितिः॥उक्तातिव्याप्तेरिति॥घटत्वाभाववान्मेयत्वादित्यादावित्यर्थः॥अभावेभावभिन्नत्वस्यप्रतियोगिनिभावत्वस्यचनिवेशेत्वाह॥आत्मत्वसाध्यकेति॥बाधबुद्धिप्रतिबंधकतायाइति॥तद्दृत्त्याज्ञाननिष्ठतत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रकारतात्वेनाहार्यज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितत्वाभाववत्ताज्ञाननिष्ठप्रतिबंधकतायाइत्यर्थः॥संबंधविशेषनियंत्रितत्वानुरोधादिति॥तद्धर्मावच्छिन्नप्रतियोगित्वांशेनसंबंधावच्छिन्नत्वावगाहित्वघटितधर्मावच्छिन्नत्वानुरोधादित्यर्थः॥अन्यथा॥तेनसंबंधेनतद्दृत्त्याज्ञानंप्रतिकेवलतद्भावावगाहिनिश्चयस्यप्रतिबंधकत्वे॥अविरोधित्वप्रसंगादिति॥अत्रवस्तुगत्याघटसंयोगविरोधीयोऽभावस्तद्दृत्त्यनुयोगितासंबंधावच्छिन्नप्रतियोगिप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारकज्ञानत्वेनप्रतिबंधकत्वान्नदोषइतिनाशंकनीयंतादृशानुयोगितात्वेनान्यानुयोगितावगाहिज्ञानस्याप्रतिबंधकत्वप्रसंगात्॥उपनीतकांचनमयत्वादिनावह्न्यनुमितीति॥कांचनमयत्वज्ञानरूपसन्निकर्षसहकारेणवह्नित्वावच्छिन्नव्याप्यत्वभ्रमपरामर्शजन्यकांचनमय[illegible]रेणवह्न्यनुमितीत्यर्थः॥प्रकारांत

नुत्तरेति॥हेत्वधिकरणतावच्छेदकत्वप्रतियोगितावच्छेदकायेयेसंबंधः[illegible]संबंधेनप्रतियोगिसामानाधिकरण्येनेति तेनसंबंधेनप्रतियोगिसामानाधिकरण्यमितिनिवेशानुसरणेत्यर्थः॥अथयावत्वमनुपादायसाध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेत्येवपाठस्तदुत्तरंतदुपादायवासाध्यतावच्छेदक[illegible]व्यापकप्रतियोगिताकाभावनिवेशइतिपाठःश्यामादिकएवतथाहि साध्यतावच्छेदक[illegible]व्यापकप्रतियोगिताकयावदभावनिरूपितवृत्तित्वादिनारूपसामान्याभावाभावस्यापिलक्षणघटकतयातत्र प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः॥ननुतत्रापिपूर्वक्षणवृत्तित्वविशिष्टत्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभवाद्भवत्येवातिव्याप्तिरितिवाच्यं॥घटत्वाभाववान्मेयत्वादित्यादावतिव्याप्तिवारणायप्रतियोगिसामानाधिकरण्यघटकप्रतियोगितायांनिरुक्तव्याप्यवृत्तितानिरूपकतास्यनिवेशनीयत्वात्॥ग्रंथकृताध्वंसप्रागभावरूपप्रतियोगिसामानाधिकरण्यस्यैवोक्तत्वाच्च॥ननुसमनियतत्वाभावैक्यमतेघटत्वादिनारूपाभावाभावस्यघटत्वादिनावायुत्वाभावाभावाभिन्नतयावायुत्वाभावरूपप्रतियोगिसामानाधिकरण्यमस्त्येवेतिवाच्यं॥तत्कल्पेयद्यदित्यादिविवक्षाया[illegible]शोआवेदितत्वादन्यथाव्यभिचारिण्यएवातिव्याप्तेरिति॥ननुएवमपिरूपसा-

मान्याभावेसाध्य इतिग्रंथोऽतएवेतिग्रंथोत्तरमेवलेखनीयइतिसंदर्भशुद्धिर्दुर्वारेवेतिच [illegible] उक्त्वाअथेतिग्रंथेऽवतारिते [illegible] त्वावच्छेदकेत्यादिविशेषणनिर्वाह्यतयातद्व्याद्दत्तिप्रदर्शकग्रंथोऽवश्यकएवमप्ययमात्माज्ञानादित्यादावव्याप्ति [illegible] त्यायएतेदेहादिग्रंथस्तत [illegible] त्वाभावस्यपरंपरासंबंधेनप्रतियोगिसामानाधिकरण्यसंभ [illegible] तिव्याप्त्युद्धारइतिशंकायां [illegible] दंतरेतीतिलिखित्वाप्रकृतंसमाप्यरूपादीत्यादिनोपेक्षाबीजप्रदर्शनमितिनसंदर्भशुद्धिरितिवदंति॥ रूपात्मकाभावध्वंसप्रागभावरूपप्रतियोगीति॥ भावस्यप्रागभावध्वंसयोरतिरिक्तत्वेपिध्वंसस्य [illegible] वोप्रतियोगिस्वरूपौध्वंसप्रागभावस्यध्वंसोऽपिप्रतियोगिरूपएवलाघवात्तथाचरूपध्वंसप्रागभावस्यरूपप्रागभावध्वंसस्यचरूपस्वरूपत्वात्प्रागभावध्वंसयोश्चसप्रतियोगिकत्वनियमाद्रूपप्रतियोगित्वंतद्ध्वंसप्रागभावयोरव्याहतमित्यभिप्रायः॥ यत्तुरूपवद्भिन्नभेदस्यरूपस्वरूपत्वंकारात्तादृशभेदप्रतियोगिरूपवद्भिन्नांतःपातिरूपध्वंसप्रागभावयोरूपप्रतियोगित्वमित्यभिप्रायवर्णनंतदसत्तु॥ धूमवान्वह्नेरित्यादौ [illegible] वातिव्याप्तिवारकधूमाभावादेर्विषयितयास्वावच्छिन्नभिन्नभेदस्वरूपत्वात्तत्प्रतियोगिविषयितयास्वावच्छिन्न

भिन्नवत्त्वादिरूपप्रतियोगित्वा॥ धेक्त्व॥भादायातिव्याप्तिवारणायप्रतियोगितायांभेदानवच्छिन्नत्वविशेषणमावश्यकं॥ नन्वेवंसङ्घेनासाध्यशून्यभेदस्यापितादात्म्यसंबंधेनसाध्यव्यापकतयातद्भेदस्यापिलक्षणघटकतयाघटकतादात्म्यसंबंधेनभेदानवच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्यविरहादव्याप्तिरितिवाच्यं॥व्यापकतावच्छेदकप्रतियोगितायामपिभेदानवच्छिन्नत्वस्यविवक्षितत्वादेवंचरूपवद्भिन्नभेदीयरूपध्वंसप्रागभावनिष्ठप्रतियोगितायाअतादृशत्वाध्वंसादिरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्त्यप्रसक्तेः॥महाप्रलयेति॥खंडप्रलयेपरमाणुरूपसामान्याभावोनसंभवतितथासतिभाविसर्गरूपानुकूलतंगोःसमवायिकारणाभावात्तदर्थंपरमाणुपाककल्पनेवरंपूर्वसिद्धरूपस्वीकारेणत्रुटितोमहाप्रलयइत्यस्यमहाप्रलयइत्यर्थकरणं॥मानाभावादिति॥रूपध्वंसादिर्नतदलंताभावविरोधीतत्वेसाधकाभावादितिप्रयोगोबोध्यः॥ननुघटोरूपसामान्याभाववान्लिंगरूपवदन्यत्वादित्यनुमानमेवघटरूपालंताभावेप्रमाणमित्यतआहानुमानेति॥अप्रयोजकं॥व्यभिचारशंकानिवर्तकदर्शितसाध्यहेतोःकार्यकारणभावाघनुपपत्तापादकतर्कशून्यमित्यर्थः॥प्रमात्मकेति॥तथाचरूपसामान्याभावोयदिल

प्रागभावध्वंसावच्छिन्नावृत्तिःस्यानदातद्ध्वंसप्रागभाववच्चानघटधर्मिकप्रमाविषयोनस्यादितिनकेणरक्तरूपध्वंसप्रागभावयोः रक्तरूपसामान्याभावाविरोधित्वानुमानेःप्रयोजकत्वंनिरासः॥यत्रघटादौपा काददेति॥अत्रेदंबोध्यं॥अंतराश्यामेपूर्व रक्तापररक्तेचतूरूपीघटेपिमध्यरक्तादशायांरक्तंरूपंनास्तीत्यापत्तिसंभवेपंचरूपिघटपरंतानुधावनंनिबीजं॥नन्वतत्रपूर्वरक्तापरप्रथमरक्तध्वंसप्रागभावयोःसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यव्यासज्यवृत्तित्वस्वीकाराद्रक्तंरूपंनास्तीतिप्रतीतिविषयतादशाव्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणतायाश्चतत्रासत्त्वान्नापत्तिसंभवइतिवाच्यं॥पंचरूपस्थलेपिप्राथमिकरक्तध्वंसमध्यरक्तप्रागभावयोर्मध्यरक्तध्वंसचरमरक्तप्रागभावयोःसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यव्यासज्यवृत्तित्वोपगमेनतत्रापत्तेरसंभवात॥प्राचीनेविशेषाभावादन्यस्यसामान्याभावस्यास्वीकारादिष्टापत्तिरतोदूषणांतरमाहेवमिति॥विनिगमाविरहेणसर्वस्यैवाभावस्याधिकरणविशेषकालविशेषावच्छेदेनघटत्वपटत्वादिधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्यानाभावभेदविलोपइत्यतोदूषणांतरमाहेवमिति॥तत्तत्सामानाधिकरण्यतत्समनियतेति॥अत्रसमानाधिकरणेत्यनेनदे

ज्ञातो व्याप्यत्वं विवक्षितं समनियतत्वेनैव कालतः समनियतत्वं विवक्षितं तेन समनियतस्य समानाधिकरण्यनियमात् समानाधिकरणे- गं-च-दी-
निष्प्रयोजनमिति शंकानवकाशः॥ यत्र संयुक्तयोः रक्तघटयोरेकस्मिन्घटे रक्तरूपनाशोऽन्यस्मिन्रक्तघटे संयोगनाशश्चैकदेशसन्नः काल
तोरक्तध्वंससमनियततादृशसंयोगध्वंसे रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्या तादृशसंयोगध्वंसावगाहिरक्तघटेरक्तं
रूपंनास्तीतिप्रतीतेः प्रमात्वधारणाय देशतो व्याप्यत्वनिवेशः॥ एकाधिकरणेभिन्नकालोत्पन्नस्यशाम रूपनाशस्यापिदेशतोरक्तरू
पध्वंसव्याप्यत्वाच्छ्यामनाशस्यापिरक्तकालेरक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्याशा मरूपध्वंसावगाहिन्याःरक्तका
लेरक्तंरूपंनास्तीतिप्रतीतेः प्रमात्वानुपपत्तिवारणायकालतः समनियतत्वनिवेशः॥ हेत्वधिकरणसामान्यांतर्भवितेत्यर्थइति॥स्व
विशिष्टहेतुमद्वृत्तयोयावंतोधर्माः स्वप्रतियोग्यधिकरणतन्निरूपितैकाश्रयवृत्तित्वमित्यर्थः॥ एतेनैकमात्रवृत्तिहेतुके हेत्वधिकरण-
सामान्याप्रसिद्धिः स्वविशिष्टहेत्वधिकरणताव्यापकत्वप्रतियोग्यधिकरणताकत्वनिवेशकपिसंयोगात्मकाभावत्वप्रतियोग्यधिकरण
ताया हेत्वधिकरणताव्यापकत्वेनाव्याप्तिरहात्वविशिष्टत्वविशेषणवैयर्थ्यापत्तिरित्यादिदूषणानवकाशः॥ धूमवत्त्वकार १७५

कप्रमाविषयत्वाभावस्येति॥ महाकालस्यसंयोगेननधूमवत्त्वमित्यभिप्रायेणेदमन्यथातादृशप्रमाविषयत्वस्यमहान्तलेऽपि व-
तादृशप्रमाविषयत्वाभावस्यप्रतियोगिसामानाधिकरण्यंसंभवतीतिबोध्यं॥ननुचत्रधूमाभावस्यातिव्याप्तिवारणसंभवान्नाव
श्यंतानुधावनंनिर्विजमितिचेदत्रकेचित्॥संयोगेनद्रव्यस्याव्याप्यवृत्तितामतेधूमाभावस्यापिप्रतियोगिसामानाधिकरण्यं
पर्वतादावस्तीतिनतमादायातिव्याप्तिवारणमितितावत्सर्वतानुधावनं॥ननुविशेष्यतायाअपिज्ञानत्वमतेऽव्याप्य
वृत्तित्वात्तादृशाभावस्यापिप्रतियोगिसामानाधिकरण्यमक्षतं तत्स्याअतथात्वमतावलंबनेचद्रव्यस्यव्याप्यवृत्तित्वावलंबनेन
प्रसिद्धधूमाभावत्यागोनिर्विजएवेतिवाच्यं॥धूमनिष्ठप्रकारतानिरूपितप्रमीयविशेष्यतायाःसर्वमतएवव्याप्यवृत्तित्वंतादृशवि
शेष्यनात्वस्येश्वरीयप्रमाविशेष्यतासाधारण्याद्धूमस्यव्याप्यवृत्तित्वंनुनतथेतिविशेषात्॥ननुवमपितस्यापिव्यापकताघटकस्व
रूपसंबंधनपूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यंदुर्वारमेवेतिचेन्न॥भावरूपप्रतियोगिसामानाधि
करण्यानिवेशेनातिव्याप्तिरित्युक्तिप्रायात्॥वस्तुतस्तुमहाकालक्रियाऽयोगोलकान्यतमाममवेतत्वा[illegible]च्छिन्नाभावमादायातिव्या

प्रतिबन्धकं बोध्यं तादृशाभावस्याप्यादिपदग्राह्यत्वात्॥ महाकालेचेत्युक्तमिति॥ अथचरमध्वंसात्मकस्याप्यभावस्यैतत्कालीनध्व

ध्वंसादौ प्रलयकालावच्छेदेन [illegible] कालावच्छेदेनप्रतियोगिनश्चसत्वात्संभवत्येवखंडकालेप्रतियोगिसामानाधिकरण्यं

॥ नचक्रियामात्रस्यैवकालोपाधित्वमित्यभिप्रायेणेदमितिवाच्यं॥ तथासतिप्रलयस्यापिकालत्वानुपपत्त्याप्रलयावृत्तिमान्काल

त्वादित्यस्यसद्धेतुत्वप्रसंगेनतत्रातिव्याप्तिदानस्यासंगत्यापत्तेरितिचेन्न॥ प्रलयत्वंहिजन्यद्रव्यानधिकरणत्वेसतिद्रव्याधिकर

णत्वंप्रलयस्याकालत्वेचतादृशप्रलय[illegible]स्यादितिक्रियातिरिक्तस्यप्रलयात्मकध्वंसस्यैवकालत्वंस्वीक्रियतेनतदतिरिक्तध्वं

सस्येत्यभिप्रायान्नकोपिदोषः॥ अन्यथापुनःसत्तावानिति॥ यद्यपिप्रतियोगिवैयधिकरण्याघटितव्यापकत्वकल्पनाभाना

धिकरण्यांशेस्वरूपसंबंधावच्छिन्नत्वस्यनिवेशावश्यकत्वंपूर्वमुक्तंतर्हिदानींकथंस्वविशिष्टत्वानिवेशेतेनसंबंधेनहेतुसामाना

धिकरण्यनिवेशंविस्मृत्यसत्ताभावमादायाव्याप्तिप्रदर्शनंसंगच्छतइतिशंकावतरतितथापिगगनादिवृत्तित्वविशिष्टाभावमादा

यैवस्वविशिष्टस्यव्यावृत्तिर्विवक्षितेतिबोध्यं॥ यत्तुविशिष्टाभावमादायसर्वत्रैतल्लक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेतिग्रंथाव

तार[illegible]नुपपत्तेर्विशिष्टाभावस्यसंबंधाभावरूप[illegible]मितितादृशाभावस्यलक्षणघटकतानसंभवतीतिकेन[illegible]चिदुक्तंतन्न॥प्रतियोग्यदृष्टनिश्चेतिग्रंथावतारकत्वानुपपत्तेरेवलक्षणेपारलज्यहितीयलक्षणेतुतदुक्तीजरूरत्वात्॥अत्रेदंबोध्यं॥हितीयलक्षणेव्यापकतायाःप्रतियोगिवैय्यधिकरण्याटितायाएवनिवेशेनतद्धेतुसामानाधिकरण्यांशेस्वरूपसंबंधनिवेशावश्यकतयासत्तासाध्यकेसत्ताभावस्यस्वरूपसंबंधेनहेतुसामानाधि[illegible]रहेणविशि[illegible]भावस्यतल्लक्षणाघटकत्वनाव्यभिविरहात्स्वविशिष्टेतिव्यर्थमितिशेषंपूर्वदिन्[illegible]मितिदीधितिरंतना॥नचतल्लक्षणेभावभिन्नत्वमेवनिविशंतेहेतुसामानाधिकरण्यांशेस्वरूपसंबंधनिवेशइतिवाच्यं॥कपिसंयोगात्यंताभावस्यदैशिकविशेषणतयाहेतुसामानाधिकरण्यविरहेणभावभिन्नत्वविरहेणेतिहितीयलक्षणेग्रंथेदुक्तौविशेषणहयनिवेशबोजनाभावेनभावभिन्नत्वविरहेणतत्स्वरूपसंबंधेनहेत्वसामानाधिकरण्येहेत्वर्थकतायाआवश्यकत्वेनस्वरूपसंबंधस्यैवहेतुसामानाधिकरण्यनिवेशनीयत्वात्॥नचभावभिन्नत्वविरहेस्वरूपसंबंधेनहेत्वसामानाधिकरण्यंहेतुःसंभवतितादृशद्रव्यत्वाभावादेर्भावभिन्नत्वविरहाभावाद्॥नचसमुच्चयार्थकतत्रचकारासंगतिरिति

वाच्यं॥ प्रतियोगिवैय्यधिकरण्याघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेणेत्यनेनैवसमुच्चयस्यविवक्षितत्वात्॥न च प्रतियोगिवैय्यधिकरण्याघटितव्यापकतायांसाध्यवन्निष्ठतांशेस्वरूपसंबंधावच्छिन्नतनिवेशावश्यकतयाकपिसंयोगात्मकाभावस्यस्वरूपसंबंधेनसाध्यवन्निष्ठत्वविरहेणलक्षणगमकसंभवलेवेतिवाच्यं॥स्वप्रतियोगिसत्ताग्रहविरोधितानियामकसंबंधेनैवसाध्यवद्वृत्तित्वस्यविवक्षणीयत्वादिति॥**जलद्रव्यमिति**॥इदंचजलादीतिदीधितिग्रंथानुरोधेन॥वह्निमद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यधूमाभावाधिकरणकस्यधूमाभावस्वरूपस्यवह्निमद्वृत्तिद्रव्यरूपप्रतियोगिसामानाधिकरण्यमादायप्रसिद्धहेतुकव्यभिचारिण्यतिव्याप्तिसंभवात्॥**इदंतुबोध्यं**॥एवंरीत्यागदाधरग्रंथसंगमनेपिदीधित्यसंगतिर्दुर्वारेवेति॥**अत्रकेचित्**॥कालिकसंबंधेनजलवृत्तित्वविशिष्टस्ययःकालिकसंबंधेनाभावस्तस्यधूमाभावाधिकरणकस्यधूमाभावस्वरूपतासंभवात्कालिकसंबंधेनजलवृत्तिद्रव्यरूपप्रतियोगिसामानाधिकरण्यमादायधूमवान्वह्नेरित्यत्रेवातिव्याप्त्यभिप्रायकतादीधितिग्रंथस्यसंभवति॥**नच**तादृशाभावस्यनित्यमात्रवृत्तेर्नजलत्वाभा[illegible]संभवतीतिवाच्यं॥समवायसंबंधावच्छिन्नप्रतियोगिता

कजलत्वाभावासमनेय्यत्वेपिकालिकसंबंधावच्छिन्नप्रतियोगिताकजलत्वाभावममनेय्यत्वेनतद्रूपतासंभवादित्याङ्कुस्तन्न॥
जन्यस्यकालोपाधितानभ्युपगंतृमतसाधारण्येनेंधनत्वादीतिग्रंथस्यव्यभिचारिविशेषपरत्वस्यगदाधरेरुक्तत्वात्॥अथेवमप्ययो
गोलकभिन्नस्यापितादात्म्यसंबंधेनधूमंप्रतिव्यापकत्वात्अयोगोलकभिन्नभेदस्यलक्षणघटकतयाव्यापकतादात्म्य
संबंधेनायोगोलकादौतद्भिन्नरूपप्रतियोगिसामानाधिकरण्यात्नातिव्याप्तिः॥ननुतादृशभेदाधिकरणकजलवृत्तित्वविशि
ष्टगोत्वाभाववत्वादात्म्यसंबंधेनायोगोलकवृत्तिइव्यान्यतराभावस्यतादृशभेदस्वरूपतया तादात्म्येनायोगोलकवृत्तिइव्यस्यापित
त्प्रतियोगित्वात्तत्सामानाधिकरण्यमादायातिव्याप्तिरस्त्येवेतिवाच्यं॥तथासतिजलादीतिग्रंथस्यव्यभिचारिविशेषपरत्वेनसंगम
नस्यायुक्तत्वाद्धूमाभाववाधिकरणकजलवृत्तित्वविशिष्टगोत्वाभाववह्निमवृत्तिइव्यान्यतराभावस्यापिधूमाभावरूपतासंभवे
नधूमवान्वह्नेरित्यादावेवातिव्याप्तिसंभवादितिचेन्न॥पूर्वोक्तव्याप्तियोगिसामानाधिकरण्यघटकप्रतियोगितायांभेदानव
च्छिन्नत्वविशेषणावश्यकतयैतद्रूपवानेतद्साहित्यादौपटभिन्नभेदस्ययावदंतर्गतस्यव्यापकतायाघटकतादात्म्यसंबंधेनभे

ज्ञानवच्छिन्नप्रतियोगिताक[illegible]नाधिकरण्याभा[illegible]दव्याप्तेर्व्यापकतावच्छेदकप्रतियोगितायामपितादृशविशेषण- ग[illegible]
स्यावश्यकतयाऽयोगोलकभिन्नभेदस्यलक्षणघटकत्वाभावात्॥एवंसर्वत्रहेतुसमानाधिकरणमुभयत्वावच्छिन्ना
भावमितिवाच्य[illegible]नोभयत्वावच्छिन्नाभावमित्यर्थस्तादृशोभयत्वावच्छिन्नाभावीयप्रतियोगितायाअव्यासज्यवृत्तितया-
साध्यवतितादृशप्रतियोगित्वावच्छिन्नाभावा[illegible]लक्षणघटकत्वात्॥अथहितीयलक्षणेयथाव्यधिकरण
धर्मावच्छिन्नाभावस्यप्रामाणिकत्वेसामानाधिकरण्यनानच्छेदकत्वमित्रसामानाधिकरण्येनेतिव्यर्थंस्यादितिचेदावश्यक
त्वंतथाऽपिव्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेसाध्यवन्निष्ठाभावीयप्रतियोगितायांसामानाधिकरण्येनानव-
[illegible]साध्यव्यापकतावच्छेदक[illegible]कसामानाधिकरण्येनदुरवैय्यर्थ्यस्यादितिचेदावश्यकत्वं॥यदिचप्रतियो
गिवैय्यधिकरण्याघटितव्यापकतावच्छेदकस्यगौरवग्रस्तत्वात्तटितव्यापकतावच्छेदकत्वमेवग्रंथकृदभिमतमितिम
न्यतेतदापितादृशव्यापकतावच्छेदकत्वस्यतादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणंसाध्यवत्तादृशप्रतियोगितान १७८

वच्छेदकत्वरूपस्यशरीरेयादृशप्रतियोगितावच्छेदकविशिष्टत्ववैय्यर्थ्यादृवरिवादिति चेन्न॥साध्यवन्निष्ठप्रतियोगितावच्छेदकतानवच्छेदकत्वरूपस्यैवप्रतियोगिवैय्यधिकरण्यघटितव्यापकतावच्छेदकत्वस्यायाःप्राग्दर्शितत्वात्तत्रचप्रतियोगितावच्छेदकविशिष्टत्वादेरनिवेशात्॥नचतादृशावच्छेदकतानवच्छेदकत्वंतादृशावच्छेदकत्वावच्छिन्नतादृशावच्छेदकत्वनिष्ठप्रतियोगिताकत्वंतत्रचतादृशावच्छेदकतात्वेनघटाभावस्यघटाभावीयप्रतियोगितासाधारण्येनघटाभावस्यापिलक्षणघटकतादृसंभववारणायोपादेयप्रतियोगितायामवच्छेदकत्वनिष्ठत्वंव्यर्थंस्यादितिव्यधिकरणधर्मावच्छिन्नाभावस्यावश्यकत्वमस्येति॥ मैवं प्रतियोगितासंबंधनतादृशावच्छेदकत्वविशिष्टविशिष्टाभावस्यैवनिवेशात्समानाधिकरणधर्मावच्छिन्नाभावस्यैवतथात्वात्तस्यघटाभावीयप्रतियोगितासाधारण्यविरहात्॥एवंस्वविशिष्टसामान्येसाध्यवद्यत्किंचिद्व्यक्त्यसंबद्धत्वघटितपरिष्कारेपिस्वविशिष्टत्वावच्छेदेनैवप्रतियोगितयासाध्यवद्यत्किंचिद्व्यक्तिसंबद्धत्वस्यविशिष्टविशिष्टाभावएवनिवेशनीयइतिनकोपिपूर्वपक्षावकाशइत्यलं॥ इतिमथमस्वलक्षणंद्रव्यत्वेनधूमोनास्तीति॥अथद्रव्यत्वेनधूमाभावीयप्रतियोगितायांदृष्टान्तस्यावच्छेदकत्वे

पिप्रतियोगितावच्छेदकत्वेनप्रतियोगितायाअनतिरिक्तवृत्तित्वंसंबंधावच्छेदकमेलादिविवक्षायाआवश्यकत्वेनतादृशाभावीयप्र
तियोगितायाद्रव्यत्वादेरतिरिक्तवृत्तित्वेनैवनातिव्याप्तिः॥अत्रकेचित्॥धर्मस्यविशेषाभावीयप्रतियोगितायामवच्छेदकत्वस्वीकारेमि
श्रलक्षणेप्रमेयत्वेनगगनाभावस्यसाध्याभावव्यापकतयातत्प्रतियोगितावच्छेदकत्वस्यप्रमेयत्वेसत्याद्याच्यत्वसाध्यकप्रमेयहेतु
केऽव्याप्तिकथनंदीधितिकृतोविरुध्येत॥नचप्रमेयत्वस्यप्रमाविषयत्वरूपस्यविषयतापेक्षयागुरुत्वेनाभावप्रतियोगितावच्छे
दकत्वंनसंभवतीत्यव्याप्तिसंगतिरितिवाच्यं॥एवंसतिप्रमेयत्वस्यगुरुत्वेनतदवच्छेदकत्वादितुपेक्ष्यप्रमेयत्वव्यधिकरणप्रतियोगि
तायाअप्रसिद्धत्वादितिलक्षणस्यभंगादितिचेन्न॥धूमवान्वह्नेरित्यादौधूमाभावव्यापकवह्नित्वेनायोगोलकवृत्तिवह्नि-
तदन्यवृत्तिवत्त्वुभयाभावप्रतियोगितावच्छेदकतयातादायातिव्याप्तिवारणायस्वसमानाधिकरणस्वनिरूपकाभाववद्वृत्तितानव-
च्छेदकत्वावच्छेदकस्यप्रतियोगितावच्छेदकेत्यनेनविवक्षणीयतयोक्तस्थलेतथात्वेनाव्याप्तिकथनविरोधाभावात्॥
अत्रकेचित्॥प्रतियोगितायान्यूनवृत्तिभिन्नंसंबंधावच्छेदकमितिप्रथमपरिष्कारातिव्याप्तिवारणानुरोधेनतन्मनुरुध्यवा

द्रव्यत्वस्यतादृशाभावप्रतियोगितावच्छेदकत्वनिराकरणमित्याशयः॥ननु द्रव्यत्वेनधूमाभावीयप्रतियोगितायांद्रव्यत्वस्यावच्छेदकत्वास्वीकारेशुद्धधूमवत्तानिश्चयोत्तरंद्रव्यत्वेनधूमाभाववत्तावुध्यनापत्तिस्तस्याधूमवत्तानिश्चयप्रतिबध्यतावच्छेदकधूमत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताशालिबुद्धित्वाक्रांतत्वादितिचेन्न॥शुद्धधूमत्वावच्छिन्नप्रतियोगितासंबंधावच्छिन्नशुद्धधूमत्वावच्छिन्नप्रकारताघटितधर्मस्यैवधूमवत्तानिश्चयप्रतिबध्यतावच्छेदकत्वोपगमात्॥तादृशप्रतीतौद्रव्यत्ववैशिष्ट्यस्याधिकस्यधूमांशेभानेऽकापत्तिः॥द्रव्यत्वेनधूमाभावीयप्रतियोगितायांद्रव्यत्वस्यावच्छेदकत्वाद्विह्नेरपिद्रव्यत्वेनमहानसीयधूमोनास्तीतिबुद्धेर्धूमवत्तानिश्चयप्रतिबध्यत्ववारणायनिरुक्तरूपस्यप्रतिबध्यतावच्छेदकत्वोपगमस्यावश्यकत्वाच्च॥धूमभून्येऽगारशेधूमवद्वृत्तित्वविशिष्टवह्न्यभावासत्त्वात्तादृशाभावस्यधूमाभावसमनियतत्वसंभवइतिधूमकालावच्छिन्नेतिधूमवद्वृत्तित्वेविशेषणं॥उक्तप्रतीतेर्वह्नित्वेऽवच्छेदकतावगाहित्वेपितद्विषयस्यसामान्यरूपेणविशेषाभावत्वाप्रसक्तेरित्यभिप्रायेणाहस्त्वेवेति॥घटभिन्नत्वेनेति॥अत्रधूमत्वस्यावच्छेदकतायोजकतृतीयांतोल्लेख्यत्वाभावाद्घटधूमभेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्व

पान्यतरत्वावच्छिन्नरूपप्रतियोगिनिसाक्षाद्विशेषणत्वाभावाच्च [illegible] भावप्रतियोगितावच्छेदकत्वशंकेतिध्येयं॥ भेदत्वेनेति॥
अत्राप्ययोगोलकभेदभून्येघटाभाववतितादृशप्रतीत्यनुदयापत्तेर्नतादृशान्यतरत्वमात्रस्यप्रतियोगितावच्छेदकत्वं॥ भेदत्वेना
योगोलकभेदघटान्यतराभावस्यसंयोगसंबंधावच्छिन्नप्रतियोगिताकस्यकेवलान्वयित्वेननायोगोलकभेदाभावसमनैयत्यंस्वरू
पसंबंधावच्छिन्नप्रतियोगिताकस्यतत्समनैयत्यसंभवेयोगोलकभेदभून्यस्यस्वरूपसंबंधेनतादृशान्यतरत्वावच्छिन्नवतो
ऽप्रसिद्ध्येनातिप्रसंगविरहात्तादृशान्यतरत्वस्यैवप्रतियोगितावच्छेदकत्वेनातिव्याप्त्यप्रकल्पात्तादृशाभावोपेक्षेतिध्येयं॥
न्यूनवृत्तित्वंचेति॥ यद्यपिवाच्यत्वसाध्यकेलक्षणघटकीभूतज्ञेयत्वेनवाच्यत्वाभावीयप्रतियोगितायान्यूनवृत्त्येवज्ञेयत्वंन्यूनवृत्ति
त्वनिरुक्तस्वपदेनतदभावीयप्रतियोगितायाएवोपस्थितयासमनियताभावैक्यभ्रमेणतादृशाभावस्यवाच्यत्वलक्षणज्ञेयत्वाभावाभि
न्नतयातदीयप्रतियोगितायाज्ञेयत्वेपिसत्वात्तथापिस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्यावच्छेदकत्वसामानाधि
करण्येतत्त्रितयसंबंधावच्छिन्नप्रतियोगिताकतदभावीयप्रतियोगित्वाभाववत्तदभावीयप्रतियोगितावच्छेदकंन्यूनवृत्ति

भिन्नसंसर्गावच्छेदकमित्यनेनविवक्षणीयमितिनदोषः॥एतत्कल्पेसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपिस्वन्यून
वृत्तिधर्मानवच्छिन्नत्वंदेयंतेनवह्निसाध्यकेवह्नित्वेनमहानसीयवह्निघटान्यतराभावस्ययावदंतर्गतस्यप्रतियोगितायान्यून
वृत्तिभिन्नावच्छेदकाप्रसिद्धावपिनक्षतिः॥वह्न्याद्यभावीयप्रतियोगितायाप्रमेयसामान्यवृत्तित्वेत्याह॥अथवेति॥स्वव्या
पकतत्कान्यत्वेति॥स्वनिरूपकस्वाश्रयसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्वाश्रयसामानाधिकरण्येतत्त्रित
यसंबंधेनावच्छेदकताविशिष्टान्यप्रतियोगितावच्छेदकमेवतादृशोभयाभाववत्तत्प्रतियोगितावच्छेदकमित्यर्थेनिरुक्तीय
मितिनानुगमादिदोषः॥एतत्कल्पेव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपिनिरुक्तत्रितयसंबंधेनावच्छेदकताविशिष्टान्यत्वंदेयंतेनवह्नित्वेनमहानसीयवह्निघटान्यतराभावीयतादृशावच्छेदकत्वस्याप्रसिद्धावपिनाव्याप्तिः॥अत्रस्वाश्रयत्व
शरीरेस्वाधिकरणत्वस्यप्रतियोगितावच्छेदकताघटकसंबंधेनैवविवक्षणीयतयायादृशाभावप्रतियोगितावच्छेदकताघटकः का
लिकसंबंधोविषयितासंबंधोवातदभावीयतादृशप्रतियोगितावच्छेदकत्वंस्वव्यापतत्कान्यत्वाप्रसिद्ध्याऽप्रसिद्धिरत आह॥

स्वन्यूनवृत्तिभिन्ना याः प्रतियोगितायास्तिनि॥ अवच्छिन्न[illegible]धिकरण्यसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे त्रितयसंबंधेनधर्मविशिष्टान्याया इत्यर्थस्तेननाननुगमः॥ एतत्कल्पेव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपिनिरुक्तत्रितयसंबंधेनधर्मविशिष्टान्यत्वंदेयंतेननवह्नित्वेनमहानसीयवह्नि[illegible]राभावीयप्रतियोगिता[illegible]विरहेव्याप्तिः॥ निरुक्तकल्पत्रयेपिभावरूपप्रतियोगिसामानाधिकरण्यनिवेशान[illegible]रवादाह॥ तत्प्रतियोगितासमानाधिकरणेति॥ एतत्कल्पेप्रतियोगिनिभावत्वानिवेशः प्रयोजनाभावाद्धेयः॥ असंभव इति॥ हेतुसामानाधिकरण्यांशेस्वरूपसंबंधनिवेशपर्यवसितमात्रभिन्नत्वनिवेशाभिप्रायेण॥ अव्याप्तिरितिव्यापकतावच्छेदकरूपेभावघटनित्वनिवेशकल्पाभिप्रायेण॥ तत्कल्पेभावभिन्नत्वनिवेशात्॥ प्रमेयसाध्यकस्थलेति॥ नन्वेतत्कल्पेधूमसाध्यकेकालिकसंबंधेनधूमाभावप्रतियोगितावच्छेदकविशिष्टवह्निसामानाधिकरण्यमादायातिव्याप्तिवारणायप्रतियोगितावच्छेदकतायाघटकसंबंधेनप्रतियोगितावच्छेदकवैशिष्ट्यंनिवेशनीयंतथाचवह्निसाध्यकसंहेतौविषयितयावह्नित्वविशिष्टाभावस्यप्रतियोगितावच्छेदकतायाघटकविषयितयाप्रतियोगितावच्छेदकविशिष्टज्ञा

नादिनापर्वतादौसामानाधिकरण्याभावाद्व्याप्तिवारणायसाध्यतावच्छेदकनिष्ठावच्छेदकतायांसाध्यतावच्छेदकतावटकसं
बंधावच्छिन्नत्वनिवेशावश्यकतयाकथंसंयोगादिसंबंधावच्छिन्नप्रमेय- निष्ठावच्छेदकताकाभावस्यादायलक्षणसमन्वयइ
तिचेन्न॥अतिव्याप्तिवारणायसाध्यतावच्छेदकतावटकसंबंधेनैवप्रतियोगितावच्छेदकवैशिष्ट्यस्यनिवेश्यत्वात्साध्यतावच्
छेदकनिष्ठावच्छेदकतासंबंधावच्छिन्नत्वनिवेशान्॥ननुरूपसम्मनियतेति॥प्रमेयवह्नित्वावच्छिन्नसाध्यकेत्यर्थः॥यद्यपिगुरुधर्मस्यावच्छेदकत्वंसिद्धांतेआवश्यकमन्यथासाध्यवन्निष्ठगोत्वाभावीयप्रतियोगितायांसाधवेनगोसमवेतत्व
स्यैवावच्छेदकतयातद्भिन्नगवेतरासमवेतत्वसकलगोवृत्तित्वाभ्यांगोत्वभिन्नाभावस्ययावदंतर्गतस्यगोत्वरूपप्रतियोगिसामा
नाधिकरण्याभावासंभवापत्तेस्तथापितत्समनियताभावांतरमादायतस्यापिप्रतियोगिसामानाधिकरण्यान्नासंभवइतितदना
वश्यकं॥ननुप्रमेयवह्निसाध्यकेविषयितयाप्रमेयवह्नित्वविशिष्टाभावस्यैवप्रसिद्धेर्नाव्याप्तिः॥नहिवह्नित्वस्यैवतादृशाभा-
वप्रतियोगितावच्छेदकत्वंसंभवतिप्रमेयवह्न्यविषयकवह्निविषयकज्ञानवतितादृशाभावासत्वप्रसंगात्॥ननुसंयोगेनप्रमेय

वह्निसाध्यकेविषयितयाप्रमेयवह्नित्वविशिष्टसंयोगेनाभावस्यकेवलान्वयितयावह्नित्व[illegible]विषयितयावह्नित्वविशिष्टस्याप्रसिद्ध्यनातप्रसंगइतिवाच्यं॥प्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यप्रयोजनाभावनानिवेशात्तस्यवायेनतादृशाभावप्रसिद्धेः॥नचप्रमेयत्वविशिष्टात्मत्वसाध्यकईश्वरत्वहेतुकेविषयितयासाध्यतावच्छेदकविशिष्टाभावस्यहेतुसामानाधिकरण्याभावेनव्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्धेरव्याप्तिरितिवाच्यं॥आत्मत्वमात्रविषयकज्ञानप्रमेयत्वमात्रविषयकज्ञानाव्यतरत्वविशिष्टस्यसाध्यतावच्छेदकरूपेणाभावस्यैवप्रसिद्धेरितिचेन्न॥प्रमेयत्वविशिष्टेश्वरवृत्तिसाध्यकईश्वरत्वहेतुकेविषयितयासाध्यतावच्छेदकविशिष्टाभावस्यहेतुसामानाधिकरण्यविरहेणव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेः॥साध्यतावच्छेदकनिष्ठावच्छेदकतायांविषयितासंबंधावच्छिन्नत्वेवेश्वरस्यावश्यकतयागुरुधर्मावच्छिन्ननिरुक्तसाध्यकताद्दशावच्छेदकाभावाप्रसिद्ध्याव्याप्तुर्दुर्वारत्वात्॥पूर्वोक्तदीशातिव्याप्तेरिति॥पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तेरित्यर्थः॥ननुपूर्वक्षण

वृत्तित्वविशिष्टस्वाभावत्वेनतत्प्रतियोगितासमानाधिकरणतत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकान्यतत्प्रतियोगिता
वच्छेदकत्वाभावान्नोक्तातिव्याप्तिरितिचेन्न॥तादृशावि वक्षाकल्पवह्निसाध्यकेया[illegible]ह्नित्वेनमहानसीयवह्निध्व
न्यतराभावस्यतादृशप्रतियोगितावच्छेदकाप्रसिद्ध्याव्याप्तिवारणायसाध्य[illegible]रूपावच्छिन्नप्रतियोगितायाम
पिस्वसमानाधिकरणस्वनिरूपकाभाववद्वृत्तितावच्छेदकधर्मावच्छिन्ना[illegible]तियोगितातत्तदन्यत्वनिवेशावश्यकतयासंयो
गनद्रव्यस्याव्याप्यवृत्तित्वमतएवतन्मतेधूमाभावस्यलक्षणघटकत्वानुपपत्त्याव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिर्वा
रणायप्रतियोगिताया अनतिरिक्तवृत्तिसंयोगावच्छेदकनिरूपितत्वेनादरणीयत्वेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभा
वत्वेनतादृशावच्छेदकलाक्षतेरतिव्याप्तेर्दुर्वारत्वात्॥ननुतादृशप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यनिवेशा
न्नातिव्याप्तिःसिद्धांतेऽपिप्रतियोगितावच्छेदकावच्छिन्नभावत्वस्यावश्य[illegible]तयामन्मतेतन्निवेशेगौरवविरहादितिवाच्यं॥सि
द्धांतेतत्प्रतियोगिसमानाधिकरणत्वादिकल्पस्यैवादरणीयतयापूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वरूपप्रतियोगितावच्छेद-

कावच्छिन्नसामानाधिकरण्यमादायातिव्याप्तेस्तदनावश्यकत्वात्॥ किंचैतन्मतेसंयोगेनद्रव्यस्याव्याप्यवृत्तित्वमतेसंयोगेनव
त्वादिसाध्यकेसाध्यतावच्छेदकसंबंधघटितव्यापकतासिध्यर्थंसाध्यवन्निष्ठाभावेप्रतियोगिवैयधिकरण्यनिवेशावश्यकत
यावाच्यत्वसाध्यकेपिदर्शितविशिष्टाभावमादायलक्षणसमन्वयसंभवेप्रतियोग्यव्यधिकरणत्वनिवेश्वेतिग्रंथानुपपत्तिरेवंच॥ नच प्रति
योगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकमिति॥अत्रयद्यपिसिद्धांतेपिव्यधिकरणधर्मावच्छिन्नाभावसंय
होनसंभवतिसंयोगेनवाच्यत्वाभावस्यापिपूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठायास्वप्रतियोगितादृवच्छेदकस्वरूपसंबं
धघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेनलक्षणघटकतयाबुद्धिस्थतादृशस्वरूपसंबंधेनवाच्यत्व
त्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगितायाःस्वसमानाधिकरणस्वनिरूपकाभावस्यलक्षणसमन्वयात्॥ नच संयोगेनवाच्यत्वाभावीयप्र
तियोगितायाःस्वसमानाधिकरणस्वनिरूपकाभाववृत्तितावच्छेदकवाच्यत्वत्वावच्छिन्नत्वेनतदन्यत्वविरहात्तादृशा-
भावस्यनलक्षणघटकतेतिवाच्यं॥स्वनिरूपकाभाववृत्तित्वावच्छेदकसंबंधावच्छिन्नत्वनिवेशावश्यकत्वेनतादृशसं

योगेन वाच्यत्वादेरदृष्टेर्वाच्यत्वलक्षस्यतादृशदृष्टेस्तावच्छेदकत्वविरहात्॥ नचैवंतादृशाभावस्यलक्षणघटकत्वेपितत्प्रतियोगितासमानाधिकरणेत्यादिघटकत्वस्यवाच्यत्वेऽसंभवेननतद्वच्छिन्नसामानाधिकरण्यमादायलक्षणयोगइतिवाच्यं॥तत्रापिस्वनिरूपकाभावत्वहेतित्वांशेत्वावच्छेदकसंबंधावच्छिन्नत्वविवक्षायाआवश्यकत्वेनतादृशांशावच्छेदकत्वानपायात्॥ नचस्वनिरूपकाभावत्वहेतित्वांशेत्वावच्छेदकसंबंधावच्छिन्ननिवेशोवह्न्यादिसाध्यकेसत्तासामान्याभावस्यापिलक्षणघटकतयायावद्यंतर्गततादृशाभावीयप्रतियोगितानिरूपकाभावत्वसामान्यादौत्वावच्छेदकसमवायसंबंधेनहेत्वंतरप्रसिद्ध्यातत्प्रतियोगितासमानाधिकरणेत्यादिघटकाप्रसिद्ध्याऽव्याप्तिरितिवाच्यं॥सत्ताभावस्यस्वरूपसंबंधेनहेतुसामानाधिकरण्याभावेनलक्षणघटकत्वविरहादितिपूर्वपक्षोवतरतितथापिस्वाधिकरणधर्मावच्छिन्नाभावस्वीकारेतत्प्रतियोगितावच्छेदकसंग्रहायोपात्ततत्प्रतियोगितासमानाधिकरणेतिविशेषणवैय्यर्थ्यस्यादितितदावश्यकताहिवह्नित्वलक्षणवादितिबोध्यं॥ एवंवह्नित्वेनधूमकालावच्छिन्नधूमवह्नित्वविशिष्टाभावस्यधूमाभावसमनियततयातद्वच्छेदकवह्नित्वावच्छिन्नसामानाधि

करण्यमादायातिव्याप्तिवारणायप्रतियोगितावच्छेदकतापर्याप्यधिकरणमेवतदवच्छेदकत्वेनविवक्षणीयंतथाचमहानसीयवह्न्यभावस्यात्तथात्वादव्याप्तिरतोव्यापकतावच्छेदकरूपपर्याप्यभावच्छेदकताकप्रतियोगिताकाभावत्वेनविवक्षणीयतयानसर्वत्रविशिष्टाभावमादायलक्षणसङ्गतिरितिध्येयं॥ पूर्वोक्तदिशेति॥ सत्तावान्जातेरित्यादौकालिकसंबंधेनहेतुसमानाधिकरणसत्ताभावमादायेत्यर्थः॥ ननुभावभिन्नाभावनिवेशेवह्निसाध्यकेघटवृत्तिरूपध्वंसवद्द्रव्यत्वाभावस्यकालिकसंबंधेनहेतुसमानाधिकरणस्यभावरूपप्रतियोगिसामानाधिकरण्याभावाद्व्याप्तिरतआह॥अस्तुवेति॥ संयोगध्वंसेनेति॥तत्प्रतियोगिनासमानाधिकरणेत्यादिप्रतियोगितावच्छेदकनिवेशाभिप्रायेणेदंतत्कल्पेप्रतियोगिनिभावत्वत्यागस्योक्तत्वात्॥अयंगोलकनाशजन्यसंयोगनाशसंभवस्थलानुरोधेनाह॥अनुयोगितेति॥ वह्निप्रकारकप्रमाविषयत्वादेःकालत्वसंदेहात्कालिकसंबंधपरित्यागः॥ प्रतियोगिवृत्तय इति॥ प्रतियोगितावच्छेदकसमानाधिकरणाइत्यर्थस्तेनायोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्यतादृशविषयत्वत्वादिनाप्रमेयाभावाभिन्नत्वेनप्रमेयमात्रस्यतत्प्रतियोगित्वेनतादृश

भावस्य प्रमेयरूपप्रतियोगिवृत्तित्वेपिनातिव्याप्तिरितिबोध्यं॥ ॥इतिद्वितीयस्वलक्षणं॥ ॥निरवच्छिन्नवृत्तिकत्वविशिष्ट
स्यकपिसंयोगाभावस्यशुद्धविशेष्यानतिरिक्ततयाऽव्याप्तितादवस्थ्यमतआह॥हेतिति॥आधेयतायाआधेयस्वरूपत्वेआधेयता
वच्छेदकरूपत्वेवाकपिसंयोगाभावरूपायाःकपिसंयोगाभावत्वरूपायावानिरवच्छिन्नाधेयतायाहेत्वधिकरणनिरूपितत्वान
पायादव्याप्तितादवस्थ्यमतआह॥हेत्वधिकरणनिष्ठेति॥हेत्वधिकरणीभूतेति॥संयोगीसत्वादित्यादौसंयोगाभावनिष्ठत
द्यक्तित्वस्यहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वविरहाद्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिरतोयत्किंचिदि
ति॥नचायंसंयोगाभावनिष्ठतद्यक्तित्वादेर्यत्किंचिद्धेत्वधिकरणवृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वान्नातिव्याप्तिः॥न-
न्वतिव्याप्तिर्नामसद्धिंगकानुमितिजनकपरामर्शस्यप्रमात्वापत्तिस्तत्रचद्रव्यनिष्ठाभावप्रतियोगितानवच्छेदकंयदभावनिष्ठ
दद्यक्तित्वंतादृशभावप्रतियोगितानवच्छेदकत्वावगाहिज्ञानस्यप्रमात्वविरहेपिइत्यस्यापिहेत्वधिकरणत्वान्निष्ठाभावप्रति
योगितायांसामानाधिकरण्येनानवच्छेदकंयदभावनिष्ठंतद्यक्तित्वंतादृशाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्न

समानाधिकरणहेत्वभावः निति परामर्शस्य प्रमात्वानपायात्तेनोगुणः संयोगवानेतद्भूतस्यानुमितिर्दुर्वारैवेयं ॥ स्वनिष्ठाभावीयप्रति
योगितावि शिष्टतद्व्यक्तित्ववत्त्वसंबंधेन हेत्वधिकरणविशिष्टाभावप्रतियोगितावच्छेदकत्वसामान्याभावव्याप्यहेतुज्ञानस्यैवकारण
तयोक्तापत्तेरभावात् ॥ प्रतियोगितावैशिष्ट्यंचसामानाधिकरण्यावच्छेदकतोभयाभाववत्त्वसंबंधेनबोध्यं ॥ व्यधिकरणधर्मा
वच्छिन्नाभावनिष्ठतद्व्यक्तित्वस्यापिहेत्वधिकरणनिष्ठव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात्तदभावाप्रसि
द्धिरतः सामानाधिकरण्येनेति ॥ अत्र हेत्वधिकरणवृत्तित्वसंबंधविशेषानिवेशेसंयोगीजन्यसत्वादिदोसंयोगाभावस्यापिकालि
कसंबंधेनहेत्वधिकरणवृत्तित्वसंयोगाभावस्यलक्षणघटकत्वेदव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिःस्यादतएवीयत्व
दृशनिरूपकताश्रयवत्ताज्ञानंप्रतियेनसंबंधेनस्वाश्रयवत्ताज्ञानंविरोधितेनसंबंधेनसाध्यतावच्छेदकसंबंधेनवातन्निवेशनीय
तथाचद्रव्यत्वसाध्यकेद्रव्यध्वंसान्यतरत्वादावतिव्याप्तिर्हेतुमतिध्वंसेतादृशसमवायसंबंधेनवृत्तेरप्रसिद्धेः ॥ द्रव्येचद्रव्यत्वस्यते
नसंबंधेनवृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघटकत्वादित्यस्वरसआकूरित्यनेनसूचितश्चपरेत्यादिमतेऽधिकाधि

करणतास्वीकारेस्वरसः॥ भावानांदेशिकविशेषणतास्वीकारेत्वाहेत्यर्थः॥ इतीति॥ बाधकविरहादिति॥ इत्यन्यत्वविशिष्टाभाव-साध्यकेसत्तायाःसाध्याभावरूपत्वेगुणादोषतादृशाभावोनास्तीतिव्यवहारस्तादृशतीतौविशिष्टाधिकरणतायानियामकत्वमंगी-कृत्यवारणेपवक्ष्यमाणप्रतियोगिमत्ताग्रहविरोधितानियामकसमवायसंबंधेनतस्याहेतुत्वेतयाऽव्याप्तिरितिविशिष्टाधिकर-णतायाविशेष्याभावत्वमभ्युपगंतव्येनबाधकमस्तीतिभावः॥ स्वीययादृशप्रतियोगितात्रयवत्ताज्ञानंप्रतीति॥ अत्रप्रतियोगितायांस्वीयत्वविशेषणंव्यर्थं॥ प्रतियोगितावच्छेदकरूपेणातत्प्रतियोगिमत्तावगाहिज्ञानस्यापिप्रतिबध्यत्वात्प्रति-योगिप्रकारकत्वनिवेशाच्चव्यर्थमितितंपरिहरतिः॥ एवंचेति॥ अघाजनाभावादिति॥ अथप्रतियोगितावच्छेदकप्रकार-तावलिज्ञानसामान्यंप्रतीत्यस्यैवंवक्तव्यत्वेऽपिआकाशाभावप्रतियोगितावच्छेदकप्रकारकाकाशत्वावच्छिन्नप्रकारकसमूहालंबनंप्रतिदेशिकविशेषणतासंबंधेनाकाशाभाववत्ताज्ञानस्यतेबंधेनतयादेशिकविशेषणतानिरूपितसाध्यकेसंशयेहेतुत्वंस्तथाचतादृशज्ञानांतर्गतघटत्वादिनावल्यादिभावप्रतियोगितावच्छेदकघटत्वा

दिनाघटावगाहिज्ञानंप्रतिघटत्वादिनावत्त्वभावावघवगाहिज्ञानस्याप्रतिबंधकतयातादृशाभावासंग्रह इतिचादृशप्रतियोगि
तात्राश्रयप्रकारकत्वमावश्यकमितिचेन्न॥ प्रतियोगिप्रकारकत्वनिवेशेपिवह्नित्वादि[illegible]घटत्वेन[illegible]मत्ताज्ञानस्यापित
दृशज्ञानसामान्यांतर्गततयातद्दोषवारणासंभवाद्दर्शितसमूहालंबनमादायदर्शित[illegible]दृशप्रतियोगितावच्छेदकया
दृशप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकेनदुभयातिरिक्तधर्मावच्छिन्नप्रकारताशून्यज्ञानंप्रतीतिविवक्षयाकर्तव्यं॥
साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तेति॥अथैवंविवक्षणेवह्नित्वेनघटाभाववत्ताज्ञानस्यवह्नित्वेनघटाव
त्ताज्ञानंप्रत्येवप्रतिबंधकतयातादृशज्ञानस्यचसाध्यता[illegible]तियोगितावच्छेदकातिरिक्तप्रकारतावच्छेदकप्रकारक
त्वविरहेणवह्नित्वेनघटाभावस्यलक्षणाघटकत्वेवाव्याप्यवृत्तिसाध्याभावपदवैय्यर्थ्यमितिचेन्न॥विषयितया
वह्नित्ववतोवह्नित्वेनाभावमादायवह्निसाध्यकेव्याप्तिवारणायतदावश्यकत्वात्॥साध्यतावच्छेदकप्रतियोगि[illegible]स्यतदर्थत्वाच्चनज्ञानवानात्मत्वादिनालोकालिकेनज्ञानत्ववतोज्ञानत्वेनाभावमादायाव्याप्तिः॥नचैवंगुणवान्द्रव्यत्वादिनाद्रव्यविषयितयागुणत्वा

दि विशिष्टाभावमादाय व्याप्तिवारणार्थमुपात्तंप्रतियोगितावच्छेदकतायांसाध्यता[illegible]टकसंबंधावच्छिन्नत्वंयदि[illegible]शाभाव
स्यज्ञानत्वव्याप्यप्रतियोगिताकत्वविरहादितिवाच्यं॥समवायेनघटपटोभयत्वविशिष्टस्यसमवायेनसाध्यत्वेघटपटान्यतरत्वेहे
तोपर्याप्तिसंबंधेनतादृशोभयत्वविशिष्टाभावमादायाव्याप्तिवारणायतदावश्यकत्वात्॥गुणवान्द्रव्यत्वादित्यादावव्याप्तिवारणम
योजनकथनंयथाश्रुताभिप्रायेणनिबोध्यं॥इदमत्रचिंत्यं॥एवंरीत्यासाध्याभावांशसार्थक्येपिसर्वत्रद्वित्वावच्छिन्नाभावमादायल
क्षणसमन्वयप्रदर्शनसंगतंस्यात्तस्यसाध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वविरहात्॥नचतद्वृत्तित्वविशिष्टसाध्यतदन्यवृत्ति
त्वविशिष्टसाध्योभयाभावमादायैवलक्षणसमन्वयोविवक्षितइतिवाच्यं॥एकमात्रवृत्तिसाध्यकेतादृशाभावाप्रसिद्धेःक्षणविशेष
विशिष्टसाध्याभावस्यहेत्वधिकरणेव्याप्यवृत्तित्वविरहान्नव्यधिकरणधर्मावच्छिन्नाभावस्यावश्यकत्वादिति॥यदिचस्वन्यूनवृत्ति
धर्मानवच्छिन्नत्वंप्रतियोगितायांनिवेश्यसाध्यतावच्छेदकव्याप्यत्वविशेषणवारणीयाव्याप्तिवारणंसंभवतिग्रंथसंगमनंचभवतिन्यू
नवृत्तित्वस्यप्रतियोग्यवृत्तित्वविशिष्टभेदघटितत्वादित्युच्यतेतदान्यूनवृत्तित्वस्यविरुद्ध्यावृत्तस्यनिवेशेव्यर्थत्वाभावेनवक्ष्यमाणग्र

दाभावीयप्रतियोगितायास्तादृशत्वविरहादृश्यमाणसमनियतनानाधर्मावच्छिन्नप्रतियोगितात्वभेदमताभिप्रायेणापितत्साध्यव्याप्यसंभवादि ग-च-टी-
ति॥ सर्वत्रद्वित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादाय दि॥ ननु वह्निसाध्यके वह्नित्वघटोभयाभावीयप्रतियोगितावच्छेदकतायाःसा
ध्यतावच्छेदकताघटकसंबंधावच्छिन्नायाअप्रसिद्धानतादृशाभावमादायलक्षणसमन्वयएवमेतद्रूपवानेतद्रूपवत्त्वादित्यादावपि
तत्रविशिष्टाभावस्यहेत्वधिकरणेव्याप्यवृत्तित्वविरहादुभयाभावीयप्रतियोगितावच्छेदकतायाःसाध्यतावच्छेदकताघटकसंबं
धावच्छिन्नत्वविरहाच्च॥ एतेन वह्निसाध्यकेमहानसीयवह्न्यभावमादायलक्षणसमन्वयेपिनक्षतिः॥ अत्रकेचित्॥ महानस
वृत्तिवह्न्यभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकतापर्याप्तेवह्नित्वएवसत्वेहवह्निसा-
ध्यकेव्याप्तिवारणायसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकताकायाहेतुसमानाधिकरणाभावीयप्रतियोगितातदवच्छे
दकतात्वावच्छिन्नपर्याप्तिशून्यत्वंवानवच्छेदकपदेनविवक्षणीयतयेतद्रूपतद्रूपोभयाभावीयप्रतियोगितायामवतरणंग्रंथोक्त
रीत्यातद्रूपत्वतद्रूपत्वद्वित्वतत्त्रितयस्यावच्छेदकत्वेएकत्वाद्वोभयाभावीयप्रतियोगितायाअपिसाध्यतावच्छेदकताघटक- १८७

समवायसंबंधावच्छिन्नेतद्रूपत्वतद्रूपत्वनिष्ठावच्छेदकताकलाक्षतेरित्याऊः॥ परेतु प्रतियोगितायांसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वदानेपिकालिकेनमहानसीयत्वविशिष्टस्यनवह्नित्वविशिष्टस्यसाध्यतायांसद्वेतोसमवायेनमहानसीयत्वविशिष्टस्यकालिकेनवह्नित्वविशिष्टस्याभावमादायाव्याप्तिवारणायस्वानवच्छेदकसंबंधावच्छिन्नस्वसमानाधिकरण्येतदुभयसंबंधेनसाध्यतावच्छेदकतादिशिष्टान्यत्वस्यहेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकतायामवश्यंनिवेशनीयतयागुणवान्द्रव्यत्वादित्यादौविषयितयागुणत्वविशिष्टाभावीयप्रतियोगितावच्छेदकतायांतादृशोभयसंबंधेनसाध्यतावच्छेदकताविशिष्टान्यत्वविरहेणाव्याप्त्यप्रसक्तेः प्रतियोगितावच्छेदकतायांसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वस्यानिवेशनीयतयानोक्तपूर्वपक्षावसर इतिवदंति॥ ननु द्वितीयलक्षणेप्यधिकरणधर्मावच्छिन्नाभावास्वीकारेवह्नित्वादिनाघटाभावमादायाव्याप्तिवारणायोपात्तसामानाधिकरण्येनेत्यस्यवैय्यर्थ्यस्यादितितदावश्यकत्वंदर्शयिष्यतेतद्वदिहापिप्यधिकरणधर्मावच्छिन्नाभावास्वीकारेवह्नित्वादिनाघटाद्यभावमादायाव्याप्तिवारणायोपात्तसाध्याभावेत्यस्यवैय्यर्थ्यस्यादितितदावश्यकतासंभवतीतिचेन्न॥ अखंडाभावघटकतास

पादकत्वेन साध्याभावांशस्यात्रसार्थक्यसंभवात्॥ नहि द्वितीयलक्षणेऽयंसंभवतिव्यधिकरणधर्मावच्छिन्नाभावास्वीकारे हेतुस
मानाधिकरणाभावीयप्रतियोगितावच्छेदकतादृशाभावीयप्रतियोगितायांसानानाधिकरण्येनावच्छेदकत्वयोःसमनैय्यत्वेनसम
नियतनानाधर्मावच्छिन्नप्रतियोगितानामभेदस्यान्यत्रोक्तत्वेनाभावभेदप्रयोजकप्रतियोगिनाभेदविरहात्॥ हेतुसमानाधिकर
णाभावप्रतियोगितावच्छेदकतादृशसाध्याभावप्रतियोगितावच्छेदकत्वयोःसमनैय्यत्वविरहेणतदवच्छिन्नाभावयोर्भेदस्यावश्यंवक्तव्यत्वात्॥ **यादृशप्रतियोगितावच्छेदकविशिष्टेति**॥ यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वयादृशप्रतियो
गिताश्रयाधिकरणत्वोभयाभावत्वमेवोभयानधिकरणत्वंतेनद्रव्यंसत्वादित्यादौनातिव्याप्तिः॥ **वह्निभिन्नेऽसंभाविन्तत्येति**॥ वह्नि
भिन्नत्वेनवह्न्यभाववह्निभिन्नत्वेनवह्नितदन्योभयाभावयोःसमनैय्यत्वेनावच्छेदकैक्येनचतदीयप्रतियोगिनयोरप्यैक्यमितितादृशा-
भावीयप्रतियोगितायावह्निभिन्नेपिसंभवस्तुनाशंक्यः॥ वह्निभिन्नत्वेनवह्नितदन्योभयाभावीयप्रतियोगितायाआस्तांवत्यवतरणयंथो
क्तरीत्याव्याप्यवृत्तित्वेनवह्निभिन्नत्वेनवह्न्यभावीयप्रतियोगितातोविलक्षणत्वेननतस्यांसाश्रयानधिकरणत्वस्यहेतुमतिवह्निशून्ये

क्षतत्वात्॥ अथवावच्छे॰णरीत्येति॥ चैत्रान्यत्वविशिष्टेनदंडसाध्यकएतद्दंडसंयोगहेतुकेव्यभिचारिण्येतद्दंडसंयोगसामान्येविशिष्टाभावप्रतियोग्येतद्दंडप्रतियोगिकत्वानुयोगिकत्वोभयसत्वेनविशिष्टाभावस्यलक्षणघटकत्वानुपपत्तिरतोयादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वनिवेशः॥ धूमसंयोगेधूमत्वविशिष्टप्रतियोगिकत्वधूमप्रतियोगिकत्वयोर्द्वयोःसत्वेनधूमसाध्यकेव्यभिचारिणिधूमाभावस्यलक्षणघटकत्वार्थंहेत्वधिकरणयत्किंचिद्व॰त्वानुयोगिकत्वनिवेशः॥ तत्रैवधूमसंयोगेवाक्रमदनुयोगिकत्वस्यापिसत्वेनधूमाभावस्यलक्षणघटकत्वानुपपत्तेरतोयत्किंचिदिति॥ वक्रित्वेनघटाभावसंग्रहाययादृशप्रतियोगिताश्रयप्रतियोगिकत्वनिवेशः॥ लाघवादाह॥ अथवेति॥ साध्यनिष्ठतादृशप्रतियोगितात्वप्रसिद्ध्यादपूर्वोक्तलक्षणेप्रतियोगिव्यधिकरणत्वंनिवेशितमिति॥ अथघटत्वेनैतद्रूपंनास्तीतिप्रतीतौघटत्वस्यस्वावच्छिन्नप्रतियोगितासंबंधेनाभावांशेस्वातंत्र्येणभानस्याभ्युपगतत्वेनघटत्वावच्छिन्नैतद्रूपनिष्ठप्रतियोगितासंबंधावच्छिन्नघटत्वनिष्ठप्रकारतावच्छेदकघटत्वावच्छिन्नाधिकरणत्वहेतुमतिसत्वाद्घटत्वावच्छिन्नैतद्रूपनिष्ठप्रतियोगितेवतादृशीप्रसिद्धेतिचेन्न॥ घटत्वेनैतद्रूपाभावप्रतीतौघटत्वादेः

स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनभानेपितादृशसंबंधस्यपरंपरासंबंधत्वेनघटत्वनिष्ठप्रकारतायाविशेष्यीभूतप्रतियोगित्वसं
बंधनिष्ठसांसर्गिकविषयतानिरूपितत्वरूपतादृशप्रतियोगित्वसंबंधावच्छिन्नत्वविरहात्॥अस्तुवाविशिष्टस्यैवतादृशप्रतियो-
गिताकत्वस्यसंबंधतातथापिरूपत्वेनरूपंनास्तीतिप्रतीतिनिर्वाह्यभावीयप्रतियोगित्वसंबंधावच्छिन्नरूपत्वनिष्ठप्रकारतावच्छेदक
रूपत्वत्वावच्छिन्नानधिकरणत्वमादायरूपवान्पृथिवीत्वादित्वादावव्याप्तिवारणायप्रकारतायांप्रतियोगिनिष्ठत्वनिवेशस्यावश्यक
त्वान्नदोषः॥नचैवमपिरूपघटोभयाभावीयप्रतियोगितामेतद्रूपतद्रूपान्यतरतदुभयाभावीयप्रतियोगितांचादायतादृशप्रति
योगित्वप्रसिद्धिःसंभवतीतिवाच्यं॥वह्नित्वेनमहानसीयवह्निघटान्यतराभावीयप्रतियोगितामादायाव्याप्तिवारणायप्रकारतायां
साध्यतावच्छेदकव्याप्यत्वस्यवानिवेश्यतादर्शितप्रतियोगित्वयोरतादृश्यात्॥प्रतियोगितावच्छेदकतयेति॥स्वप्रतियोगिताव
च्छेदकतयेत्यर्थस्तेनवह्नित्वादेरभावांतरप्रतियोगितावच्छेदकत्वेपिनानियमभंगः॥तेजस्त्वादिनिर्विकल्पकानंतरमंधकारस्तद्दे।रदमि
तिप्रतीतिर्निर्वाह्यायाभावेप्रतियोगिविशेषितेतिविशेषणंदेयं॥प्रत्ययस्यापीति॥शुद्धप्रतियोगितासंबंधेनविशेष्यविशेषणमितिरी-

त्यावच्छिन्नास्तीतिप्रत्ययस्येत्यर्थः॥सामानाधिकरण्येनावच्छेदकतयाऽव्याप्तिरिति॥अत्रासंभवएवसंभवति॥नन्वनुगतधर्मत्वा
नवच्छेदकत्वेतदवच्छिन्नसाध्यकेलक्षणसमन्वयइतिवाच्यं॥तन्मतेपारिभाषिकावच्छेदकतस्यैवनिवेश्यत्वादितिध्येयं॥न-
न्वेवंसामानाधिकरण्येनेत्यस्यवैय्यर्थ्यमतआह॥तदपीति॥नन्वेवंप्रतियोग्यसिद्धेत्यादिग्रंथावतारकत्वानुपपत्तिरितिचेन्न
॥व्यधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेरप्रतियोगितावच्छेदकतावैलक्षण्यस्यप्रतियोगिवैयधिकरण्येसामानाधिकरण्यांशस्यव्यर्थता-
यामेवतद्ग्रंथतात्पर्यात्॥अव्ययीभावेति॥यद्यप्यव्ययीभावोनरंमत्वर्थीयइनिप्रत्ययोनभवतिनकर्मधारयान्मत्वर्थीयइत्यनुशास
नविरोधात्॥तथापिव्यभिचारस्याभावोयत्रेतिव्यधिकरणबहुव्रीहावनुशासनाभावेननास्तिव्यभिचारोयत्रेतिबहुव्रीहौनञपद
स्यक्षणिकत्वपर्यन्तादृशानुशासनबहुव्रीहिपरंयथाश्रुतमेवप्रकृतप्रयोगवशाच्चनञसमासा न्यसमासपरंवेत्यभिप्रायः॥अव्य
भिचारिसंबंधइत्यत्राव्यभिचारिणःसंबंधइतिव्युत्पत्तिमभिप्रेत्यशंकते॥नन्वेति॥अव्यभिचारीति॥नन्वव्यभिचारनिरूपकार्थकत
त्पदान्वयस्थलएवायंनियमोऽन्यत्रतुसामानाधिकरणेत्यादिक्रमेणैवेतिनायंदोषइतिवाच्यं॥प्रथमदोषएवनिर्भरात्॥अव्यभिचारिणि

संबंध इतिव्युत्पत्तिमभिप्रेत्यार्थेति॥ [illegible]समाधत्ते॥ नेति॥ नचयद्रूपावच्छिन्नस्येति॥ यद्रूपं [illegible] एकसाध्यसामानाधिकरण्यंतद्

न्यरूपमव्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यं॥ अव्यभिचारिसंबंधरूपतोपपत्तेरिति॥ साध्याभाववद्वृत्तित्वविशिष्टसाध्यसा

मानाधिकरण्येनतत्प्रतिपाद्यतासंभवादित्यर्थः॥ उक्तलक्षणेपीति॥ यत्सामानाधिकरण्यादिदीधितिकारीयलक्षणेपीत्य

र्थः॥ प्रतियोगीति॥ यावद्भावकत्वस्यहेतुनिष्ठाधेयत्वरूपत्वान्नोक्तरीत्याअव्यभिचारसंबंधरूपता॥ स्वविशिष्टहेत्वधिक

रणावच्छिन्नत्वस्वप्रतियोगिनिरूपितत्वोभयसंबंधेनाभावविशिष्टसामानाधिकरण्यं [illegible] यत्साध्यव्या [illegible] प्रति

योगिताकत्वविशिष्टसामानाधिकरण्यंनिरूपकतासंबंधेनतद्धत्व [illegible] र्थवसितार्थरूपस्योक्तरीत्याऽव्यभिचारि

संबंधरूपतासंभवाच्च॥ तथाचपारिभाषिकमेवाव्यभिचरितत्वमित्यनेनतस्य [illegible] रिभाषिकत्वप्रतिपादनासंगतिरितिभावः॥ अवच्छेदकत्व

मित्यस्य [illegible] त्वपदार्थइतिनार्थोऽवच्छेदकत्वपदाभावादतोव्याचष्टे॥ अनवच्छेदकमित्यत्रेति॥ अ [illegible] र्थांतसंबं

धेनावच्छेदकतावि शिष्टतात्पर्यकत्वात्पर्याप्तिसंबंधेनावच्छेद [illegible] र्थविषयतावच्छेदकमितिभावः॥ स्वविशि [illegible] संबंधीति॥अ

त्वहेतुसमानाधिकरणाभावीयप्रतियोगितायाःस्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितायाः[illegible]दानाधिकरण्येनावच्छेदकत्वंनिवेश्यं
तेननवह्नित्वेनघटाभावीयप्रतियोगितावच्छेदकस्यस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायानवच्छेदकत्वेपिनाव्याप्तिः॥नवाअवच्छे
दकतयाऽभिमतस्यस्वविशिष्टसंबंधिनिष्ठव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेपिपारिभाषिकावच्छेदकाप्राप्तेरिति
॥एवंसतिवह्नित्वेनघटाभावमादायव्याप्तिवारणायसाध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावपरत्वेसार्थक्यमवसेयमितिदिक्॥ ॥इतिकेवलान्वयिलक्षणानि॥ ॥
विशिष्टाभावइत्यादि॥द्वित्वावच्छिन्नसाध्यकेव्यभिचारिणिव्यभिचारनिरूपकाधिकरणावृत्तित्वावच्छिन्नाभावमादायातिव्याप्तेर्निरासः
॥अथैवंविशिष्टसत्तावान्जातेरित्यादौविशिष्टाभावस्यसाध्यप्रतियोगिकत्वविरहेणसत्ताभावस्यसाध्यप्रतियोगिकत्वेपिहेतुसामा
नाधिकरण्यविरहेणव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः॥नन्वगुणावृत्तित्वावच्छिन्नाभावस्यसाध्यप्रतियोगिकत्वेनत
मादायातिव्याप्तिवारणंशंक्यं॥विशेष्येसतोगुणवृत्तित्वस्यविशिष्टेऽभावानुपगमादन्यथाघटवृत्तित्वविशिष्टवाच्यत्वेपदावृत्तित्व

त्वेननटद्वच्छिन्नाभावस्यापिसाध्यप्रतियोगिकत्वेनतमादायवाच्यंतेयत्वादित्यादौलक्षणसमन्वयसंभवेनव्यधिकरणधर्मावच्छिन्नाभावस्यानावश्यकत्वप्रसंगात्॥ नैवंद्रव्यत्वेनद्रव्यत्वसत्त्वान्यतराभावमादायैवविशिष्टसत्तासाध्यकेऽतिव्याप्तेर्वारणात्॥ नन्वतादृशाभावस्यद्रव्यत्वाभावसमनियतत्वेनद्रव्यत्वप्रतियोगिकत्वमवश्यंक्रियतइतिवाच्यं॥ सत्तायाअपिताद्रूप्यात्तातावुल्लेखवत्तत्प्रतियोगिकत्वावश्यकतमित्यभिप्रायात्॥ अथैवमप्येतद्रूपान्यत्वविशिष्टसत्तावान्नातेरित्यादावतिव्याप्तिःकथंवार्यतेविशिष्टाभावस्यलक्षणघटकत्वाभावात्॥ द्रव्यत्वेनद्रव्यत्वसत्तान्यतराभावादेःसाध्यसामानाधिकरण्यात्॥ नन्वेतद्रूपभेदत्वेनैतद्रूपभेदसत्तान्यतराभावस्यसाध्यप्रतियोगिकत्वसाध्यसामानाधिकरण्यविरहेणैवतत्रातिव्याप्तिवारणमितिवाच्यं॥ तादृशान्यतराभावस्यसमवायसंबंधावच्छिन्नप्रतियोगिताकत्वेहेतुसमानाधिकरणस्यसाध्यसामानाधिकरण्यात्स्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वतस्यसर्वत्रव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावमादायलक्षणसमन्वयाद्व्यधिकरणधर्मावच्छिन्नाभावस्यानावश्यकत्ववारणायविवक्षणीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वविरहात्॥ नन्वव्यधिकरणसंबंधावच्छिन्नाभाव

वारणायप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वविद्यावच्छिन्नत्वप्रतियोगिद्वयनिरूपितोभयसंबंधेनसंसर्गविशिष्टान्यत्वस्यैवनिवेशेनव्यधिकरणसंबंधावच्छिन्नाभावत्वारणस्यनिरुक्तान्यतराभावस्यचसंग्रहःसंभवतीतिवाच्यं॥एवमपिवाच्यत्वस्यकालिकसंबंधेनाभावमादायलक्षणमनन्वयाद्व्यधिकरणधर्मावच्छिन्नाभावानावश्यकत्वस्यदुर्वारत्वादितिचेन्न॥विशिष्टसाध्यकेविशेष्यस्यैवपरम्परासंबंधेनसाध्यत्वमित्यभिप्रायेणप्रथमकल्पकरणात्॥नचैवंविशिष्टसत्तासाध्यकेसाध्यतावच्छेदकविशिष्टत्वनिवेशव्यावृत्त्यसंगतिरितिवाच्यं॥अथवेतिद्वितीयकल्पाभिप्रायेणतत्संगतेः॥यथोक्तधर्मयोरिति॥यत्समानाधिकरणसाध्याभावत्वसाध्यसामानाधिकरण्ययोरित्यर्थः॥सम्बन्धेति॥स्वरूपसंबंधरूपेत्यर्थः॥मानाभावादिति॥भूतलेप्रमेयमित्यादौप्रमेयत्वादौभूतलाधेयतावच्छेदकत्वावगाहिप्रत्ययोऽतिप्रसक्तःप्रमेयत्वादेःस्वरूपसंबंधरूपावच्छेदकत्वंविषयीकरोत्यतिप्रसक्तसाधारणतादृशावच्छेदकत्वनिवेशेसत्ताभावाभावोद्रव्यत्ववतीतिप्रतीतिसिद्धतादृशावच्छेदकत्वमादायसत्ताभाववान्द्रव्यत्वादित्यादावतिव्याप्तिरतोऽतिप्रसक्तव्यावर्तनतादृशावच्छेदकत्वमेवनिवेश्यंतथाचतादृशावच्छेदकत्वावगाहियत्समानाधिकरण—

साध्यानधिकरणवर्तित्वादिप्रत्ययाभावादसंभवइति भावः॥ व्यभिचारिणीति॥संयोगिसत्वादित्वादौगुणत्वाभावमादायातिव्याप्तिवारणंबोध्यं॥ द्रव्यत्वादिसामानाधिकरण्यविरहपीति॥संयोगेनद्रव्यस्याव्याप्यवृत्तित्वमेततदावश्यकत्वेपिविषयतयाज्ञानाधिकरणवर्तिनात्मत्वसामान्याभावस्यसाध्यसामानाधिकरण्यविरहात्मज्ञानादित्वादावव्याप्तिवारणंतत्रोद्देश्यतावच्छेदकंबोध्यं॥ वृत्तिद्वयं॥साध्यसामानाधिकरण्यघटकहेतुसामानाधिकरण्यघटकंचेत्यर्थः॥ एकसंबंधेनदेशिकविशेषणतारूपैकसंबंधावच्छिन्नप्रतियोगितानिरूपकत्वमेवप्रयोजनमाह॥ नेनेति॥द्वितीयेसत्तावान्द्रव्यत्वादित्वादौकालिकसंबंधेनहेतुसमानाधिकरणस्यसत्ताभावस्यदेशिकविशेषणतयासाध्यसामानाधिकरण्यविरहात्व्याप्तिवारणंप्रयोजनंबोध्यं॥ तत्त्वयोजनमस्फुटमेवेति॥धूमवत्तायांनिश्चयवत्यभावविषयकप्रमायांसाध्यवत्ताज्ञानप्रतिबंधकत्वाभावात्सत्वादव्याप्तिवारणरूपमित्यर्थः॥ स्वाधिकरणवृत्तित्वंनिरवच्छिन्नंग्राह्यमिति॥अथैवंविवक्षणेवह्निमान्धूमादित्वादौकालिकादिसंबंधेनहेतुसमानाधिकरणसाध्याभावप्रमायांसाध्यवत्ताज्ञानप्रतिबंधकत्वाभावात्सत्वादव्याप्तिवारणायहेतुमद्वृत्तित्वांशस्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधितानियामकसंबंधस्यैवविवक्षणीयतया-

कालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभावाभावे साध्येघटसमानकालीनक्रियादौव्यभिचारिणिप्रमेयत्वादौसाध्याभावस्यहेत्वधि
करणकालेनिरवच्छिन्नवृत्तिकत्वविरहेणव्यधिकरणधर्मावच्छिन्नाभाव[illegible]त्यातिव्याप्तिः॥ नच हेत्वधिकरणवृत्तित्वंदैशिकविशेष
णतयैवनिवेशनीयंभावाभावसाधारणंदैशिकविशेषणतया[illegible]किंयनइतिनाभावसाध्यकव्यभिचारिण्यतिव्याप्तिःप्रकृतस्थलेतेन
संबंधेनघटत्वाभावादेर्दैशिकविशेषणतयानिरवच्छिन्नवृत्तिकतयाकालिकसंबंधेननहेत्ताज्ञानस्यतादृशसाध्यवत्ताज्ञानवि
रोधित्वान्नातिव्याप्तिरितिवाच्यं॥ एवंसतिनत्साध्यकेआत्मत्वहेतावव्याप्तेर्घटत्वाभावरूपस्यसाध्याभा[illegible]स्यदैशिकविशेषणतयातेन
नसंबंधेनात्मनिवृत्तेः॥ मैवंस्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधितानियामकसंबंधेनैवहेत्वधिकरणवृत्ति
त्वंविवक्षितमभावत्वज्ञानस्यदैशिकविशे[illegible]यद्यपिविरोधित्वमितिघटतेतथापिदर्शनायमतस्यैवा
वलंबनादु[illegible]स्थलेदैशिकविशेषणतासंबंधादायातेव्याप्ति[illegible]रणं॥ एवंचभावाभावसाधारणदैशिकविशेषणतास्वीकारेपिनत्त
न्निरूपितसाध्यकेव्यभिचारिणिसमवायादेरपितथात्वात्॥ दर्शितसाध्यकेआत्मत्वादिहेतुकेऽव्याप्तिवारणायसंबंधेनहेतुमत्ति

ताव च्छेदकसाध्याभावत्वविशिष्टविषयकप्रमासामान्यइतिविवक्षयाकर्तव्यमितिदिक्॥तत्सामान्यपरमिति॥ननुसाध्यता गदाधरी-
वच्छेदकपर्याप्तावच्छेदकताकप्रकारतानिरूपितप्रकारित्वावच्छिन्नप्रतिबध्यतानिवेशेलौकिकौदासीन्यपदंव्यर्थमितिचेन्न॥
विशिष्टसाध्यतावच्छेदककस्थलेतादृशप्रकारकत्वावच्छिन्नप्रतिबध्यतायाअप्रसिद्धेः॥प्रतिबध्यतायाश्चमसाधारण्यायनिरूप्यनिरूप
कभावापन्नप्रकारकत्वस्यैवतदवच्छेदकत्वस्यवक्तव्यत्वात्॥विशिष्टसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारकत्वस्यात्तथात्वात्
तादृशप्रकारकत्वविशिष्टज्ञानत्वव्यापकप्रतिबध्यतायानिवेशनावश्यकत्वेनव्यापकत्वतात्पर्यकतत्तदवश्यकत्वात्॥ज्ञानंचेति॥ननु
स्वधर्मितावच्छेदककयद्धर्मावच्छिन्नसमानाधिकरणसाध्याभावविषयकप्रमासामान्येस्वसमानधर्मितावच्छेदककसाध्यवत्ताज्ञान
सामान्यविरोधित्वाभावात्तत्परंतत्सत्॥निर्धर्मितावच्छेदकसाध्याभावविषयकप्रमायाःस्वसमानधर्मितावच्छेदककसाध्यवत्ताज्ञानाप्रसिद्धिर
तःसधर्मितावच्छेदककत्वस्यतादृशप्रमायांनिवेशः॥तत्त्वपरंप्रमासामान्यपरं॥तत्तत्प्रमापरंवा॥आद्ये॥तादृशप्रमासमानधर्मितावच्छे
दककसाध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यतायाःकामिनीजिज्ञासानिरूपितायाएवसिद्धेरतिव्याप्तिः॥अन्त्ये॥घटत्वेनवह्न्यभाववान्हृदश्च १९३

वत्त्वभाववानिति प्रमायाः स्वसमानधर्मितावच्छेदककृदत्तावच्छिन्नविशेष्यकवह्निमत्ता[illegible]वेरोधित्वाद्व्याप्तिरितिचेन्न॥ हेतुसमानाधिकरणसाध्याभावांशेसधर्मितावच्छेदकतायाप्रमाप्रत्येकंसीयहेतुसमानाधिकरणसाध्याभावनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितायास्वविषयीभूताभावीयप्रतियोगितावच्छेदकसंबंधावच्छिन्नासाध्यतावच्छेदकावच्छिन्नप्रकारतातच्चाल्पनाहार्यत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकत्वाभावस्तत्वमित्यस्यविवक्षितत्वान्नदोषः॥ एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकःसाध्यवत्ताज्ञानप्रतिबंधकत्वाभावस्तत्वमित्येतादृशार्थकत्वइति॥ अत्रेदं चिंत्यं॥ पूर्वोक्तयुक्त्यालक्षणपरिष्कारावश्यकतयातादृशप्रमात्वव्यापकत्वघटितपरिष्कारोऽसंभवदुक्तिकइति॥ ॥इति प्रागल्भलक्षणद्वयं॥ यन्निष्ठत्वानुपादानइति॥ यल्लिंगकत्वस्यानुमितिविशेषणत्वेव्याप्तेर्हेतुनिष्ठत्वलाभः॥ असंभवोऽव्याप्तिर्वेति॥ साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशेसाध्यप्रकारकव्यभिचारज्ञानस्यैवप्रतिबंधकतयासंसर्गतावच्छेदककोटौभ्रमत्वांगीकारेकेवलान्वायेन्यपितादृशज्ञानप्रसिद्ध्याऽसंभवः॥ तदस्वीकारेऽव्याप्तिः॥

वस्तुगत्येति ॥ तत्समानाधिकरणविषयतानिरूपितत्वेनैववस्तुगत्यातद्विशिष्टनिरूपितत्वमित्यर्थः ॥ यन्निष्ठसाध्याभाववद्वृत्तित्वविशिष्टविषयितेत्यत्रतादृशवृत्तित्वस्यतादृशवृत्तित्वोपलक्षणत्वविवक्षायांगुणकर्मान्यत्वोपलक्षितसत्तायागुणादिरिवसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन[illegible]वृत्तित्वावगाहिज्ञानीयविषयितानिरूपितत्वसंबंधेनतादृशवृत्तित्वस्योपलक्षणत्वविवक्षायांसत्तायागुणेसमवायेनविशेषणत्वंतत्र्यांचगुण[illegible]संबंधेनेतितादृशवृत्तित्वस्योपलक्षणत्व[illegible]विषयित्वांशेतादृशवृत्तित्वस्यनिरूपितत्वसंबंधेन[illegible]वृत्तित्वंचतादृशवृत्तित्वेआश्रयतासंबंधेनविशेषणमित्यस्यैववक्ष्यमाणज्ञानीयविषयितेनिरूपितत्वसंबंधेनतादृशवृत्तित्वेआश्रयतासंबंधेनतादृशवृत्तित्वस्यचाबाधात् ॥ गुणादिस्थविशेषणत्वविवक्षायांतस्यस्वावच्छिन्ननिरूपितत्वसंबंधेनधर्मिपारतंत्र्येणान्वयात्तेनसंबंधेनतस्यगुणादौवाधात्तद्विशिष्टसत्तायागुणादिरिवयन्निष्ठसाध्याभाववद्वृत्तित्वेविशेषणत्वविवक्षणेतस्यस्वावच्छिन्नसंबंधताकत्वसंबंधेनधर्मिपारतंत्र्येणान्वयेनवृत्तित्वस्यापिनिरूपितत्वसंबंधेनान्[illegible]शवृत्ति

त्वावच्छिन्नसंबंधिताकविषयितेतयान्विष्टसाध्याभाववद्वृत्तित्वविशिष्टविषयितेतिशब्दाद्बोध्यते॥उक्तभ्रमविषयिताया
न्नसंबंधिनाकत्वसंबंधेनयान्विष्टसाध्याभाववद्वृत्तित्वस्य बाधान्नाद्यहानिः॥तादृशवृत्तित्वस्यादृच्छिन्नसंबंधिताचतादृशवृत्तित्व-
त्वावच्छिन्नाधेयत्वनिष्ठनिरूपकत्वेनाभिप्रायेणाह॥विशेषणीभूतेति॥विशेषणांतरमिश्रितेनविशेषणविशेषणमपिधर्मि
पारतंत्र्येणान्वेतीतिसूचनं॥व्यावर्त्यमानस्य॥विशेषितस्य॥विशेष्यसंबंधिताव्यावर्तकत्वाभावात्॥विशेष्यांशेस्वावच्छिन्नसं
बंधिनाकत्वसंबंधेनविशेषणांशेप्रकारीभूतव्यक्तिभाननियमात्॥निरूपकीभूयविषयितायाव्यावर्तकत्वेन॥निरूपितत्वसंबंधेनतादृश
वृत्तित्वविशिष्टस्यविषयिताविशेषणत्वे॥आश्रयतासंबंधेन॥विशेषणे॥स्यापे॥तादृशवृत्तित्वस्या
पि॥निरूपकतावच्छेदकीभूयविषयितायाव्यावर्तकत्वात्॥स्वावच्छिन्नस्वसमानाधिकरणनिरूपकताकत्वसंबंधेनविषयितावि
शेषणत्वादित्यर्थः॥वृत्तिविशेष्यतानिरूपकाधिकरणतेति॥पर्वतादावितिशेषः॥वारणासंभवादिति॥तादृशविषयिता
श्रयाधिकरणनिरूपितत्वयान्विष्टत्वाधेयतात्वेतत्त्रितयविशिष्टनिरूपितत्वाप्सतेरितिभावः॥साध्यतावच्छेदकावच्छिन्नप्रति

योगिताकत्वसंबंधेनसाध्यविशिष्टस्यव्यधिकरणधर्मावच्छिन्नाभावस्यसिद्धेति॥ननुवह्नित्वावच्छिन्नाभावनिष्ठप्रतियोगि
ताकत्वेनवह्नित्वेनवह्निघटोभयाभावावगाहिभ्रमविषयस्यतादृशसाध्याभावस्यप्रसिद्धतादृशभ्रमीयविषयतायाअसिद्धितो
चेन्न॥तादृशाभावस्यधूमइतिज्ञानस्यानुमितिप्रतिबंधकत्वाभावेनप्रतिबंधकत्वस्यतद्व्यर्थंतादृशाभावीयप्रतियोगिता
वच्छेदकोभयत्वसाधारण्यंवाच्यंतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्वसंबंधेनसाध्यतावच्छे
कावच्छिन्नसाध्यमात्रनिष्ठप्रतियोगिताकत्वसंबंधेनवाभावांशेसाध्यव्यभिचारज्ञानस्यैवप्रतिबंधकत्वोपगमस्यावश्य-
कत्वेनतत्संबंधेनसाध्यविशिष्टस्यतादृशभ्रमविषयसाध्याभावस्यासत्त्वादव्यर्थत्वनवकाशात्॥वह्नित्वादिनोभयाभावोतादृ-
शोभयत्वाभावएवेतितस्यसाध्यप्रतियोगिकत्वमेवनास्तीति॥केचित्॥प्रतिबंधकतावच्छेदककोटौतादृशादिति॥साध्या
भाववद्वृत्तित्वनिष्ठविषयताकत्वेनप्रतिबंधकत्वएवविषयतताविशेषणतयातादृशवृत्तित्वस्यावच्छेदकत्वंसंभवति॥तदेवन
प्रतिबंधकत्वस्यतादृशवृत्तित्वत्वेनघटावगाहिज्ञानसाधारण्यायतादृशवृत्तित्वनिष्ठत्वंविहायसाध्याभाववद्वृत्तित्वत्वावच्छिन्नवि

षयताकत्वेन प्रतिबंधकतायाः कक्ष्यत्वात्तदवच्छेदकको टौ तादृशवृत्तित्वस्याप्रवेशादितिभावः॥ विषयतापर्याप्तभावविवक्षणइति॥ अनुमितिप्रतिबंधकतावच्छेदिकायासमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन हेतुनिष्ठसाध्याभाववद्वृत्तित्वावगाहिज्ञानीयविषयतायाहेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टत्वात्तत्रोक्तपर्याप्तिनिवेशस्तथाचप्रतिबंधकतावच्छेदकविषयतायाःसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वहेतुनिष्ठसाध्याभाववद्वृत्तित्वोभयस्मिन्नेवपर्याप्ततयानाव्याप्तिः॥ नन्वसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वे प्रतिबंधकतावच्छेदिकायातादृशज्ञानीयविषयतातदवच्छेदकत्वमेवेतिपर्याप्तिविवक्षणेपतद्दोषतादवस्थ्यमितिवाच्यं॥ विशिष्टविषयकज्ञानेविशिष्टकपदार्थेषुविशेष्यविशेषणभावापन्नेषुसर्वेषुतज्ज्ञानीयविषयतात्वेनविषयतापर्याप्तिरस्तीतिमनानुसरणात्॥ नचतस्यनियुक्तिकत्वंशंक्यं॥ उपलक्षितवक्तृज्ञानविशिष्टवक्तृज्ञानयोर्वैलक्षण्यायउपलक्षितवक्तृज्ञानीयप्रकारतायाःकेवलविशेष्यपर्याप्तत्वस्यविशिष्टवक्तृज्ञानीयप्रकारतायाविशेषणविशेष्योभयपर्याप्तत्वस्यावश्यवक्तव्यत्वात्॥ प्रकृतानुमितिसामान्यपरमिति॥ नन्वनुमितौसाध्याभाववद्वृत्ति

त्वविषयतात्यन्ताभावत्वविवक्षयैवोक्तसमूहालंबनवारणाय सामान्यपदं व्यर्थं॥ ननु च घटत्वेनैवव्याप्यत्वेन हेतौ धूमकालीनपर्वतोवह्निमानित्यनुमिति
निरूपितायांतादृशपर्वतावच्छेदकीभूतधर्मावच्छिन्नाभाववानितिबाधज्ञाननिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यतायांतदवच्छेदकत्वस्यहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितेसतातदव्याप्तिरितिसामान्यपदोपादानमावश्यकमिति वाच्यं॥ साध्याभाववद्वृत्तित्वविषयत्वपूर्वोक्तविषयतान्यतरशून्यत्वस्यैवविवक्षितत्वात्॥ यत्तु तादृशस्थलेतादृशान्यतरविषयताकैवानुमितिर्नान्यातत्रतादृशानुमित्यप्रसिद्धेस्तथानिवेशासंभवइतितन्न॥ तादृशस्थलस्वीकारसिद्धांतेप्यव्याप्तेर्दुर्वारत्वात्॥ तादृशस्थलापलापस्यैवकर्तव्यत्वात्॥ अत्रकेचित्॥ यत्रवह्निसामान्याभाववद्वृत्तित्वेनधूमाभावस्यत्वेनानुमितिःप्रसिद्धातत्रतादृशान्यतरविषयिताशून्यानुमित्यप्रसिद्धेश्चाप्तिःसिद्धांतेहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितायांतादृशानुमितिप्रतिबंधकतावच्छेदकत्वाभावेनलक्षणमन्वयइतिविशेषइतिसामान्यपदंव्यर्थमित्याहुरित्यवदंति॥ वस्तुतस्तु॥ अनुमितिनिष्ठप्रतिबध्यतायांतादृशान्यतरविषयितावच्छिन्नलक्षणेनसकलदोषवारणेसामान्यपदंव्यर्थमितिप्रतिभाति॥ स्वरूपासिद्ध्यादीति॥ अथ धूमाभावत्वेनपर्वतादित्वरूपासिद्धिज्ञाननिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यतायास्तु ११६

लिंगकतत्साध्यकतत्संसर्गकानुमितित्वव्यापकत्वंनसंभवतितादृशानुमितित्वस्यद्रव्यंवह्निमत्त्वमेयंवह्निमदित्याद्यनुमितिसाधारण्यात्तत्व
त्वनिरुक्तस्वरूपासिद्धिज्ञानप्रतिबध्यतायाअभावात्॥ननुचतल्लिंगकत्वंप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकपरामर्शविशिष्ट
त्वमितिवाच्यं॥साध्यव्याप्यहेतुविषयकपरामर्शत्वस्यव्यभिचारज्ञानप्रतिबध्यतावच्छेदकत्वेनैवोपपत्तौलक्षणेतन्निवेशप्रयोजनाभावा
त्॥धूमाभाववान्यत्रेतिज्ञानानंतरमपिवह्निव्याप्यधूमवद्द्रव्यमित्यादिपरामर्शाद्द्रव्यंवह्निमदित्याद्यनुमित्युत्पत्तेः॥तादृशपरामर्शत्व
स्वरूपासिद्धिज्ञानप्रतिबध्यतावच्छेदकत्वाभावादितिचेदत्रकेचित्तु॥स्वरूपासिद्धिज्ञानस्यलाघवेनधर्मितावच्छेदकत्वासत्येवप्रति
बंधकत्वकल्पनानतुप्रतिबध्यतावच्छेदककोटौतल्लिंगकत्वमात्रस्यनिवेशेनप्रतिबध्यतायाव्यापकत्वभंगविरहात्॥ननुव्यभिचा
रज्ञानप्रतिबध्यतावच्छेदकस्यहेत्वाभासप्रथमलक्षणोक्तरीत्याहेतुधर्मिकव्यभिचारज्ञानविशिष्टा[illegible]वकत्वेनस्वरू
पासिद्धिज्ञानप्रतिबध्यतावच्छेदकस्यतथाऽन्यत्वेननव्यापकत्वभंगोदुर्वारइतिवाच्यं॥केवलान्वयिनिव्यभिचारस्यासंभवात्प्रकृत
लक्षणेतल्लिंगविषयकपरामर्शविशिष्टत्वरूपस्यवतल्लिंगकत्वस्यनिवेशनीयत्वात्॥तन्मात्रविषयकत्वस्यैवतदर्थत्वाच्चनव्यभिचा

रज्ञानानंतरलिंगदृश्यवगाहिपरामर्शजन्यानुमितौव्यापकत्वभंगः॥ इत्थंचधूमाभाववान्पर्वतइतिस्वरूपासिद्धिज्ञानानंतरंधूममात्रलिंग
कानुमित्यनुत्पत्तौतल्लिंगकानुमितित्वव्यापकत्वस्यस्वरूपासिद्धिज्ञानप्रतिबध्यतायांसत्यांस्वरूपइतिग्रंथकृदभिप्राय इत्याहुः॥भ्रम
स्याप्रामाणिकत्वादिति॥ द्वित्वेनसंसर्गतानभ्युपगमात्तादृश्या॰॰॰

हेतुसमानाधिकरणा[illegible]नुयोगिकइत्यादिविद[illegible]स्वमितितत्यागइतिध्येयं॥ **निवेशोनसंभवतीति**॥हेतुसमानाधिकरणसाध्यतावच्छेदकविशिष्टनिरूपितविषयितायामनुमितिप्रतिबंध[illegible]त्वाभावस्यैवव्याप्तितयातज्ज्ञानस्यचप्रतियोग्यविषयकसाध्यतावच्छेदकविशिष्टाभावविषयकतयाप्रतियोग्यविषयकप्रतियोगितावच्छेदकविषयकाभावबुद्धेरप्रसिद्धेस्तादृशव्याप्तिज्ञाननंसंभवतीतिभावः॥ **स्वनिरूपकहेतुसमानाधिकरणेति**॥स्वप्रतियोगिसाध्यनिष्ठस्वावच्छिन्नावच्छेदकतानिरूपितत्वस्वानुयोगिहेतुसमानाधिकरणाभावनिष्ठत्वेतदुभयसंबंधेनसाध्यनिष्ठप्रतियोगिताकत्वविशिष्टविषयतानिरूपितत्वेनानुगमोबोध्यः॥अग्रिमपरिष्कारेयत्किंचिद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसाध्यप्रतियोगिकसंबंधवद्विषयतानिरूपितत्वेनातादृशसंबंधवत्वंचस्वप्रतियोगिनिष्ठावच्छे[illegible]ताकत्वस्वानुयोगिहेतुसमानाधिकरणाभावनिष्ठत्वोभयसंबंधेनतेनवह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वस्यवह्नित्वावच्छि[illegible]केनिष्ठप्रतियोगिताकत्वसाधारण्यान्नादृशविशिष्टसाध्यप्रतियोगिकहेतुसमानाधिकरणाभावानुयोगिकत्वयोःसत्वेनवह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टस्यतादृशतयातेनसंबंधेनहेतुसमानाधिकरणाभावांशे

साध्यस्यभ्रममादायाव्याप्तिरितिशंकानिरासः॥साध्यप्रतियोगिकतादृशसंबंधभेदात्॥निरुक्तभ्रमविषयितायांनिरुक्तोभयसंबंधेन
तादृशसंबंधवह्निषयतानिरूपितत्वविरहात्॥एतन्मतेनिरुक्तविषयित्वनिष्ठानुमितिप्रतिबंधकतावच्छेदकत्वाभावघटितस्य
वानुमितिजनकज्ञानविषयत्वादिति॥अयंचाभ्युपगमवादः॥वस्तुतस्तु॥अनुमित्यविरोधित्वज्ञानस्यानुमितिहेतुत्वमेवन
संभवति॥तथाहि॥अनुमित्यविरोधित्वंतल्लिंगकतत्साध्यकतत्संसर्गकानुमित्यविरोधित्वंतादृशानुमितिजनकज्ञानाविरोधित्वंवा॥
तत्रतल्लिंगकत्वंननावश्याप्तिपक्षधर्मताविशिष्टतल्लिंगविषयकजन्यत्वंव्याप्तेरनिरूपणात्॥नापिपक्षधर्मताविषयकज्ञानजन्य
त्वंकस्मिंश्चिद्व्याभिन्नलिंगपरामर्शाभ्यांयत्रैकस्यसाध्यस्यानुमितिस्तत्रतल्लिंगकतत्साध्यकानुमितिसामान्याविरोधित्वस्यतादृशानुमितिज
नकज्ञानसामान्यविरोधित्वस्यवाकस्मिंश्चिदपिव्यभिचारेऽसत्वेनव्यभिचारिण्यतिव्याप्तेः॥अथतल्लिंगधर्मिकपक्षधर्मताज्ञानाव्यवहितो
त्तरत्वविशिष्टतत्साध्यकतत्संसर्गकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकताश्रयज्ञानसामान्याविरोधित्वंवक्तव्यं॥तथाचतादृशज्ञान
ताश्रयत्वंचनलिंगांतरमात्रपरामर्शस्येतिचेत्तर्हितादृशाश्रयप्रसंगः॥यतस्तादृशीजनकताव्याप्तिनिश्चयत्वावच्छिन्नैवतादृशजनक

ताज्ञानार्थं [illegible] व्याप्तिज्ञानमपेक्षितं व्याप्तिश्चेन्निरुक्तरूपातदादृशव्याप्तिज्ञानं नादृशज्ञानमपेक्षितमिति विभावनीयं सुधीभिः॥ ॥इति विशारदलक्षणं॥ ॥दीधितौ यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीया इति॥अत्र प्राचः एवं व्याचक्षुः॥ प्रत्येकमिति षष्ठीबहुवचनांतं तत्र [illegible] तेषां साध्याभावानामित्यर्थः निपातोत्तरमेवभेदार्थकविभक्तेरकल्पनान्नतत्तदभावानां प्रतिस्विकरूपेणसाजात्यनिरूपकत्वलाभः॥तत्तत्सजातीया इत्यत्र तेतेचतेसजातीया इतिकर्मधारयाश्रयणात्तत्तदधिकरणवृत्तित्वाभावानांप्रतिस्विकरूपेणसाजात्यानुयोगित्वलाभइति॥तन्नतत्तदस्यपूर्वतनयत्पदोपस्थापितार्थबोधकतायाःस्वरससिद्धायाभंगप्रसंगइतिपूर्वतनपदोपस्थापितसाध्याभावार्थकवीप्सितत्तच्छब्देनसजातीयपदस्यषष्ठीतयुरुषाश्रयणेनसाध्याभावानांप्रतिस्विकरूपेणसाजात्यानुयोगितयाऽन्वयएवयुक्तः॥ नचैवमपिसाध्याभावानांयच्छब्दोपस्थापितत्वाभावेनोक्तस्वरसभंगस्तुल्यइतिवाच्यं॥यावंत इत्यत्रयेयेइतिशब्दकल्पनयातद्भंगाभावात्॥पूर्वोपस्थितबोधकत्वस्वरसस्यभंगाभावाच्च॥प्रत्येकमितिप्रथमाबहुवचनांतंतत्तदधिकरणवृत्तित्वाभावाइत्यस्यविशेषणमतस्तेषांप्रतिस्विकरूपेणसाजात्यानुयोगितालाभः॥नचप्रत्येकमित्यव्ययीभाव

समासस्याश्रयतरादुक्तं प्रथमैकवचनमेवसाधुत्वार्थप्रयोगार्हमितिकथंतदुत्तरंबहुवचनमितिवाच्यं॥नामार्थयोरभेदान्वयसमान
वचनत्वस्यतंत्रत्वानुरोधेनबहुवचनकल्पनादित्यभिप्रायेणतथैवव्याचष्टेयावत्साध्याभावत्वेनेत्यादि॥द्वयोर्णामेत्यंतेन॥कू
टाधिकरणतायाःक्वचिदप्यसत्वेनेति॥नन्वस्मिन्लक्षणेसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकस्यैवसाध्याभावस्यनिवेश
नीयतयावह्निसाध्यकेतादृशसंयोगसंबंधावच्छिन्नतन्नदृष्टनित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणतायायुणात्वेवप्र
सिद्धिःसंभवतितत्रहेतुतावच्छेदकसंयोगसंबंधेनद्रव्यत्वसिद्ध्याव्याप्तिसत्वेपिकूटाधिकरणाप्रसिद्धिकथनंनिरभिप्रायमेवेतिचेदत्र
केचित्॥वह्निपदस्यवह्नित्वप्रकारकप्रमाविषयत्वरूपसंबंधावच्छिन्नप्रतियोगिताकतादृशकूटाधिकरणाप्रसिद्ध्यावत्व
तात्पर्यं॥तथापीति॥यद्यपिनिरुक्तकूटरूपसंबंधाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वंतदुक्तिकंसर्वत्रैवव्याधिकरणधर्मावच्छिन्नाभावस्यकिंचिद्विशिष्टसाभावत्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेनतदन्यत्वस्यकस्मिन्नपिव्यधिकरणधर्मावच्छिन्नाभावेऽसंभवात्॥तथापिचक्रवर्तिलक्षणोक्तरीत्याविशिष्टाभावोविशिष्टाधिकरणत्वाभावरूपएवेतिमतानुरोधेनेयमुक्तिरितिध्येयं

वस्तु तस्तु॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नायावत्यः प्रतियोगिताः प्रत्येकं [illegible] जातीयानां तत्तन्निरूपकीभूताभावाधिकरणधर्मावच्छिन्नत्वनिष्ठतत्तत्प्रतियोगितानां निरूपकीभूतायेऽभावास्तद्वत्त्वं व्याप्तिस्तत्र साजात्यं [illegible] धिकरणधर्मावच्छिन्नत्वं स्वसमानाधिकरणधर्मावच्छिन्नाया प्रतियोगितानत्तदन्यत्वं व्यधिकरणधर्मावच्छिन्नत्वं तु स्वसमानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितानत्तदन्यत्वरूपं व्यभिचारितात्पर्यं॥ समनियतभाव [illegible] वायितया प्रमेयत्ववद्वह्नेस्तन्निरुक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहेपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वशरीरनिविष्टसमानाधिकरणधर्मावच्छिन्नेत्यस्य व्यधिकरणधर्मानवच्छिन्नत्वसमानाधिकरणधर्मनिष्ठावच्छेदकतेत्यर्थविवक्षयातन्निर्वाहो ज्ञेयः॥ [illegible] इति॥ एकैकमनसाधारणस्यतद्दोषणाघटितलक्षणस्यसंदेपिमतद्वयसाधारण्येनतन्निवेशानंभवानंदानांसम्यगेवेतिकेचित्॥ धूमाभावीयप्रतियोगितायाः [illegible] न्यूनवृत्तिधर्मानवच्छिन्नाव्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितेवेतिताद्दशाभावमादायातिव्याप्तेराह॥ अनिरुक्तवृत्तीति॥ विरुद्धव्याप्तमितिसमानाधिकरण्यघटितमित्यर्थः॥ व्याप [illegible] ताचेति॥ साध्यवन्निष्ठाभावीयप्रतियोगितेत्यर्थः॥ समवायेनद्रव्यत्वसा

ध्यक इति॥वह्निसाध्यकविषयतयाऽनुव्यापकस्यज्ञानस्यसाध्यतावच्छेदकसंयोगेनाभाव[illegible]न्वयितयासमनियतानांवैक्यमतेऽग
नाभावत्वेनतत्तज्जातीयंतदधिकरणवृत्तित्वस्यव्यधिकरणधर्मावच्छिन्नाभावमादायलक्षणसमन्वयःसंभवतीतितत्साध्यकस्थलत्या
गः॥वह्निमानिति॥अत्राप्युक्तयुक्त्यैवगुणसाध्यकस्थलांतरानुसरणं॥व्यापकतावच्छेदकताघटकसंबंधावच्छिन्नेति॥यद्यपि
साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वस्यप्रतियोगितावच्छेदकतायांनिवेशेपिदर्शितभावव्याप्तिसंभवतितथापिपार्थिवत्वा
दिविशेषितस्येतिदीधित्यनुरोधात्त्यागः॥तन्निवेशेऽयोगोलकावृत्तित्वावच्छिन्नाभावस्यलक्षणायटकत्वात्साध्याभाववद्यत्किंविशे
षवृत्तित्वाभावमादायेवातिव्याप्तेःप्रतियोगितायांवृत्तित्वस्यावश्यकत्वात्तेनदेशकालसंपर्कोपार्थिवत्वादिविशेषितनिर्धूमवृत्तित्वाभा-
वानुसरणस्यनिर्बीजत्वात्॥तादृशाभावस्यप्रामाणिकत्वेपिलक्षणघटकतासंभवादिति॥अथेश्वरज्ञानस्यसंयोगसं
बंधघटितव्यापकतावच्छेदकत्वंसाध्याधिकरणनिरूपितनिरवच्छिन्नाधेयतावदभावीयप्रतियोगिताधिकरणेसंयोगेनविद्यमानं-
सद्यदवच्छेदकंतदन्यत्वरूपंसंयोगेनयद्धर्मविशिष्टानधिकरणंसाध्यंतदन्यत्वरूपंसाध्यवद्यत्किंचिद्यत्संबंधसंयोगेनस्वावि

शिष्टसामान्यकान्यत्वरूपवान्[illegible]र्वचनत्वान्नतु त्रिविधमपिप्रमेयत्वेऽक्षतंप्रमेयत्वंतद्धर्म्याऽपिप्रतियोगितयाऽधिकरणेसंयोगेनविद्यमानंमदवच्छेदकंनवासंयोगेनप्रमेयत्वविशिष्टंप्रसिध्यतीतिचेन्न॥ दर्शितद्वितीयविधायांवह्निमान्धूमादित्यादौवह्निद्रव्यत्वाभयत्वावच्छिन्नस्यसंयोगेनव्यापकतापन्निस्तादृशोभयत्वविशिष्टस्यसंयोगेनाधिकरणाप्रसिद्धेरितितत्संबंधावच्छिन्नाभावमादायाव्याप्तिवारणायनिरुक्ततद्भिन्नत्वेसतितत्संबंधावच्छिन्नाधेयतावच्छेदकत्वंवक्तव्यं॥ आधेयतावच्छेदकतावच्यापकतावच्छेदकताघटकसंबंधावच्छिन्नाया[illegible]अन्यथादर्शितोभयत्वस्यकालिकसंबंधावच्छिन्नाधेयतावच्छेदकत्वेनतद्दोषतादवस्थ्यात्तथात्वसंयोगेनमदे[illegible]च्छेदकत्वंनसंभवतितस्यसंयोगसंबंधावच्छिन्नाधेयतावच्छेदकत्वाभावात्॥ नच्चपूर्वमनेसमवायितयाप्रमेयत्व[illegible]तन्मतेदर्शितद्वित्वावच्छिन्नाभावस्यसमनियताभावैक्यमतेगगनाभावत्वेननाव्याप्तिरितिवाच्यं॥ तदनैक्यमतएवलक्षणाघटकत्वाभिधानात्॥ अनैक्यमतेसमवायितयाप्रमेयत्ववद्भेदस्यव्यधिकरणधर्मावच्छिन्नत्वस्योपपादितत्वाच्च॥ वस्तुतस्तु॥ दर्शितत्रिविधविधासुप्रथमविधायांसाध्यत्वंह्रदीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशावश्यकतयाद्वितीयविधायांसाध्यतावच्छेदकसंबं

धेनयद्धर्मविशिष्टानधिकरणत्वनिवेशावश्यकतयातृतीयविधायांसाध्यतावच्छेदकसंबंधेनसाध्यवद्यत्किंचि[illegible]क्त्यसंबन्धत्वनिवेशावश्य
कतयाविषयितासंबंधेनसर्वसाध्यकनित्यज्ञानत्वहेतुकेविषयितासंबंधघटितत्रिविधस्यापिव्यापकतावच्छेदकत्वस्याप्रसिद्ध्यासाध्यवन्नि
ष्ठाभावीयप्रतियोगितासामान्येयद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नलोभयाभावस्तत्व
रूपमेवसाध्यव्यापकतावच्छेदकत्वंवक्तव्यंयद्धर्मसामानाधिकरण्यघटकयद्धर्माधिकरणत्वंव्यापकतावच्छेदकताघटकसंबंधे
नतथाचैतादृशसंयोगसंबंधेनव्यापकतावच्छेदकत्वंनप्रमेयत्वस्येत्यवधेयं॥लक्षणस्थ[illegible]तयेति॥कपिसंयोगाभावस्यकेव-
लान्वयितेपिनतस्यसमनियतानावैक्यमतेगगनाभावत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वंप्रतियोगिवैय्यधि[illegible]ण्याद्यटि
तसननैयत्यघटकव्यापकताक्रांतयोरैक्यादित्यवधेयं॥सत्तासाध्यकाव्याप्तिवारक[illegible]संबंधेनकस्यचिदधिकरणेवर्त
मानत्वविशेषणेस्वरूपसंबंधेनवर्तमानत्वविवक्षणेत्याह॥कपिसंयोगाधिकरणत्वाभावेति॥आत्मत्वहेतावव्याप्तिरिति॥सा-
ध्याभाववत्तायांदैशिकविशेषणतासंबंधावच्छिन्नत्वनिवेशाभिप्रायेणेदंयदिसाध्याभावत्वविशिष्टाधिकरणत्वंनिवेश्यतेस्वप्रतियोगिता

वच्छेदकविशिष्टस्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेन तदधिकरणत्वं निवेश्यते तदानायं दोषः॥ रूपान्यत्वविशिष्टगुणत्वसाध्यके यावत्साध्याभावानधिकरणरूपासमवेतत्वावच्छिन्नाभावस्य रूपे प्रतियोगिवैय्यधिकरण्यसंभवान्नातिव्याप्तिरतोऽतदधिकरणत्वमिति॥ आकाशत्वाभावाभावे साध्य इति॥ आकाशाभावस्य कालिकसंबंधेन व्याप्यवृत्तित्वात्तेन संबंधेन तदभावस्य काले किंचिदवच्छेदेनाप्यसत्त्वान्न प्रतियोगिवैय्यधिकरण्यनिरूपकाप्रसिद्धिरितिकालिकसंबंधावच्छिन्नाकाशाभावाभावसाध्यकस्थलपरित्यागः॥ आकाशावच्छेदनेति॥ आकाशस्यापि स्वरूपसंबंधेन मूर्तद्रव्यवृत्तित्वात्तदधिकरणसंबंधित्वमाकाशस्याक्षतमिति ध्येयं॥ जन्यज्ञानविषयत्वसाध्यक इति॥ यद्यपि विषयतया जन्यज्ञानसाध्यकेऽप्यव्याप्तिः संभवति तथापि साध्यतावच्छेदकसंबंधावच्छिन्नाभावस्यैवन्मतेनिवेशाद्विषयताया छेदकनियामकतामतेतत्संबंधावच्छिन्नाभावाप्रसिद्धेस्तत्संबंधेन साध्यतानभ्युपगमाभ्युपायेनतत्यागः॥ एतद्रूपान्यत्वविशिष्टसत्तावानिति॥ अत्रापि रूपान्यत्वप्रयोजनंपूर्ववदेव॥ प्रतियोग्यप्रसिद्धेति॥ यद्यपि मानसप्रत्यक्षताभावैक्यमतेतत्प्रसिद्धिः संभवति तथापि तदनधिकरणाप्रसिद्धिर्दुर्वारा॥ अथवायादृशप्रतियोगितेतिविवक्षणावश्यकत्वान्नासंगतिः

स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणाइति॥व्यधिकरणधर्मावच्छिन्नाभावस्यस्वप्रतियोगितावच्छे
दकावच्छिन्नसमानाधिकरणत्वान्नलंग्रहायस्वप्रतियोगीति॥तादृशसामानाधिकरण्यमव्याप्यवृत्तिसंयोगाभावादौप्रसि द्धमितिस्वपदे
नतंगृहीत्वातदन्यत्वंलक्षणघटकाभावेउपपादनीयं॥भवानंदोक्तदूषणमाशंक्यनिराकुरुते॥नचतथाप्येतदभावभिन्नमिति॥
साध्यप्रतियोगिनःसप्तमपदार्थत्वस्वीकारेणायेतदिति केचित्॥असंभवस्यैवप्रसंगादिति॥अत्रकेचिद्वह्निमान्नगनादित्यवृत्ति
हेतोर्लक्ष्यत्वमनाभिप्रायेणदीधितिकारीयाव्याख्याभिधानसंगतेमाङुः॥नथाचेति॥अथायंनिष्कर्षोनसंभवतितादात्म्यसंबंधेन
प्रमेयसाध्यकेलक्षणघटकत्वेनाभिमतसमवायित्ववाच्यत्वत्वादिनाप्रमेयत्ववद्भेदस्यप्रतियोगितावच्छेदकसमवायि
त्ववाच्यत्वत्वादौसाध्यतावच्छेदकतादात्म्यसंबंधघटितव्यापकतावच्छेदकत्वाभावादत्रब्रूमः॥समवायित्वावच्छिन्नप्रमेयत्वनि
ष्ठावच्छेदकताकप्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्याप्यभ्युपगमान्नादृशभेदप्रतियोगितावच्छेदकताकप्रमेय-
त्वादौसाध्यव्यापकतावच्छेदकत्वसत्वान्नादृशभेदमादायैवलक्षणसमन्वयः॥नचतादृशभेदस्वीकारेकपिसंयोगाभाववान्मेयत्वादित्यादो-

घटत्वावच्छिन्नाकपिसंयोगाभावत्वनिष्ठावच्छेदकतातन्निरूपककपिसंयोगाभावत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदमादायद्रव्यस्यापिकपिसंयोगात्मकाभावनिष्ठप्रतियोगिवैय्यधिकरण्यनिरूपकतापत्त्यातत्रहेतोर्दृत्तेरव्याप्तिरितिवाच्यं॥व्यधिकरणधर्मावच्छिन्नत्वव्यतिरेकिनिष्ठत्वोभयाभाववतीयत्साश्रयनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकतादाश्रयत्वेनचसाध्यव्यापकतावच्छेदकत्वविवक्षणात्॥वह्न्यादिसाध्यकेवह्नित्वादिनाघटवद्भेदीयतादृशप्रतियोगितावच्छेदकतावच्छेदकतामादायैववह्नित्वादिनाघटाभावादिर्लक्षणघटकत्वमुपपादनीयं॥व्यधिकरणधर्मावच्छिन्नावच्छेदकताकावच्छेदकताकभेदानभ्युपगमेतुसाध्यसाधनभेदेनव्याप्तिभेदमभ्युपगम्यसाध्यतावच्छेदकव्यापकधर्मावच्छिन्नप्रतियोगिताकाभावेप्रतियोगितावैय्यधिकरण्यघटितमेवलक्षणं॥साध्यतावच्छेदकव्यापकत्वंव्यावर्त्यसत्त्वेधर्म्यव्यापकत्वंयत्किंचित्साध्यव्यक्त्यसंवद्धभिन्नत्वरूपंग्राह्यंतेननद्वित्वादिनासाध्यभेदमादायाव्याप्तिः॥प्रतियोगितावैय्यधिकरण्यंचप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताश्रयवृत्तिप्रतियोगिताकभेदवृत्तित्वरूपंग्राह्यमितिनानुपपत्तिलेशोपि॥साध्यवत्त्वेतद्रूपतद्रूपोभयत्वावच्छिन्नाभावसत्त्वेनेति॥इदंचसमनियताभावांशेक्याभिप्रायेणतेनताद्

वाभावस्य केवलान्वयितया गगनाभावस्यापि तादृशत्वेन तस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयेऽपि नक्षतिः॥ व्याप्यवृत्तीति॥ ननु तथापि तदूपभिन्नत्वेनैव तदूपतदन्यतराभावमादाय व्याप्तिरित्यत आह॥ स्वव्यापकेति॥ अव्याप्तिर्गतिलिखनं नयुज्यत इति॥ अत्रेदं चिन्त्यं तादात्म्यसंबंधेन साध्यैकलक्षणसमन्वयाद्व्याप्तिलिखनं युज्यत एव नहि तत्त्वलक्षणविशेषवृत्तित्वविशिष्ट साध्यभेदस्य व्याप्यवृत्तित्वं शक्यते वक्तुं तथासति साध्यव्यापकत्वादौ भेदघटितप्रतियोगिवैय्यधिकरण्यस्यापि केवलिकरत्वापत्तेः भेदस्य व्याप्यवृत्तित्वमिति प्राचेणदीधितिकारीयाव्याप्तिलिखनस्यसंगमयितुं शक्यत्वाच्चेति॥ हेतुवृत्तितानवच्छेदकेति॥ ऋदवृत्तित्वादित्यर्थः॥ लाघवान्निवेशयितुमुचितमिति॥ ननु वह्निमान्धूमादित्यादौ वह्नित्वादिनाघटाभावसजातीयस्यतादृशाभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नतादृशवृत्तित्वत्वव्यापकप्रतियोगिताकाभावस्याप्रसिद्ध्याऽसंभवएववक्तुमुचितः॥ नचतादृशवृत्तित्वत्वेनतादृशवृत्तित्वघटान्यतराभावस्यैवप्रसिद्धिरितिवाच्यं॥ तस्यस्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेनतदन्यत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहात्॥ नच्चसमनियताभावेक्यमेवतस्यगगनाभावत्वेनसाध्याभावसाजात्यंसंभवतीतिवाच्यं॥ तथाचिन्त्यो

क्यमतेः संभवस्य दुर्वारत्वादिति चेन्न॥ दृत्तित्वव्यापकधर्मावच्छिन्नेत्यनेन साध्याभाववद्वृत्तित्वविशिष्ट[illegible]तावच्छेदकधर्मावच्छिन्नत्वस्य विवक्षणाद्व्यर्थत्वेन साध्याभाववद्वृत्तित्वाभावप्रसिद्धेर्हेत्वाधिकरणावच्छिन्नाभाववारणस्य च संभवात्॥ अत एवगौरवोक्तिरपि यथाश्रुतेस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकावच्छिन्नव्यासज्यवृत्तित्वाश्रयधर्मानवच्छिन्नत्वतादृशवृत्तित्वव्यापकत्वयोर्हेत्वभावव्यापकधर्मावच्छिन्नत्वतादृशवृत्तित्वव्यापकत्वयोः साध्यसमानाधिकरणत्वसंभवेऽपि बोध्यं॥ हेतुतावच्छेदकसंबंधानुयोगितानिवेशतस्संबंधनिवेशाद्गौरवमतोऽनुयोगितेति॥ दीधित्यनुसारेणात्रापि॥ विशेषणविशेष्यसंबंधस्य॥ गुणकर्मान्यत्वसामानाधिकरण्यस्य॥ परंपरासंबंधेन॥ स्वाश्रयाश्रयत्वसंबंधेन॥ यदि च सत्तादेरेवेति॥ हेतुतावच्छेदकेवृत्तितावच्छेदकत्वाभावनिवेशविशिष्टहेतुतावच्छेदककस्थलेऽव्याप्तेरतोऽधिकरणतापरिष्कारानुधावनं॥ ॥ इतिमिश्रप्रथमलक्षणं॥ ॥ व्यापकतासाध्यतावच्छेदकसंबंधघटितात्वेति॥ अत्र यद्यपि प्रतियोगितावच्छेदकसंबंधघटितव्यापकत्वनिवेशसंभवस्तथापिसाध्याभावव्यापकत्वविशेषणवैयर्थ्यापत्तेस्तदुपेक्षा॥ तदनिवेशेसाध्याभावसामानाधिकरण्यमात्रनिवेशेधूमाभावसमानाधि

धिकरणवत्त्वभावमादाय धूमवान्वह्नेरित्यादावतिप्रसंगोवाच्यः सचननसंभवतिप्रतियोगितावच्छेदकसंबंधेनव्यापकत्वकल्पेः योगोलकान्यत्वाभावस्यापिलक्षणघटकत्वात्॥साध्यतावच्छेदकसंबंधेनतन्निवेशेचतस्यातथात्वादयोगोलकादृत्तेरभावस्यलक्षणघटकत्वेपिसंयोगसंबंधावच्छिन्नप्रतियोगिताकतादृशाभावस्यगुणादावपिसत्वात्तदंतरभावेणैववत्त्वभावस्यधूमाभावसामानाधिकरण्यंसंभवतीतिध्येयं॥**अनवच्छिन्नदेशिकविशेषणतासंबंधेनव्यापकत्वलाभायेवेति**॥इदमवचिंत्यमेवंसतिइव्यत्वादौसाध्येप्रमेयमित्याकारकजन्यज्ञानस्यहेतुतायांतादृशहेत्वभावस्यव्यापकत्वापत्तिस्तदीयनिरवच्छिन्नदेशिकविशेषणतायाअप्रसिद्ध्या[illegible]तेयोगिकत्वसाध्याभाववद्घटादिकंचिद्व्यत्वयनुयोगिकत्वोभयाभावस्तदन्यत्वमेवनिरवच्छिन्नदेशिकविशेषणतासंबंधेनसाध्याभावव्यापकत्वमितिविवक्षणावश्यकतयाअनादरस्येतभावभिन्नस्येत्यर्थकमित्यनेनविवक्षितंभावभिन्नत्वंव्यर्थमिति॥क्रियामात्रस्यैवकालोपाधित्वमतेधूमवान्वह्नेरित्यादावतिव्याप्त्यभावान्महाकालभिन्नःकालत्वादिति॥**स्वयमूह्यमिति**॥ज्ञानवान्द्रव्यत्वादित्यादौविषयितयाद्रव्यत्ववज्ज्ञानाभावस्यसा

विशेषणत्वेनाप्ययंदोषोवारयितुंशक्यते॥एवंचेतल्लक्षणस्यकूटघटितलक्षणाक्षेपकत्वमपिसाधुसंगच्छते॥यथासर्वलक्षणानामप्याक्षेपकत्वापत्तेर्नसम्भवात्कूटातिरिक्तमकलविशेषणमत्वएवाक्षेपकतायावाच्यत्वात्तथापितादृशविशेषणोपादानेगौरवंस्यात्॥कूटघटितलक्षणाक्षेपकत्वंविनरलक्षणापेक्षयाप्रचुरसजातीयविशेषणघटितत्वादेवनिर्दोषसाजात्यस्यकथमपिवक्तुमशक्यत्वात्॥**यद्वि**साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशपक्षएवलाघवं॥तथाहिसाध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावनिवेशेवह्निसाध्यकेवह्नित्वेननइह्निघटान्यतराभावमादायाव्याप्तिवारणायप्रतियोगितायांस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वंदेयमथचद्रव्यत्वत्ववाच्यत्वत्वादीनामपिसाध्यव्यापकतावच्छेदकतयातत्तद्वच्छिन्नाभाववद्वृत्तित्वसमनियतप्रतियोगिताकाभावकूटमेवव्याप्तिशरीरेनिवेशनीयमित्युच्यतेतदापिसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशेप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यैवनिवेशनीयतयादृत्तियासंबंधेनसाध्यतायांतत्संबंधावच्छिन्नप्रतियोगिताया[illegible]व्याप्त्यापत्तेर्लाघवमकिंचित्करं॥**नच**लक्षणलाघवानुरोधेनवृत्तिनियामकसंबंधसमभावप्रतियोगितावच्छेदकत्वमुपगमेत

नसंबंधेनसाध्यतानभ्युपगमोवान्याय्यस्तथासतिव्याप्तेःपदार्थांतरत्वस्यैवयुक्तत्वात्॥ **व्याप्यवृत्तिरिति**॥ननुत्रव्याप्यवृत्तित्वनिवेशो विफलःप्रतियोगिवैय्यधिकरण्याघटितसाध्यव्यापकतायाएवनिवेशनकपिसंयोगा[illegible]टकत्वादितिचेन्न॥स्वलक्षणोक्तरीत्यालाघवेनप्रतियोगिवैय्यधिकरण्यघटित[illegible]निवेशनीयत्वात्॥ **हेतुदृष्टान्ततावच्छेदकीभूतयत्किंचिद्धर्मेति**॥तादृशधर्मोआलोकादृत्वादिस्तत्रहेतुदृष्टान्ततावच्छेदकत्वकथनंतदवच्छिन्नाभावस्यहेतुदृष्टान्तत्वसूचनायेतिध्येयं॥ **तत्तदभावपदवृत्तित्वत्वघटकेति**॥अत्रघटकतंस्वाविच्छेदकप्रतीतिवृत्तितत्तदभाववदवृत्तित्वत्वरूपविशिष्टनिरूपितविषयितात्वरूपंज्ञेयं॥ **वत्त्याद्यभाववत्त्वेरिति**॥निष्ठत्वंषष्ठ्यर्थस्तस्यतदभावत्वेऽन्वयः॥ **तदवच्छिन्नाभावस्यापि**॥वत्त्वभावत्वावच्छिन्नाभावस्यापीत्यर्थः॥ **तादृशतया**॥तदभाववदवृत्तित्वत्वघटकधर्मावच्छिन्नप्रतियोगितानिरूपकतया॥ **यद्यपिवृत्तिमद्वृत्तिरित्यत्रवृत्तित्वस्यस्वरूपसंबंधेनैवव्याप्यवृत्त्यात्मकाभावस्यवृत्तिमद्वृत्तित्वमेवनसंभवति॥तथापिभा[illegible]पितृपसंबंधोस्तीत्यभिप्रायेणेदं॥ **यद्वा वत्त्यधिकरणत्वात्मकाभावस्यस्वरूपसंबंधेनवृत्तिमत्ताद्वत्त्यधिकरणत्वाभाववत्त्वभावयोःसमनैयत्याद्वत्त्यधिकरणत्वमपिवन्**

धाभाव व्यापकतयातमादायातिव्याप्तिवारणाय प्रतियोगितावच्छेदकतायांहेतुतावच्छेदकताघटकसंबंधावच्छिन्नत्वमयमात्मज्ञानादित्यादौविषयतयाहेतौसाध्याभाव व्यापकात्मत्वाभावप्रतियोगितावच्छेदकात्मत्वत्वस्यविषयितासंबंधेनहेतुतावच्छेदकत्वादतिव्याप्तेर्वारणाय व्यापकतावच्छेदकतायांहेतुतावच्छेदकताघटकसंबंधावच्छिन्नत्वंनिवेशनीयं॥एवंयद्यत्संहेतुतावच्छेदकताघटकसंबंधेनयद्यदवच्छिन्नत्वंहेतुतावच्छेदकसंबंधेननिवेशनीयंतत्सयोजनंस्फुटमेवेत्येवमित्यर्थः॥हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्धेति॥विषयितासंबंधस्याभावप्रतियोगितानवच्छेदकत्वाभिप्रायेणेदं॥अन्यथाविषयितासंबंधावच्छिन्नप्रतियोगितायांतदवच्छिन्नत्वस्यसिद्धेत्यसंगतंस्याद्॥विषयितासंबंधस्याभावप्रतियोगितावच्छेदकत्वेतुव्यापकीभूताभावप्रतियोगितायामुभयसत्वेनयुरुधर्मावच्छिन्नहेतुकस्थलेऽव्याप्तिरिष्टव्या॥अप्रतीकारादितिः॥ननुहेतुतावच्छेदकानवच्छिन्नत्वमित्यनेनहेतुतावच्छेदकव्यापकधर्मानवच्छिन्नत्वनिवेशेनकंबुग्रीवादिमत्वावच्छिन्नहेतुकाव्याप्तिप्रतीकारःसंभवतीतिचेन्न॥तथासतिद्रव्यंसत्वादित्यादावतिव्याप्तेः॥द्रव्यत्वाभावकविशिष्टसत्ताभावप्रतियोगितायांसत्तात्वव्यापकविशिष्टसत्तात्वावच्छिन्न

त्वसत्त्वेनोभयाभावसत्त्वात्॥यदिचहेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नत्वमेवनिवेश्यंविशिष्टसत्त्वस्यसत्त्वात्

वच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिरित्युच्यतेतदासिद्धांतएवपर्यवसानमितिध्येयं॥ ॥इतिमिश्रलक्षणानि॥ ॥ वृत्तिमद्वृत्तयइत्यत्रहेतुतावच्छेदकसंबंधेनवृत्तिमत्त्वनिवेशमात्रस्यप्रयोजनंदीधितिकृतादर्शितंनतुवृत्तिमद्वृत्तित्वविशेषणस्येत्यतास्वयंतत्प्रयोजनंदर्शयति॥ वृत्तिमद्वृत्तित्वानुपादानइति॥जगत्संबंधित्वस्येति॥स्वयंवृत्तिपदस्यसंबद्धत्वमित्यर्थकरणात्तदनुरोधेनेयमुक्तिः॥नानाव्यक्तिसाध्यकइति॥नन्वेकव्यक्तिसाध्यकेएतद्रूपवानेतद्वानादिरूपान्यतराभावमादायाव्याप्तिसंभवेनानाव्यक्तीत्यसंगतमितिचेन्न॥वह्नित्वेनवह्निघटान्यतराभावमादायाव्याप्तेर्वारणायस्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्यप्रतियोगितावि शेषणत्वावश्यकत्वेनतादृशाभावस्यलक्षणाघटकत्वात्॥यद्वासाध्यमात्रप्रतियोगिताकाभावनिवेशेनैकव्यक्तिसाध्यकेऽव्याप्तिरितिनानाव्यक्तीत्युक्तिः॥अतएवरूपघटोभयाभावमादायतत्राव्याप्तिसत्त्वेपिनक्षतिः॥तार्णतार्णदहनोभयाभावमादायेति॥यद्यपिसाध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वस्यसाध्याभाव

त्यभावाभावइत्यभिप्रायः॥ घटवृत्तित्वतावच्छिन्नसाध्यकेतादात्म्येनघटत्वव्यापकादिहेताविति॥ घटत्वव्यापकत्वंपरिचायकंतत्परिचितप्रमेयत्ववाच्यत्वादिकंतादात्म्येनहेतुःस्वरूपसंबंधावच्छिन्नघटवृत्तित्वंसाध्यं॥ समवायसंबंधावच्छिन्नघटवृत्तित्वस्यसाध्यत्वेघटनिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वाभावरूपघटावृत्तित्वावच्छिन्नाभावस्यलक्षणघटकत्वासंभवात्तादृशघटावृत्तित्वस्यअत्यंतसमवेतवृत्तित्वस्यवासाध्याभाववद्वृत्तित्वस्यघटकत्वासंभवात्॥ घटासमवेतत्वस्यतद्घटकत्वेपिस्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्यैववृत्तित्वाभावस्यनिवेशनीयतयावाच्यत्वादिसाधारणतद्वच्छिन्नस्यस्वरूपसंबंधेनाभावाप्रसिद्धेः॥ अथवृत्तित्ववृत्तीत्यत्रसाध्याभाववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नयावदाधेयतावृत्तित्वविवक्षणात्स्वरूपसंबंधावच्छिन्नघटवृत्तित्वसाध्यकेपिनाव्याप्तिः[illegible]साध्याभाववद्घटनिरूपिततादात्म्यसंबंधावच्छिन्नवृत्तित्व[illegible]तादात्म्यरूपेघटावृत्तित्वस्याभावात्॥ नैवंघटनिरूपिततादात्म्यस्वरूपान्यतरसंबंधावच्छिन्नवृत्तित्वस्यैवसाध्यत्वाद्घटस्यतादृशसाध्याभाववत्त्वाभावात्॥ अथसाध्याभाववद्वृत्तित्वमात्रनिष्ठत्वेनधर्मिविशेषणत्वेनायंदोषोघटावृत्तित्वस्यतन्मात्रनिष्ठत्वाभावात्॥

तादृशावृत्तित्वभावनि[illegible]वृत्तित्वव्याप्यत्वंननुतदितरावृत्तित्वंविवक्षितसंबंधेनहेतुतेसंबंधावच्छिन्नवृत्तित्वस्यलि
षयतावच्छेदकत्वेनाप्रसिद्धेश्च॥विषयरूपत्वेनतदितराप्रसिद्धेरिति[illegible]॥तत्तत्साध्याभाववद्वृत्तित्वत्वसमानेयत्वंधर्मेनिवेश्यत
द्वच्छिन्नत्वस्यप्रतियोगितायांनिवेशापेक्षयाप्रतियोगितायांतत्तत्साध्याभाववद्वृत्तित्वसमनेय्यत्वनिवेशस्योचितत्वात्॥विष-
क्षितसंबंधेनहेतुतायांसाध्याभाववद्वृत्तित्वत्वस्यजन्यद्वेषयतात्वरूपत्वयाविवक्षितावषयत्वरूपत्वमानेयतधर्मावच्छिन्न
तियोगिताकाभावाप्रसिद्धेश्च॥एतेनहृदवृत्तित्वत्वेननिर्धूमवृत्तित्वसामान्याभावीयप्रतियोगितायानिर्धूमवृत्तित्वसामान्येस्वीकारे
धर्मसमनेयत्वनिवेशएवोचितोऽन्यथातादृशाभावमादायातिव्याप्तेर्दुर्वारतेतिनिरस्तं॥अनेनैवदोषेणतादृशावृत्तित्वंनिरर्णीयत्व
त्वं॥साध्याभा[illegible]त्तेति॥स्वनिष्ठमुख्यविशेष्यताशून्यप्रतीतीतिवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्व
त्वेत्यर्थः॥तत्तदिति॥यद्यपितत्तद्व्यक्तिवेनाभावनिवेशेसंबंधावच्छेदकसंबंधावच्छिन्नप्रतियोगितानेयसामान्याभावसाध्यके
गगनाद्यात्मकसाध्याभावाधिकरणवृत्ति[illegible]सिद्धं॥तथापिसाध्याभावत्वरूपायावत्योऽनुयोगिताःप्रसिद्धास्तत्तद्व्यधिकरणवृत्ति-

त्वाभावाया[illegible]तइतिनिवेशान्नदोषः॥अनुयोगित्वप्रतियोगित्वयोरनुयोगिप्रतियोगि[illegible]परिचा
यकतयातत्परिनि[illegible]च्छिन्नतत्तन्निष्ठतत्तत्संबंधावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधिकरणवृत्तित्वाभावाप्रवनि
वेश्याः॥नानाविपक्षेऽप्रसिद्धिरिति॥नन्वेकविपक्षेपतितघटभिन्नंपटत्वादेतद्घटवृत्तित्वाभावीयप्रतियोगितायास्तन्न
त्साध्याभावव[illegible]त्तित्वव्याप्यत्वेपितन्नत्साध्याभावांतःपातिव्यधिक[illegible]धर्मावच्छिन्नाभाववद्वृत्तित्वव्यापकत्वविरहात्समनेय्य
त्वाप्रसिद्धिरस्तीतिनानाविपक्षे[illegible]व्यावर्तकमितिचेन्न॥व्याप्यत्वाप्रसिद्धिप्रयोज्यायाः समनेय्यत्वाप्रसिद्धेरेवविवक्षितत्वात्॥अत
एवव्याप्येकप्रतियोगिनायाअप्रसिद्धिरितिग्रंथरुदुक्तिः॥नचैवमत्रैकविपक्षेकव्यापकत्वाप्रसिद्धिप्रयो[illegible]प्रासंग्यनभि
धानेनन्यूनतादुर्वारेतिवाच्यं॥यत्किंचित्साध्याभाववद्वृत्तित्व[illegible]नवेशेनाप्रसिद्धिरित्यभिप्रायात्॥यत्किंचित्प्रतियोगितेति
॥व्यधिकरणधर्मावच्छिन्नप्रतियोगितेत्यर्थः॥अतिव्यापकतयेति॥व्यभिचारिहेतुसाधारणतयेत्यर्थस्तथाचातिव्याप्तिरितिभावः
॥घटभेदादीति॥नन्व[illegible]वृत्तित्वत्वावच्छिन्नाभावस्यलक्षणाघटकत्वेपिनातिव्याप्तिर्व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति

त्वाभावस्यापिलक्षणाघटकत्वात्॥व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वापेक्षयावृत्ति
त्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्यैवलघुत्वेनतदवच्छिन्नभेदरूपव्यापकत्वस्यतादृशाभावीयप्रतियोगितायामसंभवा
त्॥नच्चघटभेदसाध्यकेतादृशाभावाप्रसिद्ध्याऽव्याप्तिरेवविवक्षितेतिवाच्यं॥केवलान्वयिनिवह्निमान्धूमादित्यादौसर्वत्राप्रसि
द्धिसंभवेतदुपेक्षायानिर्बीजत्वात्॥अत्रकेचित्॥वृत्तित्वांशेव्यधिकरणधर्मावच्छिन्नाभाववन्निरूपितलक्षणतयाघटत्व
नजगद्वृत्तित्वाभावमादायलक्षणसमन्वयेनघटभेदसाध्यकेऽतिव्याप्तिरेवविवक्षितेत्याहुः॥तदवच्छिन्नैकभे
दनिवेशासंभवादिति॥अथवमपिविषयितासंबंधेनहेतुतायामव्याप्तिस्तत्रव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति
त्वस्यतादृशाभाववद्वृत्तित्वनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगितान्यापकत्वासंभवात्॥तथाहितादृशप्रतियोगित्वविषय
तात्वयोःसमनियतत्वेनविषयतानिष्ठभेदप्रतियोगितावच्छेदकत्वापेक्षयाप्रतियोगितासमानाधिकरणभेदप्रतियोगितावच्छेद
कत्वस्यगुरुत्वेनप्रतियोगितानवच्छेदकतयातदवच्छिन्नभेदरूपव्यापकत्वाप्रसिद्धेः॥नच्चतत्रापिप्रतियोगितावच्छेदकत्वा।धिक

ण्भेदप्रतियोगितावच्छेदकभेदकूटभेदनिवेश्यमिति वाच्यं॥ तथासतिवह्निमान्धूमाद्वाच्यंज्ञेयत्वादित्यादौ धूमज्ञेयत्वनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यतद्व्यक्तित्वेनयोऽभावस्तदीयप्रतियोगितायास्तादृशवृत्तित्वनिष्ठतद्व्यक्तित्वापेक्षयागुरुत्वेनतादृशसाध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितावच्छेदकंयद्यत्किञ्चिन्नत्वेनतादृशसाध्याभाववद्वृत्तित्वत्वेतादृशभेदकूटात्मकतद्व्यापकत्वसत्वेनचतादृशप्रतियोगिताकाभावस्यापिलक्षणघटकतयाऽसंभवापत्तेः॥ नन्वभेदप्रतियोगितावच्छेदकत्वमपिप्रतियोगिताविशेषणंदातुंशक्यंनथासतिविषयितासंबंधेनहेतुतायांजगद्विषयतात्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वसमनियतप्रतियोगितायास्तादृशविषयत्वनिष्ठायाविषयतायाविषयस्वरूपत्वमतेकेवलान्वयितयाभेदप्रतियोगितावच्छेदकत्वाभावेनतादृशप्रतियोगितायाअप्रसिद्ध्याऽव्याप्त्यापत्तेरितिचेन्न॥ प्रतियोगितायाअखंडत्वमतेनैतदभिधानात्तन्मतेतत्स्याःस्वरूपतएवावच्छेदकत्वान्नोक्तदोषः॥ यद्विचाभावधर्मोविशेषणविधयाननिवेश्यतेऽपित्वभावप्रभृतिरेवेति॥ अयमर्थः॥ प्रकृतनिरुक्तोसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावत्वनिष्ठावच्छेदकतानिरूपकीभूतायाअभाव

निष्ठावच्छेदकतानिरूपकीभूतायाअधिकरणनिष्ठावच्छेदकतानिरूपकीभूतायांनिरूपितत्वनिष्ठावच्छेदकतानिरूपकीभूतायाहृत्तित्वनिष्ठनिरूपकतानिरूपितस्यनिरूप्यत्वस्ययोऽभावस्तेनतत्तत्साध्याभाववहृत्तित्वनिरूपितत्वाभावस्यनप्रवेशः॥ अपितुसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकत्वादिकमेणैव॥ एवंचघटहृत्तित्वनिरूपितत्वंनास्तीतिधीसिद्धाभावस्यनिरुक्तविशेषणाक्रांतस्यघटहृत्तित्वावच्छिन्नप्रतियोगितायामसत्वान्नतादृशाभावस्यलक्षणघटकत्वानुपपत्तिः॥ तत्रचाभावनिष्ठावच्छेदकतायांकिंचिन्निष्ठावच्छेदकतानिरूपितत्वरूपमनवच्छिन्नत्वंनानिवेश्यतेयेननिर्धूमहृत्तित्वत्वनिरूपितत्वंनास्तीतिधीसिद्धाभावस्यनिरुक्तविशेषणाक्रांतत्वंस्यात्॥ **तन्तद्भाववहृत्तित्वनिरूपितत्वपर्याप्तावच्छेदकताकाभावस्यैवनिवेशनीयत्वादिति॥ अथात्रतद्भावत्वस्योपलक्षणत्वंविशेषणत्वंवाविवक्षितं॥ तदाधूमाद्यभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छेदकताकहृत्तित्वत्वनिष्ठनिरूपकताकत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावत्वेनैवनिवेशइतिपर्यवसितंतथा**

त्वधूमाभावत्वावच्छिन्नत्वविशेषितावच्छेदकताघटितंयद्धूमाभावत्वविशिष्टाधिकरणवृत्तित्वत्वनिरूपितत्वत्वंतत्पर्याप्तावच्छेदकताकप्रतियोगिताकाभावस्यसंग्रहोदुर्घटः॥ यदिचतत्संग्रहेपिनक्षतिर्धूमाभावनिष्ठावच्छेदकताघटितंयद्धूमाभावत्वोपलक्षितताधिकरणनिरूपितवृत्तित्वत्वनिरूपितत्वत्वंतत्पर्याप्तप्रतियोगितावच्छेदकताकाभावमादायेवनिर्धूमवृत्तित्वाभावस्यलक्षणघटकत्वोपपत्तिरित्युच्यते॥ तदप्यतत्तदभावत्वेननिवेशोव्यर्थोगौरवग्रस्तश्च॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावत्वेनानुगतेनोपलक्षणीभूतेननिवेशसंभवात्तथानिवेशोधूमाभावत्वेनधूमाभावघटितविशिष्टनिरूपितत्वत्वावच्छिन्नाभावस्यासंग्रहेपिधूमव्यापकतावच्छेदकरूपावच्छिन्नाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छेदकतानिरूपितवृत्तित्वत्वनिष्ठनिरूपकताकत्वंनास्तीतिधीविषयाभावमादायेवनिर्धूमवृत्तित्वाभावघटवृत्तित्वाभावादेर्लक्षणघटकत्वसंभवात्॥ अत्रेघटभिन्नंमेयत्वादित्यादावतिव्याप्तिरितिचेन्न॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावत्वेनोपलक्षणेनसाध्याभावनिवेशनएवव्यर्थछत्तात्पर्यकल्पनात्॥ तादृशानियमेमानाभावादिति॥ गोत्वादिप्रकारिताप्रकारकज्ञाना-

नुष्यत्वसमवायेन प्रकारिणांशेत्वरूपसमवायेन गोत्वादेः प्रकारतयातादृशनियमेव्यभिचारात्समवायनिरूपितत्वाभ्यामतिरिक्तसंबंधेनजातेःस्वरू
पेणानानामित्येवंरूपनियमस्यवर्त्मिकागत्वसमवायेनेवेत्यादिनियमेमानाभावादितिभावः॥ जातिसाधारणेति॥ घटत्वपटत्व
हेतोर्घटत्वपटत्वादिवृत्तित्वाभावाभावात्॥ साधारणपदोपादानेनेदंवाच्यंज्ञेयत्वादित्यादावपि॥ जातेःसमवायेनेवेत्यादिनियमांगी
कर्तृमतेपूर्वोक्तसकलदोषाद्वारदभावप्रभृतिविशेषणत्वविवक्षाकल्पेदोषमाहेवमिति॥ ध्वंसाधिकरणहेतिति॥ कपालंघ
टादित्यादावित्यर्थः॥ संयोगेनवृत्तिमतितादृशाध्वंसवत्वनियमेनतादृशाभावस्यवृत्तिमद्वृत्तित्वाभावादतोसंयोगेनधूमस्यहेतुत्वपरि
त्यागः॥ अव्यापकतया॥ अवृत्तितया॥ तथाचतादृशाभावस्यसमवायेनवृत्तिमन्निरूपादावसत्वाद्व्याप्तिरितिभावः॥ स्वस्मिन्ने
व॥ जात्यादावेव॥ एतेनजातेर्घटादौसमवायेनसत्वात्समवायावच्छिन्नविषयत्वाभावस्यघटवृत्तित्वेकथंतानिरस्ता॥ कालेति
कालपदंक्रियापरंतथाचवह्निमान्क्रियातः आत्मज्ञानादित्यादावित्यर्थः॥ गगनभेदसाध्यकघटत्वादौलक्षणसमन्वयान्नासंभवः
॥ येनसंबंधेनयद्वर्तते इति॥ साध्याभाववद्वृत्तित्वनिष्ठस्वरूपसंबंधावच्छिन्नावच्छेदकताभिन्नसमानाधिकरणसंबंधाव

च्छिन्नावच्छेदकताभिन्नसमानाधिकरणसंबंधावच्छिन्नावच्छेदकत्वनिरूपकत्वंप्रतियोगितायांपर्यवसितं॥ तदर्थश्चस्वाविषयक प्रतीतिदृत्तीति॥ इदमत्रविचार्यं॥ स्वाविषयकप्रतीतिदृत्तिसाध्याभाववद्वृत्तित्वस्वरूपविशिष्टनिरूपितविषयिताकत्वरूपघटकत्वशरीरेसाध्याभावानांकेनरूपेणनिवेशः॥ नतावत्तत्तद्व्यक्तित्वेनसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितानिरूपितायाअनुयोगितायाव्यक्तयःप्रत्येकंनतद्व्यक्तिपुरस्कारेणवाभूतत्वमूर्तत्वोभयाभाववान्भूतत्वविशिष्टमूर्तत्वाभाववान्वामनत्वादितादृशोनतत्तद्व्यक्तित्वेनतादृशोभयाभावादिनिष्ठप्रतियोगितानिरूपितानुयोगितावि[illegible]शेषेणवाविशेषितनतत्साध्याभाववद्वृत्तित्वस्वरूपविशिष्टनिरूपितविषयितायाःस्वरूपतोभूतत्वरूपजातिघटितमूर्तवृत्तित्वत्वाविषयकप्रतीतिदृत्तित्वविरहेणस्वपदेनतादृशमूर्तवृत्तित्वत्वस्योपादानासंभवेननत्स्याघटकत्वाभावादघटकधर्मानवच्छिन्नप्रतियोगिताकमूर्तवृत्तित्वत्वावच्छिन्नाभावस्यगगनपरिमाणव्यापकवृत्तिमद्वृत्तेर्मनस्त्वरूपहेतावभावेनाव्याप्तेः॥ अथतादृशानुयोगितात्वत्वावच्छिन्ननिरूपकताकाधिकरणदृत्तित्वत्वाघटकतैवनिवेशनीयमतोस्वरूपतोमूर्तत्वघटितमूर्तदृत्तित्वत्वस्यतादृशदृत्तित्वाघटकत्वनिर्वाहात्तदवच्छिन्नाभावस्यलक्ष

णाघटकत्वेनोक्ताव्याप्यत्ववकाश इतिचेन्नहिभूतत्वमूर्तत्वोभयाभावसाध्यकेघटभेदसाध्यकेचमेयत्वप्रतिव्याप्त्यापत्तिर्दुर्वारा
र्शवहत्वित्वघटहत्वित्वतदसादृशानुयोगितावच्छेदकताकाधिकरणहत्वित्वाघटकत्वेनतत्तद्धत्वेतत्त-
त्स्पर्शवहृत्वित्वेनवायुरुत्वेनाभावप्रतियोगितानवच्छेदकतयाव्यधिकरणधर्मावच्छिन्नाभावरूपलक्षणघटकत्वादिति
॥ किंतुतदन्यदोषाणामत्रानवकाश इति॥ अत्रकेचित्पूर्वपक्षयंति॥ अस्मिन्पक्षेपिसाध्याभावेव्यधिकरण
त्वसत्तावान्जातेरित्यादेर्व्यभिचारमानाभावावच्छिन्नरूपितसमवायेनवृत्त्यप्रसिद्ध्याव्याप्तेः कूटघटितलक्षणइवात्रापिसत्वेन
तदन्यदोषाणामत्रानवकाशइत्यसंगतं॥ अत्रेदंसमाधानंबोध्यं॥ तत्तत्साध्याभाववद्धत्वित्वतत्समनियतप्रतियोगिताकाभाव
निवेशकल्पेसाध्याभावेव्यधिकरणत्वविशेषणावश्यकत्वेपियद्दिचाभावधर्मोविशेषणतयानिवेश्यतइतिप्रतिपादितपूर्वकल्पेनतत्तत्साध्या
भाववद्धत्वित्वतावद्भिन्नसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावनिवेशपक्षीययेनसंबंधेनयद्धर्तत्तदितिनिष्कर्षेसा
ध्याभावेयावत्वानिवेशेपिक्षतिरित्यादिग्रंथस्याभिप्रायेणतदन्यदोषाणामत्रानवकाशइत्युक्तिःसंगमनीयेति॥ ॥ इतिकूटघ॥ २११

टिनलक्षणं॥ ॥शेषदलइति॥साध्याभावसमुदायवृत्तित्वंतत्वव्यापकत्वंदलइत्यर्थः॥तथाचेति॥पूर्वदलानुपादानेचेत्यर्थः॥अतिव्याप्तिरित्याशयेनेति॥नन्वेवंदलानुपादानेपिनातिव्याप्तिसंभवःधूमभेदजगत्संयुक्तत्वोभयाभावस्यशेषदलवृत्तिधूमादावृत्तिमद्वृत्तेर्वक्ष्यमाणत्वात्॥नचघटवृत्तित्वघटान्यवृत्तित्वोभयाभावमादायवाच्यंज्ञेयत्वादित्यादावव्याप्तेर्वारणायसप्रतियोगितायांव्याप्यवृत्तिधर्मानवच्छिन्नत्वविशेषणस्यावश्यकतयानतस्यलक्षणघटकत्वमितिवाच्यं॥एवमपिवह्निवृत्तित्वेनजगद्वृत्तित्वाभावस्यतादृशस्यहेतावसत्वादतिव्याप्तेरनवकाशात्॥नचतुल्ययुक्त्याहेतुनिष्ठवृत्तित्वतेनजगद्वृत्तित्वाभावमादायसद्धेत्वपिलक्षणयोगवारणायसप्रतियोगितायांस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविशेषणस्यनिवेशेलक्षणसामान्यानावीयप्रतियोगित्वस्यविशेषमात्रनिष्ठत्वाभ्युपगमेऽवश्यकतेनतादृशाभावनिरासइतिवाच्यं॥एवमपिवह्निजगद्वृत्तित्वान्यतरत्वेनवह्निजगत्संयुक्तत्वोभयाभावमादायातिव्याप्तेर्निरासइतिचिन्त्यं॥दलानुपादानेनोभयाभावस्यवह्नित्वेनतार्णतार्णदहनोभयाभाववत्त्वंगीकारात्॥अन्यथातुल्ययुक्त्याहेतुवृत्तित्वजगद्वृत्तित्वान्यतरत्वेनतादृशोभयाभावादेरेवलक्षणयो-

गस्य दुर्निरूपत्वात्॥ यद्वा तादृशाभावस्वीकारेपि तमादायाव्याप्तिवारणायपूर्वदलंदेयं॥ तदवयवासतिपूर्वदलमेवोपादेयमिति- ग्रंथासंगतिरितिवाच्यं॥ अव्याप्तिसंपादकदर्शितात्माभावव्यावर्तकत्वस्यैवदलत्वकल्पकत्वस्यपूर्वदलघटकत्वेनैवोपपत्तेः॥ नोपादेयमित्यस्यविशिष्टदलानुपादानएवतात्पर्यकल्पनात्॥ तादृशविशिष्टदलस्यानिव्याप्तिवारणप्रयोजनकत्वसंभवेपितद्वारणा पक्षेदलेसमुदायनिवेशस्यैवलघुत्वमितितदनुपादानतोक्तिरितिविभावनीयं॥ अत्रशेषदलेसमुदायपदोपादाने पूर्वदलो पादानस्यैकमित्यसंगतंसमुदायरहितोत्तरदलसहितपूर्वदलोपादानेवह्निमान्धूमादित्यादौप्रसक्ताव्याप्तिवारणस्यशेषद लेसमुदायप्रवेशप्रयोजनस्यसत्वात्तूर्णनमेवसम्यगितिकेचिदित्यनेनास्वरसःसूचितः॥ अविरोधादिति॥ प्रतियोगितासंसर्गकाभावज्ञानएवप्रतियोगितावच्छेदकांशेउपलक्षणतयाभानस्यानुभवविरुद्धत्वादितिभावः॥ प्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैवलक्षणेनानुमितिहेतुत्वमित्यभिप्रायेणाह॥ वस्तुतस्त्विति॥ भेदकूटमेवनिवेश्यमिति॥ स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वव न्निष्ठभेदप्रतियोगितावच्छेदकत्वसमानाधिकरणोभयावृत्तित्वपरिचितधर्मावच्छिन्नप्रतियोगिताकभेदकूटत्वसंबंधेनस्वविशिष्टप्र

तियोगिनैवनिवेश्यानेननादृशकूटस्यदुर्ज्ञेयत्वेपिनव्याप्तिज्ञानानुपपत्तिःसंबंधज्ञानस्यविशिष्टबुद्धावहेतुत्वस्यान्यत्रोक्तत्वात्॥कूटस्य-संबंधित्वेनज्ञानानपेक्षणाद्॥ वृत्तिपदस्यसंबंधित्वार्थकत्वमावश्यकमिति॥ननुवंसतिसमवायेनवह्नेःसाध्यत्वेसंयोगेनधूम-स्यहेतुत्वेतिव्याप्तिःधूमाद्यभावाधिकरणगगनसंबंधित्वस्यव्यधिकरणधर्मावच्छिन्नाभावस्यैववृत्तिमद्वृत्तित्वादितिचेन्न॥महाकाला-न्योयदाहित्यादावित्यादिपदसंग्राह्यत्वान्नादृशातिव्याप्तेः॥ननुचैवंप्रसिद्धसाध्यकस्थलत्यागानौचित्यंशंक्यं॥वृत्तिपदस्ययथाश्रुतार्थ-परत्वाभिप्रायेणतत्यागात्॥ वस्तुतस्तुसाध्यवदनुयोगिकत्वहेतुप्रतियोगिकत्वोभयाभावाद्वृत्तिवृत्तित्वैतदुभयाभावव्याप्यंयत्साध्या-भाववन्निरूपितहेतुतावच्छेदकसंबंधनसंबंधित्वंतदभावएवनिवेश्योनिरुक्तस्थलेगगनान्यसाध्याभाववत्संबंधित्वमेवतथेतिनादृशाभावस्यवृत्ति-मद्वृत्तेर्हेतावसत्वान्नातिव्याप्तिरित्यवधेयं॥ एतेनवृत्तिपदस्यसंबंधार्थतानालोचनंकथंवकुंशक्यं॥तादात्म्यसंबंधेनहेतावव्या-प्तेरप्यनेनदूषणानंतर्गतत्वान्नहालोचनंकथंसाध्यतावच्छेदकसंबंधनिवेशेपितदोषानालोचननितिशंकानवकाशः॥प्रथमदोष-स्यमतद्वयसाधारण्यभावेनतदनुद्धारेणसाध्यतावच्छेदकसंबंधविवक्षायांचोक्तविवक्षयातिव्याप्तेरपिवारणात्॥ तेनाव्याप्तिव्याप्ति

वारयितुंशक्यत इति॥ अत्रेदंविचार्यंसाध्यसामानाधिकरण्यविशेषणेनतद्धूमान्तद्वह्न्यवयवत्वादित्यादावतिव्याप्तिवारणंसंभवे पिसामान्यतःसंयोगेनवह्निमान्तद्व्यवयवत्वादित्यत्रातिव्याप्तिर्दुर्वारेवस्तावयवेसंयोगासंभवेपिस्वातिरिक्तवह्निसंयोगोत्पत्तौबाधकाभावादन्यथैतद्धूमावयवेधूमांतरसंयोगमत्त्वस्यसर्वभौमनिरुक्तौस्वयमुक्तस्यानुपपत्तिरिति॥ नानाविपक्षकेति॥ वह्निमत्प्रकारकप्रमाविषयोधूमादित्यादावित्यादिः॥ तेनसंयोगेनवह्निसाध्यकेसंयोगसंबंधावच्छिन्नप्रतियोगिताकतत्तद्विपक्षाद्यत्तित्वावच्छिन्नाभावकूटाधिकरणस्यगुणादेःप्रसिद्धत्वेपिनक्षतिः॥ समव्यापकतावच्छेदकेति॥ साध्यतावच्छेदकव्यापकत्वस्तितद्व्याप्यतावच्छेदकधर्मावच्छिन्नेत्यर्थः॥ तद्व्याप्यतावच्छेदकत्वंचस्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदककत्वं॥ अव्याप्त्यनवकाशादिति॥ ननुसाधनसमानाधिकरणत्वस्यसाध्याभावविशेषणत्वपक्षेवह्न्यभावघटितकूटस्यलक्षणाघटकत्वान्नार्णार्णदहनोभयाभावघटितकूटमादायाव्याप्तिरस्त्येवेतिचेन्न॥ साधनसमानाधिकरण्यविशेषणपक्षेसाध्याभावेसाध्यसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वविशेषणस्यवक्ष्यमाणत्वादृशीतोभयाभावस्यतादृशविशेषणानाक्रांततयातद्घटितकूटस्यलक्षणघटक

त्वविरहात्॥ **वाच्यत्वभिन्नेति**॥ साध्यतावच्छेदकसंबंधेन वृत्तिमतीत्यादि॥ तेन वाच्यत्वभिन्नत्वेन वाच्यत्वगगनान्यतराभावस्य वाच्यत्वभिन्नत्वेन वाच्यत्वाभावसमनियतत्वेन तदभिन्नतया तदीयप्रतियोगितायां वाच्यत्वान्यगगनवृत्तित्वसंभवेपि न क्षतिः॥ साध्यतावच्छेदकसंबंधावच्छिन्नाधेयतावैशिष्ट्यप्रतियोगितात्वेन समनैयत्यविवक्षणाच्च न समनैयत्यभंग इत्यवधेयं॥ **यद्यप्येवंरीत्या लक्षण**संगमनेपि धूमत्वेन प्रमेयाभावीयप्रतियोगितायाः प्रमेयसामान्यवृत्तितया धूमाभावो न लक्षणघटक इति धूमभिन्नत्वेन धूमाभावमादायाव्याप्तिस्तथापि वह्नित्वेन प्रमेयसामान्याभावपरित्यागावसरे तादृशप्रतियोगितावह्निमात्रनिष्ठत्वव्यवस्थापनांग दोषः॥ समवायितया वाच्यत्वाभावस्य लक्षणघटकत्वे ऽथेत्यादिग्रंथस्येन लक्षणाभिप्रायकत्वमनुपपन्नमित्याशयेन तस्य लक्षणघटकत्वार्थमाह॥ **वस्तुतस्त्विति**॥ **यत्तु** वाच्यत्वभिन्नत्वेन वाच्यत्वाभावस्य लक्षणघटकत्वेपि कूटाप्रसिद्ध्याऽव्याप्तिशंकयातदवतरणं तन्नसम्यक्॥ समनियताभावैक्यमतेसिद्धांतेपि कूटाप्रसिद्धेरव्यासज्यवृत्त्यनेकवृत्तिधर्मभिन्नधर्मावच्छिन्नाधिकरणस्यैवसमुदायाधिकरणमित्यनन्वितत्वेन विवक्षणीयतयाऽदोषात्॥ **ज्ञानानपेक्षापत्तेरिति**॥ **यदि च** ज्ञानापेक्षानास्त्येवेत्युच्यते तदा चक्रवर्तिलक्षणोक्तरीत्या तत्ति

द्विर्बोध्या॥ **अथैवमिति**॥ मिश्रलक्षणेपर्याप्तिनिवेशोवश्यकोऽन्यथासाध्यव्यापकतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकमहान सीयवत्त्वभाववद्वृत्तित्वाभावस्य हेतावसत्त्वाद्व्यभेः॥ **यद्यपि**॥ वह्नित्वेनघटाभावस्यतल्लक्षणाघटकत्वेपिवह्निसामान्याभावमादायल क्षणसमन्वयःसंभवतिनथापितल्लक्षणेहेतुतावच्छेदकसंबंधेनकस्यचिदधिकरणेवर्तमानत्वविशेषणावश्यकतयातदाक्रांतयावद्भा वाप्रसिद्धिर्द्रव्यसामान्याभावादेरनथात्वादितिवह्नित्वेनघटाद्यभावस्यलक्षणघटकत्वावश्यकत्वंतन्नसंभवतीतिशंकातात्पर्यं॥ व्यापकता नवच्छेदकावच्छेदेनेति॥ **इदमत्रचिंत्यं**साध्यतावच्छेदकसंबंधेनैवव्यापकतानवच्छेदकत्वस्यविवक्षणीयतयासंयोगेनद्रव्यप्रमेयादिसा ध्यकेनादृशाव्याप्तिरपरिहार्यैवास्मिन्कल्पइति॥ **एवंचेति**॥ घटत्वसमवायित्वादिनावाच्यत्वाभावस्यापिलक्षणघटकत्वेचेत्यर्थः॥ पूर्वक ल्पेसमवायितयावाच्यत्वाभावस्यलक्षणाघटकत्वादुपष्टंभसंगतिः॥ **द्रव्यत्वप्रकारकप्रमाविषयत्वादिति**॥ द्रव्यत्वस्यसमवायेनहेतु त्वेजातित्वावच्छिन्नाभावघटितकूटवतिसमवायेनदृत्वप्रसिद्ध्यानातिव्याप्तिरतोतावत्पर्यंतानुधावनं॥ **स्वप्रतियोगिसामानाधिकरण्याभावविशिष्टाभावघटितायाइति**॥ स्वाधिकरणावच्छेदेनस्वप्रतियोगिसामानाधिकरण्याभाववदभावघटितायाइत्यर्थस्तेनकेवलोभ

यत्वाभावादस्मादृशविशिष्टाभावानतिरेकेपिनक्षतिः संप्रतियोगिता॥जलत्वादस्मत्सामानाधिकरण्याभावविशिष्टतदभाववत्ते
न॥तादृशोभयत्वाभावेजलत्वावच्छेदेनप्रतियोगिसामानाधिकरण्याभाववत्तेन॥निवेशसंभवादिति॥ननुप्रतियोग्यसामानाधिक
रण्यघटकप्रतियोग्यधिकरणत्वंसाध्यतावच्छेदकताघटकसंबंधेनैवनक्तंतथाचकालिकसंबंधेनमर्ववतस्तादात्म्यसंबंधेनसा-
ध्यतायांमर्ववद्वह्नीयप्रतियोगित्वाधिकरणनहाकालावच्छेदेनप्रतियोगिसामानाधिकरण्याभावविशिष्टाभावाप्रसिद्धिरितिचेन्न॥
त्वाधिकरणावच्छेदेनप्रतियोगितावच्छेदकसंबंधेनभवत्प्रतियोगिकालानाधिकरण्याभाववद्भावीयप्रतियोगितासामान्येयन्निष्ठत्वसाध्य
तावच्छेदकताघटकसंबंधावच्छिन्नत्वाभयाभावस्तत्स्यविवक्षितत्वात्॥सामानाधिकरण्यस्यव्याप्यवृत्तित्वेत्याह॥अथवायन्निरू
पितेति॥सामान्यपदानुपादानेसंयोगेनवह्निमत्तस्मादात्म्येनसाध्यतायांसाध्यतावच्छेदकताघटकपर्वतानुयोगिकवह्निसंयोगेप्रति
योगित्वाधिकरणधर्मकिंचिन्नहानमानुयोगिकत्वाभावनत्वेनवह्निमद्वह्नीयप्रतियोगितान्यापकत्वस्यवह्निरूपसाध्यतावच्छेदकानु
पपत्तिरतस्तदुपादानं॥घटत्वपर्याप्तौजातिसामान्याभावीयप्रतियोगिताधिकरणानुयोगिकत्वसामान्याभावस्तेनवह्नि

शोभयत्वस्यापि तादृशप्रतियोगितान्यापकत्वापत्तिरेवायत्किंचिदिति॥ समवायैक्यमतेतुयन्निरूपितसाध्यतावच्छेदकतावटकसंबंधा
नुयोगितासामान्येप्रतियोगित्वाधिकरणयत्किंचिन्निष्ठाभावस्तदन्यत्वमेवविवक्षणीयं॥ नन्वत्रापिकालिकसंबंधेनसर्ववस्तु
दात्म्यसंबंधेनसाध्यतायां तादृशतत्त्यवह्नेरीयप्रतियोगितान्यापकत्वंसाध्यतावच्छेदकेदुरुपपादंदृत्तिमन्मात्रस्ययत्तदेनोपादाने
तन्निरूपितसाध्यतावच्छेदकताघटककालिकसंबंधेतादृशप्रतियोगित्वाधिकरणानुयोगिकत्वस्यैवसत्वात्तदभावोनसंभव-
त्यदृत्तेरुपादानेतन्निरूपितत्वसंबंधस्यैवाभिसंधेः॥ मैवंगगनादीनामदृत्तित्वमतेतादृशसंबंधसामान्येप्रतियोगित्वमतेवो
गित्वाधिकरणयत्किंचिद्धर्म्यनुयोगिकोभयाभावस्तदन्यत्वस्यैवप्रतियोगितान्यापकत्वरूपत्वात्तत्रगगनादेरेवयत्तदेनोपादानसंभवात्॥ नचय
त्तदेनगगनस्यापादानसंभवेपितद्भिन्नत्वस्यसर्ववावच्छिन्नेऽसत्वात्सर्ववावच्छिन्नस्यव्यापकत्वानुपपत्तिरितिवाच्यं॥ यत्प्रतियोगिकत्वस्थानेय
द्धर्मावच्छिन्नप्रतियोगिकत्वंनिवेश्यतदवच्छिन्नापर्याप्तिकविषयतापर्याप्त्याश्रयत्वस्यविवक्षितत्वात्॥ गगनादीनांदृत्तित्वमतेतुस्वाधिकर
णयत्किंचिन्निष्ठाभावप्रतियोग्यनुयोगितासामान्येतत्प्रतियोगिकसाध्यतावच्छेदकतावटकसंबंधनिरूपितत्वाभावस्तत्वमेवप्रतियोगिता

व्यापकत्वं [illegible]तियोगिता॥ ननु महानसीयवह्निसाध्यकेऽभिचारिणि वह्निसामान्याभावीयप्रतियोगिताया अपि साध्यतावच्छेदकतावत्त्वेन वह्नित्वव्याप्यतया व्यापकत्वात्तन्निरूपकाभावमादायातिव्याप्तिः॥ नच साध्यतावच्छेदकतापर्याप्तिधिकरणव्याप्यत्वं विवक्षणीयमिति वाच्यं॥ उभयत्वावच्छिन्नसाध्यकोभयाभावीयप्रतियोगितायास्तेन व्याप्यत्वानुपपत्तिस्तत्रोभयत्वधर्मितावच्छेदकस्यापि साध्यतावच्छेदकतापर्याप्त्यधिकरणत्वान्नैवं॥ तत्रहि तवैव साध्यतावच्छेदकत्वात्तद्धर्मितावच्छेदकस्यापि तत्त्वेन साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रतीयप्रकारताव्याप्यत्वस्यैव विवक्षणान्नानुपपत्तिः॥ जन्यरूपत्वावच्छिन्नाभावेति॥ यद्यपि जन्यजलपटादौ च रूपध्वंसोनास्तीति प्रतीतिर्जन्यरूपाभावेपि रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वमसंभवदुक्तिकं॥ तथापि जन्येत्यस्य पा[illegible]जन्येत्यर्थ इति ध्येयं॥ तत्कूटाधिकरणत्वेनेति॥ स्वनिरूपकजन्यरूपाभावरूपसंबंधनरूपध्वंसत्वावच्छिन्नप्रतियोगिताया जलपरमाणौ सत्वादितिभावः॥ स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेनसमनेयत्यविवक्षणादिति॥ यद्यपि वह्न्यादिसाध्यकेसाध्याभावीयप्रतियोगितायाः किंचिद्विशिष्टस्याभावेपि स्वत्वेनतदभावीयप्रतियोगितात्वेनतस्याः साध्य-

तावच्छेदकव्याप्यत्वासंभवाद्व्याप्यदिशिस्वावच्छेदकावच्छिन्नत्वविशेषणमर्थवद्व्यापकदिशितद्व्यर्थमेव॥तथापिस्वावच्छेदकावच्छिन्नाचतदभावीयाचस्वावच्छेदकावच्छिन्नतदभावीयंतचतेनप्रतियोगितेचस्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितेतयोर्भावस्तादृशप्रतियोगितात्वेननतादृशप्रतियोगितात्वेनतिव्युत्पत्तास्वावच्छेदकावच्छिन्नत्वतदभावीयप्रतियोगितात्वयोर्लाभाऽवच्छिन्नत्वंतृतीयार्थःसमनेयत्वशब्दार्थः व्याप्यत्वंव्यापकत्वंच॥स्वावच्छेदकावच्छिन्नत्वान्वितावच्छिन्नत्वस्यव्याप्यत्वऽन्वयस्तदभावीयप्रतिप्रतियोगितात्वान्वितावच्छिन्नत्वस्यव्यापकत्वेऽन्वयोव्याप्यत्वव्यापकत्वयोःसंसंबंधिकत्वेनविशिष्टघटकैकदेशान्वयेपिनासामर्थ्यंतथाचस्वावच्छेदकावच्छिन्नत्वेनव्याप्यतातदभावीयप्रतियोगितात्वेनव्यापकतानिवेशनीयेतिलभ्यतेएवंसतिव्यापकतायास्सामान्यरूपावच्छिन्नायाव्याप्यतायाश्चविशेषरूपावच्छिन्नायाएवनिवेशादित्यवतरणग्रंथोक्तिरपिसंगच्छते॥नचव्याप्यदिशितदभावीयप्रतियोगितात्वस्योक्तशब्दादलाभःतत्तदभावीयत्वंप्रतियोगितात्वविशेषणमितितद्व्याहतिकथनपरग्रंथविरोधइतिशंक्यं॥तादृशग्रंथस्यदेयमितिपदपूरणेनशब्दलभ्यविशेषणातिरिक्तविशेषणदानप्रयोजनपरत्वात्॥तत्तदधिकरणावृत्ति

शून्यत्वमिति॥ तत्तदधिकरणवृत्तित्वाभावकूटसमानाधिकरणाभयावृत्तिधर्मावच्छिन्नाभावकूटवत्वमित्यर्थः॥ उभयावृत्तित्वमपरिचायकं॥ एतेन तत्तदवृत्तिनिष्ठप्रतियोगिताकाभाववत्त्वविवक्षणेव्यभिचारिसामान्येऽतिव्याप्तिस्तादृशगगनाभाववत्त्वस्य जगत्येवसत्त्वात्॥ तत्तदवृत्तित्वावच्छिन्नप्रतियोगिताकाभावश्चगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमतेविवक्षितुमशक्यःकेवलान्वयिन्यव्याप्तत्वमात्रस्यतत्प्रतियोगितावच्छेदकत्वसंभवेनतादृशाभावाप्रसिद्धेरितिशंकानिरस्ता॥ जातिमतामेवेति॥ अथजातिप्रतियोगिकाभाववान्मेयत्वादित्यादौसच्चाविशिष्टजातिप्रतियोगिताकाभावाभावीयप्रतियोगितायाअपिसाध्यतावच्छेदकसमनियतत्वेनतादृशप्रतियोगिताकाभावघटितकूटाधिकरणंसामान्यादिचतुष्टयमितिजगतएवतादृशान्यतमाधिकरणत्वमितिनाव्याप्तिः॥ नचातिप्रसंगोनापादकलघुधर्मस्यावच्छेदकत्वेतादृशाभावीयप्रतियोगितायांसच्चावशिष्टस्यैवावच्छेदकत्वसंभवात्तादृशविशिष्टाभावाप्रसिद्धिःसच्चावशिष्टावच्छिन्नाभावीयप्रतियोगितायाश्चस्वसाध्यतावच्छेदकव्याप्यत्वविरहाद्वृटत्वपटत्वादिरूपाभावानामेवलक्षणघटकतयाजातिमत्तासंभवतादृशाधिकरणान्यतमत्वमितिवाच्यं॥ तथासतिविशिष्टसत्ताव्यापकजातेरभावस्योक्तयुक्त्यालक्षणाघटकत्वेनैवशिष्टावच्छि

न्नाभावीयप्रतियोगितायाः साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वविरहेणघटत्वादिनासंभावमादायातिव्याप्तेः॥ घटत्वव्यत्वविशिष्ट द्रव्यत्वद्रव्यत्वादिस्तादृद्रव्यत्वत्वावच्छिन्नाभावमादायातिव्याप्तिदानासंगतेश्चतत्रापिद्रव्येतरासमवेतत्वविशिष्टसकलद्रव्यसमवेतत्वरूपद्रव्यत्वत्वापेक्षयाद्रव्येतरासमवेतत्वस्यैवलघोरतिप्रसंगानापादकस्यावच्छेदकत्वसंभवेनतादृशाभावस्यापिद्रव्यसमवेतनियतगुणरत्वानवच्छेदकत्वमितिसिद्धांतानुसरणंनछतेयुक्तंतथासतिसत्ताविशिष्टजातिप्रतियोगिकाभावस्यापिक्षणघटकत्वं दुर्वारमितिचेन्न॥ तादृशाभावस्यविवक्षणीयसाध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावान्यत्वविरहेणलक्षणघटकत्वात्॥ ननुतथासतिघटत्वपटत्वादिरूपाणामप्यभावानांसाध्यसमानाधिकरणत्वात्तसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाच्चलक्षणघटकत्वंनाव्याप्तभावेनसाध्यतावच्छेदकव्याप्यत्वविशेषणवैय्यर्थ्यमितिवाच्यं॥ समनियताभावैक्यमतेसाध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाकाशाभावनिरूपितसमानाधिकरणधर्मावच्छिन्नाभावेसत्ताद्याच्यत्वसाध्यकेतादृशाभावाप्रसिद्धाः व्याप्तिवारणायसमानाधिकरणधर्मेसाध्यतावच्छेदकव्याप्यत्वस्यविवक्षणीयत्वाद्घटत्वाभावत्वादौनाव्याप्तिः

रहाहृदत्वाद्यात्मकाभावानांलक्षणघटकत्वाक्षतेः॥ नचैवमपिसत्ताभावसाधारणजातिप्रतियोगिताकाभावत्वरूपसाध्यतावच्छेदकव्या
पकत्वस्यसत्ताविशिष्टजातिप्रतियोगिताकाभावत्वेऽसत्वात्तदवच्छिन्नाभावस्यलक्षणघटकतंदुर्निरूपिनवाच्यं॥ सत्तान्यजातिप्रतियोगि
ताकाभावस्यैवसाध्यत्वेनानुपपत्त्यभावात्॥ किंचिद्विशिष्टसाध्यस्येति॥ यद्यपिभावोममतेविशिष्टस्यातिरिक्तत्वान्नदोषस्तथापि
तस्यानतिरिक्तत्वाभिप्रायेणेदं॥ देशिकविशेषणतावगाहिबोधजनकत्वस्यैवनञपदव्युत्पन्नत्वादिति॥ नन्वनुपस्थाप्याभाव
विशेष्यकदेशिकविशेषणतासंबंधावच्छिन्नाधेयतानिरूपकशाब्दबोधंप्रतिप्रतियोगिवाचकपदसभिव्याहृतनञपदज्ञानत्वे
नकारणतायाःसर्वसिद्धत्वादित्यर्थः॥ सर्वानुभवसिद्धस्योच्छेदापत्तेरिति॥ यद्यपिदेशिकविशेषणतासंबंधावच्छिन्नप्रतियोगि
ताकाभावदेशिकविशेषणतासंबंधावच्छिन्नप्रतियोगिताकत्वसंशयदशायामयंभावोनास्तीतिवाक्यादेतदभावाभावस्यदेशिक
विशेषणतयानिश्चयानेनसंबंधेनतत्संशयोच्छेदःसिद्धांतेपितुल्यस्तथापिकालिकसंबंधावच्छिन्नप्रतियोगिताकत्वभ्रमवतोऽयंभावोनास्तीतिवाक्यात्कालिकसंबंधेनवाहनस्यसत्त्वानुभवसिद्धतयोच्छेदानि

यमभंग इत्यत्रैवतात्पर्यं॥अत्र केचित्॥वदंतीत्यनेनास्वरसः सचरूपाभावसाध्यकरूपाणामनंतत्वेपिदैशिकविशेषणतासंबंधाव-
च्छिन्नरूपाभावाभावत्वावच्छिन्नाधिकरणत्वस्यप्रमिद्धत्वादग्रिमग्रंथविरोधः पूर्वमतेयदिचेत्यादिरीतावनिर्भरात्साध्याभावत्वस्याधि
करणतानिरूपकतावच्छेदकतयानप्रवेशः प्रयोजनाभावात्॥किंचप्रतिबंधकत्वमेककालेएकत्रावर्तमानत्वं॥ईश्वरीयव्यधिकरण
धर्मावच्छिन्नाभावमादायैवतन्निर्वाह इत्याहुः॥तदसत्॥अवच्छिन्नदैशिकविशेषणतासंबंधावच्छिन्नाधिकरणतासंबंधेन-
साध्यतावच्छेदकसमनियतप्रतियोगितानिरूपितानुयोगिताकूटस्यैवनिवेशेनानुयोगितायास्वानुयोगिभेदेनभिन्नत्वात्कूटाधिकर
णत्वप्रमिद्धभावेनाग्रिमग्रंथविरोधविरहात्॥अपिचप्रतिबंधकतायाःपूर्वोक्तरूपत्वेयादृशस्थलेव्यधिकरणधर्मविशिष्टसाध्यव-
त्ताज्ञानंनाभवत्तत्रदोषानवारयितुंशक्यः॥अपिचवह्निसाध्यकेकालिकसंबंधस्यापिलक्षणघटकत्वापत्तिः कालिकसंबंधावगाहि
यादृशवत्त्वभावज्ञानकालेवह्निमत्ताज्ञानंनाजनिष्टतादृशकालिकसंबंधावगाहिवत्त्वभावज्ञानस्यप्रतिबंधकत्वापातइतिनकिंचि
देतत्॥व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वेति॥अथैवमपिमत्ताद्रव्यत्वदृथिवीत्वेतत्त्रित्वावच्छिन्नसाध्यकेद्रव्यत्वादव्यभिचा-

र्णि सत्ताऽस्थिवीत्वेनद्रव्यत्वेनचयत्तावच्छिन्नाभावीयप्रतियोगितायाअपिसाध्यतावच्छेदकसमनियतत्वेनव्याप्यवृत्तित्वेनसाध्य
तावच्छेदकसजातीयधर्मावच्छिन्नत्वेनचतादृशाभावस्यापिलक्षणघटकतयातद्घटितकूटाधिकरणंगुणादिरेवेत्यतिव्याप्तिर्दुर्वारैवेत्यवे
दवक्तव्यं किंतु॥ स्वधर्मितावच्छेदकत्वेनभासमानयावद्धर्मघटितत्वेसतिपर्याप्तिसंबंधेनवृत्तिमत्वरूपस्वनिष्ठव्याप्यवृत्तित्वेनसाजात्यं
विवक्षणीयं॥ नचैवमपिनिरुक्तत्वरूपसाध्यतावच्छेदकधर्मितावच्छेदकत्वेनभासमानद्रव्यत्वसत्तात्वयोरपिनिरुक्तहित्वश
रीरत्वघटकभेदप्रतियोगिनिविशेषणत्वान्नद्घटितत्वस्यनिरुक्तहित्वेऽक्षतत्वान्नोक्तातिव्याप्तिवारणसंभवइतिवाच्यं॥नद्घ
टितत्वस्यतदवच्छिन्नमुख्यविशेष्यतानिरूपितप्रकाराश्रयत्वरूपस्यैवविवक्षितत्वात्तस्यचतादृशहित्वेऽभावादित्याद्युः॥ परे
तुस्वपर्याप्तिसंबंधावच्छेदकधर्मावच्छिन्नपर्याप्तिकत्वेनैवसाजात्यंविवक्षणीयं तथाचनिरुक्तत्वपर्याप्तावच्छेदकधर्मावच्छिन्नपर्या-
प्तिकत्वस्यानिरुक्तहित्वेऽसत्वान्नतदवच्छिन्नसाध्यमादायातिव्याप्तिः॥ नचैवंसतिपर्याप्तिश्चायमेकइमौद्वावित्सादावयमेकइतिलि
खनस्वारस्येनाव्यासज्यवृत्तिधर्माणामपिपर्याप्तिस्वीकारेणवाच्यत्वपर्याप्तिसंबंधावच्छेदकवाच्यत्वनिष्ठतद्व्यक्तित्वावच्छिन्नपर्याप्तिकत्व-

स्यवाच्यत्वेसत्येपिसमवायित्वेऽभावात्तादृशसजातीयधर्मावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्यावाच्यत्वादेत्यादावव्याप्तिरितिवाच्यं॥व्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितायांसमानाधिकरणधर्मस्यैवावच्छेदकत्वव्यवस्थापनेनतादृशनिरुक्तरूपेणवाच्यत्वसजातीयवाच्यत्वतावच्छिन्नत्वस्यतादृशाभावीयप्रतियोगितायामक्षतत्वात्॥सजातीयधर्मावच्छिन्नेत्यत्रतन्मात्रावच्छिन्नतानिवेशादितिवदंति॥साध्यतावच्छेदकस्यप्रतियोगितायाव्यापकत्वस्थानेप्रतियोगित्वावच्छिन्नस्यव्यापकतावच्छेदकत्वनिवेशेति॥अथैवंविशिष्टसाध्यकेविशिष्टाभावस्यलक्षणघटकत्वानुपपत्तिस्तादृशाभावीयप्रतियोगित्वावच्छिन्नभूद्व्यापकतावच्छेदकत्वस्यसाध्यतासाध्यतावच्छेदकेऽभावात्॥नचविशिष्टाभावीयप्रतियोगितायास्तादृशाभावस्योपलक्षिताभावेलक्षण्यनिर्वाहायविशेषणांतर्भावेणपर्याप्तत्वस्यवक्तव्यत्वात्तदवच्छिन्नव्यापकतावच्छेदकत्वंसाध्यतावच्छेदकेऽस्तमितिवाच्यं॥तथापिसाध्यतावच्छेदकसंबंधेनैवत्वावच्छिन्नाधिकरणत्वस्यवक्तव्यत्वात्तादृशसमवायेनगुणान्यत्वद्रव्यत्वोभयतावच्छिन्नाधिकरणत्वस्यैवतादृशप्रतियोगित्वावच्छिन्नस्यसमवायेनाधिकरणत्वस्याप्रसिद्धतयातादृशप्रतियोगितायाःस्वरूपेणोपादानासंभवादितिचेदत्रके

चित्तु॥ विशिष्टाभावस्योपलक्षितभावोहेलक्षण्यायविशिष्टाभावीयप्रतियोगितायांविशिष्टप्रतियोगिकसंबंधस्यैवावच्छेदकत्वं॥ एवंचविशिष्टसत्तावानितिज्ञानस्यप्रतियोग्यभावान्वयौतुल्ययोगक्षेमावितिन्यायेनविशिष्टप्रतियोगिकसंबंधावगाहित्वेसिद्धेऽनुमितिविधेयतावच्छेदकत्वमपितस्यैवेतिसाध्यतावच्छेदकविशिष्टप्रतियोगिकसंबंधेनविशिष्टाभावीयप्रतियोगित्वावच्छिन्नव्यक्तेरेवसाध्यतावच्छेदकेप्रतियोगितायाविशेष्यमात्रनिष्ठत्वेप्यक्षतत्वात्॥ नच विशिष्टप्रतियोगिकसंबंधस्यविशिष्टाभावप्रतियोगितावच्छेदकत्वंविनातदनुमितिरितिवाच्यं॥ तादृशाभावीयप्रतियोगितायाविशेषणांतर्भावेनपर्याप्तत्वस्यापिप्रतियोगितावच्छेदकसंबंधेनप्रतियोगितावच्छेदकविशिष्टप्रतियोगितापर्याप्त्यधिकरणतयासाकल्यभावस्यविरोधांगिकर्तव्यधिकरणधर्मावच्छिन्नाभाववादिमतेविचारासहत्वात्॥ यादृशदंडद्वयंपरस्परसंश्रयस्तादृशान्यतरविशिष्टान्यतराभावस्यतादृशान्यतरोपलक्षितान्यतराभावंवेलक्षण्यस्यविशिष्टाभावीयप्रतियोगितायाविशेषणांतर्भावेपर्याप्तत्वस्वीकारेप्यनिर्वाहाच्च॥ दर्शितस्थलेविशेषणविशेष्ययोरैक्यान्नात्मकचिद्विशिष्टाभावीयप्रतियोगितायाविशेषणविशेष्यपर्याप्तंकचित्स्यांविशिष्टप्रतियोगिकसंबंधस्यैवावच्छेदकत्वमित्येवंविशिष्टाभावभेदे

नव्यवस्था॥प्रकृतेगुणान्यत्वविशिष्टप्रतियोगिकसंबंधस्यतादृशविशिष्टाभावप्रतियोगितावच्छेदकत्वबाधकविरहात्तदभिप्रायकोऽयंग्रंथः
ह्रस्वत्वावच्छिन्नव्यापकतावच्छेदकत्वस्यानेनावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वमवनिवेश्यंतथाचनकोपिदोषइतिवदंति॥वस्तुतस्तुघटत्वपटत्वो
भयसमवायेनैकआश्रयेपिघटपटोभयवादितप्रतीतिबलाद्घटत्वपटत्वद्वित्वेनत्रितयपर्याप्तविलक्षणावच्छेदकताकनिरूपकताका
धिकरणतादूतलादेस्त्रीकृत्यैतत्समवायेनविशिष्टाभावप्रतियोग्यधिकरणमितिप्रतीतिबलाद्द्वाभ्यांसज्यवृत्तितादृशप्रतियोगित्वाव
च्छिन्नसमवायसंबंधावच्छिन्नाधिकरणतापिविशिष्टाधिकरणेस्त्रीक्रियतइतिपरमतात्पर्यार्थः॥नचैवंसमानाधिकरणेति॥ननु
संयोगीद्रव्यत्वाभावोयत्रसंयोगाभावस्यसमानाधिकरणाभावप्रतियोगित्वेनव्यधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघट
कत्वादितिचेन्न॥स्वाधिकरणेथकिंचित्त्वस्यविवक्षितत्वात्॥लाघवादाहानवच्छिन्नवृत्तित्वंवेति॥पृथिवीवृत्तिगुणशून्यमित्यत्र
गुणपदव्याहृत्तिनिदर्शयति॥पृथिवीसमवेतत्वावच्छिन्नाभावइत्यादिना॥अप्रसिद्धइति॥वायुत्वहेतोर्व्यभिचारितनिर्वाहायपृथिवीस
मवेतत्वोपलक्षितोभावस्यैवसाध्यतयासमवेतत्वमात्रस्यतादृशाभावप्रतियोगितावच्छेदकत्वेपिक्षतिविरहादितिभावः॥विशिष्टाभावस्य

साध्यत्वमित्यभिप्रायेणशंकते॥ नचेति॥उपलक्षितभावस्यसाध्यत्वाभिप्रायेणसमाधत्ते॥समवेतत्वेति॥गुणपदेति॥अत्रय
द्यपिविशिष्टाभावस्यसाध्यत्वेवायुक्तस्यसद्धेतुत्वापत्योपलक्षितभावस्यैवसाध्यत्वंवक्तव्यंतस्यचगुणसामान्याभावसमनियतत्वगुणत्व
स्यैवावच्छेदकत्वंसंभवतीतिपूर्ववत्तौल्यमितिशंकासंभवति॥तथापियादृशजलेष्टथिवीत्वनिगुणःकदापिनोत्पन्नस्तादृशजलमर्त्तात्यभि
प्रायकल्पनान्नदोषस्तथासतिगुणसामान्याभावस्यतादृशाभावसमनैयत्यासंभवात्॥अत्रष्टथिवीपदंष्टथिवीसामान्यपरमेवेति
॥अत्रदंचिंत्यंपूर्वानुमानएतदनिच्छामिवारणानुरोधेनैतद्रूपात्यंताभावावान्येयतादित्यादावतिव्याप्तिवारणानुरोधेनचात्यंताभा
वघटितस्यैवव्याप्यवृत्तित्वस्यविवक्षावश्यकतांप्रदर्श्यघटतह्यायुद्दिश्यपटतह्यायुद्दिश्यात्मकाभावानांव्याप्यवृत्तित्वरूपाघष्टथिवीप
दस्येतन्मृथिवीपरत्वंयथोपपादितंतथाहिनीयानुमानेपिसंभवतितथाहिसाध्याभावेव्याप्यवृत्तित्वंतत्प्रत्या॰धेकरणात्यंताभावप्रति-
योगितानवच्छेदकसाध्याभावत्ववत्वंनिरवच्छिन्नाधेयतावच्छेदकसाध्याभावत्ववत्वंवैतदनिच्छामिवारणानुरोधेनैवनिवेशनीयं॥नतु
सत्समानाधिकरणात्यंताभावप्रतियोगितायांसामानाधिकरण्यनावच्छेदकंयदभावनिष्ठतद्व्यक्तित्वंतत्वंनिरवच्छिन्नवृत्तित्वंतत्वावच्छे

दकंयद्भावनिष्ठतद्व्यक्तित्वंतत्वंवादर्शितत्वात्तत्त्वाद्व्याप्यवृत्तित्वादेतदतिव्याप्तेःकालिकसंबंधावच्छिन्नप्रतियोगिताकध्वंसप्रतियोगित्वाभावेसाध्येमेयत्वादावतिव्याप्तेश्चसाध्याभावानांव्यतिरेकिणांसर्वेषामेवनत्तद्व्यक्तित्वेनकालिकाव्याप्यवृत्तित्वान्निरुक्तव्याप्यवृत्तित्वविरहेणव्यधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघटकत्वात्॥अपिचसाध्याभावत्वघटितव्याप्यवृत्तित्वाप्रवेशेदृक्षत्वसंयोगाभयाभावसाध्यकेदृक्षत्वादावव्याप्तिरपिदृक्षत्वस्यदर्शितोभयाभावाभावत्वेनाव्याप्यवृत्तित्वेपितद्व्यक्तित्वेनव्याप्यवृत्तित्वेननद्वृत्तिकूटाधिकरणहेतोर्दृक्षत्वेरवंचघटतद्वायुद्वित्वपटतद्वायुद्वित्वात्मकाभावानामप्यवश्यंवक्षणीयसाध्यावच्छेदकघटितव्याप्यवृत्तित्वेनलक्षणघटकतयातद्वृत्तिकूटाधिकरणेवायोहेतोर्दृक्षत्वेरतिव्याप्तिविरहाद्द्वितीयानुमानेपिपृथिवीपदस्थेनतत्पृथिवीपरत्वंयुक्तमिति॥ननुसत्तान्यपृथिवीसमवेतभून्यत्वसाध्यकेवायुत्वादावतिव्याप्तिविरहेपिविश्वसमवेतपृथिवीसमवेतभून्यत्वसाध्यकेऽतिव्याप्तिरस्त्येवेत्याशंक्यनिरस्यति॥विभ्वितिः॥मूर्तत्वस्यजातिरूपत्वमित्यभिप्रायेणेदमन्यथानव्यमतेतादृशाभावस्योत्पत्त्यादिकालावच्छेदेनवायौसत्वाद्वायुत्वस्यव्यभिचारित्वानुपपत्तेः॥सकलेति॥अत्रसाकल्यविशेषणसत्वेपतिव्याप्तेर्वक्ष्यमाणत्वान्नदुपादानंनत्वसत्वेपतिव्याप्तिर्न-

हीयनइत्येवंरूपनिर्धर्मितिध्येयं॥रूपसामान्याभाववान्वायुत्वादित्यादौस्वपदेनतन्नहृदादेरेवोपस्थितेनतत्रयद्यर्थप्रसिद्धिस्तत्साध्यकेवीक्षानुपादानेतत्साध्यकेव्यभिचारिण्यतिव्याप्तिरतआह॥अथवेति॥स्ववृत्तिसाध्याभावत्वव्यापकाधेयतानिरूपकाधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकमधिकरणंरूपसामान्याभावादेरर्थइत्यथवेतिकल्पाभिप्रायः॥शेषमिति॥तादृशाऽदृवृत्तित्वाभावमादायातिव्याप्तिवारणायतादृशंयद्यत्संतावदन्यनमदृवृत्तित्वत्वसमनियतप्रतियोगिताकत्वविवक्षणमित्यर्थः॥यद्यत्वमितिनिवेशेदुर्ज्ञेयत्वंगोरवंचत्वतआह॥अथवेति॥धर्मेदिच्छेदकीयइति॥तथाचाधेयतावच्छेदकसाध्याभावमात्रवृत्तिव्यासज्यवृत्तियोधर्मस्तन्यूनवृत्तित्वंतद्व्याप्यंयत्तदन्योयःसाध्याभावमात्रवृत्तिव्यासज्यवृत्तिधर्मस्तदवच्छिन्नाधिकरणतावृत्तित्वाभाववत्वंव्याप्तिरितिनिष्कर्षः॥न्यूनवृत्तित्वंसामानाधिकरण्याघटितं॥व्याप्यत्वंचसामानाधिकरण्यमात्रमितिविवक्षितं॥प्रतियोगितावच्छेदककोटौमात्रपदानुपादानेव्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तिसमुदायत्वेनादृशाभावोदासीनसाधारणसमुदायत्वन्यूनवृत्तित्वव्याप्यत्वयोःसत्वेनतद्भिन्नसाध्याभावमात्रवृत्तिव्यासज्यवृत्तिधर्मप्रसिद्धावाव्यत्वसाध्यकेऽव्याप्तिरतस्तन्निवेशः॥व्यासज्यवृत्तित्वनिवेशेरूपाभावसाध्यकेएकरूपव्यधिकरणधर्मावच्छि

न्नसाध्याभाववृत्तिसमुदायत्वस्यसकलरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावसाधारणोयःसाध्याभावत्वरूपधर्मस्तन्यूनवृत्तितयानद्याप्यतया
वतद्भिन्नतादृशधर्मप्रसिद्धिरतस्तन्निवेशः॥ आधेयतावच्छेदकत्वविशेषणप्रयोजनंग्रंथकृद्दर्शितंज्ञेयं॥ घटत्वादुदासीनधर्माणांनेदंनिवेशे
गौरवमतोव्याप्यत्वनिवेशःस्वस्यापिस्वव्याप्यत्वानद्भिन्नतादृशधर्मप्रसिद्धिरतोन्यूनवृत्तित्वनिवेशः॥ अनुयोगिकोटीमात्रपदानुपादानेवा-
च्यत्वसाध्यकेव्यधिकरणधर्मावच्छिन्नसाध्याभावघटाधिकरणवृत्तिद्वित्वरूपतादृशधर्मावच्छिन्नाधिकरणेहेतोर्वृत्त्याऽव्याप्तिरतस्तन्निवेश
॥ व्यभिचारिणितादृशसाध्याभावत्वरूपधर्मादायतदवच्छिन्नाधिकरणत्वंजगतएवस्यादतोव्यासज्यवृत्तीति॥ समनियताभावैक्यमतेतादृश
धर्मन्यूनवृत्तितादृशधर्मव्याप्यधर्मप्रसिद्धानद्भिन्नतादृशधर्मप्रसिद्धिस्तन्यूनतद्व्याप्त्योभयाभावंनिवेश्यवारणीया॥ सत्तात्वस्यसाध्यतावच्छे-
दकेत्यनिवेशेलाह॥ द्रव्यत्वविशिष्टेति॥ एतद्रूपान्यत्वविशिष्टेति॥ स्वरूपसम्बन्धोभयसंबंधघटितसामानाधिकरण्यरूपंविशिष्यन
स्यचैतद्रूपेपिसत्वात्तादृशवैशिष्ट्यावच्छिन्नप्रतियोगितायाःसमवेतमात्रनिष्ठत्वंबोध्यं॥ उक्तपूर्वपक्षेकेचिल्लमाधानमाह॥ एवमिति॥ प्र
मेयसाध्यकेति॥ अयमाभावसाधनसामानाधिकरण्यघटितास्मिन्कल्पेमद्धेतुमात्रएवव्यधिकरणधर्मावच्छिन्नाभावस्यैवलक्षण

घटकतयातस्यचसाध्यसमानाधिकरणेत्यादिविशेषणाक्रांतगगनाभावभिन्नत्वासंभवेनासंभवस्यैवप्रसक्तेः प्रमेयसाध्यकेत्यनुपपन्नं॥ नचसमानाधिकरणधर्मेसाध्यतानिरूपितत्वदानेवह्निसाध्यकेगगनाभावमादायनाप्रसिद्धिः संभवतीत्यभिप्रायेणेदमितिवाच्यं॥ वह्निसाध्यकेपिव्यधिकरणस्वरूपसंबंधावच्छिन्नाभावमादायाप्रसिद्धेर्दुर्वारत्वात्॥ नचस्वरूपादिव्यधिकरणसंबंधावच्छिन्नाभावानांनविवक्षणीयसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वमितिवाच्यं॥ स्वरूपसंबंधेनवह्नित्वेनप्रमेयसामान्याभावस्यनादृशतयातमादायेवाप्रसिद्धेः संभवात्॥ नचसमानाधिकरणसंबंधावच्छिन्नत्वमित्यस्यस्वावच्छेदकसंबंधावच्छिन्नाधेयतावच्छेदकधर्मावच्छिन्नत्वमर्थोवह्नित्वस्यतादृशाधेयतानवच्छेदकतयानतादृशाभावमादायाप्रसिद्धिरितिवाच्यं॥ तथासतिगगनत्वेनप्रमेयसामान्याभावस्यानादृशतयातमादायाप्रसिद्धिवारणायधर्मेसाध्यतावच्छेदकव्यापकत्वविशेषणप्रयोजनकथनासंगतेः॥ नच्चसाध्यवदन्यभावेसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वंपरित्यज्यसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशकल्पेवत्यादिसाध्यकेऽप्रसिद्ध्यभाव इतिवाच्यं॥ एकत्वप्रागभावविशिष्टवह्नेः संयोगेनयोऽभावस्तमादायाप्रसिद्धेस्तत्कल्पेपिदुर्वारत्वात्॥ अत्रेदंसमाधानं॥ स्वरूपसंबंधेनवह्न्यभावेकत्व-

प्रागभावविशिष्टवह्न्यभावादीनामाश्रयवह्निसाध्यकेऽप्रसिद्धिसंभवेपिसमानाधिकरणधर्मसाध्यतावच्छेदकव्यापकत्वविशेषणेपितादृशाप्रसिद्धिर्वारणासंभवान्नहिविशेषणप्रयोजनतयानेषाप्रसिद्धिरुद्भावयितुंशक्यतइतिप्रमेयसाध्यकस्थलानुधावनमिति॥ननुचैकत्वप्रागभावस्याव्याप्यवृत्तितयानप्रतियोगिवैयधिकरण्याघटितसाध्यतावच्छेदकव्यापकत्वमितिनादृशाभावस्यनसाध्यवह्नीत्यादिविशेषणाक्रांतत्वमितिवाच्यं॥साध्यवह्नितादृशाभावस्त्वोभयत्वादिनासाध्याभावएवप्रसिद्ध इत्युक्तेः प्रतियोगिवैयधिकरण्यघटितसाध्यतावच्छेदकव्यापकत्वस्यैवग्रंथेदभिप्रेतत्वात्॥यापुरुषव्यक्तिरेतद्दंडविशिष्टाऽस्मिन्नेवाधिकरणेऽपरदंडविशिष्टान्यस्मिन्नेवाधिकरणेवर्ततेतादृशदंडविशिष्टव्यक्तौसाध्यायांस्वाश्रयदंडतद्व्यक्तित्वोभयावच्छिन्ननिरूपकताकाधिकरणत्वसंबंधेनप्रमेयत्वस्यहेतुतायामेतद्दंडविशिष्टतद्व्यक्त्यभावतद्दंडविशिष्टतद्व्यक्त्यभावयोर्भिन्नभिन्नव्यक्त्यंतर्भावेणसाधनसमानाधिकरणयोरुक्तविशेषणाक्रांतत्वेनचतद्घटितकूटाधिकरणेहेतुतावच्छेदकसंबंधेनहेत्वप्रसिद्ध्याऽव्याप्तिवारणायप्रतियोगिवैयधिकरण्यघटितसाध्यतावच्छेदकव्यापकत्वस्यसमानाधिकरणधर्मेऽवश्यंनिवेशनीयत्वाच्च। प्रतियोगितायांसमानाधिकरणसंबंधावच्छिन्नत्वनिवेशोसाध्याभावीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधाव

च्छिन्नत्वंव्यर्थमित्यतस्तत्परित्यज्यसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंनिवेशयति॥समानेति॥उभयत्वादिनासाध्याभावएवेति॥य
द्यपिसाध्यवद्वृत्तीत्यादिविशेषणाक्रांतवह्निगगनोभयत्वावच्छिन्नाभावभिन्नसाध्याभावाप्रसिद्धाःसंभवोदुर्वारएव॥तथापिसमानाधिकरण
धर्मसाध्यवद्वृत्तितानवच्छेदकव्यासज्यवृत्तिधर्मभिन्नत्वनिवेशान्नासंभवः॥अत्रेदंचिंत्यंसमानाधिकरणधर्मसाध्यतावच्छेदकव्यापकत्वापर
नपिज्ञेयत्वान्यप्रमेयत्वान्याच्यत्वादित्यादौसाध्यवद्वृत्तितथाविधायाज्ञेयत्वान्यप्रमेयत्वनज्ञेयत्वगगनान्यतरभावस्यकेवलान्वयितयातद्
न्यसाध्याभावाप्रसिद्धाःव्याप्तिवारणायसाध्यवद्वृत्त्यभावेस्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविशेषणस्यावश्यकतयातेनैवगग
नस्वनप्रमेयत्वसामान्याभाववारणेसमानाधिकरणधर्मसाध्यतावच्छेदकव्यापकत्वविशेषणंव्यर्थमितिप्रतियोगितायांसाध्यतावच्छेदकव्याप
कत्वविशेषणंवैयर्थ्यंदुर्वारमेव॥नचस्वन्यूनवृत्तित्वंस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वंतत्रभेदप्रतियोग्यवृत्तित्वमवश्यंनिवे
शनीयमन्यथासाध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकघटत्वादेःस्वसमानाधिकरणव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकंयधिकरणधर्मावच्छिन्नाव
च्छेदकताकप्रतियोगिताकंवाभेदमादायतत्प्रतियोगितावच्छेदकतापत्यास्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगितायाअप्रसिद्धापत्तेस्तथात्वमा-

ध्यगगनोभयाभावस्यापि तादृशत्वात्तन्निवृत्तिसाध्याभावाप्रसिद्धिरिति दिक्॥ व्यासज्यवृत्तिधर्मसाधारणस्यपर्याप्तातिरिक्तसंबंधा

वच्छिन्नतादृशभेदप्रतियोगितावच्छेदकतारूपन्यूनवृत्तित्वस्यनिवेशेनोक्तदोषाभावात्॥किंचसत्तासाध्यकेद्रव्यगुणाद्यन्यत्वविशिष्टसत्ताभा-

वानांयत्किंचित्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावभिन्नत्वेनलक्षणघटकतंदुर्वारमेवसमानाधिकरणधर्मावच्छिन्नप्रतियो

गिताकत्वस्यानुगतस्यैकस्याभावात्तादृशाभावभेदकूटमेवनिवेशनीयंतदपेक्षयासाध्यवृत्त्यभावगगनाभावभिन्नत्वेनलाघवाद्देयंतेनै

वप्रमेयत्वेनगगनाभाववारणाद्यर्थं प्रतियोगितायांसाध्यतावच्छेदकव्यापकत्वमिति॥ घटवृत्तित्वविशिष्टेति॥ यद्यपि घटवृत्तित्ववि

शिष्टाकाशाभावाभावेसाध्येसाध्यवृत्तीत्यादिविशेषणाक्रांतगगनाभावभिन्नाभावाप्रसिद्ध्यैवनातिव्याप्तिस्तथापितुल्ययुक्त्यातत्साध्यकेसद्धे

तौनातदृशाभावाप्रसिद्ध्याऽव्याप्तिवारणायसमानाधिकरणधर्मावच्छिन्नाभावत्वेनसाध्यवृत्तिर्विवक्षणीयातथाचेयमतिव्याप्तिरितिध्येयं॥साध

नाधिकरणेषांपरस्परंमेकाधिकरण्यमिति॥ यद्यप्येवंविवक्षायांवह्निमान्यर्वतचत्वयवसंयोगादित्यत्रसंबंधइत्यावच्छिन्नप्रतियोगिता

कसाध्याभावसमुदायस्यसाधनाधिकरणेऽसत्वान्नतत्रातिव्याप्तिवारणप्रयोजनकत्वंप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वविशे

षणस्यसंभवति॥तथापिसाध्यतावच्छेदकसंबंधातिरिक्तसंबंधावच्छिन्नप्रतियोगिताकतादृशसाध्याभावसमुदायमादायासंभववारणप्रयोजनंतद्विशेषणस्यबोध्यं॥त्याज्यमेवेति॥पृथिवीइव्यत्वप्रकारकप्रमाविषयत्वादित्वादौजलासमवेतत्वतेजोःसमवेतत्वावच्छिन्नाभावघटितकूटस्यसाध्यनाधिकरणेःसत्वादतिव्याप्त्यभावादितिभावः॥ ॥इतिकूटघटितलक्षणं॥ ॥उक्तविशेषणनिवेशइति॥साध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावान्यत्वनिवेशइत्यर्थः॥साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावनिवेशेपिपृथिवीइव्यत्वप्रकारकप्रमाविषयत्वादित्वजलासमवेतत्वतेजोःसमवेतत्वाद्यवच्छिन्नाभावकूटमादायातिव्याप्तिवारणायसाध्यतावच्छेदकव्याप्यत्वंप्रतियोगितायामावश्यकमितिगोरवमितिशंकांनिरस्यति॥विशिष्टस्येति॥अनतिरिक्ततयेति॥इदंचप्रतियोगितायांसाध्यतावच्छेदकव्याप्यत्वनिवेशकल्पेपिपृथिव्यन्यइव्यत्ववइव्यत्वादित्वादावतिव्याप्त्यावश्यकत्वसूचनायेव॥तथाचतद्वारकदर्शितविवक्षायानतद्व्यावश्यकत्वेननयेवपृथिवीइव्यत्वप्रकारकप्रमाविषयत्वादित्वादौजलासमवेतत्वतेजोःसमवेतत्वावच्छिन्नाभावमादायातिव्याप्तिवारणेप्रतियोगितायांसाध्यतावच्छेदकव्याप्यत्वंनदेयमितिनगौरवंपुच्छलक्षणइतिभावः॥नलक्षणघटकतापत्तिरिति॥तथाचतद्वारकसाध्यवद्वृत्तीत्यादिविशेषणानावश्यकतयानकूटघ

टितलक्षणेगौरवमित्याशयः॥ वक्ष्यमाणत्वादिति॥ तत्संक्षिप्यव्याख्यानावसर इत्यादिः॥ व्याख्यांतरमुपन्यस्यति॥ साधनवतीति॥ हेतुतावच्छेदकसंबंधेनकिंचित्सदर्थाधिकरणवृत्तित्वं इति॥ अत्रसाध्याभावकूटाधिकरणनिरूपितवृत्तित्वांशे हेतुतावच्छेदकसंबंधावच्छिन्नत्वनिवेशोपितादृशवृत्तित्वनिरूपकत्वस्यसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यावदंतर्गतस्यहेत्वधिकरणतावच्छेदनास्त्वादितिव्याप्तिविरहेणहेतुतावच्छेदकसंबंधेनयत्किंचित्सदर्थाधिकरणवृत्तित्वमितिविशेषणमफलंसद्धेतौतादृशवृत्तित्वनिरूपकत्वस्यव्यधिकरणधर्मावच्छिन्नाभावस्यैवप्रसिद्धेः॥ परंतुहेतुतावच्छेदकसंबंधेनवृत्तिमद्वृत्तयोयावंतस्तादृशसाध्याभावकूटाधिकरणवृत्तित्वाभावाइतिलक्षणघटकविशेषणापरित्यागेनैवसमानाधिकरण्यस्यव्याप्यवृत्तित्वकल्पेलक्षणपरिष्कारःसंभवतीतिज्ञापयितुंसाध्याभावकूटाधिकरणवृत्तित्वांशेहेतुतावच्छेदकसंबंधावच्छिन्नत्वघटितमेवलक्षणमभिप्रेतंतथाचतद्वैय्यर्थ्यंवृत्तित्वांशेहेतुतावच्छेदकसंबंधावच्छिन्नत्वविशेषणस्यत्वखंडाभावसंपादकतयैवसार्थक्यमितिबोध्यं॥ ॥इतिपुच्छलक्षणं॥ ॥विदुषकंठदृप्तयेरघुनाथेननिर्मितं॥ संन्यायरत्नेसंपूर्तिनगमन्मनुलक्षणी॥ ॥इतिमीमांसान्यायपंचास्यश्रीमद्राघवाचार्यविरचितस्य २२५

पर्वते इत्युपनामकरघुनाथस्यकृतौगदाधरीपंचवादटिप्पण्यांन्यायरत्नाभिधायांचतुर्दशलक्षणीसमाप्ता॥ ॥

॥ ॥अथभिङ्गांतलक्षणं॥ ॥यथाश्रुतमूलादिति॥ ननुनञ्पदसमभिव्याहृतप्रथमोच्चारितपदार्थनञ्र्थभेदानुयोगि
तावबोधस्यघटःपटोनेत्यादौदृष्टत्वात्प्रतियोगितावच्छेदकावच्छिन्नंयन्नभवतीतिमूलानयुक्तदार्थप्रतियोगितावच्छेदकावच्छिन्नभेदोनञाबोधयि
तुंशक्यतेःपिनुपूर्वपदार्थप्रतियोगितावच्छेदकावच्छिन्नएवयत्तदार्थभेदइतियथाश्रुतमूलाद्यत्तदार्थसाध्यप्रतियोगितावच्छेदकाव-
च्छिन्नभेदःप्रतीयतइत्यसंभवी॥ नचयत्तदस्यपूर्वंयोजनयाग्रंथसामंजस्यमितिवाच्यं॥ तथासतियथाश्रुतमूलप्रतिपाद्यलोकेरसंग
त्यापत्तेरितिचेन्न॥ यथाश्रुतत्वंहिनश्रूयमाणवर्णानुपूर्विकत्वंयेनोक्तदोषःस्यादपितुनिरूढलक्षणेतरलक्षणाधीनार्थप्रतिपत्यत्ता
त्पर्यकत्वंतच्चयत्तदस्यपूर्वंयोजनायामप्यक्षतमितिनोक्तासंगतिः॥ नचतर्हिदंयथाश्रुतत्वंनञ्व्यत्यासपक्षेप्यक्षतमितिवाच्यं॥ न
ञ्व्यत्यासोहिनोत्तरत्रोच्चारितनञ्पूर्वत्रयोजनानञ्समासघटकत्वेनतस्यप्रतियोगितावच्छेदकावच्छिन्नेतिसमासघटकीभूतप्र
तियोगितावच्छेदकपदोत्तरंयोजनायांअसंभवादपितुप्रतियोगितावच्छेदकावच्छिन्नेतिसमस्तपदघटकीभूतप्रतियोगितावच्छेदकपद

स्वप्रतियोगितानवच्छेदकरूपार्थलक्षणातात्पर्यकत्वमेवनत्वस्यतथात्वस्वारसिकलक्षणयाप्रतियोगितानवच्छेदकरूपार्थलक्षणातात्पर्यक-
कयाश्रुतत्वस्यासंभवादिति॥अथप्रतियोगितावच्छेदकावच्छिन्नेयत्तदर्थभेदनिवेशेव्यर्थत्वंतरूपूर्वयोजनयाविपरीतभे
दबोधनंविफलमितिचेन्नैवं॥तथासतिव्यभिचारिण्युदासीनपदार्थेसाध्यभेदस्यनानियाप्यप्रतियोगितावच्छेदकावच्छिन्नप
स्यवीप्साकरणप्रसंगेनतस्याव्यापकत्वेनात्पर्येणचगौरवापत्तेः॥नचयत्तदर्थभेदनिवेशेपिप्रतियोगितावच्छेदकावच्छिन्नोदासीन
पदार्थभेदमादायव्यभिचारिण्यतिव्याप्त्यापत्त्यावीप्सायाभवतोप्यावश्यकत्वेनसाम्यमेवेतिवाच्यं॥प्रतियोगितावच्छेदकावच्छिन्नंयत्त
भवतीतिमूलेनहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नंनेत्याकारप्रतीतिसाक्षिकस्यप्रतियोगितावच्छेदकावच्छे-
न्नावच्छेदकतानिरूपितप्रतियोगिताकस्यैवानुगतैकभेदस्यसाध्यनिवेश्यत्वेनातिव्याप्तेर्निरासात्॥यद्यपिन्यूनवृत्तेर्धर्मस्यैकभेदानुयोगितावच्छे
दकत्वानियमेनप्रतियोगितावच्छेदकतावच्छिन्नानुयोगितावच्छेदकताकस्यसाध्यभेदस्यैवानुगतस्यनिवेशेपिनयथाश्रुतमणिवाक्यार्थेतिव्याप्तिःसंभवति॥तथापिप्रतियोगितावच्छेदकत्वावच्छिन्नानुयोगितावच्छेदकताकभेदप्रतियोगित्वस्यसाध्यनिवेशेसाध्यो

दासीनपदार्थाभयत्वावच्छिन्नभेदमादायव्यभिचारिण्यतिव्याप्तानतथाविधवाक्यार्थोऽदृत इतिध्येयं॥यत्तुप्रतियोगितावच्छे[illegible]च्छिन्ने त्यत्रप्रतियोगितावच्छेदकपदंप्रतियोगिता[illegible]च्छिन्नपदंचावच्छिन्नप्रतियोगिताकपरमवच्छिन्नपदार्थैकदेशोऽवच्छिन्न-त्वनिरुपकत्वसंबंधेनावच्छेदकपदार्थस्यान्वयोऽवच्छिन्नपदार्थस्यचाभेदेननत्रर्थेऽन्व[illegible]त्वावच्छिन्नप्रतियोगिताकभेदस्यसाध्यतावच्छेदकलाभान्नावच्छिन्नपदवैय्यर्थ्यंनवासामान्यभेदनिवेशात्प्रतियोगितावच्छेदकोदासीनपदार्थतावच्छेदकभेदमादायव्यभिचारिण्यतिव्याप्तिरितिव्याख्यानंनलक्षणाद्वयापत्त्यानञ्[illegible]स्वसमभिव्याहृतप्रतियोगिवाचकपदार्थतावच्छेदकावच्छिन्नप्रतियोगिताकभेदबोधनिरूढतयातत्तएववाऽवच्छेदकत्वावच्छिन्नभेदबोधेपुनरवच्छिन्नपदस्यलक्षणयातादृशभेदबोधनेवव्यर्थ्यंनावच्छेदकपदार्थस्यैकदेशेऽन्वयेननिय[illegible]सुबर्थस्याभेदेनान्वयादर्शनाच्चहेयं॥महानसीयवह्न्यभावमादाय-दोषोदुर्वार इति॥हेत्वसमानाधिकरणाभावाप्रतियोगीत्यादिपूर्वपक्षलक्षणोक्[illegible]संभवःस्थिर इतिभावः॥नन्वसंभवोनसंभवतिनानाधिकरणकसाध्यकविशिष्टाभावोभयाभावाद्यादायलक्षणागमनेयंकाधिकरणसाध्यकएतद्रूपवानेतद्रूपादित्यादौलक्षणग

मनात्॥ तत्र विशिष्टाभावोभयाभावयोः प्रतियोगिव्यधिकरण्यासंभवेन लक्षणाघटकत्वादिति चेन्न॥ सर्वत्र प्रमेयसाध्य दृष्टान्तपक्षयोः
भयाभावस्य प्रतियोगि धिकरण्यसंभवेन तमादायासंभवसत्वात्॥ नन्वोभयाभावस्य लक्षण कलेपितत्वप्रतियोगितावच्छेदको
यत्वावच्छिन्नभेदः प्रत्येकमक्षतएवेतिनासंभवइतिवाच्यं॥ उभयत्वस्याभयत्वत्वेनव्यासज्यवृत्तित्वादुभयत्वावच्छिन्नभेदस्यप्र
तियोगितावच्छेदकत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्यैवलक्षणेनिवेशनात्। तेयोगितादवच्छेदकोभयत्वस्याव्यास
ज्यवृत्तित्वान्नतदवच्छिन्नावच्छेदकताकभेदःसाध्येसंभवतीति॥ ननुतत्तद्व्यक्तिवावच्छिन्नाभावमादायदोषसंभवेन हानसीयवह्न्यभावप
र्यंतानुधावनंव्यर्थमितिचेन्न॥ रूपवान्पृथिवीत्वादित्यादौविषयितासंबंधेनरूपत्वविशिष्टज्ञानाभावमादायाव्याप्तिवारणाय तत्तद्व्यक्ति
धिकरणाभावप्रतियोगितावच्छेदकतायांसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वस्यनिवेश्यत्वेन तत्तद्व्यक्तित्वनिष्ठावच्छेदकतायाः
समवायानवच्छिन्नत्वात्तद्व्यक्तित्वावच्छिन्नाभावमादायदोषासंभवेनमहानसीयवह्न्यभावपर्यंतानुधावनात्॥ नन्वेवंमहानसीयवह्न्य
भावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकतायावह्नित्वएवपर्याप्तत यानोक्त्यत्वेऽपि॥ तदुक्तं

गंनसंभवतीतिवाच्यं॥निरुक्ताभावीयप्रतियोगितायामेवसाध्यतावच्छेद[illegible]संबंधावच्छिन्नावच्छेदकताकत्वनिवेश्यतादृशप्रतियोगिता
वच्छेदकतात्वावच्छिन्नपर्याप्त्यनधिकरणत्वस्यसाध्यतावच्छेदकेनिवेशनीयतया[illegible]भावाद॥यद्यपिकालिकेनमहानसीयत्वविशिष्ट
वह्निसाध्यकधूमहेतुकेसमवायसंबंधावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताककालिकसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकताका
भावमादायाव्याप्तिर्नव्यत्यासेपयति॥नचतादृशाभावस्यस्वप्रतियोगितावच्छेदक[illegible]कालिकसंबंधावच्छिन्नमहानसीयत्वनिष्ठाव-
च्छेदकतानिरूपकताकतादृशसमवायसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपकताकाधिकरण[illegible]तयानप्रतियोगि
वैय्यधिकरण्यमितिवाच्यं॥समवायेनमहानसीयत्वविशिष्टस्यकालिकेन वह्नि त्वविशिष्टस्यसाध्यतायांव्यभिचारिणिसमवायसं
बंधावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताककालिकसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकाभावस्योक्तरीत्याप्रतियोगिवैय्यधिकरण्य
भावेनान्याभावमादायातिव्याप्तिवारणायय[illegible]त्संबंधावच्छिन्नायद्धर्मनिष्ठास्वप्रतियोगितावच्छेदकतातत्तत्संबंधेनतत्तद्धर्मविशिष्टानधि
करणवृत्तित्वस्यैवप्रतियोगिवैय्यधिकरण्यपदार्थत्वावश्यकतयानिरुक्ताभावस्यापितथात्वात्तद्वारणायस्वानवच्छेद[illegible]संबंधावच्छिन्न

त्वस्वसमानाधिकरण्योभयसंबंधेनसाध्यतावच्छेदकताविशिष्टान्यायाहेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकतातत्पर्याप्यन

धिकरणत्वस्यसाध्यतावच्छेदकनिवेशयतयातेनवरूपवान्पृथिवीत्वादिसाधारणेऽवच्छेदकतायांसाध्यतावच्छेदकताघटकसंबंधा

वच्छिन्नत्वनिवेशेऽपिव्यक्तिसत्तावच्छिन्नाभावमादायापिदोषःसंभवति॥तथापितादृशपरिष्कारानुसंधानेऽननुसंधानेवाभयथापि

दोषवारणार्थंमहानसीयवह्न्यभावानुधावनमितिध्येयं॥भेदकूटेनेति॥तृतीयार्थेनिरूपकताकर्तृतस्यसामानाधिकरण्येऽन्वयः॥ननु

तादृशभेदकूटाधिकरणाप्रसिद्ध्यावह्निमान्धूमादित्यादावव्याप्तिरतआह॥प्रत्येकमितिं॥प्रत्येकभेदमात्रवृत्तिधर्मावच्छिन्नेति॥तदर्थस्य

स्यनिरूपकत्वेऽन्वयात्तद्धर्मावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नभेदसामानाधिकरण्यकूटवत्वंसाध्यतावच्छेदकेपर्यवसितंतत्स्यवह्नित्वादा

वबाधान्नाव्याप्तिः॥एकव्यक्तिकसत्तादिसाध्यकइति॥नन्वेतत्परिष्कारेवह्निमान्धूमादित्यादावपिवह्निघटाभयाभावमादायाव्या

प्तिसंभवादेकव्यक्तिसत्तादिसाध्यकपर्यंतानुधावननिर्बीजमेव॥नचतादृशाभावप्रतियोगित्वस्यैकाभयत्वावच्छिन्नभेदसामा

नाधिकरण्यंवह्नित्वादावक्षतमेव॥वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्तिवारणायपर्याप्तिघटितसामानाधिकरण्यस्यहेतुसमानाधिकर

णाभावप्रतियोगितावच्छेदकावच्छिन्नभेदानुयोगितावच्छेदकावच्छिन्नपर्याप्तिकत्वरूपस्यनिवेशावश्यकत्वेपिवह्निघटोभयत्वावच्छिन्नभेदा
नुयोगितावच्छेदकवह्निनिष्ठ[illegible]वच्छिन्नपर्याप्तिकत्वस्यापिवह्नितेऽक्षतत्वात्व्याप्तिरितिवाच्यं॥ धूमसमानाधिकरणाभावप्रतियो
गितावच्छेदकमहानसीयवह्नित्वार्णात्वार्णत्वत्युभयत्वाघवच्छिन्नभेदानुयोगितावच्छेदकतद्व्यक्तित्वावच्छिन्नपर्याप्तिकत्वस्य वह्निधूमोभ
यत्वादावसत्वेन वह्निधूमोभयवान्धूमादित्वादावव्याप्त्यापत्यापर्याप्तिघटितसामानाधिकरण्यनिवेशासंभवात्॥ तस्मादुभयसाध्यकव्यभिचा
रिण्यतिव्याप्तिवारणायसामानाधिकरण्यघटकीभूतभेदाधिकरणतायांनिरवच्छिन्नत्वंनिवेश्यंतथाचोभयसाध्यकव्यभिचारिण्युभयाभावस्या
पिलक्षणघटकतयातत्प्रतियोगितावच्छेदकोभयत्वावच्छिन्नभेदाधिकरणतायाःप्रत्येकंप्रतियोगितत्तद्व्यक्तित्वावच्छेदेनवह्नेर्निनि
रवच्छिन्नत्वासंभवान्नतादृशभेदसामानाधिकरण्यमुभयत्वादेरितिनातिव्याप्तिः॥ इत्थंचवह्निमान्धूमादित्वादौवह्निघटोभयाभावस्यापिल
क्षणघटकतयोभयत्वावच्छिन्नभेदनिरूपितनिरवच्छिन्नाधिकरणतायावह्न्यादावसत्वेनाव्याप्तेर्दुर्वारत्वात्॥ मेवमुभयत्वावच्छिन्नसा
ध्यकव्यभिचारिण्यतिव्याप्तिवारणायनिरवच्छिन्नाधिकरणतायघटितसामानाधिकरण्यंननिवेश्यमपितुयावत्साध्यतावच्छेदकेषुतादृ

शभेदसामानाधिकरण्यनिवेशेनाच्चवह्निधूमोभयवान्वह्नेरित्यादौवह्नित्वधूमत्वोभयत्वेनवह्नि[illegible]साध्यत्वेऽतिव्याप्तेः यत्रधूम
त्वाद्यवच्छिन्नघटकधूमाभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्नभेदसामानाधिकरण्याभावान्नातिव्याप्तिः॥ इत्थंचवह्निसाध्यकेवह्निघटो
भयाभावस्यलक्षणघटकत्वेपितत्प्रतियोगितावच्छेदकोभयत्वावच्छिन्नभेदसामानाधिकरण्यस्यवह्नित्वादा सत्तान्याप्तिः॥ अथैवमपि
पर्वतान्यवृत्तित्वविशिष्टवह्न्यभावस्यापिलक्षणघटकतयातत्प्रतियोगितावच्छेदकीभूतपर्वतान्यवृत्तित्वविशिष्टवह्नित्वावच्छिन्नभे
दसामानाधिकरण्यंवह्नित्वस्यनसंभवतिपर्वतवृत्तिवह्नेरपिपर्वतावयवेगगना[illegible]दवृत्तित्वेनपर्वतान्यवृत्तित्वाक्रांतत्वादित्यव्याप्तिर्वह्निसा
ध्यकेपिसंभवतीत्यत्रकश्चिन्नसत्तादिसाध्यकपर्यंतानुधावनंव्यर्थं॥ अत्रवृत्तिस्फुटतरप्रतिपत्त्यर्थतावत्पर्यंतानुधावनमिति॥ वस्तुतस्तु
सत्ताद्रव्यत्वोभयवान्द्रव्यत्वादित्यादिनानाव्यक्तिसाध्यकेपिघटवृत्तित्वविशिष्टत्वावच्छिन्नाभावमादायदोषसंभवादेकव्यक्तिसाध्यकपर्यंतवृ
त्तित्वेनवृत्तीत्यादावव्याप्तिसंभवादेकव्यक्तिसत्तादिसाध्यकपर्यंतमनुधावनमेकव्यक्तिसत्ताहीत्यादिनानानाधिकरणवृत्तिसाध्यकेतिविव
क्षितं॥ एकव्यक्तिपदमपिसाध्यावच्छेदकैक्यतानाधिकरणवृत्तेत्वलाभार्थंनत्वितिकेचित्॥ एकलाभार्थंसत्ताद्रव्यत्वादिव्यक्तिश्चनानाधि-

करणवृत्तिर्भवतीति तत्राव्याप्तिरिष्टैव॥ एतद्रूपादिव्यक्तिस्वरूपानाधिकरणवृत्तीति तत्साध्यकेलक्षणसमन्वयेऽप्यक्षतिरतएवानासंभवोऽभिहितः॥ इत्थंचवह्नित्वादेरपिनानाधिकरणवृत्तित्वेनोक्तस्थलेऽव्याप्तत्वादव्यक्तस्वरूपत्वाच्चाप्तिः॥ यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नविषयकप्रतीतिविषयइति॥ यद्रूपंतादृशप्रतीतिविषयतावच्छेदकमित्यर्थः॥ प्रतियोगितावच्छेदकाश्रयाविषयकत्वस्यप्रतीतौनिवेशेविशिष्टसत्तात्माश्रयाविषयकत्वस्यसत्तायांप्रतीतावसंभवेनाव्याप्तेरित्यादौविशिष्टसत्ताभावमादायाव्याप्तिरतःप्रतियोगितावच्छेदकावच्छिन्नाविषयकेति॥ प्रमेयत्वादिनासाध्यविषयकप्रतीतेःप्रतियोगितावच्छेदकावच्छिन्नाविषयकतयाह्यभिचारिण्यतिव्याप्तिस्तन्यवृत्तेतादृशप्रतीतिविषयतावच्छेदकत्वनिवेशः॥ यद्रूपेणाव्यभिचारिविषयवृत्तित्वनिवेशेसएवदोषइत्यवच्छेदकत्वनिवेशः॥ प्रतियोगितावच्छेदकावच्छिन्नाविषयकत्वेननप्रतियोगितावच्छेदकावच्छिन्नमुख्यविशेष्यतांशून्यत्वंविवक्षितं॥ तेनघटकालीनवह्निमांधूमादित्यादौसाध्यविषयकप्रतीतौप्रतियोगितावच्छेदकघटत्वावच्छिन्नाविशेष्यतासंभवेऽपिनाव्याप्तिः॥ एवंप्रतीतिविषयतावच्छेदकेत्यनेनप्रतीतिमुख्यविशेष्यतावच्छेदकत्वंयद्रूपेणविवक्षितं॥ तेनव्यभिचारिणिसाध्यप्रकारकप्रतीतौप्रतियोगितावच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नमुख्यविशेष्य

ताभूत्यत्वेपिनातिव्याप्तिरितिध्येयं॥अवच्छेदकतायाव्यासज्यवृत्तित्वाभिप्रायेणेदं॥तथाचमहानसीयवह्न्यभावमादायाव्याप्तिवारणायप्रति

योगितावच्छेदकतापर्याप्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकनुरुव्यावशेष्यताशून्यप्रतीतीयनुरुव्यविशेष्यतावच्छेद

कतापर्याप्यवच्छेदकसाध्यतावच्छेदकतापर्याप्यवच्छेदकविशिष्टसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यंविवक्षणीयं॥यद्रूपंप्र

तियोगितावच्छेदकभिन्नमिति॥अवच्छेदकतायाव्यासज्यवृत्तित्वमितिसिद्धांतानुसारेणेदं॥अव्यासज्यवृत्तित्वपक्षांतरमाह॥प्रति

योगितावच्छेदकाविषयकप्रतीतिविषयोवेति॥ननेवमपिवह्नित्वस्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावह्नित्वावि

षयकप्रतीतिविषयत्वंनवह्नित्वस्येत्यव्याप्तिर्दुर्वारेव॥नचप्रतियोगितावच्छेदकायेयेधर्मास्तत्तद्विषयत्वकूटाभाववत्त्वंप्रतीतौनिवेश्यंतथाच

यावद्धर्मानर्गतमहानसीयत्वविषयताघटितकूटाभावस्यवह्नित्वविषयकप्रतीतौसत्वेननाव्याप्तिरितिवाच्यं॥तथासतिव्यभिचारितिप्रतियोगि

तावच्छेदकोदासीनपदार्थतावच्छेदकविषयताघटितकूटस्यसाध्यतावच्छेदकविषयकप्रतीतौसत्वेनतदभावस्यासत्तयाव्याप्यापत्तेरतः

प्रतियोगितावच्छेदकविषयताकूटाभावंपरित्यज्यतादृशधर्मविषयत्वाभावकूटमेवप्रतीतौनिवेश्यंतथाचप्रतियोगितावच्छेदकीभूतसाध्यता

वच्छेदकविषयत्वाभावस्यकूटांतर्गतस्यसाध्यतावच्छेदकविषयकप्रतीतावसत्वेनाऽतिव्याप्तेर्निरासेप्युक्तप्रकारेणाव्याप्तिर्दुर्वारेवेतिचेन्न "हेतुसमानाधिकरणाभावीयैकधर्मावच्छिन्नायावत्यः प्रतियोगितास्तत्तत्प्रतियोगितावच्छेदकविषयकत्वाभावकूटवत्वेसतिहेतुसमानाधिकरणाभावीयानेकधर्मावच्छिन्नायावत्यः प्रतियोगितास्तत्तत्प्रतियोगितावच्छेदकैकधर्मविषयकत्वविशिष्टतादृशापरधर्मविषयकत्वाभावकूटवत्वमिलेवंरीत्यानिवेशनीयंतथाचवह्निमान्धूमादित्यादौमहानसीयवत्त्वभावस्यलक्षणघटकत्वेपितत्प्रतियोगितावच्छेदकीभूतमहानसीयत्वविषयकत्वविशिष्टवह्नित्वविषयकत्वाभावस्यवह्नित्वविषयकप्रतीतौसत्वेनलक्षणसंगतिः॥ अथवा प्रतियोगितावच्छेदकाविषयकेत्यनेनप्रतियोगितावच्छेदकतावच्छेदकत्वंविवक्षितं॥अव्यापकत्वंचनव्यापकभिन्नत्वंतथासतिव्यापकत्वकुक्षौव्यापकत्वनिवेशेनानवस्थापत्तेः॥ किंतुवच्छेदकत्वसमानाधिकरणभेदप्रतियोगितानिरूपितविषयतासंबंधावच्छिन्नावच्छेदकत्वं॥ एवंचवह्निमान्धूमादित्यादौमहानसीयवत्त्वभावीयप्रतियोगितावच्छेदकत्वस्यमहानसीयत्वेपिसत्वेनवह्नित्वविषयकप्रतीतिभेदसत्वाल्लक्षणसंगतिः॥ नच्चधूमवान्वह्नेरित्यादावतिव्याप्तिः॥ धूमत्वविषयकप्रतीतेरपिहेतुसमानाधिकरणाभावप्रतियोगित

वच्छेदकीभूतघटत्वनिरूपितभेदप्रतियोगितावच्छेदकत्वा देतिवाच्यं॥ हेतुसमानाधिकरणाभावीयायायाप्रतियोगितानत्तन्निरूपितावच्छेदक
त्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्यसाध्यतावच्छेदकविषयकप्रतीतोविवक्षितत्वात्॥ **नच** तत्तद्व्यक्तित्वेनप्रतियोगितानिवेशेदुर्ज्ञे
यतेति **वाच्यं**॥स्वावच्छेदकत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसंबंधेनहेतुसमानाधिकरणाभावीययावत्प्रतियोगितावैशिष्ट्यस्ये
वप्रतीतोविवक्षणात्॥यावत्वंचनापेक्षाबुद्धिविशेषविषयत्वंतत्रापिपुनःप्रतियोगितानांतत्तद्व्यक्तित्वेननिवेशापेक्षादुर्ज्ञेयतातदवस्थ्यात्॥वि
तहेतुसमानाधिकरणाभावीयप्रतियोगितानवच्छेदकव्यासज्यवृत्तिधर्मावच्छिन्नत्वं॥उक्तसंबंधेनतादृशव्यासज्यवृत्तिधर्मावच्छिन्नत्वस्य
प्रतीतोविवक्षितमितिनकश्चिद्दोषः॥ **नन्व**वमुष्कावपिमहानसीयवह्निभिन्नवह्निमान्धूमादित्यादावतिव्याप्तिर्महानसीयवह्निभिन्नत्वस्यवह्नि
त्वस्यचप्रत्येकंधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेनप्रत्येकविषयकतत्वीत्योःस्वावच्छेदकत्वसमानाधिकरणभेदप्रतियो
गितावच्छेदकत्वसंबंधेनहेतुसमानाधिकरणाभावीययावत्प्रतियोगितावैशिष्ट्यस्याक्षतेरितिचेन्न॥यद्रूपविषयकप्रतीतीयत्किंचि-
त्साध्यतावच्छेदकाविषयकप्रतीतिभिन्नत्वस्यविवक्षणीयत्वान्नथाचोक्तप्रतीतौनतादृशभेदत्वंमहानसीयवह्निभिन्नत्वावह्नित्वो

नयविषयकेकप्रतीतत्वाभावेदवत्वेपिनोक्तसंबंधेनयावत्स्वनियोगितावैशिष्ट्यंसंभवतियावत्स्वनियोगितांतर्गतमहानसीयवह्निभिन्नत्व
द्यनाचीयस्वनियोगितावैशिष्ट्यस्याक्तसंबंधेनासत्त्वादतानानिव्याप्त्यवसरः॥ ननु प्रतीतौयत्किंचित्साध्यतावच्छेदकाविषयकभिन्नत्वनिवे
शप्रमेयवह्न्वाच्यत्वादित्यादावव्याप्तिस्तत्रसाध्यतावच्छेदकीभूतप्रमेयसामान्यविषयकप्रतीतेर्निरुक्तावच्छेदकत्वाव्याप्यत्वसंभवा
द्वाच्यत्वरूपयत्किंचित्साध्यतावच्छेदकाविषयकप्रतीतेरक्तावच्छेदकत्वाव्याप्यत्वेपियत्किंचित्साध्यतावच्छेदकाविषयकभिन्नत्वस्यासं
भवादिति चेन्न॥ ननु दंडिसाध्यकपरंपरयादंडित्वस्यैवप्रमेयत्वसाध्यकेपिपरंपरयाप्रमेयत्वस्यैवसाध्यतावच्छेदकत्वमस्तीति वाच्यं॥ यत्रैका
पिसाध्यतावच्छेदकव्यक्तिर्नसकलहेतुमद्वृत्तितावच्छेदिकेत्यग्रिमग्रंथस्वरसेनदंडिसाध्यकएवपरंपरयादंडित्वस्याऽवच्छेदकत्वं॥ प्र
मेयत्वावच्छिन्नसाध्यकेतुवाच्यत्वरूपकवलान्वयिप्रमेयस्यसकलहेतुमद्वृत्तितावच्छेदकत्वेनयत्रैकापीत्यादिग्रंथोक्तस्थलानाक्रांतत्वा
दितिचेन्न॥ तादृशग्रंथस्यसिद्धांतानुरुद्धतयैतत्परिकारस्यचपूर्वपक्षीयतयासंदर्भविरोधाभावेनपरंपरयाप्रमेयत्वस्यैवसाध्यतावच्छे
दकत्वापगमात्॥ अथवमपिमहानसीयत्वविशिष्टवह्नित्ववह्न्धूमादित्यादावतिव्याप्तिर्वह्नित्वस्यैवसाध्यतावच्छेदकत्वेनतद्विषयक

प्रतीतेर्युरुधर्मस्यप्रतियोगितावच्छेदक लपक्षेहेतुसमानाधिकरणमहानसीय लविशिष्टवह्नित्ववदभावीयप्रतियोगितावच्छेदकमहा
नसीयत्वनिष्ठावच्छेदकत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वात्॥ अवच्छेदक कुक्षिप्रविष्टानामवच्छेदकत्वपक्षेमहानसी
यत्वस्यापिहेतुसमानाधिकरणमहानसीयत्वविशिष्टवदभावीयप्रतियोगितावच्छेदकत्वात्॥ महानसीयत्वस्यविधेयतानवच्छेदकत्वा
दह्नित्वस्यैवविधेयतावच्छेदकत्वेननद्विषयकप्रतीतेर्यत्किंचित्साध्यतावच्छेदकाविषयकभिन्नत्वस्याक्षतत्वाच्चेतिचेन्न॥ महानसीयत्ववि
शिष्टवह्नित्वप्रतियोगिकसमवायस्यैवतादृशाभावप्रतियोगितावच्छेदकतावच्छेदकत्वाभ्युपगमादतिप्रसंगेनमहानसीयत्वस्यतादृशाभाव
प्रतियोगितावच्छेदकत्वानभ्युपगमादितिदिक्॥ इदंपुनर्बोध्येयं॥ व्यभिचारिणिसाध्यतावच्छेदकस्यतादृशप्रतियोगितावच्छेद
कत्वेपितन्निष्ठसाध्यतावच्छेदकविषयकप्रतीतिघटोभयवद्भेदप्रतियोगितावच्छेदकत्वस्यसाध्यतावच्छेदकप्रतीतौसंभवादतिव्या
प्तिर्दुर्वारा॥ भेदप्रतियोगितायां व्यासज्यवृत्तिधर्मावच्छिन्नत्वनिवेशेतत्रापिव्यासज्यवृत्तिधर्मावच्छिन्नत्वघटोभयाभाव-
मादायदोषाभावस्तस्यैवाभेदप्रतियोगितावच्छेदकतायांसाधिकरणसाध्यप्रतीतौविवक्षितोयावच्छेदकतायाअव्यासज्यवृत्ति

त्वाभिप्रायेणैवैतत्परिष्कारस्य कृतित्वेनप्रतीतिघटोभयवद्भेदप्रतियोगितावच्छेदकत्वपर्याप्तेरपिप्रतीतावक्षतत्वात्॥साध्यतावच्छेदक
विषयकप्रतीत्यवच्छिन्नप्रतियोगितासंबंधेनतादृशप्रतीतिमद्भेदइत्युक्तावप्युभयवद्भेदेनथात्वाभावस्यशाकथैकगम्यत्वेनतादृशशाक
थस्यायंहेतूत्कर्त्वेनाश्रद्धेयत्वादिति॥एवंस्वरूपसंबंधावच्छिन्नत्वविवक्षयति॥अत्रकेचित्॥यद्यपावच्छिन्नंप्रकारत्वंप्रतियोगि
तावच्छेदकावच्छिन्नप्रकारतान्यदितिप्रकारताधर्मिकभेदघटितपरिष्कारएवविवक्षितः प्रतियोगिताधर्मिकभेदघटितपरिष्कारकरणे
गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वमतेगुरुधर्मावच्छिन्नसाध्यकसंदेहेतद्धर्मावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याअनुमित्यनुदयेतेः॥पारिभा
षिकावच्छेदकत्वनिवेशेगौरवात्॥एवंप्रतियोगितायाःप्रतियोगिस्वरूपत्वमतेवह्न्यादिनानाव्यक्तिसाध्यकेसाध्यतावच्छेदकीभूतवह्नि
त्वाद्यवच्छिन्नतत्तद्व्यक्त्यात्मकप्रतियोगितायाहेतुसमानाधिकरणतत्तद्व्यक्त्यभावीयप्रतियोगिता वच्छेदकावच्छिन्नत्वेनतद्भिन्नत्वासं
भवेनाव्याप्तेश्च॥नचप्रतियोगितायाःप्रतियोगिस्वरूपत्वमतेतुल्ययुक्त्याविषयतायाअपिविषयस्वरूपत्वौचित्येनभवन्मतेपुक्तयुक्त्या
अव्याप्त्यापत्तेरौत्स्यमितिवाच्यं॥प्रतियोगितायाःप्रतियोगिस्व[illegible]उरवेणैवभेदैक्यात्॥विषयतायाअपिविषय[illegible]

श्रपरिष्कारस्यासंभवापत्यात्तदन्यथानुपपत्यामिश्रमतेविषयनातिरिक्तत्वस्येवकल्पनादितिवदंति॥ तन्मनोरमं॥युरुधर्मस्यप्रतियोगिता
नवच्छेदकत्वेविषयताधर्मिकभेदघटितपरिष्कारकरणेपियुरुधर्मावच्छिन्नसाध्यकव्यभिचारिणिताइशधर्मस्यप्रतियोगितानवच्छेदकतयात
ड्मावच्छिन्नविषयतायांहतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकावच्छिन्नविषयताभेदस्यलेनातिव्याप्त्यापत्त्याभवतामपिपरिभा-
षिकावच्छेदकत्वविवक्षणवत्प्रतियोगिताधर्मिकभेदनिवेशेपियड्मावच्छिन्नंप्रतियोगित्वमित्यत्रपारिभाषिकावच्छेदकत्वस्यनिवेशनगु
रुधर्मावच्छिन्नसाध्यकाव्याप्यभावात्॥एवंप्रतियोगितायाःप्रतियोगिस्वरूपत्वंविषयतायाश्चातिरिक्तत्वनित्यस्यशक्यैकार्थ्यत्वेनविषय
तायाअतिरिक्तत्वेप्रतियोगितायाअपितत्वस्ययुक्तत्वान्नवत्वादिनानाव्यक्तिसाध्यस्थलेयुक्तरीत्याव्याप्त्यापत्तिरितिप्रतियोगिताधर्मि
कभेदघटितपरिष्कारेपिनकश्चिद्दोषः॥ इदमत्रचिंत्यं॥यद्रूपावच्छिन्नप्रतियोगित्वकारणत्वंतत्कार्यतानिरूपकत्वादिसाधारण्यंयद्रूप-
निष्ठावच्छेदकतानिरूपकत्वरूपयद्रूपावच्छिन्नत्वावच्छिन्नएवप्रतियोगितावच्छेदकावच्छिन्नोहेतुनिवेशनेष्यनुपपत्त्यभावाद्यद्रूपाव-
च्छिन्नप्रतियोगितात्वेननिवेशनंव्यर्थं॥ननुवेशापत्तिः॥परंतुप्रतियोगित्वादिनिष्ठयद्रूपावच्छिन्नत्वावच्छिन्नएवनेदंनिवेशनार्थंतदुक्तं २३३

रवः॥ अतएव स्वरूपसंबंधरूपावच्छेदकत्वविवक्षयेत्युक्तिरिति वाच्यं॥ प्रतियोगितात्वेननिवेशोग्रंथकर्तुरभिनिवेश॥ स्यात्. प्रतियोगितावच्छेदकावच्छिन्नपदस्यव्याप्तिप्रदर्शनसमयेधूमवान्वह्नेरित्यादावपिधूमत्वाद्यवच्छिन्नाधिकरणतायांप्रतियोगितानेदसत्वेनातिव्याप्तिसंभवादप्रसिद्धघटादिसाध्यकस्थलपर्यंतानुधावनेप्रयोजनाभावप्रसंगाद्॥ तस्मात्प्रतियोगितात्वेननिवेशोग्रंथकर्तुः संमतस्तत्प्रयोजनंत्वदृष्टमेव॥ इदमत्राकूतं॥ प्रतियोगितावच्छेदकानवच्छिन्नत्वेननप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकत्वावच्छिन्नसामान्यभेदनिवेशावश्यकतयाप्रतियोगितावच्छेदकतातिरिक्तावच्छेदकतायाःपर्याप्त्यस्वीकारेवह्नित्वावच्छिन्नप्रकारत्वादोपर्याप्तिघटितताहशसामान्यभेदसत्वाद्वह्निसाध्यकेऽव्याप्तिरितिवह्नित्वावच्छिन्नप्रतियोगितात्वेननिवेशः॥ ननुप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मानवच्छिन्नत्वमेवनिवेश्यंकिंपर्याप्तिघटितसामान्यभेदनिवेशेनेतिवाच्यं॥ एकत्रासत्त्वेऽन्यत्रपर्याप्त्यनुयोगित्वेनवह्नित्वस्यापिमहानसीयवह्नित्वावच्छिन्नाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणतयाऽव्याप्तेःपर्याप्तिघटितदृशितसामान्यभेदनिवेशावश्यकत्वात्॥ ननवायेनघटादौसाध्येसयोगेनघटादावतिव्याप्तिरिति॥ ननुकालिकसंबंधावच्छिन्नप्रतियोगिताकधूमाभाव

स्वप्रतियोगिवैय्यधिकरण्याभावेनकालिकसंबंधावच्छिन्नधूमत्वावच्छिन्नप्रतियोगित्वप्रतियोगिव्यधिकरणहेतुमानाधिकरणाभावीयप्रतियोगिताभेदसत्वाद्धूमवान्वह्नेरित्यत्रैवातिव्याप्तिसंभवेन टसाध्यकपर्यंतानुधावनेकिंबीजमितिचेज्जन्यमात्रस्यकालत्वाभावेकालिकसंबंधेनधूमाभावस्यप्रतियोगिवैय्यधिकरण्यसंभवेनदोषत्वेहि॥ नच्चतथापिस्वरूपसंबंधावच्छिन्नप्रतियोगिताकधूमाभावस्यतेनसंबंधेनधूमाधिकरणाप्रसिद्ध्याप्रतियोगितावच्छेदकस्वरूपसंबंधेनप्रतियोगिवैय्यधिकरण्याभावेनस्वरूपसंबंधावच्छिन्नधूमत्वावच्छिन्नप्रतियोगित्वतादृशप्रतियोगिताभेदसत्वेनसंभवत्येवधूमसाध्यकेऽतिव्याप्तिरिति वाच्यं॥ स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वहेत्वधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वोभयाभावव्यूत्वप्रतियोगितावच्छेदकसंबंधसामान्यकत्वरूपवक्ष्यमाणप्रतियोगिवैय्यधिकरण्यस्यस्वरूपसंबंधेनधूमाभावेऽसत्वात्॥ अतएवहेतुमानाधिकरणाभावीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशप्रयोजकवाच्यत्वादित्यादावप्रिमाव्याप्तिकथनंसंगच्छतेव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाभावस्यापेक्षितोभयाभावघटितवक्ष्यमाणप्रतियोगिवैय्यधिकरण्यसंभवात्॥ एतेन॥ व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाभावस्यप्रतियोगितावच्छेदकसंबंधघटितप्रतियोगिवैय्यधिकरण्याभावेनाव्याप्त्यभावमाशंक्या

दिपदस्यान्यनादात्यसंबंधेनवाच्यसाध्यकस्थले व्याप्तिनात्पर्यकल्पनंकेषांचिदनादेयमेव॥ कालिकसंबंधेनवाच्यत्वाभावस्यात्मादौप्रतियोगिवैय्यधिकरण्यसंभवाच्च॥ अथप्रतियोगितावच्छेदकानवच्छिन्नमित्यस्यप्रतियोगितावच्छेदकतापर्याप्तियनुयोगितावच्छेदकावच्छिन्नपर्याप्तिकावच्छेदकतात्वावच्छिन्नभेदवदित्यर्थकत्वावश्यकत्वेननदृपेक्षयाद्रूपावच्छिन्नप्रतियोगितासामान्येहेतुसमानाधिकरणाभावीयप्रतियोगितात्वावच्छिन्नभेदनिवेशेपिव्यभिचारिणिसाध्यनावच्छेदकसंबंधावच्छिन्नद्रूपावच्छिन्नप्रतियोगितायांसामान्यांतर्गतायांतादृशप्रतियोगितायाभेदासत्वेनातिव्याप्तिवारणात्प्रतियोगितावच्छेदकावच्छिन्नभेदनिवेशोव्यर्थ इतिचेन्न॥ सामान्यपदेनतादृशप्रतियोगितात्वव्यापकत्वस्यैवबोधनात्तदपेक्षयातादृशप्रतियोगितावच्छेदकानवच्छिन्नत्वविवक्षणएवलाघवात्॥ यत्तुयद्रूपावच्छिन्नप्रतियोगितासामान्यइत्यनेननादृशप्रतियोगितात्वावच्छिन्नानुयोगितात्वमेवविवक्षणीयमित्यंचनातिव्याप्तिर्लक्षतमिति॥ तदसत्॥ अधिकरणतातिरिक्तानुयोगितायांमानाभावेनाधिकरणतानिरूपकधर्मस्याप्यधिकरणतावच्छेदकत्वेनयद्रूपावच्छिन्नयत्किंचित्प्रतियोगितावृत्तिहेतुसमानाधिकरणाभावीयप्रतियोगितानिरूप्ययद्रूपावच्छिन्नप्रतियोगितात्वावच्छिन्नानुयोगितात्वानपायादितिव्याप्त्यवारणाच्चादृशप्रतियोगितात्वव्या

पकत्वविवक्षावश्यकत्वेनतत्रक्षेगौरवादित्यभिप्रायात्॥ इतिमिश्रीत्यापरिष्कारेगौरवमिति॥कालिकसंबंधेनगगनादेर्वृत्तित्वकल्पे कालोघटवान्कालपरिमाणादित्यादावव्याप्तिर्नत्रव्यत्यासपक्षेपिसत्वेनयश्चोभयोःसमोदोषःसनेकतरेणोद्भावनीयइतिन्यायरत्नोक्तमनु-द्भावनं॥ अथवागुरुधर्मावच्छिन्नसाध्यकेयद्रूपावच्छिन्नप्रतियोगि त्वाप्रसिद्ध्यापारिभाषिकमवच्छेदकत्वंनिवेश्यंतथा च द्रूपाव-च्छिन्नवृत्तिर्यत्तादात्म्यीयसंबंधावच्छिन्नस्वरूपसंबंधावच्छिन्नाभावीयप्रतियोगितानदनवच्छेदकरूपावच्छिन्नप्रतियोगित्वहेतुमन्निष्ठा भावप्रतियोगितानवच्छेदकावच्छिन्नस्वरूपसंबंधावच्छिन्नाभावीयाप्रतियोगितानवच्छेदकावच्छिन्नभिन्नमितिविवक्षणीयं गुरुधर्मावच्छिन्नसाध्यके-गुरुसननियतलघुधर्मावच्छिन्नप्रकारकप्रमाविशेष्यतात्वावच्छिन्नप्रतियोगित्वमेवयद्रूपनिष्ठपारिभाषिकावच्छेदकतानिरूपकं सिध्यति॥ व्यभिचारिणिसाध्यप्रकारकप्रमाविशेष्यत्वाभावस्यापिलक्षणघटकतयातत्प्रतियोगिताभिन्नंसाध्यतावच्छेदकनिष्ठपारिभाषि-कावच्छेदकतानिरूपकंप्रतियोगित्वंनसंभवतीतिनातिव्याप्तिः॥ इत्थंचकालोघटवानित्यादौकालिकावच्छिन्नकर्तृत्वाविषयता त्वावच्छिन्नंप्रतियोगित्वंलक्षणघटकसमवायावच्छिन्नघटत्वपटत्वाद्यवच्छिन्नप्रकारताकप्रमाविशेष्यतात्वावच्छिन्नाभावीयप्रति

नाभिन्नमितिलक्षणसमन्वयः॥पारिभाषिकावच्छेदकतशरीरनिविष्ट[illegible]प्रतियोगितयोरे[illegible]वच्छिन्नत्वविवक्षायांप्रतियोगिवैय्यधिकरण्यत्यागस्यग्रंथकृतावश्यमाणत्वान्नक्षतिः॥अथयद्रूपावच्छिन्नेप्रतियोगितावच्छेदकेच्छिन्नभेदनिवेशेमहानसीयवह्नेर्भावभावाद्याव्याप्तिवारणायहेतुसमानाधिकरणाभावेत्यवच्छिन्नसामानाधिकरण्यस्याश्रयप्रतियोगिकत्वोभयसंबंधेनसाध्यतावच्छेदकविशिष्टान्यत्वंविशेषणंदेयं॥सद्धेतौहेतुसमानाधिकरणस्यसर्वस्याप्यभावस्यसाध्यसमानाधिकरणत्वात्तत्याभावाप्रसिद्धिरतःस्वाश्रयप्रतियोगिकत्वस्यनिवेशः॥व्यभिचारिणिसाध्याभावसंग्रहायस्वावच्छिन्नसामानाधिकरण्यनिवेशः॥विशिष्टसत्त्वांजातेरित्यादौविशिष्टसत्ताभावसंग्रहायसामानाधिकरण्यघटकाधेयतायाःस्वावच्छेदकत्वनिवेशः॥अथैवंकपिसंयोग्येतत्वादित्यादौकपिसंयोगाभावस्यलक्षणाघटकत्वात्प्रतियोगिवैय्यधिकरण्यस्यनैरर्थक्यापत्तिः॥न[illegible]गीसत्वादित्यादौतध्याभावस्यलक्षणाघटकतयाऽतिव्याप्तिवारणायसामानाधिकरण्यस्यनिरवच्छिन्नवृत्तित्वघटितस्यैवनिवेश्यत्वात्तौसंयोगाभावस्यलक्षणघटकतयाऽव्याप्तिवारणायतेनयोगिवैय्यधिकरण्यस्यावश्यकतेतिवाच्यं॥संयोगसाध्यकव्यभिचारिणिगुणाद्यवृत्तित्वावच्छिन्नाभावस्यलक्षणघटकतयासंयोगस्या

पितत्वप्रतियोगितावच्छेदकावच्छिन्नत्वादतिव्याप्तिवारणसंभवेनसामानाधिकरण्यघटकवृत्तित्वनिरवच्छिन्नत्वानिवेशादितिचेन्न॥संयो गनद्रव्याभाव्यवृत्तित्वेधूमवान्वह्नेरित्यादौधूमाभावस्ययोगोलकासंयुक्तपदार्थाभावस्यचधूमवत्तिस्वरूपसंबंधेनसत्वालक्षणाघट कत्वेनातिव्याप्तापत्तासामानाधिकरण्यघटकवृत्तित्वनिरवच्छिन्नत्वस्यावश्यकत्वेनकपिसंयोगसाध्यकेकपिसंयोगाभावस्यापिलक्ष ण्यरक्षणाय व्यासेर्वारणायप्रतियोगिवैयधिकरण्यस्यावश्यकत्वान्नअव्याप्तपक्षावलंबनमसंगतमितिचेन्न॥एवंसतिप्रमेयवान्न्यत्वादित्यादौसर्वेषामेवाभावानामुक्तोभयसंबंधेनसाध्यविशिष्टतयातदन्याभावाप्रसिद्ध्याऽव्याप्यापत्तिः॥ननुकालपक्षकव्यभिचारिणिसाध्याभावस्यव्यभिचारनिरूपकाधिकरणावृत्तित्वावच्छिन्नाभावस्यचकालिकसंबंधेनसाध्यसमानाधिकरणतयालक्षण घटकत्वेनान्याभावादायातिव्याप्तिवारणायसामानाधिकरण्यघटकवृत्तिःस्वरूपसंबंधेनविवक्षणीयातथाचप्रमेयसाध्यकेघटा न्यकाभावस्यैवप्रसिद्ध्यानाप्रसिद्धिनिबंधनाव्याप्तिरितिवाच्यं॥देशवृत्तीकालस्यावच्छेदकत्वेनकालपक्षकव्यभिचारिणिसाध्याभावस्य निरवच्छिन्नवृत्तित्वघटितसाध्यसामानाधिकरण्यासंभवेनोक्तोभयसंबंधेनसाध्यतावच्छेदकविशिष्टान्यत्वसंभवेनातिव्याप्तेरभावाद्

त्तासामानाधिकरण्यघटकस्वरूपसंबंधविशेषानिवेशेनप्रमेयसाध्यकेयद्यात्मकाभावस्यापिसमवायादिनासाध्यसमानाधिकरणतयातदन्याप्रसिद्धेर्दुर्वारत्वाद्॥ यद्यपिविषयितासंबंधावच्छिन्नाप्यधिकरणनिष्ठप्रतियोगिकाभावेसाध्यसमद्देतौतत्तद्व्यक्त्यसाध्याभावस्यवृत्त्यनियामकविषयितासंबंधेनसाध्यवत्यवृत्तिनयानिरुक्तोनवमसंबंधेनसाध्यतावच्छेदकविशिष्टान्यत्वस्यैवनिवेशनीयसामानाधिकरण्यकुक्षौवृत्तित्वंपरित्यज्यसंबंधित्वंनिवेश्यंतथाचसत्तावान्मेयत्वादित्यादौव्यभिचारिणिसत्ताभावस्यव्यभिचारिनिरूपकाधिकरणावृत्त्यभावस्यचसाध्याधिकरणेज्ञानादौविषयितासंबंधेनसंबद्धतयातदन्यत्वासंभवादुदासीनपदार्थाभावमादायातिव्याप्तिवारणायसामानाधिकरण्यघटकसंबद्धत्वंदेशिकविशेषणतयावाच्यंतथाचप्रमेयसाध्यकेभावात्मकाभावस्यलक्षणघटकत्वंसुलभं॥ तथापिरूपप्रतियोगिकाभाववान्मेयत्वादित्यादौतत्तद्रूपात्मकानांसाध्याभावानांस्वरूपसंबंधेनसाध्यवत्यवृत्तिनयासाध्यतावच्छेदकविशिष्टान्यत्वेनहेत्वधिकरणतयाचलक्षणघटकत्वेनाव्याप्तिप्रसक्त्यास्वप्रतियोगिसत्ताग्रहविरोधिनानियामकसंबंधेनैवसाध्यसामानाधिकरण्यस्यवाच्यतयाप्रमेयसाध्यकेचतथाविधभावात्मकाभावस्यसमवायसंबंधेनसाध्यसमानाधिकरणतयासाध्यतावच्छेदकविशिष्टान्याभावाप्रसिद्धेर्दुर्वारत्वाद्॥ नचरूपप्रतियोगिकाभावसाध्यकेऽव्याप्ति

वारणायसाध्यवत्ताग्रहविरोधितानियामकसंबंधेनैवसाध्यसामानाधिकरण्यंविवक्षणीयंतथात्वप्रमेयसाध्यकेस्वरूपसंबंधस्यैवतथा-
त्वेनघटात्मकाभावस्यप्रसिद्धिःसुलभैवेतिवाच्यं॥ सत्ताभाववान्जातेरभावात्कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावा
भाववानात्मत्वादित्वादौसाध्यवत्ताग्रहविरोधितानियामकीभूतसमवायकालिकविशेषणतादिसंबंधेनसाध्याधिकरणवृत्ति-
त्वस्याप्रसिद्ध्याऽव्याप्यत्वात्प्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेनैववृत्तित्वस्यविवक्षणीयत्वादितिदिक्॥ संबंधा
दीति॥समवायस्वरूपादिसंबंधादीत्यर्थः॥ आदिनासावच्छिन्नत्वनिरवच्छिन्नत्वयोःसंग्रहः॥ एवंसतीति॥ नन्वत्रमहा
नसीयवह्निमान्धूमादित्यत्रवह्नित्वादिरूपसाध्यतावच्छेदकस्योक्ताभावप्रतियोगितानवच्छेदकत्वेनातिव्याप्तिसंभवे-
महानसीयवह्निभिन्नवह्निसाध्यकानुधावनंव्यर्थं॥ नन्वसाध्यतावच्छेदकसामान्येऽनवच्छेदकत्वनिवेशेनोक्त
दोषःसाध्यतावच्छेदकसामान्यांतर्गतस्यमहानसीयत्वस्यानवच्छेदकत्वविरहेणमहानसीयवह्निसाध्यकस्थ
लेऽतिव्याप्तेस्तदवस्थसंभवइतिवाच्यं॥ तथासतिप्रमेयसाध्यतावच्छेदकेऽव्याप्तिःसाध्यतावच्छेदकसामान्यांतर्गतस्यघटत्वादेरनवच्छेद

कत्वासंभवात्॥ तत्र परंपरासंबंधेनप्रमेयत्वस्यसाध्यतावच्छेदकत्वमित्यपिन संभवतियत्रैकापीत्यग्रिमग्रंथेनसाध्यतावच्छेदक सकलव्यक्ती नांतादृशाभावप्रतियोगितावच्छेदकत्व एव परंपरासंबंधेऽननुगतधर्मस्यसाध्य[illegible]मेयसाध्यतावच्छेदककस्थलेसाध्य तावच्छेदकस्यांतर्गतस्यगगनाभावादेस्तादृशाभावप्रतियोगितावच्छेदक[illegible]संबंधेनत्वस्यसाध्यतावच्छेदकत्व स्यग्रंथकारानुमतत्वात्॥ एकैकसाध्यतावच्छेदकव्यक्तिरितिपाठकल्पनंप्रामादिकंप्रमेयसाध्यतावच्छेदककस्थलेगगनाभावादेस्तादृशाभाव प्रतियोगितानवच्छेदकत्वेपरंपरासंबंधेनप्रमेयत्वस्यसाध्यतावच्छेदकत्वाभ्युपगमस्यनिरर्थकत्वादितिचेन्न॥ चक्रवर्तिलक्षणेवस्तुतस्ति त्वादिप्रतियोगिवैय्यधिकरण्यनिरूपितप्रमेयसाध्यतावच्छेदककस्थलेप्रमेयत्वस्यपरंपरयासाध्यतावच्छेदकत्वस्यग्रंथकारानुमतत्वेनत न्नताभिप्रायकत्वात्॥ नन्वनुमितौसाध्यतावच्छेदकस्यसाध्यतावच्छेदकत्वेननप्रवेशोऽभिप्रेतःयोधर्मइत्यादिनाविशिष्यनिवेशस्याभिप्रे तत्वान्महानसीयवह्निसाध्यकव्यभिचारिणियोधर्मइत्यादिनाविशिष्योपादेयमहानसीयत्ववह्नित्वयोर्मध्येमहानसीयत्वस्यावच्छेदक त्वान्नातिव्याप्तिः॥ प्रमेयसाध्यतावच्छेदककस्थलेविशिष्यापादेयमाना[illegible]भावरूपसाध्यतावच्छेदकेऽनवच्छेदकत्वसत्त्वान्नाव्याप्तिः॥ योध

इत्यादिनावह्नित्वमात्रापादानेनवह्नित्वावच्छिन्ननिरूपितव्याप्तिः॥ नतुमहानसीयवह्निनिरूपितेनुदेशंभवेनमहानसीयवह्निभिन्न वह्निसाध्यकानुसरणं ॥ननुरूपेणानवच्छेदकत्वग्रहादिति॥साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नविशेष्यकानवच्छेदकत्वप्रकारकव्याप्तिज्ञानस्यकारणत्वाभ्युपगमेवह्नित्वत्वावच्छिन्नविशेष्यकधूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वप्रकारकधूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकवह्नित्ववद्वृत्तिसमानाधिकरणधूमवानितिज्ञानस्यैववह्नित्वावच्छिन्नरूपेतावह्नित्वावगाहिवह्निमानित्याद्यनुमितौचकारणत्वंकल्पनीयंतथाचकदाचिद्वह्निमान्कदाचिद्वह्नित्ववद्वानित्यनुमितिर्नस्यादित्यनुपपत्तिः केवलान्वयिग्रंथेउच्यतइतिप्रघट्टकार्थः॥ अनवच्छेदकत्वेनवह्नित्वादिभानेति॥समानविषयकत्वेनप्रतिबंधकतानवच्छेदकत्वेइत्यत्वादौ व्यापकतानवच्छेदकत्वभानस्यतन्निरूपितावच्छेदकव्यापकतावच्छेदकत्वेनप्रतिबंधकत्वंसंभवतीतिप्रायशइति॥शब्दज्ञानादेर्यस्यनियामकत्वादनवच्छेदकत्वेनवह्नित्वबोधतात्पर्येनइत्यत्वभानमितिप्रायशइतिकेचित्॥ननुवनवच्छेदकधर्मितावच्छेदकतयायस्यभानंतत्रैवविधेयतावच्छेदकतयाभाननियमइतिनेयंदोषइत्यतोदोषांतरमाहेवमिति॥वह्निव्यभिचारितयेतिप्रकारत्वंतृतीयार्थस्यस्य

हेतुज्ञानेऽन्वयः॥ ननु हेत्वाभासलक्षणघटकसमूहालंबनानुमितौकिंचिद्धर्मावच्छिन्नप्रतियोग्यनिरूपितानवच्छेदकत्वप्रकारकत्वमेव व्यभिचारस्यहेत्वाभासलोपपत्तयेनिवेश्यं॥ नत्वनुमितिकारणतावच्छेदककोटावह्नित्वत्वाद्यवच्छिन्नेऽनवच्छेदकत्वावगाहित्वंनिवेश्यतेप्रयोजनाभावादितिवाच्यं॥ तथासतिव्याप्तिज्ञानप्रतिबंधकतयाव्यभिचारस्यकथायामुपन्यासानर्थक्यादिति॥ केवलान्वयिग्रंथोक्तकदाचिद्वह्निमान्कदाचिद्वह्नित्वावद्वानित्यनुमित्यनियमरूपदोषमुद्भावयंस्तन्नियामकमाह॥ यत्रेति॥ याऽऽद्यन्तयोगइत्यर्थः॥ तेनेन्द्रियेण॥ वह्नित्वत्वादिना॥ तद्धर्मिणां॥ वह्नित्वादीनां॥ व्याप्तिघटकत्वं॥ व्याप्तिकुक्षिप्रविष्टानवच्छेदकत्वधर्मिताकवह्नेर्यत्कुक्षिप्रविष्टभेदप्रतियोगितानिरूपिततत्तद्धर्मावच्छिन्नावच्छेदकत्वं॥ प्रवेशः॥ निरुक्तभेदप्रतियोगितानिरूपितानवच्छिन्नावच्छेदकत्वरूपंव्याप्तिघटकत्वं॥ इत्थंचवह्नित्वत्वंहिविधंवह्नित्वदितराद्यत्वरूपंवह्नीतराद्यत्वरूपंचेति॥ तत्रप्रथमवह्नित्वत्वावच्छिन्नेऽनवच्छेदकत्वावगाहिधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकंयद्वह्नित्वदितराद्यत्वंतदवच्छिन्नसमानाधिकरणधूमवानितिज्ञानंवह्नित्ववद्वानित्यनुमितौकारणंद्वितीयवह्नित्वत्वावच्छिन्नेऽनवच्छेदकत्वावगाहिधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकंयद्वह्नीतराद्यत्वंतदवच्छिन्नसमानाधिकरणधूमवानितिज्ञानंवह्निमानित्यनुमितौ-

कारणमिति नियामकभेदान्न दर्शितद्विविधानुमित्यनियम इति भावः॥ ननु वह्नीतरद्रव्यत्वस्य वह्नित्वभिन्नवह्निगतरूपादावपि सत्त्वात्सकल वह्निवृत्तित्वं नास्तीति द्विविधवह्नित्वशरीरे निवेशनीयमित्यत आह॥ वह्नीतरद्रव्यत्वस्येति॥ सकलवह्निवृत्तित्वविषयतानिवेश इति॥ कारणतावच्छेदककोटावित्यादिः॥ ननु तर्हि सकलवह्निवृत्तित्वरूपवह्नित्वत्वविषयतैव कारणतावच्छेदककोटौ निवेश्यान तु वह्नीतरद्रव्यत्वविषयतायां विनिगमकाभावादित्यतो विनिगमकमाह॥ सकलवह्न्यादिवृत्तित्वस्येति॥ वह्निनिष्ठभेदप्रतियोगितानवच्छेदकत्वं सकलवह्निवृत्तित्वं॥ अनुमितिप्रसंगादिति॥ वह्नित्वावच्छिन्नानुमितिजनकेंधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यत्सकलवह्निवृत्तित्वं तदवच्छिन्नसमानाधिकरणेंधनवानिति परामर्शस्यप्रमात्वप्रसंग इत्यर्थः॥ यत्तु प्रकृतानुमितिविधेयतावच्छेदकतायावह्नित्वत्वावच्छिन्न एव पर्याप्तत्वया दर्शितपरामर्शस्य तदवच्छिन्नेऽनवच्छेदकत्वावगाहित्वाभावान्नोक्तप्रसंग इतिपूर्वपक्षयित्वोभयत्वावच्छिन्नसाध्यतावच्छेदककस्थलेएवप्रकृतानुमितिविधेयतावच्छेदकतायादृशधर्मावच्छिन्नेपर्याप्तत्वादिविवक्षणंनतुसर्वत्रेतिसमाधानं॥ तदसत्प्रकृतानुमितिविधेयतावच्छेदकवह्नित्वघटकवह्नीतरद्रव्यत्वविषयतानिरूपितकारणतावच्छेदकतालाघवादुक्तंतत्रविनिगमनादिरूपं दूषकमकल

वह्निवृत्तित्वविषयतायाएवकारेणनावच्छेदकलंननुवह्नीतरावृत्तित्वविषयतायाइतिशंकायामतिप्रसंगदानात्॥येनरूपेणोपस्थितेवह्नित्वादाविति॥अत्रतृतीयायाःप्रकारितारूपंविशिष्यमर्थः॥उपस्थितेतत्रविशेष्यतावत्तृक्प्रत्ययार्थोवह्नित्वेविशेषणंवह्नित्वादावित्यत्रसंशयान्वयिविशेष्यत्वंसप्तम्यर्थः॥इतरसाधारण्यसंशयः॥इतरवृत्तित्वप्रकारकसंशयस्तथाचयद्रूपप्रकारकोपस्थितिविशेष्यीभूतवह्नित्वादिविशेष्यकेतरवृत्तित्वप्रकारकसंशयउत्पत्त्याश्रयत्वाभाववानित्यर्थः॥अत्रयद्यपिधर्मिप्रसिद्ध्याप्रसिद्धिभ्यांनिषेधानुपपत्तिः॥नचानाहार्यःसन्निति॥शेषेणानाहार्यत्वविशिष्टसत्त्वोनिषिद्धायांविशेष्यवृत्तिविशिष्टाभावस्यविशेषणाभावपर्यवसन्नत्वादाहार्यत्वनियमलाभः॥तथाचोक्तसंशयस्याहार्यत्वनियमान्नोक्तदोषदुष्टितिवाच्यं॥एवमपियद्वीतरावृत्तित्वप्रकारकनिर्धर्मितावच्छेदकज्ञानसत्वेपिजातित्वादिनेतरसाधारण्यसंशयस्यानाहार्यस्यसंभवेनव्यभिचारस्यदुर्वारत्वात्॥तथापिस्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितयदितरवृत्तित्वावच्छिन्नप्रकारताकत्वैकक्षणावच्छिन्नैकात्मवृत्तित्वोभयसंबंधेनयद्धर्मावच्छिन्नप्रकारतानिरूपितविशिष्टसंशयस्याहार्यत्वानियमस्तद्रूपावच्छिन्नविशेष्यताकानवच्छेदकत्वप्रकारकज्ञानस्यानुमितिजनकत्वमित्यभिप्रायात्॥यद्वायद्धर्मावच्छिन्नविशेष्य

केतरवृत्तित्वप्रकारकज्ञानसामान्यस्याहार्यत्वमित्यर्थान्नदोषः॥ नचैवं संशयपदवैयर्थ्यं शंक्यं संशयपदस्य प्रतिबध्य—
ज्ञानपरतयाप्रतिबध्यज्ञाननंजायतइतिप्रतिबध्याहार्यमेवजायतइत्युक्तार्थलाभापत्तेरागत्वात्॥वस्तुतस्तूपस्थितेतस्यभावकालनतयोप
स्थितेर्नत्यागित्यर्थः॥वह्नित्वादावतिव्याप्तिदोषः॥नजायतइतिप्रतिबध्यप्रतिबंधकभावलाभार्थंसंशयपदंप्रतिबध्यत्वलाभार्थं॥तथा
चयत्किंचिद्धर्मावच्छिन्नविशेष्यकयद्धर्मप्रकारकज्ञानंस्वसमानधर्मिनावच्छेदकंकेतरवृत्तित्वप्रकारकसंशयप्रतिबंधकंप्रतिब
ध्यंचेतनरूपेणानवच्छेदकत्वप्रकारकज्ञानंकारणमित्यर्थः॥प्रतिबध्यंचेत्युक्त्यैतरावृत्तित्वव्याप्यवत्वस्यव्यावृत्तिः॥अथसाध्यतरावृत्तित्व
वच्छिन्नेनावच्छेदकत्वावगाहिज्ञानस्यानुमितिकारणत्वेवह्निधूमोभयवान्धूमादित्यादौवह्निधूमोभयरूपसाध्यभिन्नप्रत्येकवह्न्यादिवृत्तित्व
स्यतादृशोभयत्वेसत्वादनुमितिकारणत्वेनाभिमतज्ञानस्यप्रमात्वानुपपत्तिः॥नचसाध्यभेदानुयोगितावच्छेदकंयत्किंचित्स्वच्छिन्नापर्या
प्तिकत्वमेवसाध्यतरावृत्तित्वंविवक्षितंनिरुक्तोभयभिन्नत्वस्यप्रत्येकंसत्वेपितादृशभेदानुयोगितावच्छेदकप्रत्येकमात्रवृत्तिधर्मावच्छिन्नाप
र्याप्तिकत्वस्यतादृशोभयत्वेसत्वान्नोक्तदोषइतिवाच्यं॥तथापिप्रमेयत्वसाध्यकेसाध्यभिन्नाप्रसिद्धेरुक्तदोषस्यदुर्वारत्वादितिचेन्न॥यत्रसाध्य

बंधावच्छिन्नत्वे ऽनवच्छिन्नत्वाभावात्॥ समवायेन विद्यमानत्वाद्यवच्छिन्नाभावीयप्रतियोगितावच्छेदकतायाअनवच्छिन्नत्वेपि संयोगसंबंधावच्छिन्नत्वाभावात्॥ नच पारिभाषिकावच्छेदकत्वघटकानवच्छेदकत्वघटकसंबंधेनतादृशावच्छेदकत्वमभिप्रेतमितिवाच्यं॥ अग्रिमातिव्याप्त्यसंगतेः॥ व्यभिचारनिरूपकाधिकरणन्यत्वादेः स्वरूपसंबंधावच्छिन्नधर्मानवच्छिन्नावच्छेदकत्वसंभवात्॥ नचाखंडोपाधौमानाभावाद्व्यभिचारनिरूपकाधिकरणान्यत्वादेःस्वरूपतोऽभानान्तन्निष्ठावच्छेदकतायाअनवच्छिन्नत्वाभावान्नासंगतिरितिवाच्यं॥ तथाप्यखंडोपाधिस्वीकर्तृमतेःसंगतेर्दुर्वारत्वात्॥ अत्रकेचित्॥ एतत्कल्पेऽवच्छेदकतायांसाध्यतावच्छेदकता—घटकसंबंधावच्छिन्नत्वंनदेयं प्रयोजनाभावात्॥ नच गुणवान्द्रव्यत्वादित्यादौपूर्वोक्तरीत्याव्याप्तिरितिवाच्यं॥ जातेःसमवायेनैवस्वरूपतःस्वच्छेदकत्वाधिकरणतासंबंधावच्छिन्नगुणत्वनिष्ठनिष्ठावच्छेदकतायाअनवच्छिन्नत्वाभावादनवच्छेदकत्वस्यसाध्यतावच्छेदकेऽक्षतत्वात्॥ नच्चनिरूपितत्वसंबंधेनजातेःस्वरूपतोभानस्यापेक्ष्यव्यवस्थापितत्वाद्गुणसाध्यकसद्धेतावच्छेदकतायांसाध्यतावच्छेदकतायटकसंबंधावच्छिन्नत्व[illegible]स्वसंबंधेनगुणत्वविशिष्टप्रकारित्वाभावस्यहेतुसमानाधिकरणस्यायाप्रतियोगितानि

रूपितानवच्छिन्नावच्छेदकतायाः साध्यतावच्छेदकेसत्वादव्याप्तिरितिवाच्यं॥गुणत्वविशिष्टप्रकारित्वाभावस्य प्रतियोगिवैय्यधिकरण्यमेवनसंभ
वति॥तथाहि॥दृशाभावोयदिसमवायेननददाप्रतियोगितावच्छेदकसमवायसंबंधेनप्रकारित्वस्याधिकरणप्रसिद्धिः॥यदिस्वरूपसंबंधेनत
दातदीयप्रतियोगितानसाध्यतावच्छेदकसंबंधावच्छिन्नेतिनदोषइत्याशंक्य॥तदसत्॥समवायेनैवतदभावमादायाव्याप्तिस्तस्मिन्यथाश्रुतप्रतियो
गिवैय्यधिकरण्यानावेपिप्रतियोगितावच्छेदकसंबंधादिधर्मिकेभ्याभावघटितस्यतस्याक्षततात्॥अपरेतुनिरुक्तावच्छेदकभेदोनसाध्यतावच्छेदकेनिवेश्यतेऽपितुसाध्यतावच्छेदकतावच्छेदकसंबंधावच्छिन्नावच्छेदकत्वीयपर्याप्तिसंबंधावच्छिन्ननिरवच्छिन्नावच्छेदकत्वाभावएवेत्यभिप्रायेणशंकासंगतिरितिद्रष्टव्यं॥प्रसिद्धानुमानाव्याप्तिंपरिहर्तुमाहेवंचेति॥तथाचगुणवान्द्रव्यत्वादित्यादावव्याप्तिवारणायविवक्षणीयसाध्यतावच्छेदकतावटकसंबंधावच्छिन्नावच्छेदकताशून्यत्वस्यवह्नित्वरूपसाध्यतावच्छेदकेसत्वान्नाव्याप्तिरितिभावः॥विशिष्टविशेषणकबुद्धावविशेषणविशिष्टप्रतियोगिकसंबंधावगाहित्वानुभवात्तत्रैवविशेष्यरूपेणसंसर्गतानान्यत्रतेनवह्नित्वप्रतियोगिकसमवायादेर्यत्रसाध्यतावच्छेदकतावटकसंबंधेनावच्छेदकसमानाधिकरणाभावप्रतियोगितानिरूपितसाध्यतावच्छेदकतावटकसंबंधावच्छिन्नावच्छेदकत्वप्रसिद्धया॥

तावच्छेदकस्यस्वरूपतः किंचिद्रूपणवेतिद्वेधाऽनुमितौभानंप्रसक्तंतत्रैवतादृशानुमित्योःकादाचित्कत्वनिर्वाहायसाध्येतरवृत्तित्वसाध्यतावच्छेदकवदितरवृत्तित्वरूपावच्छिन्नेऽनवच्छेदकत्वावगाहिज्ञानस्यकारणत्वकल्पनात्॥तत्तद्व्यक्तिगमकतात्प्रयोजकमिति॥तत्तद्व्यक्तिविधेयतात्कानुमितिसाधारणज्ञानीयभूयस्त्वप्रकारतानिरूपितप्रयोजकत्वमित्यर्थः॥ दंडिसंयोगत्वरूपनानाधिकरणवृत्तितावच्छेदकेति॥नानाधिकरणवृत्तितावच्छेदकहेतुतावच्छेदकावच्छिन्नहेतुकस्थलेषुसर्वत्रपरंपरासंबंधेनदंडत्वादीनांसाध्यतावच्छेदकत्वंनसंभवतियत्रएकएवदंडोनानापुरुषेषुवर्तितेतत्रदंडिमान्त दंडिसंयोगादित्यत्रतद्दंडव्यक्तेरेवहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वसंभवेनपरंपरासंबंधेनदंडत्वादीनांसाध्यतावच्छेदकत्वासंभवादतःस्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवृत्तितावच्छेदकत्वसंबंधेनसकलसाध्यतावच्छेदकविशिष्टहेतुतावच्छेदकविशिष्टहेतुकस्थलेसर्वत्रपरंपरासंबंधेनदंडत्वादिकंसाध्यतावच्छेदकंतद्दंडिसंयोगहेतुकस्थलेसकलसाध्यतावच्छेदकांतर्गतंतद्दंडव्यक्तिवैशिष्ट्यंतत्ताविशिष्टदंडिप्रतियोगिकत्वविशिष्टसंयोगत्वेऽसत्वान्नपरंपरासंबंधेनदंडत्वादेःसाध्यतानवच्छेदकत्वेनिष्कर्षतिः॥ स्वाश्रयघटितपरंपरासंबंधेनयत्रधर्मेति॥अनवच्छेदकत्वाश्रयधर्मवत्वेस

तिसामानाधिकरण्यनिरूपकतावच्छेदकतयाभासमानत्वंदंडनिष्ठविधेयतावच्छेदकतानुमितौनंत्रमित्यर्थः॥ अवच्छेदककुक्षिप्रविष्टाना
मवच्छेदकत्वांशेयंशंकते॥ **अथेति**॥तत्रोपलक्षितदंडइवेति॥प्रतियोगितावच्छेदकांशेभासमानत्वेसत्यनवच्छेदकत्वमुपलक्षणत्वमत्रवि
वक्षितं॥तेनावच्छिन्नावच्छेदकत्वंतदाश्रयाधिकरणतायाःप्रतियोगितानिरूपकत्वंनियामकंव्यासज्यवृत्तिसावच्छिन्नावच्छेदकतायां
[illegible]च्छिन्नाधिकरणतायाःप्रतियोगितानतिप्रसक्तत्वंनियामकंव्यासज्यवृत्यवच्छेदकतायांचतदाश्रयैकतरविशिष्टापराधिकरण
तायाःप्रतियोगितानतिप्रसक्तत्वंनियामकमितिनियममभिप्रेत्यसमाधत्ते॥ **स्वरूपतोभासमानस्येवेति**॥**उक्तानुशयेनेवेति**॥उक्तास्व
रसेनेवेत्यर्थः॥ **अनवच्छिन्नावच्छेदकत्वमिति**॥धर्मानवच्छिन्नावच्छेदकत्वमित्यर्थः॥**अथ** गुणवान्द्रव्यत्वादित्यादौविषयितयागुण
त्वविशिष्टज्ञानस्यद्रव्यत्वसमानाधिकरणस्यप्रतियोगितायांसाध्यतावच्छेदकस्यावच्छेदकतादृष्टान्तीयतत्तद्दृष्टान्तीयप्रतियोगितावच्छेदक
तायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यनिवेश्यतयातादृशदंडित्वादावनवच्छिन्नतादृशसंयोगावच्छिन्नावच्छेदकतायाअप्र
सिद्धिः॥तथाहिसंयोगेनविद्यमानस्यसमवेतत्वनियमानदवच्छिन्नाभावीयप्रतियोगितावच्छेदकतायाःसाध्यतावच्छेदकतायाघटकसंयोगस

व्याप्तिरितिशंकानवतारः॥ यद्धानवच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकतीयस्वरूपसंबंधेनैवहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्यनिवेशनीयत्वान्नदोषः॥साध्यतावच्छेदकताघटकेति॥ यद्यपिगुणवान्द्रव्यत्वादित्यादौविधयितयागुणत्वविशिष्टाभावमादायाव्याप्तिनारणायावच्छेदकतायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वंदेयंतत्रव्यर्थं॥कालिकसंबंधेनघटत्वविशिष्टस्यकालिकसंबंधेनसाध्यतायांकालपरिमाणहेतोतादृशसंबंधनावच्छेदकत्वाप्रसिद्धेःपारिभाषिकावच्छेदकताघटकावच्छेदकत्वयोरेकसंबंधावच्छिन्नत्वनिवेशस्यैवत्वरूपसंबंधरूपावच्छेदकतानिवेशपक्षेप्रतियोगितावच्छेदकताघटकसंबंधेनप्रतियोगितावच्छेदकविशिष्टवृत्तिसाध्यतावच्छेदकताघटकसंबंधेनस्वविशिष्टवृत्तिविषयताकत्वस्यैवसाध्यतावच्छेदकेनिवेश्यतयोक्ताव्याप्तेरपिवारणंसंभवतितथापितथाविधनिरुक्तिनिर्वाह्यधर्मवत्वदुल्लेखइति॥ यदुपलक्षितेति॥ नन्वेवंतद्विशिष्टधर्मावच्छिन्नप्रतियोगिताकाभावत्वदुपलक्षितत्वंतद्विशिष्टधर्मावच्छिन्नप्रतियोगितानिरूपकत्वंवलक्षण्यसंपादनेनतुल्ययुक्त्यायदुपलक्षितनिरूपितसमवायादेःप्रतियोगिताघटकसंबंधत्वंतस्योपलक्षणतयावच्छेदकत्वंयद्विशिष्टनिरूपितसमवायादेःप्रतियोगिताघटकसंबंधत्वंतस्यविशेषणविधयावच्छेदकत्वमितितद्विशिष्टाभावत

नदुपलक्षितनाभावयोर्वैलक्षण्यं संभवति तथाच गुणकर्मान्यत्वविशिष्टाभावस्य स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकसमवायेन गुणादौ प्रतियो- न्य.सि.टी.
ग्यसामानाधिकरण्यसंभवाद्धीधिकृतांप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यसामानाधिकरण्यनिवेशव्याहतसंगतिरत आह॥ एकत्वेति॥ अन्य
थेवेति॥ प्रतियोगितायाविशेषणविशेष्योभयपर्याप्तत्वंस्वीकृत्येत्यर्थ स्तथाच घटाधिकरणे एकत्वप्रागभावघटोभयपर्याप्तप्रतियोगितावि
ष्टस्यासत्त्वात्तदधिकरणेनैकत्वप्रागभावविशिष्टघटोनास्तीतिप्रत्ययइतिभावः॥ ननुवैकत्वप्रागभावविशिष्टघटवदभावप्रतियोगितावच्छेदकता
यांविशिष्टप्रतियोगिकसंयोगादेरप्रसिद्ध्याऽवच्छेदकत्वासंभवेनयद्विशिष्टनिरूपितसमवायादेरित्यादिनोक्तस्यविशेषणविधयाऽवच्छेदक
त्वस्यापिनसर्वत्रसंभवइत्यत आह॥ माभूदेवमिति॥ आद्या॥ उपलक्षणीभूतधर्मावच्छिन्ना॥ अंत्या॥ विशेषणीभूतधर्मावच्छिन्ना॥ विशेष-
णविशेष्यभावापन्नयोर्गतिः॥ ननुवंमतिमहानसीयत्वविशिष्टवह्नित्वावच्छिन्नसाध्यकेवह्नित्वस्यैवसाध्यतावच्छेदकतयातत्रहेतुसमा
नाधिकरणमहानसीयत्वविशिष्टवह्नित्वावच्छिन्नाभावीयप्रतियोगितावच्छेदकत्वान्महानसीयत्वादिरूपविशेषणांतर्भावेनैवपर्याप्ततयात
दनधिकरणत्वस्यसत्वादतिव्याप्तिरितिचेन्न॥ एतन्मतेमहानसीयत्वोपलक्षितवह्नित्वंनसाध्यतावच्छेदकंकिंतुतादृशविशिष्टवह्नित्वंवह्नित्वादिद्विविधानुमि २४३

तिविधयतावच्छेदकतायावैलक्षण्यानुरोधेनाद्यविशेष्यमात्रेपर्याप्तांत्याचविशेषणविशेष्ययोर्द्वयोःपर्याप्तेस्यस्यैवस्वीकरणीयत्वात्॥ वस्तु तस्त्विति॥ स्वस्यस्वातिरिक्तदृत्तित्वविरहादिति॥ अत्रेदंचिंत्यं॥ यादृशंसाध्यतावच्छेदकंविशिष्टमविशिष्टंवायत्रतत्रतादृशमवावच्छेदकत्वनिरुक्तोस्वपदनयात्यमन्यथामहानसीयत्वविशिष्टवह्नित्ववह्न्धूमादित्यादावतिव्याप्तिर्हेतुमद्वृत्त्यभावीयप्रतियोगितावच्छेदकस्यमहानसीयत्वादिविशिष्टवह्नित्वादेर्वह्नित्वविशिष्टसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाद्विशिष्टवह्नित्वस्यस्वपदार्थत्वेचमहानसीयत्वादिविशिष्टवह्नित्वादेस्तादृशवह्नित्वविशिष्टसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावान्नातिव्याप्तिः॥ इत्थंचदंडिमानित्यादौदंडत्वादिविशिष्टस्यैवस्वपदेनोपदर्शितयाहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकंयत्तद्दंडादितस्यदंडत्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वाद्दंडत्वादिविशिष्टस्यतदतिरिक्तवृत्तित्वंसंभवतीति॥ यत्तुविशिष्टोपलक्षितसाध्यतावच्छेदककयोर्नैकाव्यभिचारःसाध्यंहेतुमद्वृत्त्यभावप्रतियोगितावच्छेदकंयावत्स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकमितिप्रच्छतलक्षणेविशिष्टसाध्यतावच्छेदककेकस्वपदनविशिष्टोपादानेप्युपलक्षितसाध्यतावच्छेदककस्थलेस्वपदंतत्तद्व्यक्तिपरमेवेति॥ हेतुमद्वृत्त्यभावप्रतियोगि

तावच्छेदकतद्व्यक्तेरन्यद्व्यतिरिक्तवृत्तित्वंनसंभवतीतितन्न॥यत्रैकापिसाध्यतावच्छेदकव्यक्तिर्नसकलहेतुमद्वृत्तितावच्छेदकेतिग्रंथेन तादृशविशिष्टसाध्यतावच्छेदकत्वस्थलेपिपरंपरासंबंधेनदंडत्वादेःसाध्यतावच्छेदकत्वस्यस्वरसतोलब्धस्यभंगापत्तेः॥यद्रूपावच्छिन्नमनवच्छेदकमितिं॥यदिचैकमात्रपर्याप्तिकमवच्छेदकत्वंनाव्याप्यवृत्तितदातत्तावच्छेदेनपर्याप्तावच्छेदकत्वस्यदंडत्वावच्छेदेनाभावोनघटतइत्युक्तंतदाव्याहतमेवेतियद्रूपंवेति॥दंडत्वपृथिवीत्वव्याप्यजातित्वविशिष्टावच्छेद्यत्वाभावस्याव्याहतत्वादिति॥अथावच्छेदकविशेषणस्यावच्छेदकतावच्छेदकत्वमात्रमितिमतेयद्धर्मावच्छिन्नत्वपदस्यतादृशविशेषणविशिष्टस्यविशिष्टस्यवायस्यसाध्यतावच्छेदकत्वंतन्निष्ठावच्छेदकतानिरूपितावच्छेद्यत्वमेवार्थोनत्ववच्छेदकतायांविशेषणावच्छेद्यत्वघटितएकोक्तिभंगापत्तेरवच्छेदककोटिप्रविष्टानामवच्छेदकत्वमंतर्पियादृशधर्मपरत्वंयच्छब्दस्यतन्निष्ठावच्छेदकत्वनिरूपकत्वमेवतदर्थस्तत्राद्येतत्तद्दंडावच्छिन्नप्रतियोगितायांदंडनिष्ठावच्छेदकताकत्वस्याव्याहतत्वादव्याप्तिर्दुर्वारैवद्वितीयेपिविशिष्टस्यशुद्धविशेष्यानतिरेकितयोक्तरीत्यैवाव्याप्तिरिति कथमेकोक्तौदोषाभावप्रदर्शनमितिचेन्न॥प्रथमेतादृशयद्धर्मावच्छिन्नयद्धर्मनिष्ठावच्छेदकतानिरूपितावच्छेद्यत्वमेवव्य

द्धर्मावच्छिन्नत्वपदार्थः॥ द्वितीयधर्मपर्याप्तावच्छेदकताकत्वंतादृशधर्मघटकाश्रितत्वेसतितादृशधर्मघटकः॥ सामान्यनिष्ठावच्छेदकताकत्वंवातदर्थः॥ पृथिवीत्वव्याप्यजातिमद्वानित्यत्वाद्यव्याप्तिवारणायसामान्यपदं॥ प्रमेयसाध्यतावच्छेदकस्थलेप्रमेयत्वस्यैवसाध्यतावच्छेदकतापगमान्नाघटकाप्रसिद्धिशंका॥ परंतुप्रथमेपृथिवीत्वव्याप्यजातिमद्वानित्यत्वादावव्याप्तिवारणंचिंत्यमेव॥ सादृश्यहेतुकानुमितिरिति॥ गोभेदसामानाधिकरण्यविशिष्टयोगाश्रितत्वोपलक्षितोधर्मः सास्नादिमत्त्वज्ञानजन्याऽयंगवयइत्याकारकानुमितिरित्यर्थः॥ सादृश्यघटकगोभेदसामानाधिकरण्यस्योपलक्षणत्वेसाधनाप्रसिद्धिवारणायगोनिष्ठत्वस्योपलक्षणतायाआवश्यकत्वेनगविचभिचारइतितस्यविशेषणत्वमवश्यवाच्यंकिंचिद्धेतुतावच्छेदकविशिष्टयत्किंचिद्धेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यगर्भव्याप्यंतरमप्यावश्यकमितिभावः॥ विशिष्टहेतुकेविशिष्टहेतुमत्तावगाहिज्ञानस्यैवकारणतयातत्रचविशेष्येविशेषणंनत्रचविशेषणांतरमितिरीत्याज्ञानेलक्षण्यार्थविशिष्टप्रतियोगिकसंबंधनविशेषणावगाहित्वमवश्यंक्रियतइत्येकमतंविशेषणस्यकेवलसंबंधेनैवभानंविशेषणविशेषणंतुस्वावच्छिन्ननिरूपितत्वसंबंधेनाधिकरणांशेभासतइतिस्वीक्रियतइत्यपरंमतंतत्राद्यहेतुतावच्छेदकसंबंधोविशिष्टप्रतियोगिकसमवायादिरेवानुमितिज

नकपरामर्शियमुख्यप्रकारतावच्छेदकसंबंधस्यैवतत्तान्यथाचविवक्षणीयहेतुतावच्छेदकसंबंधेनहेतुसामानाधिकरण्यघटितायाविशिष्टहे तुकानुमितिप्रयोजिकायाव्याप्तिर्निर्वाहेहेतुतावच्छेदकविशिष्टत्वनिवेशनमफलमित्याशंकते॥ अथेति॥द्वितीयमतेनसमाधानमाह॥नन्वे ति॥विशिष्टहेतोरित्यविरोधग्रहसत्वेति॥साध्यावच्छेदेनहेतुमद्भेदकत्वरूपविरोधग्रहसत्वेत्यर्थः॥विशेष्यवृत्तेर्विशिष्टानुयोगि काभावान्युपगमाद्विशिष्टहेतुकेसाध्यसामानाधिकरण्यस्यविरोधरूपतायाअसंभवेननिरुक्तरूपस्यैवविरोधत्वरूपत्वात्॥विशिष्टाधिकरणत्व घटितहेतुसाध्यसामानाधिकरण्यविषयकस्यैव॥हेतुमद्वृत्तिव्यापकसाध्यवत्तत्कहेतुमान्पक्षइतिपरामर्शस्यैव॥अन्यथा॥हेतुव्या पकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्तावगाहिज्ञानस्यविशिष्टहेतुकानुमितिकारणत्वे॥विरोधस्य॥दर्शितविरोधस्य॥तद्ग्रहे॥विशिष्टनिरू पितव्यापकतायाग्रहे॥ननुविशेष्यीभूतसत्तायाःप्रतियोगिप्रकारघटकत्वेपिनतदंतर्भावेणप्रतियोगितावच्छेदकतापर्याप्तिमत्त्वस्योपलक्षणतयैव भानस्वीकारात्किंतुविशिष्टत्वद्वारेत्येतिविशिष्टव्यापकतायाग्रहस्यविशेषणव्यापकताग्रहंसुघटमित्याशंकांनिरस्यति॥अभावप्रतियोगि प्रकारघटकस्येति॥शाब्दार्थीनेति॥शाब्दबोधरूपेत्यर्थः॥अनियमादिति॥शाब्दबोधेतात्पर्यस्यनियामकत्वादितिभावः॥दंडा-

द्युपलक्षितेति॥ तस्यविशेषणत्वेचधर्मिपारतंत्र्येणभानंसंभवतीत्यनउपलक्षितेति॥ तादृशधर्मिहेतुकानुमितिविलोपेइष्टापत्तौदूषणांतर
माह॥ स्वातंत्र्येणेति॥ यत्रविशेषणस्यपरंपराःस्वाश्रयाश्रयत्वस्वप्रतियोगिकसंसर्गानुयोग्यत्वभेदेनभिन्नास्तत्रयथापरंपरयास्वातंत्र्ये
णाधिकरणेविशेषणस्यपरामर्शनिकस्यापिजातोऽपितुधर्मिपारतंत्र्येणैवतत्रानुमितिनिर्वाहायविशिष्टपदोपादानमित्यावेदनायप्रथमसंकलप
दं॥ यादृशांकुरविशेषाद्यात्मकविशेषणस्यकेनापिपरंपरासंबंधेनपरामर्शकस्यापिनजातस्तत्रविशेषणहेतुकानुमितिसाम्प्रदायिकैर्दुर्वचत्वेनतत्र
विशिष्टहेतुकपरामर्शस्यैवकारणत्वमित्यावेदनायद्वितीयसंकलपदं॥ अधिकरणभेदेनधूमभेदेनचेत्यादिरितिक्वचित्पाठः॥ तत्रनाना
नाधिकरणंकधूमंमभिप्रेत्याधिकरणभेदेनेति॥ एकाधिकरणकनानाधूमाभिप्रायेणधूमभेदेनेति॥ भ्रमंविनापीति॥ रासभोवह्निमान्प्रमेय
त्वव्यवहारातित्रसंगस्तुनास्तिसमभिव्याहृतपदार्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नव्यापकसामानाधिकरण्यस्यैवव्याप्तिपदार्थत्वात्॥
हेतुविशेषणतयेति॥ अभेदस्तृतीयार्थस्तथाचहेतुनिष्ठविषयतानिरूपितप्रकारतारूपानुमितिजनकज्ञानविषयत्वरूपेत्यर्थः॥ सा
दीत्यादि॥ विरोधस्येति॥ विरोधविशिष्टहेतुज्ञानस्यसाक्षात्॥ साध्यसामानाधिकरण्यरूपविरोधस्यसाध्याभावव्याप्तिरूपत्वान्नाद्विशिष्टहेतुज्ञानस्यतदभाव-

वाधवत्ताज्ञानविरोधया॥ **हेत्वाभासत्वं**॥ यद्विषयकत्वप्रकृतानुमितिप्रतिबंधकताशून्यपक्षधर्मताज्ञानकालीनज्ञानाद्यच्चित्तत्वरूपंदोषविरोधस्ये
तिशेषः॥ **खंडनायतयेति**॥ इत्यंमत्वादित्यादावतिव्याप्त्यादिः॥ अवच्छेदकत्वयोर्वस्तुनोर्भेदादित्यादिग्रंथेनानतिरिक्तद्यत्तित्वरूपावच्छेद
कतावगाहिन्यानुमितावेवंतथाविधावच्छेदकत्वावगाहिहेतुमत्ताज्ञानस्य [illegible] कर्यदीति॥ ननुतदवच्छेद्यत्वमिति॥ सामानाधिक
रण्येनैवसाध्यंसिद्ध्यतिननुतदवच्छेदेनापीत्यपिपाठः॥ पक्षेयदिसाध्यंनस्यात्तदासाधनमपिनस्यादितिविषयपरिशोधकतर्कएवविपर्य
यानुमानपक्षेसाध्यसाधकःपक्षतावच्छेदकोवच्छेदकत्वाभावकंनकिमप्यस्तीतिभावः॥ **अतींद्रियत्वमिति**॥ सामान्याभावप्रत्यक्षे [illegible] ति
योगियोग्यत्वंतंत्रमित्यभिप्रायः॥ **परिनइति**॥ सर्वविषयावावच्छेदेनेत्यर्थः॥ **विरोधिज्ञानमुइत्येति**॥ तदभाववत्ताज्ञानत्वेनेत्यर्थः॥ **दोषवि**
धयेति॥ मणिमंत्राद्यन्यायेनेत्यर्थः॥ **संयोगाविषयकमिति**॥ संयोगाभावप्रत्यक्षकारणसंयोगज्ञानकालेधिकरणंदेशोलौकिकसन्नि
कर्षसत्वेनसंयोगोपलब्धिरेवस्यादतोपनीतेति॥ **यत्तुसंयोगाभावलौकिकप्रत्यक्षसामग्याविरोधितयेत्यत्तसंयोगोपलब्धिरितितन्न**॥ तथा
सतिदृश्यचक्षुःसंयोगावश्यकतापत्तेःसिद्धांतेधर्म्यंतरघटितचक्षुःसन्निकर्षादेवसंयोगाभावप्रत्यक्षापादनान्नतत्रचक्षुःसंयोगावश्यक-

ता॥ **कथंचिदापत्तिसंभवेपीति**॥ द्रव्यसमवेतद्रव्यत्वाभावप्रत्यक्षकारणचक्षुःसंयुक्तसमवेतसमवेतद्रव्यत्वादृक्षादिद्रव्यगतरूपसामान्येकर्षघटितसामग्रीबलादित्यभिप्रायः॥ द्व्यणुकवृत्तित्वेनाभावप्रत्यक्षकारणायोग्यंयच्चक्षुःसंयुक्तंतत्समवेतविशेषणतेवतादृशप्रत्यक्षेकारणमिति वक्तव्यंतथाच त्र्यणुकवृत्तित्वेनाभावप्रत्यक्षंनस्यादितिद्रव्यान्द्रव्यसमवेतंतद्वृत्तित्वेनाभावप्रत्यक्षत्वस्यैवतादृशविशेषणताकार्यतावच्छेदकत्वावश्यकत्वात्तादृशवृत्तित्वेनसंयोगाभावप्रत्यक्षस्यतदनाक्रांतत्वान्नदूषणात्तदवच्छिन्नापत्तिरित्यभिप्रायेणकथंचिदित्युक्तं॥ **तादात्म्यसंबंधेनद्रव्यत्वेनैवप्रतिबंधकत्वोचित्यादिति**॥ **अत्रेदंचिंत्यं**॥ स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्याभयसंबंधनभेदविशिष्टान्यधर्मरूपस्वतादात्म्यस्यस्वविषयसंयोगवत्वापेक्षयानलघुशरीरेतेति॥ **यत्तु द्रव्यतादात्म्यंद्रव्यत्वमेवतत्स्वरूपतएवसंसर्गत्वोपगमाल्लाघवमक्षतं**॥ **नचैवंस्वविषयसंयोगवत्वादेरपिस्वरूपतःसंसर्गताभ्युपगमःसंभवतीतिनोत्यभितिशंक्यं**॥ तथापिपरंपरासंबंधघटकसकलपदार्थसाधारणसांसर्गिकविषयतायाःप्रतिबंधकतावच्छेदकत्वेगौरवंदुर्वारमिति॥ **तन्न**॥ एकमात्रवृत्तिधर्मस्यैवनिरुक्तभेदविशिष्टान्यरूपस्यतादात्म्यरूपतायाव्युत्पत्तिवादे[illegible]द्रव्यत्वंद्रव्यतादात्म्यरूपत्वाभावात्॥ **प्रतियोगिनो यत्वतत्वेननिवेशाइति**॥ यद्वृत्तियद्धर्म्या

यधर्मावच्छिन्नाभाववान्यः सतद्वृत्तिसद्धर्मावच्छिन्नाभाववानिति विवक्षणे इत्यर्थः॥ **अन्यसंबंधेति**॥ समवायान्यसंबंधेत्यर्थः॥ **तत्संबंधेति**॥ स
समवायसंबंधेत्यर्थः॥ संभाव्येत॥ हेतुघटकविशेषाभावीयप्रतियोगितायांसंबंधविशेषावच्छिन्नत्वानिवेशे संयोगसमवायसंबंधावच्छिन्नप्रतियोगि
ताकघटीयविशेषाभावकूट साधारणघटीयविशेषाभावकूट[illegible] समवायसंबंधावच्छिन्नघटसामान्याभावव्यभिचरितत्वतद्भावसमानाधिकर
णत्वान्नसाधारणधर्मवत्ताज्ञानात्तादृशघटीयविशेषाभावकूटेतत्संशयःस्यादित्यर्थ इति केचित्॥ **तत्रेदं चिंतनीयं**॥ हेतुघटकविशेषाभावीयप्रति
योगितायांसंबंधविशेषावच्छिन्नत्वाविवक्षणेतादृशकूटत्वाश्रयस्य हेतुत्वमुतादृशकूटत्वपर्याप्तिविशिष्टस्यवा॥ **नाद्यः**॥ तादृशसमवायसंबं
धावच्छिन्नविशेषाभावकूटांतःपातिकिंचित्तादृशविशेषाभावाधिकरणेतादृशसामान्याभावासत्वाद्व्यभिचारः॥ **नद्वितीयः**॥ संयोगसमवायादि
संबंधावच्छिन्नप्रतियोगिताकघटीयविशेषाभावसाधारणकूटत्वपर्याप्त्यधिकरणस्यनसमवायसंबंधावच्छिन्नप्रतियोगिताकघटसामान्याभा
वव्यभिचारसंभावनापर्याप्तिसंबंधेनतादृशकूटत्वस्यतादृशघटसामान्याभावव्यभिचरितत्वसाधारण्याभावादिति॥ **वस्तुतस्तु**॥ यत्किंचित्संबंधावच्छिन्नविशेषाभावकूटस्य हेतुत्वेयत्किंचित्तदेनसंयोगसंबंधग्रहणेतत्संबंधावच्छिन्नविशेषाभावकूटस्ययथासमवायावच्छिन्नत्वा

न्याभाव व्यभिचारित्वं तथा समवाय ग्रहणेपि समवाय नानात्व पक्षे समवायावच्छिन्न विशेषाभाव कूटे समवायावच्छिन्न सामान्याभाव व्यभिचारित्व संभा
वनास्यात्साध्य हेतोर्भिन्न संबंधावच्छिन्न प्रतियोगि ताकत्व विशेष रूप तुल्यन्याया दिति संबंधैक्य विवक्षणीयं॥ तथाच तत्संबंधावच्छिन्न विशेषा
भाव कूटस्य तत्संबंधावच्छिन्न सामान्याभाव व्यभिचारित्वाभावेन न दोष इतितात्पर्यं॥ **अतएव** ॥ संबंधैक्य विवक्षणादेव॥ तदविवक्षणेकिंचित्सं
बंधावच्छिन्न प्रतियोगिताकत्वेन स्वसजातीय संयोग संबंधावच्छिन्न घटीय विशेषाभाव कूटे स्वसजातीय समवायावच्छिन्न घट सामान्याभाव नि
रूपित व्याप्य हेतु [illegible] वायावच्छिन्न संयोग सामान्याभावासिद्धिरितिभावः॥ **आधेयतासंबंधेनावच्छेदकमधिकरणमप्रसिद्धमिति**
॥ अनवच्छेदकमधिकरणमप्रसिद्धमितिपाठः प्रामादिकस्तथासति॥ तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरितिग्रंथोऽनुपयुक्तएवस्यात्॥ प्रथम
पाठेतु प्रतियोग्यप्रसिद्धेरित्यादिः॥ **अत्रेदं चिंत्यं**॥ संयोग विशेषाभाव निष्ठोयो आधेयतासंबंधेन दृक्षविशिष्टध्वंस [illegible] तियोगिताव च्छेद
कत्वस्य दृक्षेपि सत्वेननावच्छेदकाधिकरणाप्रसिद्धिः॥ **नन्वतथाप्यनवच्छेदकत्वरूपहेत्वसिद्धिः शंक्या**॥ आधेयतासंबंधावच्छिन्नावच्छेदक
ताकतादृशभेदीय प्रतियोगितानिरूपितावच्छेदकतावच्छिन्न पर्याप्तिशून्यत्वस्यैव हेतुत्वान्निरुक्तभेदीयतादृशप्रतियोगितावच्छेदकता

यात्तादृशावच्छेदकतात्वेनदृक्षध्वंसोभयत्वावच्छेदेनैवपर्याप्ततया[illegible]र्थानिर्भृन्यत्वाक्षतेः॥ननुसंयोगविशेषाभावनिष्ठकालिक
काधेयत्वोभयसंबंधेनदृक्षादिमद्भेदीयाधेयत्वसंबंधावच्छिन्ना[illegible]रूपासिद्धिवारणायाधेयत्वसंबंधातिरिक्तसंबंधाव
च्छिन्नावच्छेदकत्वनिरूपकप्रतियोगिताकत्वे हेत्वंशघटकभेदविशेषणत्वावश्यकतयादृक्षविशिष्टध्वंसभेदस्यातथात्वेनतादृशभेदप्रतियो
गितावच्छेदकाधिकरणासिद्धिरत्येवेतिवाच्यं॥आधेयतयातादृशतत्संयोगाभावनिष्ठतत्संयोगाभावान्यत्वविशिष्टदृक्षवद्भेदप्रतियोगिता
वच्छेदकत्वस्यदृक्षेसिद्धत्वात्॥ननुवंशीयात्तदभावरूपहेत्वसिद्धिवारणायकेवलाधेयतासंबंधावच्छिन्नावच्छेदकतैवविवक्षणीयादृशी
तभेदीयप्रतियोगितावच्छेदकताघटकसंबंधोविशिष्टप्रतियोगिकाधेयतैवेतिकेवलाधेयतासंबंधावच्छिन्नावच्छेदकताश्रयाधिकरणाप्र-
सिद्धिरव्याहतेवेतिवाच्यं॥आधेयतयातत्संयोगाभावान्यमात्रवृत्तेतत्संयोगाभावान्यत्वविशिष्टदृक्षोभयवद्भेदमादायतत्प्रतियोगितावच्छे
दकाधिकरणप्रसिद्धेरुक्तादृशावच्छेदकत्वाभावरूपहेत्वसिद्धिरपिनशंक्या॥उभयत्वावच्छेदेनाभावस्यदृक्षत्वावच्छेदेनाभाव
स्यदृक्षेसत्वात्॥यत्वावच्छेदकतायाअव्याप्त्यादिलक्षणावलंबनेनानवच्छेदकमधिकरणमप्रसिद्धमितिपाठकल्पनयासमाधानंतत्तदनवच्छे

दकत्वरूपहेत्वप्रसिद्धिरितिग्रंथानुपयुक्तत्वरूपोक्तदूषणेनहेयं॥ व्यभिचारइति॥ ननुसाध्यस्याप्रसिद्धत्वात्कथंव्यभिचारः॥ नचसाध्याप्रसिद्धिरेवव्यभिचारपदेनविवक्षितेतिसांप्रतं॥ हेतूपात्तधर्मे॰ इत्यादि॥ एवंअवच्छिन्नप्रतियोगिताकत्वसंबंधेनयद्धर्मवत्त्वमेवसाध्यंतथाचहेतुमतिव्यधिकरणतादृशसंबंधेनयद्धर्मवत्ताभावसत्त्वेनव्यभिचारइतितात्पर्यं॥ यद्धर्मित्वनेनेति॥ अथयुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वसंयोगत्वसमा॰॥ धिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावत्वसमानाधिकरणभेदप्रतियोगितात्वमपिनाभावप्रतियोगितावच्छेदकंतदपेक्षयालघोस्तत्संयोगाभावनिष्ठभेदप्रतियोगितात्वस्यैवतत्संभवान्नस्यातादृशप्रतियोगितात्वन्यूनवृत्तित्वेपियावत्संयोगाभावविषयकबुद्धिमादायतद्बुद्धिविषयनिष्ठभेदप्रतियोगितात्वस्यैवतत्संभवान्नातादृशप्रतियोगितावच्छिन्नाभावरूपहेतुरप्यसिद्धइतिचेदत्रकेचित्तु॥ स्वदत्युभयावृत्तिधर्मावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभावत्वसमानाधिकरणभेदप्रतियोगितानिरूपिताधेयतासंबंधावच्छिन्नावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकयद्धर्मावच्छिन्नाभावस्यैवहेतुत्वंस्वपदंयद्धर्मावच्छिन्नपरंतद्धर्मावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभावस्यैवसाध्यत्वमभिमतमित्याहुः॥ व्यर्थमेवेति॥ संयोगविशेषाभावनापिसंयोगसामान्याभावस्यसाधयितुंशक्यत्वादितिभावः॥

कथंचिदिति॥ यत्तदर्थघटितसाध्यहेतूनामनुगमाभिमानेन॥ अविरोधादिति॥ तथाचसिद्धत्वात्किंतत्साधनेनेतिभावः॥ अव्याप्यवृत्तिजातीया

नांव्याप्यवृत्तित्वंसर्वावच्छेदेनवृत्तिमत्त्वंतत्त्ववच्छिन्नवृत्तिकान्यत्वमित्याहुरेके॥ व्याप्यवृत्तेरवच्छेदकोपगमेत्विति॥ तत्तन्निष्ठेति॥ मूलाद्यादिनिष्ठेत्यर्थः॥ नियामकत्वेति॥ नियमकत्वेत्यर्थः॥ खंडदृक्षस्यापरावयवनाशादिति॥ असमवायिकारणनाशात्खंडदृक्षनाशोनसंभवतितथासतिखंडदृक्षोत्पत्तिकालेविभागआवश्यकःसनसंभवतिकर्मवतिकर्मांतरानुदयात्॥ एककियायागगनसंयोगप्रतिद्वंद्विविभागासमवायिकारणसंयोगप्रतिद्वंद्विविभागयोरुत्पत्तिर्नसंभवति॥ तथासतिगगनसंयोगनाशक्षणएवावयवसंयोगनाशायत्खंडदृक्षस्यैकक्षणावस्थायित्वप्रसंगादितिसमवायिकारणनाशाधीनत्वंनस्यदर्शितं॥ अत्रेदंबोध्यं॥ प्रथमक्षणेखंडदृक्षस्यैकावयवेगगनसंयोगप्रतिद्वंद्विविभागजनककियाद्वितीयक्षणेऽपरावयवेसमवायिकारणसंयोगप्रतिद्वंद्विविभागजनककियाएवंचप्रथमक्रियाजन्यविभागजगगनसंयोगनाशकालेद्वितीयक्रियाजन्यासमवायिकारणसंयोगनाशजन्यखंडदृक्षोत्पत्तिरपिसंभवतीति॥ पक्षधर्मताबलादिति॥ पक्षधर्मताज्ञानादित्यर्थः॥ उपस्थितेति॥ फलीभूतानुमितिव्यवहितप्राक्कालेत्यादिः॥ तत्तत्साधनेति॥ तत्कालोपस्थितप्रकृतहेतु

मजातीयसाधनेत्यर्थः॥तत्तत्साध्येत्यस्याप्येवमेवार्थः॥गगनाद्यद्वृत्तीत्यादि॥निरुक्तेति॥उभयाद्वृत्तीत्यर्थः॥अत्रगगनाद्वृत्तित्वविशेषणानुपादानेपक्षेहेत्वसिद्धिःसंयोगत्वस्यापिस्वपदेनधर्तुंशक्यत्वात्॥यत्किंचित्सदानुपादानेपरिमाणत्वेव्यभिचारःपरिमाणत्वसमानाधिकरणोभयाद्वृत्तिघटपरिमाणनिष्ठतद्व्यक्तित्वावच्छिन्नाभावस्यगगनाद्वृत्तित्वविरहेणस्वपदेनपरिमाणत्वस्यधर्तुमशक्यत्वात्॥तदुपादानेचतादृशगगनपरिमाणनिष्ठतद्व्यक्तित्वावच्छिन्नाभावस्यगगनाद्वृत्तित्वसत्वेनस्वपदेनतस्यग्रहणसंभवान्नतदन्यत्वरूपहेत्वकांतत्वंतस्येतिनव्यभिचारः॥संयोगत्वसमानाधिकरणगगनवृत्तिसंयोगत्वावच्छिन्नाभावस्यगगनाद्वृत्तित्वसंदेहेनसंदिग्धासिद्धिरित्युभयाद्वृत्तित्वंविशेषणं॥अत्रगगनाद्वृत्त्यभावप्रतियोगितावच्छेदकोभयाद्वृत्तिधर्मसमानाधिकरणभिन्नत्वस्यैवहेतुत्वसंभवेनतादृशभेदकूटस्यहेतुत्वानुसरणेबीजांतरमेव॥गुणइति॥गुणनिष्ठमित्यर्थः॥एतेनगुणावच्छेदेनोपाधेःसाध्यवदवृत्तेर्मुक्तं॥इदानीमवच्छेदकमाह॥कपिसंयोगवतीति॥यावत्तत्तदीयविशेषाभावावच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभावविशिष्टोयःप्रत्येकंतन्निरूपिताधिकरणतासमुदायस्तत्स्वाधिकरणपर्याप्तिसंबंधावच्छिन्नव्याप्यवृत्त्यधिकरणतासाधारणसमुदायत्वेनतादृशसमुदायघटकव्याप्यवृत्त्यधिकरणतानामवच्छिन्नत्वंमित्येकःपक्षः॥नास्तीत्यपरः॥

तत्रोपाधेः साधनाव्यापकत्वरक्षायै प्रथमपक्षस्येवावलंबनीयतयासाध्योपाध्योः सामान्यव्याप्तिभंगोदुर्वार इत्यभिप्रायेणशंकते॥ अथेति॥ नै
कावच्छेदकावच्छिन्नत्वंसंभवति॥ नोभयाभाववत्त्वंसंभवति॥ कुतइत्यतआह॥ वृक्षावृत्तीत्यादि॥ व्याप्यवृत्तितया॥ मूलमध्याद्यवच्छि
न्नाधिकरणतासाधारणरूपेणाव्याप्यवृत्तित्वेपिविनिगमनाविरहेणमूलमध्याद्यवच्छिन्नत्वावश्यकतया॥ अनवच्छिन्नत्वात्॥ एकावच्छे
दकानवच्छिन्नत्वात्॥ तथाचवृक्षनिष्ठकपिसंयोगव्यक्तीनांयेमूलमध्याद्यवच्छेदेनवृक्षनिष्ठाभावास्तदधिकरणतानांमूलमध्यादिरूपना
नावच्छेदकावच्छिन्नानामेकावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयवत्त्वमिववृक्षावृत्तिकपिसंयोगव्यक्त्यभावाधिकरणतानामप्यु
क्तरीत्यातादृशोभयवत्त्वेननतादृशोषाभावाधिकरणतासमुदायेनतादृशोभयाभाववत्त्वमितिभावः॥ अपरपक्षाभिप्रायेणशंकते॥ नन्वेति॥उ
पाधेःसाधनाव्यापकत्वरक्षायैप्रथमपक्षावलंबनमेवकर्तव्यमित्यथेतिशंकितुरभिप्रायंस्पष्टयति॥ एवंसतीति॥ स्वसमानाधिकरणेति॥
स्वंयत्किंचिदधिकरणतातथाचावच्छेदकावच्छिन्नत्वसंबंधेनस्वसमानाधिकरणयावत्तदभावाधिकरणत्वाभावावच्छिन्नत्वोभयाभाववत्त्व
द्यावत्तदीयविशेषाभावाधिकरणताकूटनुपाधिरितिपर्यवसितार्थस्तेनस्वसमानाधिकरणयावत्तदभावाधिकरणतावच्छेदकाप्रसिद्धावन-

पिनक्षतिः॥ इत्यनिष्टयावत्संयोगाभावाधिकरणताकूटइत्यनिष्टयत्किंचिदधिकरण[illegible]धिकरणयावत्संयोगाभावाधिकरणतानामवच्छेद
कावच्छिन्नत्वरूपव्यधिकरणसंबंधेनाभावसत्त्वात्तद्घटककतिपयाधिकरणतास्व[illegible]श॥ धिकरणताकूटेउभयाभावासत्वे
नोपाधेःसाधनाव्यापकत्वं॥ स्वसमानाधिकरणकिंचिदवच्छिन्नेति॥ अत्राप्यवच्छेदकावच्छिन्नत्वसंबंधेन[illegible]नाधिकरणकिं
चिदवच्छिन्नयावत्तदभावाधिकरणत्वाभावावच्छिन्नत्वोभयाभाववद्यावत्तदीयविशेषाभाववत्कूटमेवोपाधिरितिपर्यवसितार्थोत्र स्व
स्वसमानाधिकरणकिंचिदवच्छिन्नयावत्तदभावाधिकरणतावच्छेदकाप्रसिद्धावपिनक्षतिः॥ यावद्विशेषाभाववत्वमित्यस्ययावद्विशेषा
भाववान्हृदादिरितिप्रतीतिसिद्धतावन्निष्टयावत्वावच्छिन्ननिरूपितमेकमधिकरणत्वमवार्थेनतुतत्तद्विशेषाभावाधिकरणताकूटमित्यभि-
प्रायेणाह॥ अथवेति॥ साध्योपाध्योःसामान्यव्याप्तिनिर्वाहपूर्वपक्षेइष्टापत्तिप्रकारांतरमवलंबति॥ वस्तुतस्त्विति॥ पर्यवसितेति॥ प
र्यवसानंफलीभूतानुमितिः॥ सत्प्रतिपक्षोत्थापकत्वमिति॥ शब्दोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्म[illegible]इत्यादौपर्यवसितसा
ध्यरूपानित्यत्वव्यापकत्वकृतकत्वादेरिवेत्यर्थः॥ प्रतिरोधइति॥ उद्देश्यायाप्रतिवादिसमवेतायाअनुमितेरनुत्थादुद्देश्यतावच्छेदकार्थानुभाने-

दर्शितोपाधिनिश्चयानियमेपिनक्षतिः॥ प्रतिवादिनस्तुवास्तवअभिमानिकोवोपाधिनि[illegible]नानुपपत्तेः॥ पक्षधर्मविच्छिन्नेति॥सा

मानाधिक[illegible]संबंधेनपक्षधर्मविशिष्टेत्यर्थः॥ पूर्ववदिति॥अव्याप्यवृत्तिसाधारणरूपेणतेषामव्याप्यवृत्तित्वंस्वीकृत्येत्यर्थः॥ एकावच्छेदकावच्छेदेति॥ अवच्छिन्नत्वैकावच्छेदकानवच्छेद्यतोभयाभाववदित्यर्थः॥ ननुप्रतियोग्यनवच्छेदकमात्रस्येति॥तथाचप्रमेयत्वस्यप्रतियोगिसंबद्धदेशतासंबंधावच्छिन्नाधेयतानिरूपितदेशकालत्वाभावाच्चनदोषइतिभावः॥ निराकृतत्वादिति॥ इदमुपलक्षणं॥ ध्वंसप्रागभावयोर्देशसंबंधावच्छिन्नाधेयतानिरूपितदेशकालविशेषावच्छिन्नप्रागभावादेरेवस्वलक्षणोक्तौसासामान्याभावत्वावश्यकत्वमित्यवधेयं॥ जन्यैकत्वहेतुभूतस्येति॥ इदमत्रचिंत्यं॥ रूपवतिरूपोत्पत्तिवारणायरूपंप्रतिरूपात्यंताभावस्यैवहेतुत्वंयुक्तंरूपप्रागभावस्यहेतुत्वेभाविपाकजरूपप्रागभावसायरूपवतिरूपोत्पादस[illegible]नु॥जन्यैकत्ववतियुनरेकत्वोत्पादवारणस्यजन्यैकत्वंप्रतितत्प्रागभावस्यहेतुतथापिसुकरत्वं नत्येकत्ववतिभाव्येकत्वप्रागभावोस्तितथाचतदानतत्रतदत्यंताभावस[illegible]यकतेति॥ अतिप्रसंगादिति॥खंडकालेगगनेनसंयोगइतिव्यवहारापत्तेरित्यर्थः॥ तदभावोपपत्तेरिति॥ ननुसंयोगस्याव्याप्यवृत्तित्वंसंयोगिनोव्याप्यवृत्तित्वस्यैवसंयोगसमवायस्यव्याप्यवृत्तित्वात्संयो

गादेरपिव्याप्यवृत्तित्वंस्यादित्याशंकांनिरस्यति॥संयोगादेरिति॥तदभावोपपत्तेरिति॥व्यापकाभावस्यैवव्याप्याभावप्रयोजकत्वाद्द्रव्येसंयोगाभावसत्वेपितत्समवायोपपत्तेरितिभावः॥केचित्विति॥उक्तरीत्यैवनिर्वाहेविशेषरूपेणसंसर्गतास्वीकारेसमवायनानात्वमभ्युपगम्यसंयोगसमवायस्याव्याप्यवृत्तित्वस्वीकारोवाऽस्वरसः॥प्रतियोगिदृष्टत्वादि॥इदानीमत्रघटोनास्तीत्यादिप्रत्ययेदेशनिष्ठायाःकालविशेषावच्छिन्नायाःकालनिष्ठायादेशविशेषावच्छिन्नायावाअधिकरणतायाविषयत्वमित्यत्रविनिगमकाभावआधेयतावच्छेदकतयोरेवाविशेषेणसप्तम्यर्थत्वादितिभावः॥व्याप्यवृत्तिसाध्यकत्वंचस्वसमानाधिकरणाभावाप्रतियोगिसाध्यकत्वमिति॥अत्रस्वपदंहेतुपरमेवसाध्यपरत्वेसंयोगाभाववान्नित्यगुणत्वादित्यस्याव्याप्यवृत्तिसाध्यकत्वापत्त्याअत्रप्रतियोगिवैयधिकरण्यनिवेशेप्रयोजनाभावाद्व्याप्यवृत्तिसाध्यकव्याप्तेःप्रतियोगिवैयधिकरण्यघटितत्वनियमस्यस्वयमुक्तस्यासंगत्यापत्तेः॥दशामेदमनालोचयतांमतमाह॥केचित्विति॥यथाश्रुतमेव॥अवच्छिन्नवृत्तिकान्यसाध्यकत्वरूपमेवस्वस्वार्थः॥यादृशेति॥यादृशाप्रतियोगितानिरूपकाभावत्वंहेत्वधिकरणनिरूपितदेशिकविशेषणतासंबंधावच्छिन्नाधेयतावच्छेदकंतादृशप्रतियोगितेत्यर्थः॥एतन्मतेनसंयोगाभावसाध्यकनित्यगुणत्वहेतोर्व्याप्यवृत्तिसाध्यकत्वविरहेऽपिदृष्टान्तेहेत्वविध्यलाभस्य-

व्याप्यवृत्तिसाध्यकस्थलमात्रेसार्वत्रिकोपादानप्रतिक्षेपपरत्वेऽसंभवान्नलाभायसर्वथैवेतिग्रंथस्याभिप्रायांतरमाह॥अव्याप्येति॥एवंचव्या

म·सि·टी·

व्यवृत्तिसाध्यकेति॥एतन्मतेस्वसमानाधिकरणाभावाप्रतियोगिसाध्यकत्वमेवव्याप्यवृत्तिसाध्यकत्वं॥ननुयश्रुतं॥स्वपदंसाध्यपरंतुत्व

परमितिभेदः॥तथाचात्माज्ञानादित्यादावित्यर्थः॥साध्यसामानाधिकरण्याप्रसिद्धेति॥साध्यतावच्छेदकसंबंधेनयत्साध्याधिकरणंतन्निरू

पितत्वस्यत्वर्थस्यतेनकालिकसंबंधेनात्मत्वाधिकरणकालवृत्तित्वेप्यात्मत्वाभावस्यनक्षतिः॥नचसाध्यसामानाधिकरण्यघटकाधिकरणांशेसाध्यता

वच्छेदकसंबंधनिवेशनंकिमर्थमितिवाच्यं॥तदनिवेशेसंयोगीनित्यान्यत्वविशिष्टसत्वादित्यादौव्यभिचारनिरूपकाधिकरणेपसंयोगाभावस्य

संयोगसामानाधिकरण्यवत्वेनतदभावविशिष्टहेतुमदृत्यभावोऽन्यथेत्यतिव्याप्त्यापत्तेः॥अथैतन्मतेव्याप्यवृत्तिसाध्यकत्वंयथाश्रुतमेवकु

तोनगृह्यतइतिचेन्न॥तथासतिसत्तावान्द्रव्यत्वादात्मत्वादित्यादौसाध्याभावेकालिकसंबंधावच्छिन्नसाध्यवदवृत्तित्वप्रसिद्धासाध्याभावनिष्ठ

साध्यसामानाधिकरण्याप्रसिद्ध्यभिधानासंगतेः॥नचसामानाधिकरण्यघटकवृत्तितांशेसंबंधविशेषावच्छिन्नतन्निवेशप्रयोजनमस्ति॥येनसा

ध्याभावेतादृशसामानाधिकरण्याप्रसिद्धिःस्याद्व्यभिचारिणिसाध्यतावच्छेदकसंबंधेनयत्साध्याधिकरणंतन्निरूपितवृत्तित्वसामान्याभावनिरूपकव्यभि

चारनिरूपकाधिकरणावच्छेदेनैवसाध्याभावेसाध्यसामानाधिकरण्याभाववत्त्वस्यसुवचत्वात्॥ साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशोऽनुपयोजनाभावादिति॥ अत्रकेचित्॥ तादृशविशेषणस्यानुपयोजनाभावेपितादृशविशेषणविशिष्टसाध्याभावनिष्ठसाध्यसामानाधिकरण्याभावरूपखंडाभावघटकतयासार्थक्यसंभवेनोक्ताशयवर्णनंसम्यगेवेतिवदंति॥ पूर्वमुक्तत्वादिति॥ एकत्वप्रागभाववि शिष्टघटाभावीयप्रतियोगितायामप्रसिद्धतयाविशिष्टसंयोगादेरवच्छेदकत्वंनसंभवतीत्यादिनेत्यर्थः॥ विशेषणांतर्भावेणव्यर्थत्वात्॥ न न्वेवंसतिप्रतियोगितापर्याप्ताधिकरणानधिकरणत्वमेवनिवेशनीयंकिंप्रतियोगितावच्छेदकवैशिष्ट्यनिवेशेननतिचेन्न॥ समवायेनगुणाद्यन्यत्वसत्त्वोभयपर्याप्तप्रतियोगित्वावच्छिन्नाधिकरणाप्रसिद्धेर्विशिष्टसत्तासाध्यकव्यभिचारिणिविशिष्टसत्ताभाववत्स्वलक्षणघटकत्वासंभवेनातिव्याप्तेस्तथाविवक्षितुमशक्यत्वादित्यभिप्रायात्प्रतियोगितावच्छेदकवैशिष्ट्यपर्यंतनिवेशात्॥ उक्तसाध्यस्य॥ गुणकर्मान्यत्वविशिष्टसाध्यस्य॥ व्याप्यवृत्तित्वेपि॥ आत्मत्वहेतुकव्याप्यवृत्तिकालान्यत्वविशिष्टसत्तारूपसाध्यसजातीयत्वेपीत्यर्थः॥ एतेनस्वसमानाधिकरणत्वादिव्याप्यवृत्तिसाध्यकत्वनिरूक्तपूर्वोक्तपदत्रयहेतुकत्वस्वकालेनसाध्यपरत्वेपस्वाधिकरणेकालेकालिकसंबंधेनगुण

कर्मान्यत्वविशिष्टसत्ताभावसत्त्वेनगुणकर्मान्यत्वविशिष्टसत्तासाध्यकजातिहेतोर्निरुक्तव्याप्यवृत्तिसाध्यकत्वाप्रसक्तावपिनक्षतिः॥सजातीयव्याप्यवृत्तिकालान्यत्वविशिष्टसत्तासाध्यकस्थलीयकृत्तानुमितिकल्पस्य।तेयोगिवैय्यधिकरण्यघटितव्याप्तिज्ञानसजातीयज्ञानप्रमात्वापादनस्यैवाव्याप्तिप्रसंगपदार्थत्वाद॥अत्रहेतुर्वैशिष्ट्यविरहेपिघटत्वपटत्वयोरुभयत्वस्यसिद्धत्वा।दिति॥उभयपदार्थतावच्छेदकमुभयमितिपक्षसमभिव्याहृतैकपदार्थवैशिष्ट्यभिन्नंविरुद्धत्वसमभिव्याहृतपदार्थद्वयवृत्तित्वादित्यनुमानंतत्राप्रयोजकत्वशंकानिरासार्थंतस्यप्रत्यक्षसिद्धत्वमुक्तंप्रत्यक्षेविषयस्यकारणतयाविषयबाधेप्रत्यक्षानुपपत्तिसूचनायप्रत्यक्षानुधावनं॥ननुविरुद्धद्वयवृत्तित्वस्योभयपदार्थतावच्छेदकसामानाधिकरण्येनैवसत्त्वात्साध्यमपितथैवसिध्येदतआह॥तथाचेति॥लाघवज्ञानसहकृततादृशहेतुर्व्याप्यवृत्त्यत्यन्ताभावावच्छेदकावच्छेदेनैवसाध्यसिद्धिरितिभावः॥प्रतियोगिसमानाधिकरणत्वनियमादिति॥नचभावात्मकाभावस्यैवप्रतियोग्यसमानाधिकरण्यंसंभवतीतिवाच्यं॥तस्यापिस्वसमानाधिकरणाभावांतरभेदेनस्वाधिकरणीभूतस्वरूपतयास्वसमानाधिकरणाभावांतरभेदरूपप्रतियोगिसमानाधिकरणत्वात्॥प्रकृतेप्रतियोगितावच्छेदकसामानाधिकरण्यस्यैवनिवेशनीयतयेति॥यादृशप्रतियोगितात्रयसमानाधिकर-

ष्याभाववान्हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्यसाध्यतावच्छेदकेनिवेशनीयतयेत्यर्थः॥ ७ ॥ रसबीज मेवेति॥ **यत्तु**व्याप्यवृत्तिसाध्यकेप्रतियोग्यसमानाधिकरण्यस्यनिवेशात्तत्रैवान्योन्याभावंव्यावर्तयदसंतपदंसार्थकमिति॥ **तन्न**॥ तत्रापि संबंधांतरावच्छिन्नप्रतियोगिताकात्यंताभावमादायदोषवारणायहेतुसमानाधिकरणात्यंताभावीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशावश्यकतयातत्राऽसंताभावत्वांशनिवेशस्याप्रयोजनकत्वात्॥ **तेनसंबंधेनत्वयेवर्तमाननत्यंताभा**[illegible]वेति॥ तस्यगोधंसरूपप्रतियोगिसामानाधिकरण्येप्यत्यंताभावत्वनिरूपकप्रतियोगिताश्रयासामानाधिकरण्यंबोध्यं॥ स[illegible]न्द्रव्यत्वादित्यादावि ति॥ **अत्रेदंचिंत्यं**॥ पूर्वोक्तस्वसमानाधिकरणात्यादिव्याप्यवृत्तिसाध्यकत्वाभावादस्याव्याप्यवृत्तिसाध्यकत्वेनतत्रव्याप्तेःप्रतियोगिव्यधिकरण्यघटितत्वनियमस्यसत्त्वयुक्तत्वादिदमसंगतमिति॥ **द्रव्यवृत्तित्वप्रसंगादिति**॥ तथाचदैशिकविशेषणतयावृत्तित्वविवक्षणेप्यव्याप्यनिराकरणादितिभावः॥ **ननु**केवलान्वयिनिसाध्याभावाप्रसिध्यासाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधेनहेतुमवृत्तित्वनिवेशोनसंभवतीत त आह॥ **प्रकृतप्रतियोगिते**ति॥ हेतुसमानाधिकरणत्वेनाभिमताभावीयप्रतियोगितेत्यर्थः॥ **इष्टमेवैतदिति**॥ व्यभिचारग्रहप्रतिबंध

कतावच्छेदकविषयतावत्वेनकारणत्वाभ्युपगमान्नगौरवावकाशः॥ उक्तशंकेति॥ संसर्गाभावनिवेशपक्षेऽतिव्याप्तिवारणशंकेत्यर्थः॥ ध्वंस
स्येत्यादि॥ प्रतियोगिवैय्यधिकरण्यमक्षतमेवेति॥ अथप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैय्यधिकरण्यनिवेशकल्पेप्रतियो
गितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वविशेषणस्यावश्यकतयाध्वंसप्रतियोगितायाःसाध्यतावच्छेदकसंबंधानवच्छिन्नतया
तस्यलक्षणाघटकतयानतमादायातिव्याप्तिवारणसंभवइतिचेन्न॥ साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशेनसाध्यतावच्छेदकसंबंधातिरिक्त
संबंधानवच्छिन्नत्वनिवेशेतत्रयोजनासंभवाच्चारणस्यध्वंसप्रतियोगितायाःसंबंधानवच्छिन्नतयातमादायातिव्याप्तिवारणस्यचसंभवान्नचै-
वंसंसर्गाभावत्वविशेषणेवैय्यर्थ्यशंक्यंभेदत्वस्यखंडोपाधिरूपतामतेभेदीयप्रतियोगितायाःसंबंधानवच्छिन्नत्वानादाव्या॥ तेनाद्यतद्व
वश्यकत्वात्॥ द्व्यणुकनाशानुगुणेति॥ अत्रायंक्रमः॥ द्व्यणुकादिद्रव्यारंभकसंयोगोक्रियाततःपरमाणुद्वयविभागः॥ ततःपूर्वसंयोगनाशः
ततस्त्र्यणुकादिद्रव्यारंभकपरमाणुसंयोगःद्व्यणुकनाशश्चततःसमवायिकारणनाशाद्व्यणुकनाशःक्रियानाशश्चततआश्रयनाशाच्चरमसंयोग
नाशरूपोमहाप्रलयइति॥ नन्वतादृशचरमसंयोगस्यनाशकाभावान्नित्यत्वापत्तिःशंक्या॥ परमाणुसंयुक्तस्यावय [illegible] २५४

गं॰ सि॰ टी॰

नासंगतिः किंचोभयाभावोविशिष्टाभावोवानमनोगुणवृत्तिरितिभ्रमकालेभूतत्वमूर्तत्वोभयंनमनसिविशिष्ट[illegible]गुणत्व[illegible]। इत्यत्र[illegible]न्यूनार्थवृत्तित्वाभावा[illegible]
वस्यकमितिविशिष्टसत्तादौगुणादिवृत्तित्वाभावसि[illegible]। तेचेदत्रकेचिद्गुणाद्यधिकरणकविशिष्टाभावोवाभयाभावोदेयोयद्धर्मावच्छिन्नाधिकरणत्वाभाववान्सत
द्धर्मावच्छिन्नाभाववानितिसामान्यव्याप्युपष्टभ्यानुमानरूपप्रमाणांतरसिद्धत्वात्सिद्धविषयबाधग्रहःसिद्धविषयांशेभ्रमत्वमितिनियमेविशिष्टाभा
वोभयाभावादिर्नगुणमनोवृत्तिरितिसिद्धविषयबाधग्रहेविशिष्टस[illegible]नगुणेभूतत्वमूर्तत्वोभयंनमनसीतिप्रत्ययस्यविशिष्टसत्ताद्यधिकर
णकगुणादिवृत्तित्वाभावविषय[illegible]कत्वेपि[illegible]वृत्तित्वाभावरूपासिद्धविषयांशेभ्रमत्वमेवोपगंतव्यमितिनततोविशिष्टसत्तादौगु
णादिवृत्तित्वाभावसिद्धिरित्याहुः॥ [illegible]त्यादौपुनर्वृत्तिगगनादेरभावोलक्ष्य[illegible]इति॥ अथैवमपिसंयो
गेनदंडविशिष्टस्यकालिकसंबंधेनसाध्यतायांदंडिमान्महाकालत्वादित्यादौप्रतियोगिव्यधिकरणाभावाप्रसिद्धिर्दुर्वारैववह्निमान्धूमादित्या
दौसंयोगरूपसाध्यतावच्छेदकसंबंधेकालिकसंबंधावच्छिन्नघटत्वादिनिष्ठावच्छेदकताकनि[illegible]त्वहेत्वधि[illegible]नुयोगिक
त्वोभय[illegible]नतादृशोभयाभाववत्साध्यतावच्छेदकसंबंधसामान्याभावाप्रसिद्धिवा[illegible]प्रतियोगितावच्छेदकावच्छिन्नप्रतियो

गितावच्छेदकविशिष्टप्रतियोगिकत्वं तत्र प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकताघटकसंबंधावच्छिन्नायानिवेशावश्यकत्वेन गगन
मात्रसंयुक्तद्रव्यप्रसिद्धेर्गगनाभावस्यापि तादृशोभयाभावत्वसाध्यतावच्छेदकसंबंधसामान्यकत्वरूपप्रतियोगिवैयधिकरण्यासंभ
वाल्लक्षणघटकत्वासंभवः॥ नच्चोभयाभावप्रतियोगिकोटिनिविष्टस्वीय[illegible]तियोगितावच्छेदकनिष्ठप्रतियोगितावच्छेदकत्वहेतुस
मानाधिकरणाभावप्रतियोगितावच्छेदकत्वयोरेकसंबंधावच्छिन्नत्वमेव [illegible]दिसाध्यकेतादृशाभा[illegible]ङ्गप्रसङ्गवारणाय वक्षणीयंतथा
चनिरुक्तसाध्यकेगगनाभावः प्रतियोगिव्यधिकरणः प्रसिद्ध्यतीतिवाच्यं॥तथापितादृशाभावीयप्रतियोगितानिरूपितसाध्यतावच्छे
[illegible]टकसंबंधावच्छिन्नावच्छेदकत्वाप्रसिद्ध्यातत्राव्याप्तिर्दुर्वारेवेतिचेन्न॥गुणवान्द्रव्यत्वादित्यादौविषयितयागुणत्वादिमतःसम
वायेनाभावमादायाव्याप्तिवारणायप्रतियोगितावच्छेदकतायांसाध्यतावच्छेदकताघटकसंबंधावच्छि[illegible]मानेवेश्यसाध्यतावच्छेदक
ताघटकसंबंधावच्छिन्नावच्छेदकतीयस्वरूपसंबंधेनहेतुसमानाधिकरणाभावप्रतियोगिता[illegible]भावस्यैवनिवेश्यत्वेनपूर्वोक्तयु
क्त्यास्वानवच्छेदकसंबंधावच्छिन्नत्वस्वसमानाधिकरणत्वोभयसंबंधेनसाध्यतावच्छेदकताविशिष्टान्यत्वेनहेतुसमानाधिकरणाभावी

र्थसहभावेनतस्यनाशकइतिकल्पनात्॥ अविशिष्टधीव्यावृत्तेति॥ विशिष्टधीनियामकत्वस्यविशेषणविशेष्ययोरुपसत्वाद्विशिष्टधीनि
यामकत्वस्यचांतंविशेषणं॥ दीधितावेकार्थसमवायेनेति॥ स्वसमवायिसमवायेनेत्यर्थः॥ एकार्थसमवायस्यभावपदप्रवृत्तिनिमित्त
सत्तानिष्ठजात्यादिभावपदार्थनिरूपिताधेयतायामवच्छेदकत्वंग्रामाणिकमितिबोद्धाधिकारेदीधितिकारैःकंठरवेणोक्तमितिनसंद
र्भविरोधः॥ सत्वादिव्याप्यत्वप्रसंग इति॥ साध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकरूपव्याप्यत्वप्रसंगस्तदेवोपपादयति॥ सत्वादीति॥ पारिभा
षिकस्यैवेति॥ स्वविशिष्टाधिकरणवृत्तियावत्साध्यसमानाधिकरणकत्वरूपस्येत्यर्थः॥ अन्यथेति॥ तादृशव्याप्तौपारिभाषिकावच्छेदकत्वा-
निवेशइत्यर्थः॥ प्रागिति॥ पंचलक्षण्यांसार्वभौमपरिष्कारइत्यर्थः॥ स्वाभावेतीति अत्रकेचित्॥ स्वनिरूपकत्वयोगित्वविशिष्टनिरूपित
त्वस्यावच्छेदकविशिष्टाधिकरणानुयोगिकत्वोभयसंबंधेनप्रतियोगितानविशिष्टान्यहेतुमन्निष्ठाधिकरणतानिरूपकतावच्छेदकानुयोगितानि
रूपितप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यंतत्साघटितप्रतियोगिवैयधिकरण्यघटितव्याप्तिलक्षणेचद्रव्यत्व
भावेवान्तत्वादित्यादौनातिव्याप्तिरितिवदंति॥ तथाविधसंबंधेनेति॥ स्वावच्छिन्नवत्वसंबंधेनेत्यर्थः॥ उदक्षरतायादुर्वारत्वादिति॥

यद्यपि स्वमते पि सकलगोवृत्तित्वविषयतायाःकारणतावच्छेदकसंबंधाभावेन गोत्वत्वपदेन गवेतरासमवेतत्वस्यैवोपस्थितौ पि गोत्व
त्वशब्दार्थतायाः सकलगोवृत्ति[illegible]स्तादिसाधरणगोत्वत्वस्योदक्षरत्वं बोध्यं॥यद्यपीति पूर्वपक्षैकस्यचित्समाधानंनिरस्यति॥गोत्वत्वपदमिति॥नहन्तीति॥गोत्वत्वहन्तीत्यर्थः॥तथा चगोत्वत्वस्यविधेयतावच्छेदकत्वात्तद्वृत्तिधर्मधर्मितावच्छेदकीकृत्यैवा[illegible]स्तादिसाधारणधर्मस्योद्देश्यतावच्छेदकत्वात्तद्धर्मांशे हकाले नानुमितिनिर्वाहस्तादात्म्यसंबंधेनव्याप्तिस्वीकारेचनादृश्यधर्मांशे हकाले पनुमितिनिर्वाहइत्युक्तानुमितेस्तादात्म्यसंबंधेनव्याप्तिसाधकत्वमितिभावः॥सत्ताधिकरणेत्यादिनातिप्रसंगइत्यंतग्रंथोनयत्किंचित्सद्व्यावृत्तिप्रदर्शनपरःकिंनुसंबंधव्यावृत्तिप्रदर्शनपरइतिमतमाह॥केचित्तिति॥ननुपरस्परस्थलयोःपरस्परोपलक्षणत्वान्नसंदर्भविरोधइत्यतआह॥आदिपदेनेति॥अल्पाक्षरस्येति॥युधिष्ठिरार्जुनावित्यादौतभ्यर्हितत्वाद्युधिष्ठिरशब्दस्यपूर्वनिपातोभ्यर्हितंपूर्वमित्यन्याय्यइतिबोध्यं॥जातौनकिंचित्समवैतीतिनिश्चयदशायामिति॥जातिनिरूपितताभा[illegible]संबंधावच्छिन्नवृत्तित्ववदितिनिश्चयदशायामित्यर्थः॥तस्यैवविषयतौचित्यादिति॥अथैवंसतिभूतलेनघटइत्यादौतात्पर्यवशात्कविद्वृत्त्याभावबोधः कविद्भूतलवृत्तित्वाभावबोधइतिनत्रहीधितिलिख

यप्रतियोगितावच्छेदकतायाविशेषणान[illegible]नवाऽनुपपत्तभावाद्॥ प्रतियोगित्वस्यसंबंधांतरत्वेयनुयोगित्वस्यसंबंधाधिकरण[illegible]शयेनशंकते॥ **अथेति॥ अन्यविशिष्टधीरिति॥** घटोजलवानितिधीरीत्यर्थः॥ **घटविशिष्टबुद्धीति॥** घटेजलमितिबुद्धीत्यर्थः॥ संयोगावच्छिन्नाधेयतायाअपिसंयोगरूपत्वमेवेत्यभिप्रायः॥ **नन्वेवंसमवायैक्येपितद्नुयोगितायाभिन्नत्वात्तस्यांचद्रव्यत्वप्रतियोगिकसंव[illegible]निरूपितत्वविरहेणतद्धर्मिकनिरुक्तोभयाभावोऽक्षतइतिद्रव्यत्वाभावस्यापिप्रतियोगिवैय्यधिकरण्या[illegible]द्रव्यंजातेरित्यादावग्निमतिव्याप्तल[illegible]पत्तिरतआहेत्यादि॥ कचिदर्पीति॥** एकधर्मावच्छिन्नोद्देश्यताकाहित्वबुद्धाविति[illegible]र्थस्तेनधवखदिरौच्छिनत्तीत्यादिवाक्यजन्यधवत्वखदिरत्वादिरूपनानाधर्मावच्छिन्नोद्देश्यताकाहित्वबुद्धे[illegible]र्थासंसर्गत्वावश्यकत्वेपिनक्षतिः॥ **अनभ्युपगमेनेति॥** गगनंद्रव्यंगुणवत्त्वेसत्यसाधारणकारणवत्त्वाद्यदेवंतदेवंयथापृथिवीत्यादि॥ **उक्तस्थलेति॥** इमेवहवस्त्रित्वादित्यादावित्यर्थः॥ समवेतआकाशसमवेतघटोभयत्वादित्यादावतिव्याप्त्यभावेपिव[illegible]ध्यकेऽव्याप्तिर्दुर्वारेत्यालोच्यस्वयंसमाधत्तेत्याह॥ **तस्मादिति॥ इदंतुबोध्यमिति॥ साध्यतेति॥** कपिसंयोग्येतत्वादित्यादिसंग्रहायभिन्नं तं॥ प्रमेयत्वान्नाच्यत्वादित्यादौसाध्याभावनिरूपितसाध्यनिष्ठाधिकरणान्यहेतुमन्निष्ठाधिक[illegible]याअप्रसिद्धिरतःसाध्यतावच्छेदकावच्छिन्नाभावनिवशः

उभयाभावघटितप्रतियोगिवैयधिकरण्यानुधावनंदीधितिरुक्तानफलमेवेति॥इदमुपलक्षणं॥स्वप्रतियोगितावच्छेदकसंबंधेनस्व
प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नलक्षणनिवेश्यस्यानवच्छेदकसंबंधावच्छिन्नलक्षणसामा
नाधिकरण्योभयसंबंधेनसाध्यताविशिष्टान्यत्वदानेनाप्यसंभववारणसंभवादुभयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनायासोच्य
र्थएवकालेयकालपरिमाणादिहेतौसाध्यायेनपदाभावीयतादृशप्रतियोगितानवच्छेदकसंबंधसाध्यतावच्छेदकेसत्वालक्षणसम
न्वयः॥नचैवमपिप्रमेयसाध्यकेतादृशप्रतियोगित्वाप्रसिद्धिरितिवाच्यं॥संबंधघटकसामानाधिकरण्यस्थानेस्वव्यापकतावच्छेदकंयत्प्रति
योगितावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणहेतुसामानाधिकरणाभावीयप्रतियोगितात्वंतद्घटकसंबंधस्यैवनिवेश्यत्वात्॥स्वव्यापकत्वंवि
वक्षितसंबंधावच्छेदकतादृशप्रतियोगितात्ववत्त्वनिवेशान्नप्रतियोगितायाःप्रतियोगिस्वरूपतामतेवह्निमान्धूमादित्यादौतादृशसमवायेन
वत्त्वभावीयप्रतियोगितावच्छेदकत्वेपिसाध्यतावच्छेदकस्याव्याप्तिर्निरुक्तोभयसंबंधेनसाध्यताविशिष्टान्यत्वंतेयोगितायांप्रतियोगिव्य
धिकरणहेतुमन्निष्ठाभावीयत्वविशेषणमपितादृशविशेषणस्यसंबंधकोटौनिवेशार्थं॥यद्वयेवनःयेवह्निधूमोभयसाध्यकेवह्नित्वधूमत्वोभ

[illegible]साध्यतावच्छेदकतेऽव्याप्तिर्निरुक्तोभयसंबंधेनसाध्यताविशिष्टान्यसम[illegible]भावीयप्रतियोगितावच्छेदकवह्नित्वभिन्नत्वस्यतादृशत्वात्तावच्छेदे-
नासत्त्वादितिशंकासंभवतितन्नि[illegible]प्रतियोगितावच्छेदकपर्याप्तधर्मावच्छिन्नापर्याप्तिकविषयताश्रयस्यतादृशप्रतियोगितानव[illegible]त्येननविव
क्षणान्नाव्याप्तिरितिबोध्यं॥कूटनिवेशनेदुर्वारतेति॥हेतुमन्निष्ठभेदप्रतियोगि[illegible]यांसावच्छेदकावच्छिन्नत्वसंबंधेनावच्छेदिकायाप्रतियोगितानदन[illegible]निवेशकल्पेकूटनिवेशाभावेप्युक्तपरंपरायासंबंधत्वाभावेतथानिवेशोनसंभवतीत्यभिप्रायः॥द्वित्वावच्छिन्नाभावसत्वाल्लक्षणसमन्वयइति॥ननुसमवायिनःसंयो
गेनसाध्यतायांसंयोगिनःसमवायेनाभावीयप्रतियोगितायांतादृशप्रतियोगितासामान्यांशेयांतावच्छिन्नत्व[illegible]वच्छिन्नत्वयोर्द्वयोरेवसत्वादव्याप्तिरित्तिचेन्न॥साध्यतावच्छेदकसंबंधावच्छिन्नत्वमित्यनेनसाध्यतावच्छेद[illegible]संबंधनिष्ठसंबंधविध[illegible]कत्वस्यैवविवक्षितत्वादंशद्वयावच्छिन्नत्वमित्यनेनापियद्धर्म
निष्ठप्रकारविधयावच्छेदकतानिरूपकत्वमेवविवक्षणीयमेतल्लाभायैवधर्मसंबंधोरुपादानमित्यवधेयं॥उभयाभावानुसरणमिति॥अथोभयाभावनिवेशेपिहेतुम
तिसत्वेरिवसंबंधैःसर्वाण्यिवस्तूनिसंबध्नंतीतिभ्रमदशायांस्वप्रतियोगितावच्छेदकसंबंधेनस्वप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयत्वेनप्रतियोगिताज्ञानासंभवान्न
दोषोनिरुक्तोभयाभावज्ञानासंभवादनुमित्यनुत्पादेदुर्वारस्तेष्टापत्तौनिरुक्तभ्रमकालेपीष्टापत्तिसंभवान्नोक्तरीत्योभयाभावानुसरणबीजं-

संभवतीतिचेन्न॥तदुपदर्शितभ्रम कालेसर्वथानुमिति[illegible]संभवेनतदानुमिति[illegible]इष्टः ग्रंथछ दर्शितभ्रमकाले उभयाभावघ
टितव्याप्यत्वरूपकारणत्वेनानुमित्युपपत्ति रितिविशेषादुक्तरीत्योभयाभावानुसरणबीजकथनंसम्यगेव॥ अतिव्याप्तिभयेनेति॥ विषयितानिष्ठसा-
[illegible]कावच्छिन्नत्वस्यप्रतियोगितायामभावादितिभावः॥ हीधित्युक्तद्वितीयकल्पावतरणबीजंदूषयति॥ इदंत्विति॥ दुर्वचमिति॥ननु
तत्काल[illegible]संसर्गिकविषयतासंबंधावच्छिन्नत्वस्यतत्परंपरासाधारणंतत्प्रतियोगिकत्वसुवचमित्यतआह॥ तादृशस्येति॥ निरुक्तविषयतासंब-
धत्वरूपस्येत्यर्थः॥ किंचिद्दूषणार्पीति॥ स्वसमवायिसंयोगत्वेनेत्यर्थः॥ भ्रमत्वानुपपत्तेरिति॥ इदमापातनः॥ यंनरूपेण[illegible]यत्वानियो-
कत्वं यदनुयोगिकत्वंचतद्रूपविशिष्टसंसर्गकप्रकारकतद्विशेष्यकज्ञानस्येवभ्रमत्वं॥ किंचित्समवायिनिरूपितत्वविशिष्टसंयोगत्वेनचनहेत्व-
हित्वप्रतियोगिकत्वमपितुस्वसमवायिघटितरूपेणेतिनोक्तभ्रमत्वानुपपत्तिरिति॥ स्वयंवृद्धमिति॥ संयोगेनरूपसाध्यकेघटादौविरुद्धसंयो-
गेनरूपवतोऽप्रसिद्ध्यासंयोगेनरूपाभावस्यप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैय्यधिकरण्याभावेनरूपस्यसंयोगेनहेतुव्यापकत्वेपिसाम-
[illegible]रेसाध्यतावच्छेदकसंबंधनिवेशादेवपरामर्शस्यभ्रमत्वंतत्रसंबंधनिवेशपक्षेतेनसंबंधेनहेतिभ्रमत्वमपितत्संबंधघटितव्यापकत्व-

शरीरेनिवेशनीयमित्यादिकमित्यर्थः॥ विदुषांकंठभूषायेरघुनाथेननिर्मिते॥संन्यायरत्नसिद्धांतलक्षणंपूर्णतामगात्॥ ७ ॥इतिमीमांसा
न्यायपंचास्यश्रीमद्गयवाचार्यशिष्यस्यपर्वतेइत्युपनामकरघुनाथस्यकृतौगदाधरीपंचवादटिप्पण्यांन्यायरत्नाभिधायांसिद्धांत
लक्षणंसंपूर्णं॥ ७ ॥अथावयवग्रंथः॥ ॥अनुमाननिरूपणेति॥द्वितीयार्थेविशेष्यतानिरूपकाधेयतयाप्रकृत्यर्थलिंगपरामर्शनि
तस्यतस्यलक्षणस्वरूपप्रामाण्यविभागप्रकारकज्ञानानुकूलव्यापाररूपनिरूपकत्वंधात्वर्थैकदेशज्ञाननिरूपकतासंबंधेनतादृशधात्वर्थस्य
चध्वंसाप्रतियोगित्वंकालवृत्तित्वरूपल्यबर्थैकदेशध्वंसेप्रतियोगितयाकालीनत्वस्यलक्षणादिनान्यायतद्वयवप्रतिपत्त्यनुकूलव्यापार
रूपन्यायतद्वयवनिरूपणयदार्थेस्वरूपसंबंधेनतस्यचतदुत्तरद्वितीयार्थविशेष्यतेआधेयतयातादृशविशेष्यस्यप्रतिज्ञानंतेसत्रप्रतिपूर्व
कजानत्यर्थोव्यवहितोत्तरकालकर्तव्यत्वप्रकारकज्ञानानुकूलव्यापाररूपप्रतिज्ञाघटकज्ञाननिरूपकतयातादृशप्रतिज्ञायाआख्यातार्थकृतावनु
कूलतयातादृशकृतेश्चाख्यातार्थिकर्तरिमणिकेस्वाश्रयेनान्वयेनान्वयात्तादृशविशेष्यकलक्षणादिप्रकारकज्ञानानुकूलोयोव्यापारस्तदुत्तरका
लीनोयोलक्षणादिप्रकारकन्यायादिविशेष्यकज्ञानानुकूलव्यापारस्तद्विशेष्यकाव्यवहितोत्तरकालवर्तिप्रकारकज्ञानानुकूलकृतिमान्मणिका

रइतिविशिष्टबोधः आद्योव्यापारस्तत्करणमनुमानंतच्चलिंगपरामर्शः अथानुमानंनप्रमाणमित्यादिशब्दात्मकः॥ द्वितीयोव्यापारअनुमितिचरमका
रणेत्यादिशब्दात्मकः॥ विभिन्नकारणजन्यतावच्छेदकजातिमत्त्वेपरार्थत्वेऽनुमितित्वव्याप्येजातीतथाचस्वार्थानुमितेस्वार्थानुमानंपरार्थानुमितौ
परार्थानुमानंतदनुमितित्वेनेति॥ सामान्यतोऽनुमितित्वपरामर्शत्वाभ्यांतत्तत्कारणभानात्तत्तत्सामग्रीसंग्रहः॥ नच स्वार्थानुमितावप्रा
माण्यज्ञानानास्कंदितपरामर्शोहेतुःपरार्थानुमितौत्वप्रामाण्यज्ञानविशिष्टोपीतितयोर्वैजात्यमावश्यकमितिशंक्यं॥ तथासतिन्यायजन्यज्ञानस्यै
वोपनयार्थव्याप्तिपक्षधर्मताविषयकत्वेनपरामर्शरूपत्वसंभवात्परामर्शांतरानुसरणस्यमूलक्षतोव्यर्थत्वादित्यभिप्रेत्यपरार्थपदं व्याचष्टे॥
॥ विपरीतोद्भावकपरजिगीषयान्यायप्रयोगोविचारः॥ परस्यार्थःप्रयोजनंयस्मादितिविग्रहः॥ न्यायसाध्यमित्यत्रसाध्यलक्षण
जन्यत्वरूपमित्याहवादीति॥ सविशेषणेहीतिन्यायेनविशेषणस्यपरामर्शस्यतत्तदाद्यविशिष्टतद्व्यवहारसमर्थनेपिज्ञायमानहेतोर
नुमानत्वेतस्यवास्तवंन्यायप्रयोज्यत्वंमणिकारोक्तमनुपपन्नमतआह॥ अथवेति॥ केवलान्वयिग्रंथादावनुमानस्येवानुमितेरपित्रैविध्योक्तेस्त
च्चेतस्यानुमित्यर्थकत्वमाह अनुमीयतइत्यनुमानमितिव्युत्पत्तौभावेल्युटितदर्थकत्वमनुमानपदस्येतिबोध्यं॥ एतेनपरार्थी

नुमानस्यन्यायप्रयोज्यत्वकथनेन॥ नन्वनुमाननिरूपणानंतरंन्यायादिनिरूपणेकासंगतिरतआह॥ कारणत्वमिति॥ प्रयोजकत्वमित्यर्थः॥ संगतं
तरमपिदर्शयति॥ स्मरणेति॥ तत्रसमस्तरूपेत्यादिमूलस्यपक्षसत्वादितत्तद्रूपविशिष्टलिंगविषयकप्रतिपत्तिनिरूपिततज्ज्ञानकतावच्छेदकीभूत
यत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णत्वव्यापकसमुदायत्वमर्थस्तेननासंभवः नाप्यतिव्याप्तिर्विवेचयिष्यतेचेदमुपरिष्टात्॥ [illegible]स्स
त्वमिति॥ पक्षसत्वंपक्षसंबंधः॥ एतच्चधूमवानयमित्येवंपनयाकारइतिप्राचीनमताभिप्रायेणतेनोपनयस्यव्याप्तिबोधकत्वात्तेनैवसपक्षसत्व
वक्ष्यमाणविपक्षासत्वयोर्बोधनादुदाहरणानुधावनमग्रेचोदाहरणादित्रिकेऽतिव्याप्तिकथनंनासंगतमितिज्ञेयं॥ उदाहरणेनेति॥ ननूदाहरणे
नव्याप्तेरेवप्रतिपादनात्कथंसपक्षसत्वविपक्षासत्वयोःप्रतिपादनमितिचेदत्राहुः॥ उदाहरणजन्यबोधेहेतुसमानाधिकरणाभावप्रतियोगितान
वच्छेदकतस्यसाध्यतावच्छेदकेभानेतदवच्छिन्नाभाववद[illegible]स्यापिहेतौतुल्यत्वेति[illegible]याभानात्साध्यसामानाधिकरण्यभानेसपक्षसत्व
भानसंभवाच्च॥ यद्वासत्समानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदककत्वमेवविपक्षासत्वमितिनानुपपत्तिः॥ एतेनकेवलान्व
यिसाध्यकेन्यायेलक्षणाव्याप्तिस्तत्रविपक्षाप्रसिद्धेरितिनिरस्तं॥ नन्वेवमपितत्रबाधसत्प्रतिपक्षयोरप्रसिद्ध्यालक्षणाव्याप्तिरस्त्येवेतिचेन्न॥ साम

नाधिकरण्येनतेनसंबंधेनतद्धर्मावच्छिन्नसाध्यकस्थलीयलक्षणेपक्षतावच्छेदकव्यापकाभावप्रतियोगितासामान्ये संबंधावच्छिन्न

वच्छिन्नत्वोभयाभावस्तद्धर्मावच्छिन्नसाध्यकत्वमबाधितत्वं॥अवच्छेदकावच्छेदेनसाध्यकस्थलीयन्यायलक्षणेचपक्षतावच्छेदकसमानाधिक

रणाभावघटितनिरुक्तबोधकत्वाभावघटितनिरुक्तबोधकत्वं॥धेतत्वंविवक्षणीयं॥एवंपक्षावृत्तित्वसाध्यविरुद्धसामान्यकत्वमसत्प्रतिपक्षितत्वं॥पक्षावृत्तित्वं

धेनसाध्यविरोधस्तेनसंबंधेननिरुक्ताबाधितत्वासत्प्रतिपक्षितत्वयोःकेवलान्वयिसाध्यकहेतुसाधारणेतत्साध्यकन्यायेऽव्याप्तिः॥यत्तु

प्राचांमतेसाध्यवदन्यावृत्तित्वेसतिसाध्यसामानाधिकरण्येनव्याप्तित्वान्नदोषकादुदाहरणाभइति॥तदसत्॥केवलान्वयिसाध्यकन्या

येऽव्याप्तिनिरासात्॥उदाहरणघटकयत्पदोनरहेतुबोधकपदेव्याप्तिविशिष्टेलक्षणाप्रसंगाच्च॥ननुभवन्मतेपुरुषत्वावच्छेदकसाध्यतदेव्यापक

त्वविशिष्टसाध्यलक्षणायाआवश्यकत्वेदोषइतिचेन्नेत्याहुः॥उद्देश्यविधेयभावस्थलेउद्देश्यतावच्छेदकत्वस्यविधेयेभानस्यौत्सर्गिकत्वात्

॥नचैवंयत्तत्पदानर्थक्यंशंक्यं॥औत्सर्गिकनियमतात्सर्यग्रहएवोपयोगाद्ग्रन्थेचहेतोरुद्देश्यतावच्छेदकतयालक्षणाद्रादितिसंक्षेपः॥यद्यप्यु

दाहरणादीनांसपक्षसत्त्वादिबोधकत्वाभावेप्युत्तरकालीनमानसएवतेषांबोध्येपरार्थानुमितिपरत्वसंभवात्तत्रतत्प्रतिपादकत्वं

मित्यनेनप्रतिपत्तिपरत्वमेवविवक्षितमितिनकोपिदोष इति॥तदप्यसत्॥उक्तरीत्यानिर्वाहेमानसबोधकल्पनस्यायुक्तत्वात्॥निगमनेनेति॥प्रतिज्ञाहेतुभ्यां हेतुज्ञाननज्ञाप्यसाध्यवत्त्वस्यपक्षेऽवगतत्वान्निगमनघटकतत्तदस्यहेतुमात्रपरत्वेपौनरुक्त्यस्याबाधितत्वात्तदतिपक्षितत्वविशिष्टेत्यक्षणिकत्वादितिभावः॥केचित्तु॥अयंहेतुरबाधितत्वादिमान्साध्यान्वितस्वज्ञाप्यत्वबोधकवाक्योत्तरतथाविधज्ञाप्यत्वज्ञापकवाक्योपस्थितहेतुत्वादित्यनुमानोत्थापकतयैवनिगमनस्योपयोगात्तज्जन्यबोधोत्तरमनुमानेनैवतयोर्निर्णयइत्याऊस्तदसत्॥उक्तरीत्यैवनिर्वाहेहेतोर्बाधितसाधारण्याच्च॥ननुव्याप्तिपक्षधर्मताविशिष्टत्वेनहेतुर्विशेषणीयइतिचाच्यं॥असंकीर्णबाधितेतावतापिव्यभिचारात्॥अत्रचयथाश्रुतेशब्दज्ञानस्यजनकत्वेऽसंभवःसमस्तरूपोपपन्नलिंगविषयकज्ञानाजनकतांन्यायस्यैवंजनकत्वमात्रोक्तौज्ञायमानशब्दस्यजनकतामतएकदेशेऽतिव्याप्तिर्जनकसमुदायत्वोक्तावसंभवअतोपूर्वोक्तएवतदर्थआदरणीयः॥तत्रन्यायजन्यज्ञानस्यसमूहालंबनावच्छिन्नहेतुविषयकत्वाभावादसंभववारणायतत्तद्रूपनिवेशः॥एकैकन्यायवृत्तिसमुदायत्वस्यलक्षणघटकतावच्छेदकेकिंचित्त्वनिवेशः॥उदासीनविषयकन्यायविषयकज्ञानमादायतद्वृत्तिसमुदायेऽतिव्याप्तिवारणायावच्छेदकविषयतानिवेशः॥अव्यवहितोत्तरत्वादिसाधारणसमुदायत्वस्यैवतादृशविष-

यनानिरूपकत्वव्यापकत्वादसंभवइतिवर्णत्वनिवेशः॥एकदेशवृत्तिसमुदायत्वव्यावृत्तयेव्यापकत्वतत्तज्जनकत्वयोर्निवेशः॥ननुमूलेअवेत्यादिना तिव्याप्तिप्रदर्शनमसंगतमत्रेत्यननलक्षणवाक्यस्यसन्निहितस्यपरामर्शात्तस्यचलक्षणपरत्वेनसमस्तरूपोपपन्नलिंगपरत्वाभावात्॥अतत्परस्तुकाद्युच्चरितन्यायसमानाकारवाक्यपंचकवारणायतत्परत्वस्यलक्षणेऽवश्यंविवक्षणीयत्वादित्यतआह॥समस्तेति॥ननुलक्षणवाक्यघटकसमस्तरूपोपपन्नलिंगेत्यंततादृशलिंगप्रतिपत्तिनातात्पर्यकत्वमावश्यकमन्यथाविशिष्टलक्षणवाक्याद्विशिष्टार्थबोधानुपपत्तिः॥अवांतरवाक्यार्थबोधमजनयित्वाविशिष्टार्थबोधानुपपत्तेः॥नच्चताद्दशलिंगपरत्वंताद्दशलिंगमुख्यविशेष्यकबोधतात्पर्यकत्वंलक्षणवाक्यघटकसमस्तरूपोपपन्नलिंगेत्यंतस्यचनलिंगमुख्यविशेष्यकबोधतात्पर्यकत्वंवाक्यमुख्यविशेष्यकबोधेएवतत्तात्पर्यादितिवाच्यं॥एवंसत्यसंभवापत्तिर्न्यायस्यापिलिंगमुख्यविशेष्यकबोधतात्पर्यकत्वाभावात्॥नचछिन्नविशेष्यकहेतुव्यापकसाध्यप्रकारकःसन्यक्षेहेतुप्रकारकअबाधितासत्प्रतिपक्षितहेतुज्ञानज्ञाप्यप्रकारकश्चयोबोधस्तज्जनकतावच्छेदकयत्किंचिज्ज्ञानीयविषयतेत्यादिरीत्यानिर्वचनान्नलक्षणवाक्येऽतिव्याप्तिरितिशंक्यं॥समस्तेतिव्यावर्त्यानासंगतेः॥नच्चलिंगविशेष्यकसपक्षसत्वादिबोधएवोदाहरणादितात्पर्यात्तादृशबोधतात्प-

र्यकत्वमुदाहरणादीनामक्षतंतादृशतात्पर्यनिर्वाहश्चादीच्यमानसबोधेनैतिलिंगमुख्यविशेष्यकलक्षणघटकमितिनक्षतिरितिवाच्यं॥उप
नयेनपक्षसत्वस्यप्रतिपादनादित्याद्यसंगतेरितिचेन्न॥विभक्त्यंतवृत्तित्वेनसमुदायत्वविशेषणेलक्षणवाक्येकदेशेऽतिव्याप्तेश्चोक्तदो-
व्याख्यानसंगतेः॥नन्वविशिष्टलक्षणव्याख्यानेवातिव्याप्तिस्तस्यतादृशबोधपरत्वाद्विभक्त्यंतत्वाच्चेतिवाच्यं॥विषयत्वनिष्ठविशेष्यतानिरू-
पितप्रकारताभिन्नलिंगविषयताकबोधतात्पर्यकत्वोक्तौनायमतिप्रसंगइतितात्पर्यात्॥नन्वयमप्यतिप्रसंगोऽभक्त्यंतवृत्तित्वमित्यनेन
साध्यान्वितहेतुत्वप्रतिपादकविभक्त्यंतवृत्तित्वविवक्षायांपूर्वोक्तहेत्ववाच्छेन्नविशेष्यकेत्यादिरीत्यालक्षणनिष्कर्षाद्धानसंभवतत आहे
दमुपलक्षणमिति॥इदमप्युपलक्षणं॥घटमानयेत्याद्युदासीनवाक्यघटितसमुदायेऽतिव्याप्तेश्चातिव्याप्तिरिष्टव्या॥नच
तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वनिवेशेनतद्वारणंशक्यं॥तथाविवक्षणेप्रतिज्ञादिवाक्यपंचकसमुदायेऽतिव्याप्तेरुदाहरण
दित्रिकसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वेनासंभवापत्तेः॥ननुसमस्तरूपोपपन्नलिंगविषयकशाब्दबोधप्रयोजकवाक्यपंचकमात्र
वृत्तिसमुदायत्वंन्यायत्वमितिवृद्धोक्तौनकोपिदोषःमात्रपदनिवेशात्कोवह्निमानित्यादिवाक्यमादायनदोषइतिचेन्न॥लिंगंपक्षवृत्तिसपक्ष

इत्तीत्यादिवाक्यपंचकेऽतिव्याप्तेर्दुर्वारत्वात्॥प्रतिज्ञात्वादिनावाक्यपंचकनिवेशेप्रयोजकांतवैय्यर्थ्यात्तिद्धांतलक्षणएवपर्य- साना च॥उपाध्या

यमतमाश्रित्यलघुन्यायलक्षणपरतयामूलंव्याख्यातुमारभते॥अनुमितिचरमकारणेति॥अनुमितिजनकेतरभाविज्ञानानपेक्षत्वंच

रमत्वं॥प्रयोजकांतविशेषणपरिचितवैकल्पिकैकबोधघटितलक्षणस्येदमुत्सरससिद्धत्वंदर्शयति॥अत्रचेति॥महावाक्यार्थबोधस्ये

ति॥उपनयार्थहेत्वन्वितप्रतिज्ञार्थैक्यस्यैवदृश्यत्वेनोद्देश्यत्वेनैकत्वेननिगमनार्थस्यचविधेयतयाऽन्वयादुद्देश्यविधेयतादयो

दृष्टांतबोधकस्य तात्पर्यग्राहकतयोपयोगस्वीकाराद्धूमज्ञानज्ञाप्यवह्निमत्तेति भिन्नधूमवद्धूमव्यापकवह्निमद्भिन्नवह्निव्याप्यधूमवद्

भिन्नःपर्वतःअबाधितासत्प्रतिपक्षितधूमज्ञानज्ञाप्यवह्निमत्सर्वताभिन्नइत्याकारकविशिष्टार्थबोधस्येत्यर्थः॥वक्ष्यमाणरीत्येतादृशबोधासंभ

वमभिप्रेत्याह॥तावदर्थेति॥परिचायकमात्रमिति॥लक्षणघटकबोधंप्रदर्श्यस्वयंनिवर्तत इतियावत्॥ननुतावदर्थविषयकबोधजन

कत्वोक्तावसंभवः॥वाक्यज्ञानस्यैवजनकत्वात्॥नचतादृशबोधजनकज्ञानविषयत्वंविवक्षितमितिशंक्यं॥एकदेशातिव्याप्तेस्तादृशविष

यत्वव्यापकत्वोक्तौतत्संभवइत्यतआह॥तादृशेति॥प्रतिज्ञादिरूपैकदेशातिव्याप्तिवारणायोद्देश्येति॥पर्याप्तिनिवेशतात्पर्यज्ञान

त्वेनेति॥मनोयोगतात्पर्यज्ञानयोग्यताज्ञानानांव्यवहारे[illegible]त्वक्ष्यमाणार्थकं॥तत्तद्धर्मावच्छिन्नैकवाक्यप्रसिद्धेःप्रत्येकमिति॥नथाचयादृशयादृशधर्मप्रकारकत्वावच्छिन्नायत्किंचिच्छाब्दबोधनिष्ठजन्यतानिरूपितशब्दज्ञाननिष्ठाजनकतातत्तद्धर्मसमानाधिकरणसमुदायत्वन्यायत्वंपर्यवसितं॥पर्वतोवह्निमानित्यादिप्रतिज्ञादिज्ञानस्याव्यवहितोत्तरत्वसंबंधेनतत्त[illegible]र्णविशिष्टवर्णानुपूर्व्यवतादृशोधर्मस्तदवच्छिन्नत्वंतत्तद्वर्णेवेतिचरमवर्णपंचकेऽतिव्याप्तिरतआह॥तादृशेतिकेचित्तु॥ननुतादृशशाब्दबोधंप्रतिपूर्वपूर्ववर्णोत्तरत्वविशिष्टोत्तरोत्तरवर्णत्वप्रकारकज्ञानस्यैवहेतुतयाऽसंभवस्तत्तद्वच्छिन्नमात्रवृत्तित्वस्यन्यायात्मकसमुदायत्वेऽसत्वात्॥उदासीनवाक्यांतरसाधारणसमुदायत्वमादायोदासीनवाक्यघटितसमुदायेऽतिव्याप्तिर्वाच्यमात्रपदार्थतिर्भावस्यावश्यकत्वादेतादृशयत्किंचिच्छाब्दबोधंप्रतिशाब्दज्ञानस्यया[illegible]तादृशधर्मप्रकारकज्ञानीयविषयतानिरूपितविशेष्यतावच्छेदकसमुदायत्वमेवविवक्षणीयंतथाचगौरवमतोलघुपर्यवसितलक्षणमाहतादृशेतीत्यपरे॥वस्तुतस्तुपत्वादिनावर्णांतरनावगाहिज्ञानस्यापिहेतुत्वानुरोधेनपकारोत्तरत्वेरेतिरीत्याविशिष्टानुपूर्वीप्रकारकज्ञानत्वेनकारणत्वकल्पनाऽसंभवादव्यव

हितोत्तरत्वसंबंधावच्छिन्नपत्वावच्छि[illegible]नरूपिताव्यवहितोत्तरत्वसंबंधावच्छिन्न अत्वावच्छिन्नप्रकारतानिरूपितेतिक्रमेणानिरू- ग-अ-टी-
२६३ व्यनिरूपकभावापन्नत्वावच्छिन्नविषयताकज्ञानत्वादिनैवप्रतिज्ञादिज्ञानस्यकारणताकल्पनमावश्यकंतत्रचविनिगमनाविरहेणाव्यवहि
तपूर्व[illegible]संबंधावच्छिन्नत्वावच्छिन्नविषयतानिरूपितेतिक्रमेणपत्वावच्छि[illegible]त्वादिरपि-
तादृशोधर्मइतिनतद्धर्मावच्छिन्नसमुदायत्वंनचरमवर्णपंचकस्येतिनतत्रातिव्याप्तिःपरंतुयादृशवर्णस्यानेकधाप्रतिज्ञादिघटकत्वंतादृशैकैकवर्णघटि
तप्रतिज्ञादिसमुदायेःतिव्याप्तिर्दुर्वारेतितादृशेतिपर्यवसितपरिष्कारादरइतिध्येयं॥तत्रघटमानयेत्यादिवाक्यनिरासायतादृशत्वंशाब्दबोधविशेष
णं॥तादृशयत्किंचिज्ज्ञाननिवेशेयत्रपर्वतपदप्रतिपाद्यत्वादिरूपशब्दघटितहेतुभिःप्रतिज्ञाद्यर्थविषयकानुमितिस्तत्रतादृशानुमितिनिष्ठजन्यता
निरूपितजनकतावच्छेदकविषयतानिरूपकवर्णत्वव्यापकत्वस्यपरामर्शविषयपर्वतधूमवह्निपदसमुदायत्वेसत्वात्तादृशसमुदायेःतिव्या-
प्तिरितिशाब्दबोधनिवेशः॥शाब्दत्वावच्छिन्नत्वस्यानुमित्यदृत्तित्वस्यवाजन्यत्वेनिवेशलाभार्थः॥नचतादृशयावज्ज्ञानकतांतर्गतविशेषणज्ञा
नजनकतावच्छेदकविषयतात्रयवर्णप्रमिद्धेवनातिव्याप्तिरितिवाच्यं॥तुल्ययुक्त्याःसंभववारणायतद्यादृत्तशाब्दज्ञाननिष्ठजनकतायां- २६३

एवनिवेश्यत्वात्॥ तात्पर्यज्ञाननिष्ठजनकतामादायासंभवा[illegible]निष्ठेति॥ यद्दिचतात्पर्यज्ञा[illegible]स्येतद्वाक्यमीदृशविशिष्टार्थतात्पर्यक
मित्याकारकत्वात्तत्रचवाक्यस्यविषयत्वान्नासंभवइतिविभाव्यतेतद्दयोग्यताज्ञानस्यपदार्थविषयकत्वात्तन्निष्ठ[illegible]तायासंभववारणाय
तन्निवेशस्तेनचेच्छाघटितधर्मानवच्छिन्नत्वविशिष्टनिर्णयत्वावच्छिन्नत्वंविवक्षणीयमतोयोग्यताज्ञाननि[illegible]व्योग्यतोनयविष
यकपदार्थोपस्थितिजन्यउपस्थितयायथाश्रुतविशेषणेनाव्यावर्तनेपिनक्षतिर्नवासर्ववर्णाःप्रमेयावर्णत्वादि[illegible]वर्णविषयकत्वयाधि
[illegible]ताया निर्णयत्वानवच्छिन्नत्वात्॥ तात्पर्यज्ञानस्यवाक्याविषयकत्वेतन्निष्ठ[illegible]घटितधर्मानवच्छिन्नत्वंविशेष
णं॥ नचैकवर्णाव्यवहितोत्तरापरवर्णत्वरूपानुपूर्वीप्रकारकनिश्चयत्वा[illegible]च्छेनजनकतायामपीच्छाघटितधर्मानवच्छिन्नत्वासंभवःस्वध्वंसतियाव
ध्वंसविशिष्टत्वरूपक्षणत्वघटिताव्यवहितोत्तरत्वशरीरेस्वध्वंसतियावध्वंसविशिष्टे नेच्छयाअनिष्टकत्वादितिवाच्यं॥ [illegible]च्छात्वावच्छिन्न
घटितधर्मानवच्छिन्नत्वस्यैवतदर्थत्वात्॥ प्रतिज्ञेकै[illegible]तेति॥ तादृशयत्किंचिज्ज्ञानीयविषयतायाःपदत्वावापे
[illegible]भावादसंभवइतिवर्णत्वनिवेशः॥ तत्तद्वर्णज्ञानसमुदा[illegible]तेसमुदा[illegible]तज्ज्ञाद्येकदेशघटितसमुदायातिव्याप्तिरतो

व्यापकत्वनिवेशः॥शाब्दबोधज्ञानयोर्यत्किंचित्वि[illegible]धेयं॥ननुतादृशायत्किंचिच्छाब्दबोधजनकज्ञानविषय
तावच्छेदकसमुदायत्वमित्येवास्तुकिंव्यापकत्वनिवेशेन॥नचानुपूर्वीविशेषस्यैवतादृशज्ञा[illegible]
स्यनतथात्वमितिवाच्यं॥समुदायत्वातिरिक्तानुपूर्व्यादुर्वचत्वात्॥यदिचैवंयथाकथंचिद्यस्यप्रतिज्ञादिघटकवर्णसमुदायज्ञानादपितादृशशा
ब्दबोधंप्रतिहेतुत्वंविभाव्यतेतदाऽस्तुक्रमिकवर्णसमुदायज्ञानत्वेनहेतुत्वं॥[illegible]ज्ञानविषयतावच्छेदकत्वाक्षतेरि
त्यतआह॥तादृशधर्मस्येति॥अयमभिप्रायः॥नतावत्क्रमिक[illegible]त्वेनकारणत्वसंभवःक्रमस्यदुर्निरूपत्वात्॥सुनिरूप
त्वेनज्ञानमेवास्तुहेतुःकिमंतर्गडुनासमुदायत्वेनेतिचेन्न॥ताविषयतावच्छेदकसमुदायत्वघटितलक्षणसंभवइति॥ननुपदवतांवह्नि
मान्पर्वतोयमित्याद्याकारकसकलप्रतिज्ञासाधारणेकानुपूर्व्यसंभवात्कथमानुपूर्वी[illegible]हेतापरस्परंव्यभिचारादित्यत
आह॥आनुपूर्वीविशेषइति॥तथा[illegible]पूर्वीप्रकाकज्ञानाव्यवहि[illegible]विषयकशाब्दबोधंप्रतितत्तदानुपूर्वीज्ञान
स्यहेतुत्वान्नव्यभिचारइतिभावः॥एतेनतत्तदानुपूर्वी[illegible]हेतुत्वेव्यभिचारइतिकेषांचिदुक्तिर्गिरिवासरा-

स्था॥ तृणारणिमणीनां [illegible] नकारणत्वप्रसंगश्चैतन्मते॥ तादृशेति॥ उक्तयत्किंचिज्ज्ञानीयविषयतानिरूपकत्ववर्णत्वव्यापकत्वमर्थः॥ प्रतिज्ञात्वादिनिष्ठन्यूनवृत्तितानिरूपकत्वादसंभववारणायावत्कारणतानिवेशः॥ प्रतिज्ञाद्येकदेशनिष्ठसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वादसंभववारणाय व्यापकत्वनिवेशः॥ युक्तमप्रयुक्तप्रतिज्ञादीति॥ तादृशसाध्यवत्पक्षादिबोधकत्वे [illegible] तत्रप्रतिज्ञाव्यवहाराभावेपिलक्षणसंगतेः॥ न्युक्तमेति॥ प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यत्वादिवृत्तिन्यायत्वमर्थः॥ एकैकन्यायघटकेति॥ अर्थैकैकन्यायघटकप्रतिज्ञाद्यै [illegible] न्यायत्वरूपसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकतदर्थवारणायेत्यन्ये॥ तादृशेति॥ तादृशन्यायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वमित्यनेनस्वाभाववदवृत्तिस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकतादृशसमुदायत्वं [illegible] विवक्षितत्वात्तस्यचतादृशसमुदायत्वे [illegible] घटकप्रतिज्ञादिवृत्तिन्यायांतर्वर्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वस्य तंन्यायत्वमसंभवप्रसंगात्॥ स्वाश्रयीभूतयत्किंचिदित्यादि॥ [illegible] प्रतिज्ञाद्यव्यवहितोत्तरत्वस्वसमानाधिकरणध्वंसाधिकरणक्षणघटितस्यक्रमिकवर्णसमुदायस्य प्रतिज्ञाधिकरणाप्रसिद्ध्यासंभवइतितादृशेति। तज्ज्ञात्वाश्रयचरमवर्णएवप्रतिज्ञाशब्देनाभ्यु-

इतिसूचनायत्किंचिदितिनिवेशितम्॥ परंतु एकैकन्यायघटकप्रतिज्ञादेरेकैकवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वमादायासंभववा ग.अव.
रणाय ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वंतज्ज्ञानीयविषयताश्रयवर्णत्व समुदायत्वनिष्ठन्यूनवृत्तेत्वनिरूपकत्वं वेवक्षणीयमे
वंचसतिसमानाकारकप्रतिज्ञाद्वयहेत्वादिचतुष्टयैकवृत्तिसमुदायेऽतिव्याप्तिरतोयत्किंचिदितिचदंति॥ अथैवंविवक्षणेऽनुक्रमप्रयु
क्तप्रतिज्ञादिसमुदायवारणायानुक्रमप्रयुक्तप्रतिज्ञादिवृत्तीत्यादिविशेषणंव्यर्थं॥ मैवंतस्यैवस्वाश्रयत्वाधिकनिवेश्यपरिष्कृतत्वेनतद्व्यर्थ्या
भावात्॥ यत्तुयत्समुदायत्वंतत्तद्भेदकूटपर्यवसितताद्दशविशेषणशरीरेप्रतियोगिनिष्ठानुक्रमप्रतिज्ञादिवृत्तिसमुदायत्वभेदस्यापि
निविष्टत्वान्नतद्व्यर्थ्यमितितदसत्॥ आश्रयप्रतिज्ञाव्यवहितोत्तरत्वआश्रयप्रतिज्ञानुकूलवृत्तिसमाना॥ धिकरणवृत्तिजन्यत्वोभयशून्यवृत्ति
त्वादात्योभयसंबंधेनसमुदायत्वविशिष्टान्यत्वेसतिआश्रयहेत्व व्यवहितोत्तरत्वआश्रयहेत्वनुकूलवृत्तिसमानाधिकरणवृत्तिजन्यत्वो
भयशून्यवृत्तित्वात्योभयसंबंधेनसानुक्रमविशिष्टान्यत्वमितिरीत्यास्ववृत्तित्वस्याव्यवहितोत्तरत्वानुकूलवृत्तिसमानाधिकरणवृत्ति
जन्यत्वोभयशून्यहेतुवृत्तित्वोभयसंबंधेनप्रतिज्ञादिविशिष्टान्यत्वमितिरीत्यावानुगतभेदचतुष्टयस्यैवनिवेशनीयतयाऽसंभवदुक्तदो २६५.

निवेशानावश्यकत्वात्॥उभयशून्यत्वनिवेशाश्चक्रमेणपंचभिःपुरुषैःपुनस्तादृशदीपंकसमुदायेऽतिव्याप्तिवारणायस्वाश्रयपुरुषस्वानाश्रयपुरुषोभयसंबंधैःपुरुषविशेषणंजगदीशानामनुपादेयं॥तादृशकूटप्रतियोगितादृशसमुदायत्वभेदनिवेशेप्रतियोगिव्यक्तिपरिचायकोक्तिर्वेयर्थ्यात्॥नन्वेवमप्यसंभवःहेतुत्वोदाहरणत्वादिनाप्रतिज्ञामात्रावगाहिभ्रमात्मकयत्किंचिज्ज्ञानीयतत्तज्ज्ञानकताश्रयविषयताश्रयवर्णत्वव्यापकप्रतिज्ञात्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वान्न्यायत्वस्येत्यतआहदिगिति॥तदर्थश्चयत्किंचिज्ज्ञानेभ्रमान्यत्वविवक्षणान्नासंभवः॥एवंविशेष्यदलेपिभ्रमान्यत्वंज्ञानेविशेषणंदेयंतेनप्रतिज्ञाद्येकदेशेघटमानयेत्यादिवाक्येचनातिप्रसंगः॥तथाचायमत्रनिष्कर्षः॥तादृशयत्किंचिच्छाब्दबोधनिरूपितेच्छात्वावच्छिन्नघटितधर्मावच्छिन्नत्वविशिष्टनिर्णयत्वावच्छिन्नायायाकारणतातत्तद्वच्छेदककोटिप्रविष्टभ्रमान्यत्वंयत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णत्वव्यापकसमुदायत्वानिष्ठन्यूनवृत्तित्वनिरूपकप्रतिज्ञादिविशिष्टान्यतादृशसमुदायत्वंन्यायत्वं॥अथात्रव्यापकत्वनिवेशोव्यर्थःविनिगमनाविरहेणतत्तद्वर्णविषयितानांकारणतावच्छेदकत्वेनयायाकारणतेतिवीप्सयातत्तद्वर्णविषयकत्वावच्छिन्नसकलघटितत्वेनतत्तद्वच्छेदकविषयता

अथ वर्णवृत्तित्वस्य प्रतिज्ञादोषमुद्धरति तत्वमत्वेनेत्यादि । संगतिभावात् ॥ द्वयकारणतांतर्गतान्यव्यवहितोत्तरत्वादिसांसर्गिकविषयि

त्वावच्छिन्नकारणतावच्छेदकविषयितानिरूपितवर्णसिद्धिर्व्यापकत्वनिवेशेऽप्येकदेशातिव्याप्तिभयेनसाक्षात्त्वावच्छेदकत्वेनैवनिवेशनीय

तयातादृशकारणतायांपरंपरयावच्छेदकविषयितानिरूपितवर्णसिद्धिरितिवक्तुंशक्यमितिवाच्यं ॥ वर्णविषयकत्वावच्छिन्नयावत्का

रणताविवक्षणात् ॥ एवंसतिवर्णत्वनिवेशोव्यर्थइतिनशंक्यं ॥ तस्यतादृशकारणतानिवेशतात्पर्यकत्वात् ॥ नचैवमसंभवानुपूर्वी

विशिष्टवर्णत्वेनैवहेतुतयाविषयितायाःसाक्षात्त्वावच्छेदकत्वादितिवाच्यं ॥ तथासतिज्ञानत्वत्वप्रवेशेगौरवाज्ज्ञानीयविषयितायाएवका

रणतावच्छेदकत्वात् ॥ धर्मधर्मितावच्छेदकभावापन्नज्ञानत्वविषयित्वयोरेवतदवच्छेदकत्वाभ्युपगमाच्चनोक्तदोषः ॥ यच्चवर्णविषयि-

तानांविनिगमनाविरहेणनसाक्षादवच्छेदकत्वंसंभवतिप्रागभावानभ्युपगमपक्षेस्वात्मन्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपाव्यवहि

तपूर्वत्वस्योत्पत्तिहठाघटतत्वेनगुरुत्वात्तदर्थंव्यवहितपूर्वत्वेनहेतुत्वेचानंतदघटितत्वेनव्यवहितोत्तरतत्तद्वर्णत्वरूपानुपू

र्वीप्रकारकज्ञानत्वेनैवहेतुत्वादिति ॥ तदसत् ॥ स्ववृत्तिकृतिमत्वस्ववृत्तिध्वंसप्रतियोगित्वस्वविषयककृतिजन्यज्ञानाधीनज्ञातित्वेन

ग अव

२६६

तयसंबंधेनतत्तद्वर्णविशिष्टत्वरूपाव्यवहितपूर्वत्वस्यातिलघुतयातत्संबंधेनतत्तद्वर्णविशि[illegible]र्णज्ञानत्वेनकारतायादूषयितुमशक्यत्वात्॥विषयतानांनिरूप्यनिरूपकभावेविनिगमनाविरहेणसकलवर्णावषयितानांकारणतावच्छेदकत्वस्यनिष्प्रत्यूहत्वाच्च॥अत्रवदंति॥यायाकारणतेत्यनेनसकलकारणताउपादायतत्तदवच्छेदकविषयितानिरूपकवर्णत्वंनिसमुदायत्वस्यन्यायत्वेगौरवात्प्रतिज्ञाज्ञानीयैकाहेतुज्ञानीयैकेतिरीत्यापंचकारणतास्तत्तद्घटकचरमवर्णविषयकत्वावच्छिन्नाएवोपादेयास्तथाचैकदेशवारकतयाव्यापकत्वनिवेशःसार्थकः॥नच्चविनिगमनाविरहःशंक्यःसमनियतानांकारणतानामेक्योपगमसंभवात्पंचकारणतानामेवलक्षणघटकत्वात्॥नचैवंकारणतावच्छेदककोटिप्रविष्टेतिव्यर्थमितिवाच्यं॥विषयितामात्रेतदवच्छेदकतार्थासंःपूर्वोक्तरीत्याःसंभवेनतन्निवेशोःसंभवस्यैवप्रसंगेनपर्याप्तनिवेशस्यतत्रोपादानात्॥नच्चसमनियतकारणतानामेक्योपगमेःवयवलक्षणेआनुपूर्वीविशेषप्रकारकनिश्चयत्वसमनियतत्वेनकारणतावच्छेदकविषयितानिरूपकत्वमित्यत्रसमनियततत्तन्निवेशोवैयर्थ्यप्रसंगस्तादृशनिश्चयत्वावच्छिन्नकारणतानिवेशसंभवादितिवाच्यं॥समनियतानांकारणतानामेक्यानेक्यपक्षद्वयसाधारण्येनतन्निवेशात्॥तासामेक्यपक्षाभिप्रायेणव्यापकत्वनात्॥ननुपंचकारणतानांनिवेशेयत्किंचिच्छ

व्दबोधनिरूपितेत्यस्यपरिचायकतयाऽनिवेशापत्तिः॥ नचेष्टापत्तिः॥ आनुपूर्वीभेदभिन्नानंशजन्यतावच्छेदकलेखनिवेशात्॥ पर्वतो वह्निमान्यर्वतोदहनवानित्यादिप्रतिज्ञादिघटितनसाध्यकन्यायाननुगमप्रसंगात्॥ अवच्छेदकविषयितानिरूपकवर्णवृत्तित्वसंबंधेनतादृशसकलकारणताविशिष्टसमुदायत्वमितिव्यापकत्वाघटितसकलकारणताघटितलघुतरलक्षणसंभवाच्चेतिचेन्न॥ स्ववृत्तिसाध्यवत्पक्षविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकत्वस्ववृत्तिहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकतापंचकसंबंधेनतादृशशब्दविशिष्टसमुदायत्वंविवक्षणीयमेतदर्थतात्पर्यग्राहकेवशाद्वेयत्किंचिल्लघुतरलक्षणप्रविष्टमननुगमापत्तेरेतादृशानुगमोलक्षणानंत्यंचेति॥ वस्तुतस्तुतादृशयत्किंचिच्छाब्दबोधनिरूपितानिर्णयत्वावच्छिन्नायायाकारणतावच्छेदककोटिप्रविष्टयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकतासंबंधेनतादृशसकलकारणताविशिष्टसमुदायत्वंविशेष्यदलपर्यवसितार्थमनहयसाधारणस्तत्रसमनियतकारणतानामैक्यपक्षेणकेदृशसमुदायेतिव्याप्तिवारणायव्यापकतानिवेशः अनैक्यपक्षेसकलकारणतांतर्गताव्यवहितोत्तरत्वविशिष्टयकत्वा-

वच्छिन्नकारणतावच्छेदकविषयितानिरूपकवर्णाप्रसिद्ध्याऽसंभवा[illegible]वच्छेदककोटिप्रविष्टानामवच्छेदकत्वसूचनायकोटिप्रविष्टेति
तथाचवर्णविषयितानांतदवच्छेदककोटिप्रविष्टत्वान्नाप्रसिद्धिः॥ एतेन पूर्वकल्पेशाब्देयत्किंचित्वशब्दज्ञाननिष्ठत्वकोटिप्रविष्टत्वानांत
क्षणेऽनिवेशात्स्वरसतोनतत्संगतिरितिनिरस्तं॥ अत्रतेषांनिवेशास्यावश्यकत्वात्॥ अथविषयितायांतादृशजनकताश्रयज्ञानीयत्वमेव
निवेशनीयमुदासीनसाधारणसमुदायत्वस्यतादृशसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वेववारणात्तदवच्छेदकतानिवेशोव्यर्थइ
तिचेदत्रकेचित्॥ कालिकसंबंधेनतादृशजनकताविशिष्टघटमानयेतिवाक्यज्ञानमादायतादृशवाक्येऽतिप्रसंगवारणायस्वरूपसंबंधे
नेवजनकतावैशिष्ट्यंवाच्यंतथाचगौरवमतोऽवच्छेदकत्वनिवेशः॥ नचकालिकसंबंधेनतत्तज्जनकताविशिष्टघटपदज्ञानमादायत
द्विषयिताव्यापकघटपदत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वविरहेणैवतद्वारणमितिवाच्यं॥ तथासतितादृशप्रतिज्ञात्वमादायासंभववार
णायापरदत्तेस्वरूपसंबंधेनजनकतावैशिष्ट्यस्यावच्छेदकत्वस्यवाऽवश्यंनिवेशनीयतयोक्तातिव्याप्तेर्दुर्वारत्वात्॥ नचोक्तवाक्यविषयितानि
रूपिकालिकसंबंधेनावच्छेदकताविशिष्टत्वादतिप्रसंगवारणायस्वरूपसंबंधेनावच्छेदकतावैशिष्ट्यस्यनिवेशनीयतयाऽवच्छेदकता

वेशोऽधिक इतिवाच्यं॥ अवच्छेदकतासंबंधेनजनकतावैशिष्ट्यस्यैवनिवेशनीयतयाऽधिकनिवेशाभावादितिवदंति॥ वस्तुतस्तुस्व
रूपयोग्यज्ञानकन्यायसंग्रहायस्वरूपयोग्यतारूपमेवजनकत्वंनिवेशनीयंतच्चजनकतावच्छेदकधर्मत्वमेवतथाचजनकताव
त्वेनज्ञानंनिवेश्यतदीयत्वेनविषयितानिवेशापेक्षयातदवच्छेदकत्वेनविषयितानिवेशोयुक्तोलाघवादितितदेवनिविष्टमितिध्येयं॥ विशि
ष्टवैशिष्ट्यावगाहिबोधात्मकपरामर्शेति॥ मीयतेअनेनेतिमानमितिव्युत्पत्त्यालब्धज्ञानकरणघटकज्ञानरूपक्रियायांविशिष्टवैशिष्ट्या
वगाहीत्यभेदेनविशेषणमिति विशिष्टवैशिष्ट्यावगात्यभिन्नज्ञानकरणंलभ्यतेतच्चकरणमेकंन्यायजन्यबोधात्मकंमानांतरंमनोरूपमित्य
वयवार्थोज्ञेयः॥ उत्थाप्यतइत्यस्योत्थ्यतइतिनार्थोमनसोनित्यत्वादतआह॥ स्वात्मकेति॥ न्यायजन्यविशिष्टज्ञानात्मकेत्यर्थः॥ केवलमन
सोपरामर्शजनकत्वाभावादाह॥ तथाविधेनेति॥ तादृशविशिष्टज्ञानसहितेनेत्यर्थः॥ तदसत्वेनेति॥ उपनयजन्यव्याप्तिविशिष्टवैशिष्ट्यव
गाहिबोधस्यासत्वेनेत्यर्थः॥ उपनयजन्यशाब्दबोधोत्तरंनिगमनश्रवणेनतद्घटकपदार्थोपस्थित्यानन्याशादितिभावः॥ बाधकाभावादिति
॥ महावाक्यार्थबोधस्यसंपन्नसामग्रीकावांतरवाक्यार्थबोधाधीनत्वात्पुनर्मनिवादितात्पर्यापेक्षाभावादितिभावः॥ वादीति॥ साधारणध

र्मोक्तिरियं॥ अप्रामाण्यशंकानेयत्याभावात्कचित्सशंकितरवैय्यर्थमस्वरसः॥ व्याप्यपदस्यव्याप्यार्थकत्वेदूषणमाह॥ नामार्थेति॥ स्वयंलक्षणमाहेतिज
गदीशीयावतरणमसंगतंमूलार्थतायास्तवतस्यसंभवादित्याह॥ अत्रेति॥ अनुपपत्तेर्वक्ष्यमाणतयेति॥ उदाहृतेरेरदर्थवक्ष्यतीत्यने
नैतदिः॥ यत्किंचिदिति॥ विषयितानिवेशेषणं॥ तादृशेति॥ व्युत्क्रमप्रयुक्तेत्यर्थः॥ [illegible]णनिरसनीयकत्वमाह॥ अथवेति॥ स्वा
श्रयनिगमनवृत्तित्वसंबंधेनोपनयोत्तरत्वविशिष्टनिगमनस्वरूपानुपूर्व्यवच्छिन्नभेदप्रतियोगितावच्छेदककोटेःसंसर्गघटकतयानिगमन
प्रवेशान्निगमनसंग्रहोबोध्यः॥ स्वाश्रयीभूतेति॥ अत्रेदंबोध्यं॥ तादृशार्थकिंचिच्छब्दबोधेत्यादिलक्षणेस्वाश्रयीभूतेत्यादिविशेषणेवाक्यांत
रसाधारण्यात्यवृत्तिसमुदायत्व[illegible]वृत्तित्वानिरूपकत्वविशेषणस्यदर्शितदिशाज्ञानैक्यघटितस्यनिवेशेसमानाकारकप्रतिज्ञाद्व
यहेत्वादिचतुष्टयेतत्पक्षसमुदायत्वबारकतयानिषेधद्वयोपादानसार्थक्येपिज्ञानाघटितेऽस्मिन्लक्षणेतथान्यूनवृत्तित्वानिरूपकत्वविवक्षणा
संभवात्स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरहेत्वादिवृत्तित्वस्यसमुदायत्वविशेषणेनैवोपपत्तौनिषेधद्वयनिवेशोव्यर्थएव॥ अथतदनिवेशप्र
तिज्ञादिपंचकसमुदायत्वरूपविशेषणदलस्यव्यर्थत्वादितितत्सार्थक्यायैवोक्तानुपूर्वकत्वरूपविशेषणदलस्यनिषेधद्वयगर्भतादरइतिचेन्न

कमिकवर्णसमुदायरूपप्रतिज्ञाद्यधिकरणक्षणप्रसिद्ध्यासाश्रयप्रतिसांसर्ग्यवह्नितोत्तरहेत्वाद्यक्षणवृत्तित्वसतिस्वाश्रयहेत्वन्यवर्ण्यवह्नि
तोत्तरोदाहरणाद्यक्षणवृत्तित्वसतीत्येवंरीत्यावृत्तित्वचानुष्टुब्विशेषितसमुदायत्वस्यैवविवक्षणीयतयातादृशैकदेशसमुदायत्वस्यार्थक्यसंभवादिति॥ एवंचेति॥ उचितानुपूर्वीकेत्यस्यस्वाश्रयीभूतेत्यादिविशेषणतात्पर्यकलेचेत्यर्थः॥ ननु
तादृशानुपूर्वीकच्छिन्नभेदप्रतियोगितावच्छेदकतनिवेशेपिन्यायघटककतिपयवर्णवृत्तिसमुदायत्वनिवारणायप्रतिज्ञात्वादिपर्याप्यवच्छेद
कयत्किंचिद्धर्मव्यापकत्वस्यप्रतिज्ञादिपंचवृत्तित्वार्थकविशेष्यदलसार्थक्यमसंभवप्रयेननतादृशभेदप्रतियोगितावच्छेदकवर्णत्वव्याप
कतनिवेशसंभवादेवंचेत्यंगतमितिचेदत्रकेचित्॥ तादृशभेदप्रतियोगितावच्छेदकत्वस्यावच्छेदकतावच्छेदकसाधारणस्याप्रा-
माणिकत्वेतादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमानियतकारणतावच्छेदकयत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णत्वव्यापकत्वस्ये
वविवक्षणीयतयानदिष्यदलार्थक्यमित्याहुः॥ वस्तुतस्तुस्वाश्रयप्रतिज्ञादिघटितयत्किंचिदानुपूर्व्यवच्छिन्नभेदप्रतियो
गितावच्छेदकत्वविशिष्टवर्णत्वव्यापकत्वनिवेशसंभवादसंभवप्रयेननत्सार्थक्यासंभवइतिबोध्यं॥ नानाप्रतिज्ञादिसाधारणप्रतिज्ञा

त्वादिव्यापकत्वस्यकस्मिन्नपिन्यायत्वेऽसंभवादसंभवइतिप्रतिज्ञात्वादिपर्य[illegible]दलिंविदिति॥नादृशोधर्मःप्रतिज्ञादिनिष्ठतत्त्वद्योतकत्वमेव॥**नसंभूयैकार्थप्रतिपादकत्वमिति**॥वादितात्पर्यविषयीभूतोद्देश्यविधेयभावापन्नार्थबोधकत्वमित्यर्थः॥**गुणानांचेति**॥जैमिनिसूत्रमिदंतदर्थश्चगुणानां॥विधेयानां॥परार्थत्वात्॥उद्देश्यसाकांक्षत्वात्॥उद्देश्यनिष्ठविषयतानिरूपितविषयतात्रयत्वादिनियावत्॥असंबंधः॥अवच्छेद्यावच्छेदकभावापन्नविषयितानिरूपकत्वाभावः॥**नचैवंपर्वतोवह्निमानितिबोधीयवह्निवह्नित्वविषयितयोरवच्छेद्यावच्छेदकभावोनस्याद्वह्नित्वस्यापिधर्मिपारतंत्र्येणपर्वतविशेषणत्वादत आह**॥**समत्वात्**तुल्यतयाभानादित्यर्थस्तथाचवह्नित्वस्यवह्नावपिभानान्नतयोस्तुल्यतयाभानमितिनदोषः॥**सुंदरोदंडीति**॥अभेदान्वयबोधेकचिद्विशेषणत्वंकचिद्विशेष्यत्वं,हितोत्तरत्वविशिष्टविशेष्यकवाच्यत्वंकारकत्वंक्रियान्वयित्वंनीलघटइत्यादौकचिद्विशेषणविशेष्यवाचकपदयोःसमानविभक्तिकत्वज्ञानंयथानीलोघटइत्यादौ॥सुंदरोदंडीत्यादौद्विविधस्याप्यभावाच्छाब्दबोधोवारणीयःप्रकृतेपिसैवदुरवस्थाभवन्मतइतिभावः॥**असमस्तनामार्थेति**॥समासाघटकपदार्थेत्यर्थः॥**अभेदान्वयप्रतियोगिमापेक्षतयेति**॥**समर्थःपदविधिरितिसूत्रं**॥अस्यार्थः॥पदविधिः॥पदंकार्यं॥कार्याणिच

तद्धितसमासादीनि॥समर्थः॥समर्थाश्रितएवसर्ववाक्यंसावधारणमितिन्यायात्॥एवकारव्यवच्छेद्यंचासमर्थानाश्रितत्वं॥असामर्थ्यंच स्वविशिष्टविशेष्यकशाब्दबोधानुकूलत्वघटकपदार्थान्वितस्वार्थपरत्वं॥तथाचप्रकृतेवङ्किपदस्यस्वघटकद्विरुक्तयत्पदार्थान्वितस्वार्थपरत्वेसामर्थ्यान्नकुत्रापिद्धितसंभवइतिभावः॥इत्तयश्चरुनद्धितसमासैकशेषनाद्यंतधातवइति॥यादृशयादृशवाक्येरिति॥अथ यादृशयादृशवाक्यानांपरामर्शविषयपदार्थोपस्थापकत्वमितिनिर्वचनेसकलप्रतिज्ञादिघटकपदानामपिपरामर्शप्रयोजकतयातावद्वृत्तिसमुदायत्वस्यकस्मिन्नपिन्यायत्वेऽसत्वादसंभवः॥उदाहरणोपनययोरतिव्याप्त्यसंगतिश्चेतित्रब्रूमः॥यादृशत्वंहेत्वंशस्ययादृशसमुदायत्वाश्रयप्रयोज्यस्मृतिविषयत्वंपरामर्शविषयतायाव्यापकंतादृशसमुदायत्वाश्रयत्वमित्यर्थः॥एतेनवाक्यानांपदार्थोपस्थापकत्वाभावात्कथमतिव्याप्तिदानमितिनिरस्तं॥यथाकथंचित्तदर्थानुकूलत्वमिति॥तथाचप्रतिज्ञादिपंचवाक्यानामपितादृशपरामर्शप्रयोजकत्वात्तावद्वृत्तिसमुदायत्वस्योदाहरणोपनययोरसत्वांनतादृशवाक्यद्वयेऽतिव्याप्तिरितिभावः॥अथयादृशयादृशवाक्यानामित्युक्त्यान्यायांतरवाक्यानामपितादृशत्वात्तावद्वृत्तित्वस्यन्यायत्वेऽसत्वादसंभवःवक्ष्यमाणातिव्याप्त्यसंगतिश्च॥नचयादृशत्वंहेत्वंशस्ताश्रयप्र-

योज्यस्मृतिविषयत्वंपरामर्शविषयताव्यापकंतादृशसमुदायत्वाश्रयत्वमितिपूर्वनिरुक्तार्थेतात्पर्यंवक्तुंशक्यमपेक्षोपपत्तेः॥दुरुक्तातिव्याप्तेर्दुर्वारत्वाच्चेतिचेन्न॥यत्किंचित्परामर्शप्रयोज्य[illegible]दृशावादृशवाक्यानामितिविवक्षणीयंन्यायांतरगतवाक्यानामतादृशत्वान्नासंभवः॥नचकोवह्निमान्कुतइत्यादिवाक्यानामपितादृशतयासंभवोदुर्वारइतिवाच्यं॥एकप्रयुक्तत्वेनतादृशवाक्यविशेषणत्वात्॥नचाग्निमद्धीत्यसंगतिःशंक्यातादृशवाक्यपंचकस्यैकप्रयुक्तत्वेनतत्रैवातिव्याप्तेरभिप्रेतत्वान्नवा[illegible]स्यवक्तुंशक्यत्वात्॥न[illegible]तथासतिपर्वतोवह्निमान्कुतोधूमादित्यत्रपर्वतोवह्निमानित्यस्यवैकल्यंशंक्यं॥लक्षणसमन्वयार्थंतदुक्तेः॥नचविप्रतिपत्तिस[illegible]ह्निमानितिवाक[illegible]प्रयुक्तत्वेनतादृशतदुटितसमुदायवृत्तित्वस्यन्यायत्वेऽसंभवादसंभवइतिवाच्यं॥आदृत्तोसेवप्रतिज्ञेतिमतेविप्रतिपत्तिघटकवाक्यस्यपुनरनुसंधानमात्रमेवनपुनःप्रतिज्ञावाक्योच्चारणमितितस्यवाक्यांतरत्वाभावादितिविभावनीयं॥ ॥इतिन्यायलक्षणं॥ ७ ॥

भ्रमादृत्तीति॥भ्रमान्यदृत्तीत्यर्थस्तेननिरुक्तानुपूर्वप्रकारकज्ञानस्यान्यांशेभ्रमत्वेपिनक्षतिः॥हेतुविशिष्टहेतुत्वविषयितावहिर्भूतेति॥तादृशहेतुत्वविषयित्वाव्यापकेत्यर्थः॥तादृशहेतुत्वावच्छिन्नविशेष्यकनिश्चयत्वव्यापकप्रतिबंधकतानवच्छेदकत्वं

हिर्भूतत्वमिति भट्टाः॥ तादृशधर्मविशेषणत्वेगौरवमिति॥ अथ प्रतिज्ञादिभेदपंचकान्यतमप्रतियोगितावच्छेदकधर्मवत्वरूपंलघुलक्ष
णंसंभवतितेनैवहेत्वंतसमुदायवारणान्नद्वारकप्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकेत्यादिविशेषणंगौरवापादकंकिमर्थं॥ नन्च प्रतिज्ञाभे
दस्यतदेकदेशभेदस्यचकेवलान्वयितयासमनियतत्वेनैक्यादेकदेशाऽतिव्याप्तिरेवंप्रतिज्ञाभेदस्यहेत्वंतसमुदायभेदस्यचैक्यान्नादृशस
मुदायवारकप्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकेत्यादिविशेषणमप्यावश्यकमितिवाच्यं॥ तादृशभेदानांकेवलान्वयित्वेप्यव्याप्यवृत्ति
त्वेनप्रतियोगिव्यधिकरण्याघटितपरस्परव्यापकत्वविरहेणैक्यायोगात्॥ यथाचैतत्तथाभिश्रलक्षणेव्याख्यायांस्पष्टमितिचेन्न॥ प्र
तिज्ञाद्यन्यतमत्वशब्दस्यप्रतिज्ञादिभिन्नभिन्नत्वार्थकत्वस्यस्वरससिद्धत्वाच्छब्दार्थानुल्लंघनेनैवगुरुलक्षणकरणादर्शितरूपस्यलक्षण
त्वसंभवेपितस्यलक्षणांतरत्वात्॥ नचैवंहेत्वंतसमुदायवारकविशेषणस्यस्वातंत्र्येणनिवेशात्कथंशब्दार्थानुल्लंघनमितिशंक्यं॥ प्रतिज्ञा
दिभिन्नोयस्मात्सप्रतिज्ञादिभिन्नस्तद्भिन्नत्वस्यापितच्छब्दार्थत्वात्॥ एतेनप्रतिज्ञादिभेदपंचकानुयोगितावच्छेदकंयद्यद्यासज्यवृत्तिरू
पंतन्नदन्यत्वेसतिप्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकंयद्यत्तत्तद्भेदकूटमेवनिवेशनीयंसत्संतदलेव्यासज्यवृत्ति

त्वनिवेशात्प्रतिज्ञाघटकयावद्द्रव्यान्यतमत्वमादायनैकदेशातिव्याप्तिरितिनिरस्तंतस्यलक्षणत्वसंभवेपिप्रतिज्ञादिभिन्नभिन्नत्ववाचकप्रतिज्ञा द्यन्यतमत्वशब्दार्थत्वाभावात्॥ **स्वाश्रयांतरितभागध्वंसत्वन्यत्वेनेति**॥स्वाश्रयीभूतैकभागध्वंसाधिकरणक्षणोत्पत्तिकःस्वाश्रयभागांत रप्रागभावाधिकरणक्षणोत्पत्तिकश्चयःस्वाश्रयस्तत्कान्यत्वेनस्वाश्रयध्वंसाधिकरणंयःस्वाश्रयप्रागभावाधिकरणंक्षणस्तदुत्पत्तिकस्वाश्रयक भिन्नत्वेनवेत्यर्थः॥ **तादृशशाब्दबुद्धित्वपर्याप्तेति**॥ **अथ**पर्याप्तिनिवेशेःसंभवस्तादृशशाब्दबोधंप्रतिपर्वतोवह्निमान्नाग्निर्दहनवानित्यादि नानानुभूवश्चकज्ञानानांहेतुतयातेषांपरस्परंव्यभिचारेणतादृशज्ञानाव्यवहितोत्तरत्वस्यापिकार्यतावच्छेदकेप्रवेशावश्यकत्वात्॥ **नच्चु**तादृशय किंचिदानुभूवश्चप्रकारकज्ञानाव्यवहितोत्तरत्वसहितंतादृशशाब्दत्वपर्याप्तत्वंविवक्षणीयमितिवाच्यं॥एवमपिकार्यतावच्छेदकको टौविषयनिवेशप्रयोजनाभावेनासंभवावारणादितिचेन्न॥ **तत्तदानुभूवश्चप्रकारकज्ञानाव्यवहितोत्तरत्वपर्याप्तत्वनिवेशएवतात्पर्यात्**॥ **अ अथवा**नुमितिग्रंथोक्तलाघवानुरोधाद्विषयस्यापिकार्यतावच्छेदकनिवेशाभिप्रायकल्पनानोक्तदोषः॥ **अथैवमप्यवच्छेदकतापर्याप्तिनिवेशाव्य र्थः**॥यत्किंचिज्ज्ञानेवक्ष्यमाणतादृशजनकतादृशशून्यत्वविशेषणेनैवविशिष्टवैशिष्ट्यावगाहिशाब्दबोधजनकज्ञानसंग्रहेणानिप्रसंगाभावादिति

चेदत्रकेचित्॥स्वानवच्छेदकविषयितानिरूपितजनकताशून्यत्वंकिंचिज्ज्ञानीयविषयितानिरूपकधर्मसमुदायत्वमेवतत्तात्पर्यकवस्तुतस्तेषामभिप्रायेणयथाश्रुताभिप्रायेणवेदमितिवदंति॥वस्तुतस्तुप्रतिज्ञाघटकवह्निमानितिभागहेतुसमुदायेऽतिव्याप्तिस्तत्रहिधूमज्ञानज्ञाप्योवह्निरितिबोधनिष्ठजन्यतानिरूपितजनकताश्रयवह्न्यभावशून्यत्वंकिंचिज्ज्ञानीयविषयितानिरूपकधर्मसमुदायत्वसत्त्वात्॥नचैकदेशान्वयितादृशवर्णत्वव्यापकत्वंनिवेशनीयमेवमपिप्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिरतोतादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वंनिवेशनीयंतेनेदंसंगच्छतेसमुदायव्याप्तेरितिवाच्यं॥न्यूनवृत्तित्वानिरूपकत्वंसमुदायत्वविशेषणत्वेधूमादालोकवान्पर्वतोवह्निमानितिप्रतिज्ञानिष्ठसमुदायत्वस्यतद्घटकधूमादितिभागेऽतिव्याप्तेरतोन्यूनवृत्तित्वानिरूपकत्वेनतादृशप्रतिज्ञायामव्याप्तिसंगाज्जनकताद्वयशून्यत्वविशेषणवैयर्थ्यापाताच्चैकदेशप्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिरतोतादृशवर्णत्वसंबंधेनसंज्ञानैक्यघटितन्यूनवृत्तित्वानिरूपकत्वेनवावानिवेशनीयमितिनिरुक्तसमुदायेऽतिव्याप्तितादवस्थ्यमितिध्येयं॥तथाविधजनकताद्वयशून्यत्वेनेति॥यद्यपिपर्वतोवह्निमानितिप्रतिज्ञादिज्ञानेऽपिविनिगमनाविरहप्रयुक्तजनकताद्वयसत्त्वादसंभवस्तथापिसमनिय

तानंतरं [illegible] भेदव्याप्तिहेतुं॥ यद्वा स्वनिरूपितजनकतावत्त्वस्यानवच्छेदकविषयितावच्छिन्नतादृशान्यतमजन्यतानिरूपितज
नकतावत्त्वोभयसंबंधेन तथाविधजन्यताशून्यत्व[illegible]तियोगितावच्छेदकजनकतावत्त्वसमानाधिकरणतादृश[illegible]भय
संबंधेनभेदविशिष्टान्यत्वस्यवातादृशजनकताद्वयशून्यत्वमित्यनेकविवक्षणान्नासंभवः॥ व्याप्यव्यापकभावानापन्नेति॥परस्परव्य
भिचारीत्यर्थस्तथाचस्वाभावच्छेदकत्वसमानाधिकरणाभावप्रतियोगित्वसमानाधिकरण्येतन्त्रितयसंबंधेनतादृशजनकताविशिष्ट
जनकताशून्यत्वंपर्यवसितार्थः॥ स्वानवच्छेदकेति॥स्वसमनियतजनकतानवच्छेदकस्यार्थस्तेनावच्छेदकतावच्छेदकसाधारणावच्छे
दकत्वाभावेप्रतिज्ञादिज्ञानत्वावच्छिन्नजनकता[illegible]विषयितविशिष्टताजनकतायाः प्रतिज्ञादिज्ञानेसत्वेपिनासंभव
वः॥ अथ धूमादालोकवान्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्तिस्तज्ज्ञानेहेत्वर्थविषयकबोधजनकतानवच्छेदकपर्वतपदावेषयितावि
शिष्टतथाविधजनकतासत्वादितिचेदत्राहुकेचित्॥ सामानाधिकरण्यस्यावच्छिन्नजनकताव्यापकत्वोभयसंबंधेनस्वानवच्छेदकविष
यितावैशिष्ट्यस्यजनकतायांविवक्षणीयत्वात्॥ असंभवप्रकारव्यर्थमसंबंधनिवेशः॥ धूमादालोकवान्पर्वतोवह्निमानितिप्रतिज्ञा[illegible]

निवारणायाद्वितीयसंबंधनिवेशः॥ यदि चैवमपि स्वानवच्छिन्न[illegible]नवेशादननुगम इति विभाव्यते तदा स्वानवच्छिन्न[illegible]च्छिन्नताद्दशज

नकत्वाव्यापकत्वसामानाधिकरण्येतत्त्रितयसंबंधेनविषयिताविशिष्टताद्दशजनकताशून्यत्वमेवविवक्षणीयं॥ धूमादयं[illegible]द्वह्नि-

ह्निमानितिप्रतिज्ञाघटकधूमादितिभागविषयि[illegible]दायतस्यानव्याप्तिवारणायप्रथमसंबंधनिवेशः॥ तत्रैवपर्वतपदादिवि[illegible]

याव्याप्ति[illegible]द्वितीयसंबंधनिवेशः॥ तत्रैवपर्वतपदविषयितामादायाव्याप्तिवारणायद्वितीयसंबंधघटकजनकतायांताद्दशत्वनिवे-

शः॥ वस्तुतस्तुस्वानवच्छेदकविषयिताविशिष्टताद्दशजनकताशून्यत्वसंबंधेनताद्दशजनकतावैशिष्ट्यंयत्किंचिज्ज्ञानेविवक्षणीयंधू

मादालोकवान्पर्वतोवह्निमानितिप्रतिज्ञाज्ञानेतदर्थविषयकबोधीयजनकतावैशिष्ट्यसत्वाल्लक्षणसमन्वयः॥ नन्वेवमनुमितिहरणघटक

भागद्वयज्ञानीयजनकतयोःप्रत्येकंस्वानवच्छेदकविषयिताविशिष्टत्वेनतज्ज्ञानेनिरुक्तसंबंधेनताद्दशजनकतावैशिष्ट्याभावात्तत्राव्याप्ति

रितिचेन्न॥ संबंधघटकजनकतायामुदाहरणज्ञानीयजनकताभेदनिवेशात्॥ अथैवमपिस्वानवच्छेदकविषयिताशून्यत्वमेवनिवेश्य

तांकिंतद्विशिष्टजनकतानिवेशनेनेतिचेन्न॥ एवंसतियत्किंचिज्ज्ञानीयविषयितायांताद्दशजनकतावच्छेदकत्वस्यविवक्षि[illegible]

स्यवैय्यर्थ्यापत्तेः॥जनकतानिवेशेचैकदेश[illegible]त्यापितादृशजनकताशून्यत्वेनैकदेशवारकतयैवतत्सार्थक्यात्॥वस्तुतस्तुजनकत्वानिवेशेनिरुक्तरीत्योदाहरणाव्याप्तिवारणाय[illegible]वच्छेदकविषयितायामुदाहरणज्ञानीयजनकतावच्छेदकविषयिताभेदस्यविवक्षणीयतयाहेतूदाहरणसमुदायज्ञानेनिरुक्तसंबंधेनहेत्वर्थबोधीयजनकतावैशिष्ट्यसत्त्वात्तदादायतत्समुदायेऽतिव्याप्तिरितिजनकतानिवेशस्तथात्वनादृशज्ञानेउदाहरणज्ञानीयजनकताभिन्नतादृशहेत्वर्थबोधीयजनकतासत्त्वान्नतत्रातिव्याप्तिरितितत्त्वं॥यत्तुस्वस्वधर्मितावच्छेदकत्ववारणायप्रतिज्ञादिज्ञानेनत्वादिप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतायाःस्वीकारात्त्वानवच्छेदकतादृशविषयिताशून्यत्वस्यप्रतिज्ञादिज्ञानेसत्त्वादसंभवइतिजनकतानिवेशस्त्यक्त्वावच्छिन्नत्वसंबंधेननादृशविषयितावैशिष्ट्यस्यजनकतायामसत्त्वान्नदोषइतितन्न॥एवंसतियदिवेत्यग्रिमग्रंथासंगतिरुदासीनविषयितायाःस्वानवच्छेदकत्वेपिजनकतायांतदवच्छिन्नत्वाभावादेवाव्याप्त्यनवकाशात्॥अव्याप्तिरितिं॥अव्याप्तिरित्यर्थः॥स्वानवच्छेदकविषयितायांस्वशून्यवृत्तित्वविशेषणंगतिरितिकेचित्॥चिंतनीयइति॥स्वाश्रयवृत्तित्वस्वानाश्रयवृत्तित्वोभयसंबंधेनयत्किंचित्प्रतिज्ञात्वादिविशिष्टान्यत्वंदेयमितिभावः॥यत्तुतादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वंदेयमितिभाववर्णनं॥तदसत्॥धू

मादृशेतरावह्निमानितिप्रतिज्ञा[illegible]तादृशधूमादितिभागदृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकतयातदसंग्रहवार[illegible]घटितस्यतस्यविलक्षणा[illegible]त्वात्॥तद्घटकप्रत्येकवाक्येनिव्याप्तिरिति॥ननूदाहरणजन्यबोधेएकजन्यतायाअसत्वेनोदाहरणविषय[illegible]च्छेदकविषयितावि शिष्टतथाविधजनकताशून्यत्वासत्वादुदाहरणाव्याप्तिःकिमर्थमुपेक्षितेतिचेन्न॥स्वानवच्छेदकत्व[illegible]निरूपितजन्यतानिष्ठंयदन्यतमत्वघटकभेदप्रतियोगितावच्छेदकंतद्विशिष्टनिरूपितजनकतानवच्छेदकेत्यर्थः॥उदाहरणजन्यबोधनिष्ठजन्यताद्वयस्यान्यतमत्वेनैवान्यतमत्वशरीरेनिवेशाज्जन्यतानिष्ठान्यतमत्वमेवतादृश[illegible]तियोगितावच्छेदकंतद्विशिष्टनिरूपितस्वामिबोदाहरणविषयकज्ञाननि[illegible]रमपि॥एवंबोदाहरणविषय[illegible]ज्ञानंनेकजनकतासत्वेपितज्ञानंनस्वनिरूपितजन्यतानिष्ठंयदन्यतमत्वघटकभेदप्रतियोगितावच्छेदकंतद्विशिष्टनिरूपितजनकतानवच्छेदकविषयताश्रयः किंतुसमूहालंबनमवयवांतरविषयकमेवेत्युदाहरणमात्रविषयकज्ञानेनादृशविषयतानाश्रयत्वसत्वादुदाहरणेलक्षणसंगतिरित्याशयेनातिव्याप्तिमात्राभिधानात्॥यत्किंचिद्धर्मविशिष्टेशुद्धसाध्यतावच्छेदकविशिष्टेत्यादि॥अथशुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिशाब्दत्वावच्छिन्नजन्यतानिवेशे

नेवोपनयवारणसंभवाद्य किंचिद्धर्मविशिष्टेति व्यर्थं॥ **नन्व**साध्यतावच्छेदकनिष्ठनिरवच्छिन्नावच्छेदकताकत्वमेवावगाहित्वांतेनविवक्षि
तमुपनयजन्यबोधेव्यापकतावच्छेदकत्वेनैवसाध्यतावच्छेदकभानान्नतस्यतथात्वमितिवाच्यं॥एवंसतिनिगमनातिव्याप्तेस्तज्जन्यबो
धेसाध्यत्वधर्मितावच्छेदकतयास्वरूपतएवसाध्यतावच्छेदकभानात्॥ **यत्तु**साध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रकारताकत्वंस्वनिरू
पितप्रकारतानिरूपितत्वभिन्नत्वोभयसंबंधेनावच्छेदकताविशिष्टसाध्यतावच्छेदकनिष्ठावच्छेदकताकत्वमेवावगाहित्वांतार्थऽप
नयजन्यबोधेव्यापकतावच्छेदकत्वेनैवसाध्यतावच्छेदकभानान्नावगाहित्वांतविशेषणेनतद्व्याहृत्तिरितियत्किंचिद्धर्मविशिष्टेतिसार्थ
कमितितन्न॥तथासत्युदाहरणजन्यबोधेयादृशव्याप्तिभानंतादृशव्याप्तिविशिष्टेपक्षधर्मत्वाकांक्षयोपनयप्रयोगइतिनियमानुरोधेनोदा
हरणजन्यबोधेपिव्यापकतावच्छेदकत्वेनैवसाध्यतावच्छेदकभानस्योपगंतव्यतयातस्यनिरुक्तसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगा
हित्वाक्षतेरुक्तलक्षणादाहरणातिव्याप्तेः प्राचीनमताभिप्रायकत्वकथनासंगतेः॥ एतेनोपनयजन्यबोधेसाध्यतद्व्याहृत्तिस्वरूपव्याप्तिरेवभा
सतइतिनियमोयत्किंचिद्धर्मविशिष्टातिविशेषणमितिसमाधानमयश्रद्धेयं॥ **यद्यपि**साध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रकारताकत्व

नवावगाहित्वांतार्थउपनयजन्यबोधेहेतुमन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वंसाध्यांशेभासतएवंचकचिदुपनयजन्यबोधस्य
वगाहित्वांतविशेषणेनवारणेप्यभावमात्रस्यसाध्यतावच्छेदकतास्थलीयोपनयजन्यबोधीयसाध्यनिष्ठप्रकारतायाअभावरूपसाध्यतावच्छेदकेतरानवच्छिन्नत्वाक्षतेस्तद्वारणायचकिंचिद्धर्मविशिष्टेतिविशेषणमितिनदोषः॥ज्ञानविषयवान्धूमादित्यादिस्थलीयनिगमनजन्यबोधीयसाध्यप्रकारतायाज्ञानविषयत्वरूपसाध्यतावच्छेदकेतरधर्मानवच्छिन्नत्वात्तद्वारणानुरोधेनानवच्छिन्नांतेनसाध्यतावच्छेदकतापर्याप्तावच्छेदकधर्मावच्छिन्नापर्याप्तिकाद्यच्छेदकताकत्वस्यैवविवक्षणीयतयाऽभावसाध्यतावच्छेदककस्थलीयोपनयजन्यबोधीयप्रकारतायान्नातिप्रसक्तत्वाभावादेवतद्व्यावर्त्तेर्यकिंचिद्धर्मविशिष्टत्वस्यवैयर्थ्यतादवस्थ्यात्॥अत्रेदंसमाधानं॥व्यापकसामानाधिकरण्यसाध्यसामानाधिकरण्यावच्छेदकरूपनानाविधव्याप्तीनामनुमित्युपयोगित्वमितिमताभिप्रायकोयंग्रंथस्तथाचोपनयजन्यबोधप्रथमव्याप्तिविशिष्टहेतुभानेतस्यशुद्धसाध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावेनवारणेपिद्वितीयव्याप्तिभानेनतद्वारणमितियदुकिंचिद्धर्मविशिष्टेतिविशेषणंसार्थकं॥ननुतर्ह्युत्तरत्वप्राचीनमताभिप्रायकत्वकथनासंगतिःशंक्या॥नवीनमतेसवह्निमानितिभागेनधू- २७५

भव्यापकवह्निलाक्षणिकवह्निपदघटितनव्यापकताबोधितसाध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकरूपव्याप्तिबोधासंभवात्प्राचीनमतेदृदाहरणेनव्याप्तिरप्रतिपादनेपिव्याप्यवृत्त्यसाधिकरण्यस्यैवसाध्य सामानाधिकरण्यावच्छेदकहेतुतावच्छेदकरूपव्याप्तेर्मनसेवसुग्रहत्वात्॥ **कश्चित्तु**॥ यत्किंचिद्धर्मावच्छिन्नविशेष्यकत्वावच्छिन्नतंप्रकारितायांशुद्धत्वंवासाध्यतावच्छेदकेनिवेश्यमितिपरिष्कारहृदयग्रंथतात्पर्यं॥ एवंचाननुषंगपक्षेयत्किंचिद्धर्मविशिष्टत्वनेनोपनयनिगमनयोर्वारणंसुघटमित्युदाहरणानुधावनंस्पष्टमेव॥ अननुषंगपक्षेतुनेननिगमनवारणसंभवइतिशुद्धत्वंसाध्यतावच्छेदकेनिवेश्यकल्पांतरमुक्तं॥ उक्तरीत्यैवोपनयनिगमनयोर्वारणेप्युदाहरणस्यापिव्यापकत्वबोधकतयाशुद्धसाध्यतावच्छेदकविशिष्टाबोधकत्वेननतत्रव्याप्तिकथनसंगतिरीत्यालोच्यप्राचीनमतमनुसृतमितिवदंति॥ **जनकत्वस्येति**॥ तादृशवर्णवृत्तिसमुदायत्वमर्थः॥ नतुतादृशवर्णत्वसमनियतसमुदायत्वंप्रतिज्ञाहेतुसमुदायस्यप्रतिज्ञैकदेशस्यचावयवत्वविशेषणेनैववारणात्॥ **यत्किंचिदिति**प्रत्येकंप्रतिज्ञाव्यक्तिरूपं॥ **अथ** प्रतिज्ञाहेतूभयविषयकसमूहालंबनस्यापितादृशशाब्दबोधजनकतयाहेत्ववयववृत्तिसमुदायत्वस्यापितादृशज्ञानविषयवर्णवृत्तित्वाद्विषयितायांतादृशशाब्दबोधजनकताव

च्छेदकत्वविशेषणमावश्यकमितिजनकतावच्छेदकविषयितानिरूपकत्वसतिसमुदायत्वमितिविवक्षयैवोदाहरणवारणाद्व्यर्थःपक्षतावच्छेदकनिवेशइतिचेन्नसार्थक्यायहेत्ववयववारणायविषयितायामनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यैवविवक्षणीयत्वाद्यथासन्निवेशनैवव्यर्थ्याभावाद्॥एकदेशवारणायतादृशवर्णत्वसमव्याप्तसमुदायत्वमेवनिवेश्यतेनैवसमूहालंबनज्ञानविषयहेत्ववयववारणामितिप्रतिज्ञाद्यघटकत्वंनदृश्यमेवेत्याशयेनाह॥एवमिति॥अथोभयघटकभागद्वयाघटितत्वमपिननिवेशनीयंसमानानुपूर्वीकप्रतिज्ञाद्वयेऽतिप्रसंगवारणायतादृशशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किंचिज्ज्ञानीयविषयतात्रयवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वविशेषणस्यावश्यकतयातेनैवप्रतिज्ञाहेतुसमुदायवारणात्॥एतेनपूर्वकल्पोपिनसाधुरुक्तरीत्योदाहरणेऽतिप्रसंगाभावात्॥मैवं॥उभयघटकभागद्वयाघटितत्वेनैवसमानानुपूर्वीकप्रतिज्ञाद्वयवारणान्नोक्तविशेषणावश्यकता॥एतेनवह्निमद्द्रव्यसमानकालिनपर्वतोवह्निमानितिप्रतिज्ञासंग्रहायन्यायावयवत्वरूपतादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वस्यैवविवक्षणीयतयापूर्वकल्पःसाधुरितिकेषांचिद्दुष्करनादरणीयैव॥नचतादृशप्रतिज्ञाद्वयेप्रतिज्ञाहेतूभयघटकभागद्वयाघटितत्वसत्त्वात्कथंतेनतद्वारण

मितिवाच्यं॥हेत्वादिपदस्यप्रतिज्ञात्वनाश्रयपरत्वात्॥नचप्रतिज्ञायांप्रतिज्ञात्वानाश्रयत्वाभावेननतथापितद्वारणमितिसांप्रतं॥स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्योभयसंबंधेनतादृशयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वविशिष्टान्यत्वस्यैवतादृशविशेषणेनविवक्षितत्वात्॥भट्टाचार्योक्तरीत्याप्रतिज्ञाद्वयसमुदायस्यलक्ष्यतायाअपिवक्तुंशक्यत्वाच्च॥नतुप्रतिज्ञाद्वयघटितत्वमिति॥अत्रकेचित्॥तदनिवेशेसाधवःपूज्यःसदाशिवोवंद्यइत्यादिप्रतिज्ञासमानार्थबोधकतदेकदेशेसाधवःपूज्यःशिवोवंद्यइत्यादिभागेऽतिव्याप्तिरतस्तन्निवेशआवश्यकइतिपूर्वपक्षयंति॥तदसत्॥निस्तात्पर्यकभुकाद्युच्चरितवाक्यवारणायतात्पर्यस्यनिवेश्यत्वादुक्तस्थलेविशिष्टएवतात्पर्यादेकदेशवारणात्॥तात्पर्यनिवेशप्रकारश्चाग्रेविवेचयिष्यते॥तथापिसकलप्रतिज्ञैकदेशस्यनतथात्वमिति॥नन्विदमयुक्तंव्यतिरेक्युदाहरणेनसाध्यस्याप्रतिपादनात्सकलोदाहरणेष्वपिव्याप्त्यसंभवादितिचेन्न॥यद्यत्सक्षकयद्यत्साध्यकयावंतोन्यायाःसंभवंतितावदुदाहरणेष्वतिप्रसंगाभावेपितादृशप्रसिद्धोदाहरणेषुसर्वत्रव्याप्तिसंभवात्॥यादृशपक्षसाध्यकेऽन्वयुदाहरणघटितोन्यायोनास्त्येवतत्रप्रमाणोपलंभशालिभिरिदमनादरणीयमेव॥इतिमृत्तकारीयप्रतिज्ञालक्षणं॥ ॥अन्यसाध्यकेति॥वह्निव्याप्यधूमसाध्यकेत्यर्थः॥उद्देश्यतयेति॥उद्देश्यत्वमिच्छाविष

यत्वं॥प्रतिज्ञाव्यवहारविषयतेति॥पक्षसाध्यविशेषानियंत्रितप्रतिज्ञाव्यवहारविषयतेत्यर्थः॥स्वयंप्रतिज्ञासामान्यलक्षणाभिप्रायेणदी धितिर्लापितायेतुप्रतिज्ञाविशेषलक्षणाभिप्रायकतयालापयंतितन्मतमनूद्यदूषयतियत्तित्यादिना॥एकधर्मावच्छिन्नपक्षकत्वस्याद्य निंबकुंभूमिकामारचयति॥एतदिति॥मणिकृतोयथंपदानुषंगपक्षेस्वरसोत्तीरभिप्रायकमित्थंचेतिदीधितिग्रंथमवतारयति॥नियमनं चेति॥लक्षणाद्रइति॥लक्षणारव्यवृत्तेरादरइत्यर्थः॥एकेनेत्यादिना॥समानानुपूर्वीकपदेनैवेत्यर्थस्तेनेतरेभ्योभिद्यतइत्यादोपद इवेनसाध्यस्यप्रतिपादनेपिनक्षतिः॥सर्वस्मादिति॥हेतुजन्यबोधस्यानतिरिक्तविषयकत्वसंपादनायपक्षकोटोसर्वस्मादिति॥एवमग्रेपिपक्ष कोटोपंचम्यंतपदप्रयोजनंबोध्यं॥प्रमेयवृत्तिहेतुत्वमिति॥प्रमेयादित्यत्रज्ञापकत्वंपंचम्यर्थस्तस्यविशेष्यत्वेनान्वयादनुमितिकरणं हेतुरर्थइत्यतिव्याप्तिर्हेत्ववयवइतिज्ञेयं॥तात्पर्यभ्रमणेति॥नन्वुपदंयत्सदार्थजलादिविशेषितस्वार्थंबोधयतितात्पर्यभ्रमेणेत्यर्थः॥यदि तिं॥यद्॥जलादिकं॥इतरेति॥इतरविशेषणेत्यर्थः॥इतरविशेषणेत्वयेति॥धावत्यर्थेतरविशेषणतावच्छेदकतयेत्यर्थस्तेनपश्यमृगोधा वतीत्यादौवाक्यार्थस्यप्रथमांतार्थविशेष्यकत्वायधावनकर्तृत्वविशिष्टमृगादेःकर्मतासंबंधेनदर्शनान्वयस्यान्यत्रोक्तावपिनक्षतिः॥अनके-

त्रिरिति॥ अन्यूनविषयकत्वमिति॥ नन्वेतादृशान्यूनविषयकत्वोक्तौ प्रमेयनिष्ठहेतुत्वबोधकं प्रमेयादित्यत्र [illegible]तिव्याप्तिः पूर्ववन्निहवेवेति कथं पुनस्तादृशान्यूनविषयकत्वोक्तिः संगच्छत इति चेन्न॥ नवीनमतेज्ञाप्यत्वस्यैवपंचम्यर्थत्वात्तन्मतेप्रमेयादिति हेतुबोधकपदस्यनिष्ठहेतुत्वबोधाभावान्नतत्रातिव्याप्तिरितितन्मतावलंबनेनतदुक्तिसंगतेः॥ नचतन्मतेपिप्रमेयत्वं प्रमेयादित्यत्रहेतुत्वयवेऽतिव्याप्तिः शंक्या॥ नामार्थधात्वर्थयोरभेदातिरिक्तसंबंधेनसाक्षादन्वयाभावात्प्रमेयपदस्यप्रमेयविषयकलाक्षणिकतयातदर्थस्यधात्वर्थेऽभेदान्वयावश्यकत्वेनयादृशधर्मावच्छिन्नः प्रतिज्ञाबोध्यस्तादृशधर्मावच्छिन्नविषयकबोधजनकत्वस्यतादृशहेतुवाक्येऽसंभवात्॥ विषयत्वं प्रमेयं प्रमेयादितिहेतुवाक्यस्यातिरिक्तविषयकबोधजनकतयैववारणमितिध्येयं॥ अथवेति॥ अतएवेत्यादि॥ घटशब्दइत्यारभ्य [illegible]र्थत्वनिरूपणांतो मिश्रग्रंथः॥ घटशब्दोगुणइति॥ अवघटोगुणइत्येवप्रतिज्ञाघटइत्यस्यघकारोत्तराकारात्तरटत्वरूपानुपूर्व्यवच्छिन्नशब्दस्वरूपेनिरूढलक्षणातत्तात्पर्यग्राहकंशब्दपदं॥ प्रतिज्ञारूपशब्दएवेति॥ प्रतिज्ञासमानानुपूर्वीकघटोगुणइतिशब्दएवेत्यर्थस्तेनप्रतिज्ञाशब्दस्योदाहरणघटकत्वाभावेपिनक्षतिः॥ तन्नेति॥ तादृशोदाहरणस्थघटशब्दइत्यर्थः॥ विषयविधयेति॥ घोत्तरटोगुणइतिप्रतिज्ञाघटपदानुमि

निसमानविषयकत्वसंभवेनघटशब्दस्यविषयविधयातज्ज्ञानकत्वादित्यर्थः॥ अथप्रतिज्ञाघटकयद्यशब्देतिव्याप्तिःकुतोनाभिहितातस्या
पिगुणत्वेनस्वविषयकप्रत्यक्षजनकत्वादितिचेदत्रकेचित्॥ प्रतिज्ञाघटकगुणत्वस्यगुणत्वरूपविशेषणोपस्थित्यभावाद्गुणत्वेनप्रतिज्ञाघटकश
ब्दप्रत्यक्षासंभवात्प्रतिज्ञोपस्थितगुणत्वेनोदाहरणघटकतादृशशब्दप्रत्यक्षसंभवात्॥ प्रतिज्ञापूर्वकोगुणइतिजिज्ञासायाःसार्वत्रिकत्वाभाव
चेत्याकुः॥ पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वावच्छेदेनेति॥ अन्यूनविषयकःसन्ननतिरिक्तविषयकइत्युद्देश्यविधेयभावमहिम्ना
ऽवच्छेद्यावच्छेदकभावलाभइतिकेचित्॥ नन्वेवंदर्शितसाध्यतावच्छेदकसंबंधनिवेशफलंनसंभवतीत्यतआह॥ साध्यतावच्छेदकसं
बंधेति॥ जल्पेति॥ विजिगीषुकथारूपेत्यर्थः॥ वादेति॥ तत्त्वबुभुत्सोःकथारूपेत्यर्थः॥ अवयवत्वपर्याप्यवच्छेदकेति॥ अथैवंसत्यन्यून
विषयकत्वदलंवैयर्थ्यंधूमादालोकवान्पर्वतोवह्निमान्धूमादित्यादौहेतुवाक्यज्ञानीयजनकतायाअवयवत्वपर्याप्यावच्छेदकयत्किंचिद्धर्म्यव्याप्त
विषयताकान्यतादृशप्रतिज्ञाघटकधूमादितिभागज्ञानत्वेननक्षिन्नत्वाभावात्तादृशहेतुवाक्येतिव्याप्यभावादितिचेन्न॥ वह्निर्वह्निसामग्रीज्ञान्य
र्वतोऽभिधेयत्ववान्दहनादित्यादिन्यायांतर्गतहेतुवाक्येतिव्याप्तेस्तदलंसार्थक्यात्॥ तत्रप्रतिज्ञाघटकवह्निरितिभागज्ञानस्यतादृशविषयताका-

न्यत्वेपिनन्निष्ठवह्निरित्यानुपूर्वीज्ञानत्वावच्छिन्नजनकतानोदहनादित्यानुपूर्वीज्ञानत्वावच्छिन्नजनकतायादहनादिनिहेतुवाक्यज्ञाननिष्ठायाभिन्नत्वात्कारणतावच्छेदकभेदेनकारणतायाभेदस्यावश्यकत्वात्॥ **नन्वन्यायानंतर्गतदहनादिनिवाक्येयपक्षान्वितसाध्यान्वयबोधनक्षमार्थेपस्थितिजनकहेतुविभक्तिमच्छब्दत्वरूपहेतुत्वानावेननादृशवाक्यज्ञानस्यनादृशविषयनाकान्यतयातद्दनिजनकताभिन्नत्वस्यन्यायांतर्गतदहनादिनिवाक्यज्ञाननिष्ठजनकतायामप्यत्वेननतत्रान्याप्तिव्याप्तिरितिवाच्यं॥** हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयितावहिर्भूतविषयितान्यबोधजनकतावच्छेदकविषयतानिरूपकवर्णसमुदायत्वरूपहेतुत्वघटितावयवत्वपर्याप्यवच्छेदकेत्यादिविवक्षयातत्रातिव्याप्तेःसुकरत्वात्॥ **नन्वेवंसतिवह्निर्वह्निसामग्रीनान्यर्वनाऽभिधेयत्ववान्दहनादित्यादावन्यूनविषयकत्वदानेप्यन्यूनानतिरिक्तविषयकप्रतिज्ञार्थहेत्वर्थविषयकसमूहालंबनज्ञानीयतादृशजनकतावच्छेदकविषयताश्रयवर्णसमुदायत्वमादायहेतुवाक्येऽतिप्रसंगोदुर्वारः॥ नच मुख्यविशेष्यताश्रयशून्यत्वेनबोधाविशेषणीयःसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताभिन्नमुख्यविशेष्यताशून्यत्वरूपमन्यूनविषयकत्वंवाविवक्षणीयमितिनसमूहालंबनमादायातिव्याप्तिरितिवाच्यं॥** तथासत्यसंभवापत्तेःसर्वत्रप्रतिज्ञाजन्यबोधेसाध्यत्वरूपत। नेरूपितप-

क्षनावच्छेदकावच्छिन्नविशेष्यतायास्तदन्यपक्षतावच्छेदकनिष्ठप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतायाश्चसत्वात्॥ यद्विच्चतादृशविशेष्यत ग॰अव॰
योरभेदस्वीकारान्नासंभव इत्युच्यतेनन्वपिपक्षान्वितसाध्यान्वयबोधनक्षमेत्यादिहेतुत्वघटितावयवत्वपर्याप्यवच्छेदकेनिविवक्षयैवदर्शितहेतु
वारणेऽन्यूनविषयकत्वसार्थक्यायहेतुतावच्छेदकविशिष्टहेतुविशिष्टेत्यादिहेतुत्वघटितावयवत्वपर्याप्यवच्छेदकेनिविवक्षणंयक्षालनाद्दीनिन्या
यग्रन्थदीधितिकारीयधूमादालोकवान्यर्वतोवह्निमान्धूमादित्यादौहेतुवाक्येऽन्यूनविषयकत्वव्याप्तिज्ञानासंगतिरित्येतदाह॥ केचित्विति॥ यत्तन्नि॥ रमाधवःपूज्यःसशिवोवंद्यइत्यादाविति॥ एकदेशेति॥ माधवःपूज्यःशिवोवंद्यइत्यादिभागेत्यर्थः॥ कथंचिदिति॥ अनवधानतयेत्यर्थः॥ अप्रकृतार्थेति॥ नानार्थकहर्यादिपदघटितेत्यर्थः॥ वास्तवतथाविधतात्पर्यसत्तायाइति॥ तत्तदर्थबोधकत्वप्रक
रकस्यानुकूलकृतिसमानाधिकरणेच्छाविशेष्यतायाइत्यर्थः॥ इदंवाक्यमुमुत्सर्थबोधयत्तिनिवकुरिच्छयैवबाक्यप्रयोगाद्वाक्यतादृशतात्पर्यसत्ता
निर्वाहः॥ अत्रेदंचिंत्यं॥ तिरुक्ततात्पर्यसमानाधिकरणसमुदायत्वविवक्षयैवाप्रकृतार्थपरवाक्यद्वारणेतादृशसमुदायत्वेनतात्पर्यघटकत्वनिवे
शप्रयोजनाभावेनसनिवेशेकदेशसमुदायत्वस्यतात्पर्यसमानाधिकरणत्वात्तद्वारणमशक्यमेव॥ अनुयत्वपर्वतोवह्निमानित्यादौवह्निमत्वदेवह्नि २७९

विशिष्टपर्वतंबोधयतितात्पर्यतात्पर्यभ्रमेणपर्वतोवह्निमानितिवाक्याच्चादृशबोधस्यत्वतादृशवाक्येऽतिव्याप्तिरतस्तादृशसमुदायत्वेनतात्पर्यंव्याप्यत्व
विवक्षणावश्यकंतथाप्रतियोगिकदेशसमुदायत्वस्यतादृशत्वाभावात्तद्वारणमितितन्न॥आनुपूर्व्यवच्छिन्नतादृशो ह्यविशेष्यत्वरूपतात्पर्यस्यानुपूर्व्यवि
येकवर्णेष्वविश्रांतेः प्रतियोगिसमुदायत्वस्यतद्व्याप्यत्वाभावादसंभवापत्तेः॥ यदिच्चविनिगमनाविरहात्सर्ववर्णेष्वेवतात्पर्यमविशिष्टमितिनासंभव-
इत्युच्यतेतदाप्यत्रपर्वतपदोत्तरंत्वंतवह्निनत्वंवह्निविशिष्टपर्वतरूपार्थबोधयतितितात्पर्येणैवतादृशत्वयोगस्यत्वतादृशप्रतियोगिताया असंग्र
हादुर्वारएव॥ अथतादृशच्छाविशेष्यत्वतदवच्छेदकान्यतरावच्छिन्नव्याप्यत्वस्यसमुदायत्वेविवक्षणान्नोक्तदोषः॥ यद्विशेष्यतावच्छेदक
तानवाम्त्यत्रतिकिंतुविशेष्यद्वितीयविशेषणतत्तद्विशेष्यतावच्छेदकतावयद्वितीयविशेषणंतत्रतदवच्छेदकतावच्छेदकतेतिमतेनोक्तविवक्षणेन॥ तेषांसंग्रह इतिमन्यतेराद्धांता द-
शेच्छाविशेष्यतायादृशधर्मावच्छिन्नतादृशधर्मप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकयत्किंचिदितीयविशेषणतावच्छेदकत्वमेवसमुदा
यत्वेविवक्षणीयमितिनकोपिदोषइतिचेन्न॥एवंसतिमूलोपाचानुमित्यन्यूनानतिरिक्तविषयकत्वविशेषणविशिष्टार्थबोधत्वेनतात्पर्यग्राहकसमुदाय-
त्वस्यैकत्वेहेतुभमुदायत्वस्यचान्यूनानतिरिक्तविषयकबोधपरत्वाव्याप्यत्वादेवतत्रातिप्रसंगाभावात॥ नच्चतात्पर्यशरीरंशब्दबोधमात्रंनिर्वि

नानीतिनिनद्दैव्यर्थमिति शंक्यं॥ वह्निमत्पर्वतपक्षत्वानावच्छिन्नवह्निमत्तदस्यलक्षणयापाषाणादिबोधनात्सर्यवतिपर्वतोवह्निमानितिवाक्येऽति ग० अव
व्याप्तेर्दुर्वारत्वात्॥ अन्यूनानतिरिक्तविषयकबोधघटितनात्सर्यनिवेशेनैवोपपत्तौ बोधेतादृशविशेषणस्यष्टथकृतात्सर्यनिवेशस्यचानुपयुक्तत्व
वेति॥ इदमत्रतत्त्व॥ निरुक्तरूपतात्पर्यविशेष्यतातदवच्छेदकत्वान्यतरवद्वर्णत्वममनेन्यत्वस्यतादृशविशेष्यतायातादृशधर्मावच्छिन्ना
तादृशधर्मप्रकारकनिश्चयसमानविषयकारणतावच्छेदकयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वममनेन्यत्वस्यवाशाब्दबोधजनकतावच्छे
दकयत्किंचिज्ज्ञानीयविषयतानिरूपितवर्णनिवेशोऽवश्यकोऽन्यथाघटवद्भूतलंपर्वतोवह्निमानितिविशिष्टवाक्यंपर्वतिवह्निबोधंजनयत्विति-
तात्पर्यवतायुक्तंपर्वतोवह्निमानितिवाक्यंतत्तुल्यंवतात्पर्यविपर्यस्यतोनिरुक्तशाब्दबोधजनकेपर्वतोवह्निमानितिवाक्य॥ एवंवह्निमत्तदंवह्निम-
त्पर्वतंबोधयत्विनितात्पर्यवतायुक्तंपर्वतोवह्निमानितिवाक्येतात्पर्यविपर्यस्यतोनिरुक्तशाब्दबोधजनकपर्वतोवह्निमानितिवाक्येऽतिप्रसं
गोदुर्वारइत्यंचनत्रशाब्दबोधेऽनुभिनुमानांतरिकविषयकत्वमावश्यकमन्यथाहेतुवाक्यंप्रतिज्ञार्थबोधयतुप्रतिज्ञाहेतुसमुदायेतादृशा
र्थबोधयत्वितिचपुरुषदोषधीनात्सर्यमादायकेवलहेतुवाक्येप्रतिज्ञाहेतुसमुदायेचातिप्रसंगात्तदवस्थएवेति॥ यत्तुचित्रयुःसुंदरइत्यादौ २८०

चित्रादिपदस्यतात्पर्यग्राहकत्वेनविशिष्टतात्पर्यसत्तायाअभावाद्व्याप्तिरिति॥ तन्न॥ द्विविधंतात्पर्यपदार्थतात्पर्यं-ति॥तत्राद्यस्य
चित्रादिपदैःसत्वेविद्वन्निष्ठंयत्तद्दृष्टितत्समुदायेऽस्तंचित्रगुपदमसमर्थंबोधयतितात्पर्येणतात्पर्यग्राहकत्वेनविशेषणीयात्॥ इच्छाचविसंवादिभिन्नत्वेनविशेषणीयातेनेदानींमेवशाब्दबोधजनकमिदंवाक्यंभवतितीच्छयाप्रयुक्तेतत्कालीनशाब्दबोधाजनकेऽतिव्याप्तिमानितिवाक्येनातिप्रसंगः॥ यदि पुनस्तादृशेच्छायाअंशांतरेविसंवादिताकचित्संभावितेतिकचित्पतिहन्तव्या॥ इतिमन्यतेतदातद्विशेषणंपरित्यज्यतादृशेच्छाविशेष्यते स्वेरेच्छावृत्तित्वेनविशेषणीयासमानाकारकेच्छासुविषयतायाभेदस्याप्रामाणिकत्वात्संवाद्यंशनिरूपितविषयतामात्रस्येश्वरेच्छावृत्तित्वमक्षतमित्यलंबहुनातिसुधियोविदांकुर्वंतु॥ सर्वेभ्यइति॥ पूर्वोपस्थितपुरुषकर्तृकपुरुषकर्मकोद्देश्यत्वेत्यर्थः॥ कर्तव्यतेतिशेषः॥ अत्रतावत्फलानांवाक्यभेदपरिहारार्थंसर्वत्रैवोपस्थितिमात्रंफलतानुप्रतिसंधिकरूपेणेतिबाध्यं॥ तद्धर्म्यव्यापकेति॥ तद्धर्मव्यापकंविधेरुद्देश्यंयत्तदिति॥ इतियोजना॥ घटत्वव्यापकसर्वघटवृत्तिसर्वत्वावच्छिन्नतात्पर्यकमेवोघटःसुंदरइतिप्रयोगवारणायविधेयव्यापेति॥ तथाचतादृशसर्वत्वस्यसौंदर्यव्याप्यत्वाभावान्नतादृशप्रयोगः॥ सुंदरघटवृत्तिसर्वत्वावच्छिन्नतात्पर्यकतादृशप्रयोगवारणायतद्धर्मव्यापकेति॥ यद्यपिसमूहालंबनेति॥ पर्वतोवह्नि

मान्सर्वमभिधेयं प्रमेयमितिसमूहालंबनेत्यर्थः॥ वाक्यांतरसहितेति॥सर्वमभिधेयं प्रमेयामितिवाक्यसहितेत्यर्थः॥ नतन्मात्र इति॥तथाच नप्रतिज्ञासंग्रहइतिभावः॥ अथेदमसंगतंवाक्यांतरसहितप्रतिज्ञाजन्यसमूहालंबनबोधनिष्ठसाध्यविशिष्टपक्षविषयकत्वावच्छिन्नजन्यतानि रूपितजनकतावच्छेदकप्रतिज्ञामात्रविषयकयत्किंचिदेकज्ञानीयविषयताश्रयवर्णसमुदायत्वस्यप्रतिज्ञामात्रेसत्वात्॥ मेवंतादृशबोधनि ष्ठवह्निसंबंधिविषयकत्वावच्छिन्नजन्यतामादायैकदेशेऽतिव्याप्तिवारणायतादृशबोधनिष्ठायायाजन्यतेतिविवक्षणावश्यकतयाप्रतिज्ञासंग्र हादुःशकएव॥ नंचैकदेशस्यन्यायावयवत्वदलेनैववारणंशंक्यं॥ प्रतिज्ञाद्यघटितत्वाघटितस्यैवतस्यनिवेशइत्यभिप्रायात्॥ तथापिप्रकृतप क्षेति॥ अथधूमालोकादिपरामर्शानांपरस्परंव्यभिचारेणकारणत्वानुपपत्त्याऽव्यवहितोत्तरत्वसंबंधेनतत्तत्परामर्शविशिष्टानुमितित्वस्यैवज न्यतावच्छेदकतयाव्याप्तिविषयतासाधारणताद्दशजन्यतावच्छेदकविषयतात्वेननयद्विषयतासननैक्यत्वसंभवः व्याप्त्यादिविषयकप्रतिज्ञार्थसमू हालंबनधीत्वविषयतायाःसमनैक्यत्वसंभवेप्येकदेशवारणायविवक्षितत्वनिष्ठयावज्जन्यताघटितसमुदायत्वस्यप्रतिज्ञामात्रेऽसत्वात्तद्ग्रंथइत्येवेति चेदत्रकेचित्॥ अव्यवहितोत्तरत्वसंबंधावच्छिन्नायातादृशपरामर्शत्वजन्यतावच्छेदकतातदवच्छेदकतान्यतादृशपरामर्शजन्यतावच्छेद-

कविषयतालेनयद्विषयतासमनेय्यत्वंतत्वमितिविवक्षणान्नदोषइत्याहुः॥ अन्येतुजन्येयद्विशेषणंतद्देवजन्यतावच्छेदकंतद्विशेषणंतुतद्वच्छेदकतावच्छेदकमेवेत्यनुमितिविषयतानामेवविनिगमनाविरहेणसर्वासांजन्यतावच्छेदकत्वंनव्याप्तिविषयतायाइत्याहुः॥ तदुभयमप्ययुक्तं॥ तत्तत्परामर्शाव्यवहितोत्तरत्वस्यजन्यतावच्छेदकेनिवेशेऽनुमितिविषयतानांजन्यतावच्छेदककोटावनिवेशप्रसंगेनासंभवस्यतावतानुद्धारात्॥ वस्तुतस्तु॥ धूमत्वालोकत्वादिहेतुतावच्छेदकमनिवेश्यव्याप्यवत्तापरामर्शस्यस्वावच्छिन्नव्यापकतावच्छेदकवत्तावच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नायास्वावच्छिन्नप्रकारतातन्निरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेनकिंचिद्धर्मावच्छिन्नंप्रतियोगितासंबंधेनहेतुतावच्छिन्नव्यापकतावच्छेदकवत्तावच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नेत्यस्यस्वनिष्ठावच्छेदकतानिरूपकंयद्धेतुनिष्ठमवच्छेदकत्वंतन्निरूपकंयदधिकरणनिष्ठमवच्छेदकत्वंतन्निरूपकंयदाधेयत्वनिष्ठमवच्छेदकत्वंतन्निरूपकंयदभावनिष्ठमवच्छेदकत्वंतन्निरूपकंयदभावप्रतियोगितानिष्ठमवच्छेदकत्वंतन्निरूपकंयदवच्छेदकतानिष्ठमवच्छेदकत्वंतन्निरूपकंयदभावनिष्ठमवच्छेदकत्वंतन्निरूपकंयद्भिन्ननिष्ठमवच्छेदकत्वंतन्निरूपकंयदधिकरणनिष्ठमवच्छेदकत्वंतन्निरूपकंयदाधेयत्वनिष्ठमवच्छेदकत्वंतन्निरूपकेत्यर्थस्तेनवा

सवत्त्वाद्यसामानाधिकरण्यनिवेशसमानाधिकरणधूमवानयमितिज्ञानादनुमित्यापत्तिरितिदूषणानवकाशः॥स्वनिष्ठावच्छेदकतायानिरवच्छिन्न

त्वनिवेशार्थमयमित्यादिकंदुष्टंपुनरिहावधेयमित्यादिनाव्यभतवादेउक्तंतदभिप्रायेणेदमतएवन्यायरत्नेतदवच्छिन्नजनकतेत्युक्तिःसंग-

च्छते॥धूमत्वसामानाधिकरण्यादिहेतुतावच्छेदकाघटितनिश्चयत्वादिकंतत्रैवनिरुक्तंइष्टव्यंविस्तरभयान्नेहोच्यतइतिदिक्॥उक्तोपनयेऽतिव्याप्तिंनिर-

सनुंशंकते॥नचेति॥अभेदेनेति॥तथाचानुमितिविषयत्वोपनयजन्यबोधविषयत्वयोर्निरूप्यनिरूपकभावभेदेनभेदान्नोपनयजन्यबोधस्य

नाद्यविषयत्वमनियतविषयताकत्वमितिभावः॥किंचिद्धर्मावच्छिन्नांशइति॥तथाचहेतुजन्यबोधस्यप्रमेयत्वांशेनिर्धर्मितावच्छेदककत्वेन

नातिव्याप्तिरितिभावः॥घटान्यत्ववदिति॥अत्रहेतुकोटौयावतांनिवेशस्तावांपक्षकोटौनिवेशोहेतुवाक्यजन्यबोधस्यानतिरिक्तविषयकत्वसं-

पादनार्थः॥पक्षकोटौसाध्यधर्मस्यनिवेशादानेपक्षनिष्ठसाध्यनिरूपितज्ञानीयसंदेहाभावान्न्यायप्रयोगानुपपत्तिरतस्तन्निवेशः॥बाधवार-

णायस्वरूपसम्बन्धयोर्भयसंबंधघटितसामानाधिकरण्यसंबंधेनघटान्यत्वस्यसाध्यत्वंबोध्यं॥घटान्यत्ववद्रूपघटोभयतावच्छिन्नस्यहेतुत्वेघटान्य

त्वस्यैवव्यर्थ्यापत्तिरुभयतावच्छिन्नस्यसामानाधिकरण्यसंबंधेनघटत्वादावभावाद्व्यभिचाराभावान्नथाचतादृशहेतुवाक्यजन्यबोधस्यपक्षेसाध्य

वैशिष्ट्यावगाहित्वाभावेनानहेतुवाक्ये; तिव्याप्तिरतोयघटान्यत्वसमानाधिकरण्यावच्छिन्नस्यहेतुत्वं॥ तथाघटान्यत्वपरित्यागेतादृशसमानाधिकरण्येनतादृशा
न्यतरवतिघटितादोव्यभिचारइतितन्निवेशस्तदिदमाह॥ घटत्वादाविति॥ घटान्यत्वप्रवेशेसामानाधिकरण्यसंबंधेनघटान्यत्वविशिष्टंकपालरूपा
दिकमेवतत्रसामानाधिकरण्यसंबंधेनघटत्वादावभावान्नव्यभिचारः॥ ननुसामानाधिकरण्यसंबंधेनघटान्यत्वविशिष्टरूपस्यैवहेतुत्वास्त्विस्त
आह॥ धर्मिभेदेनेति॥ रूपभिन्नस्यघटस्यापिप्रवेशेनेत्यर्थः॥ विशेष्यस्य॥ रूपघटान्यतरस्य॥ घटमात्रस्यविशेष्यत्वेघटान्यत्वंव्यर्थंरूपमात्रस्य
तथात्वेपक्षविशेष्यकत्वनिवेशेनापिवारणंसंभवतीत्यतोऽन्यतरदुपात्तंतथाचव्यभिचारावारकत्वेपिवह्निमान्वह्निमदन्योन्याश्रयेतिवह्निभेदा
न्निवेश्यर्थ्यमितिभावः॥ ननुसामानाधिकरण्यसंबंधेनघटान्यत्वविशिष्टस्यैवहेतुतास्तुकिमन्यतरत्वनिवेशेनेतत आह॥ घटान्यत्वसमानाधिक
रणेति॥ विशेष्यतावच्छेदकस्य॥ अन्यतरत्वस्य॥ अत्रघटान्यत्वोपलक्षितस्यान्यतरत्वावच्छिन्नस्यैवहेतुत्वंबोध्यं॥ विलक्षणेति॥ वैलक्ष्यण्यं
॥ निरवच्छिन्नत्वं॥ तथाचतादृशविषयतानिरूपितनिरवच्छिन्नावच्छेदकताशून्यधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकविषयताशून्यत्वमर्थः॥
प्रमेयावच्छिन्नविषयतावारणायहृतीयनिरवच्छिन्नत्वनिवेशः॥ नान्यूनयद्व्याप्त्यसंगतिरिति॥ अत्रतादृशनिश्चयत्वनिष्ठस्वरूपसंबंध

रूपावच्छेदकत्वनिवेशधूमादालोकवान्पर्वतोवह्निमान्पर्वतोवह्निमानित्यादिप्रतिज्ञाजन्यबोधानांतादृशविशिष्टनिश्चयत्वनिष्ठस्वरूपसंबंधरूपाव- ग०अव
च्छेदकताकान्यायः ज्ञानज्ञाप्यत्वंधूमायंनवासंबंधोवह्निमान्नवतिसंशायस्तन्निवर्तकतावच्छेदकविषयितासून्यत्वाभावेनतादृशप्रतिज्ञानामसं
यहइतिदूषणंसंभवेः न्यूनपदत्वादलसंगतिरूपदूषणानौचित्यमितिकेचित्॥ यावद्रूपावच्छिन्नविशेषितेति॥ अत्रतादृशनिश्चयत्वे
स्वरूपसंबंधरूपानुमितिजनकतावच्छेदकत्वनिवेशवह्निसमानाधिकरणधूमकोलीनपर्वतोवह्निमानितिप्रतिज्ञायामव्याप्तिः॥साध्यसामानाधिकर
ण्यत्वावच्छिन्नविशेषितहेतुविशेषितपक्षनिश्चयत्वस्यापितादृशत्वादतोः नतिरिक्तहेतुत्वरूपनेवतन्निविष्टं॥ अन्वयव्यतिरेकीति॥ अन्वयव्याप्ति-
विषयकत्वाभावव्यतिरेकव्याप्तिविषयकत्वाभावइत्यमित्यर्थः॥ अन्वयिव्यतिरेक्युदाहरणाकांक्षाघटितेति॥ तादृशोदाहरणाकांक्षाजनकज्ञा
व्दज्ञानजनकन्यायावयवत्वरूपमित्यर्थः॥ अपरमिति॥ पक्षसत्वोविपक्षासत्वोहेतोर्वचनमित्येवंरूपमित्यर्थः॥ प्रतिज्ञायाः साध्यतावच्छेदकवि
शिष्टसाध्यबोधकत्वनियमस्यव्यभिचारमाशंकते॥ यद्यपीति॥ रक्तोदंडवानितिवाक्यादक्तत्वविशिष्टाभिन्नदंडसंबंधीतिबोधोनुमितिस्तुस
मवायेनरक्तत्वविशिष्टदंडसाध्यतावच्छेदककेतिभावः॥ तदयमिति॥ मतुपूप्रकृतिनामार्थस्यनामार्थभेदान्वयस्यप्रामाणिकत्वमभ्युपगमः॥प्रतिज्ञाजन्यबोधज २८३

नकत्वस्यप्रतिज्ञातत्वे आत्माश्रयादाह ॥ **अन्यत्वेति** ॥ एवंचेति ॥ भिद्यतेभिन्नमित्यादौप्रतिज्ञार्थबोधानांविशिष्योपादानेचेत्यर्थः ॥ अन्यतमत्वेनानुगमःसकलोभवतीतिशेषः ॥ अन्यथाप्रतिज्ञार्थत्वेनानुगततादृशार्थविषयकशाब्दबोधानिवर्त्यसंशयानिवर्तकप्रतिज्ञार्थबोधजनकत्वमित्यस्यैवसम्यक्त्वेऽन्यतमत्वनिवेशोव्यर्थएवस्यादितिभावः ॥ तेनरूपेणेति ॥ अन्यतमत्वेनेत्यर्थः ॥ कूटघटितधर्मस्येति ॥ तादृशकूटत्वसंशयप्रतिबंधकत्वसामान्याभावविशिष्टबोधनिष्ठान्यतमत्वस्येत्यर्थः ॥ लाघवेनेति ॥ यद्यपितादृशतादृशबोधान्यतमबोधानिवर्त्यत्वस्यतादृशान्यतमत्वसमानाधिकरणप्रतिबंधकतानिरूपितप्रतिबध्यत्वसामान्याभावरूपत्वेसर्वेषामेवसंशयानांस्वविरोधिसमूहालंबनात्मकतद्बोधान्यतमभावायत्तनिवर्त्यत्वेननतदभावविशिष्टसंशयाप्रसिद्धिः ॥ तादृशतादृशबोधान्यतमत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यत्वसामान्याभावरूपत्वेचतादृशप्रतिबंधकतायाअप्रसिद्धत्वेनाव्याप्तेर्जागरूकत्वेननिवर्त्यत्वांशेऽन्यतमत्वेनबोधानांनिवेशेगौरवकथनमनुचितं ॥ तथापितादृशतादृशविशिष्टार्थविषयकनिश्चयत्वव्यापकप्रतिबंधकतान्यतमप्रतिबंधकतानिरूपितप्रतिबध्यत्वसामान्याभावस्यैवतेनविवक्षणान्नाव्याप्त्यादिकं ॥ परंत्वेवंविवक्षातात्पर्यंतादृशतादृशबोधभेदकूटघटितरूपान्यतमत्वेत्याद्युक्तिर्विचारणीयेतिध्येयं ॥ **अन्यतमेनापीति** ॥ अन्यतमम

ध्येकेनार्थात्यर्थसंजनताद्दशकूटलाभः॥ ननुताद्दशज्ञानजनकबोधजनकत्वमेववक्तिजालमन्वित्यतआह॥ अधिकंत्विति॥ तादृशविशिष्टार्थबोध
जनिकाइयुक्तावाप्तत्वविशिष्टविषयिताकिबोधप्रयोजनजनकतात्पर्यविषयोबोधएववाप्तत्वतादृशविशिष्टविषयिताशाकित्वलाभायसंभवंवक्तुंभूमि
कामारचयति॥ तथार्थात्यादिना॥ न्यायावयवेकेषुप्रयोगेकेचादिविशेषणाघटकनिराकांक्षतयेतहेत्वंतइति॥ तादृशविशेषणाघटकनिराकांक्षा
यैनहेतावितिः॥ उक्तदिशेति॥ अनिवर्तकत्वस्वरूपनिवेशकतात्पर्यज्ञानदशाविषयिताभृत्यत्वरूपस्यनिवेशावश्यकत्वप्रदर्शनादित्यर्थः॥ निश्च
यत्वानवच्छिन्नेति॥ तादृशनिश्चयत्वाव्याप्यत्वेत्यर्थः॥ निश्चयेनेत्यत्रनिश्चयेनेतिनिर्देशेनाद्यनिश्चयादिसंग्रहमादायनाव्याप्तिर्नवाऽन्यूनविषयकत्वदलंवक्तव्यमित्यर्थः॥
उक्तेति॥ धूमादालोकवानित्यादिस्थलीयमित्यर्थः॥ जन्यतायातादृशधीविषयत्वावच्छिन्नत्वंनिवेश्यमितिभागमिधानेनवजन्यतास्वन्यूनमन्यंलक्ष्य
त्वेनदर्शयति॥ उक्तप्रायमिति॥ इतरेत्यादिना [illegible] इतिः॥ निदधातेरकर्मकत्वात्तुनगरव्यातस्यनाप्रयोजकत्वार्थंकर्तृत्वंभावे
नाकर्मकेत्यादिनानुशासनेनाकर्मकधातूनामकर्मकत्वविधानात्कर्तुरशक्यं॥ भेत्स्यंत॥ अभेदिषाघटइतिप्रयोगानुरोधाद्भिदधातोःस
कर्मकत्वाद्यास्यादिविशिष्टहेतुत्वरूपव्याप्यत्वावच्छिन्नतादात्म्यसंबंधावच्छिन्नेत्यर्थः॥ इतिकर्मकर्तृप्रयोगेनिराकांक्षएवेतिध्येयं॥ पूर्ववदेवेति॥ ता

वबोधानिवर्त्तयावत्संशयानिवर्तकत्वरूपएवेत्यर्थः॥ दर्शितहेतिति॥ धूमादालोकवानित्यादिनेत्यादिः॥ अत्रचस्वमतापेक्षयागौरवमेवास्वरस
बीजमिति॥ अथ धूमादालोकवान्पर्वतोवह्निमान्धूमादित्याद्यौ प्रतिज्ञाहेतूभयज-[illegible]लंबन बोधस्यापितावद्बोधानिवर्त्तयावत्संशयानिवर्त
कत्वमतितत्तद्धिशिष्टार्थविषयकबोधान्यतमयत्किंचिद्बोधनिवर्त्यत्वाभावरूपान्यूनानतिरिक्तविषयकत्वविशिष्टत्वेनतन्निष्ठहेत्वर्थविषयकत्वा
वच्छिन्नजन्यतानिरूपितजनकताश्रयंहेतावतिव्याप्तिसंभवेगौरवोद्भावनंनिर्बीजमितिचेन्न॥ निरुक्तान्यूनानतिरिक्तविषयकत्वव्यापकमु-
ख्यविशेष्यत्वावच्छिन्नत्वस्यजन्यतायांविवक्षणेतादृशहेतौनातिव्याप्तिस्तज्जन्यबोधीयमुख्यविशेष्यतायास्तादृशकेवलप्रतिज्ञाजन्यबोधसाधा
रणतादृशबोधत्वव्यापकत्वाभावात्॥ विशेष्यतायांमुख्यत्वनिवेशान्नप्रतिज्ञाजन्यबोधीयालोकविशेषणतापन्नधूमविशिष्टज्ञाप्यत्वविषयतामा-
दायहेतावतिव्याप्तिर्धर्मितावच्छेदकतायाःप्रकारतान्यत्वमतेप्रतिज्ञाजन्यबोधीयाया धूमविशिष्टज्ञाप्यत्वनिष्ठधर्मितावच्छेदकप्रकारतानिरू
पितविषयतायाइतरविशेषणतानापन्नत्वरूपमुख्यत्वाक्रांतायास्तादृशबोधत्वव्यापकत्वेऽपि[illegible]न्यतानवच्छेदकतयातदवच्छिन्नजन्यतायाः
अप्रसिद्धेर्नतामादायहेतुवाक्येति व्याप्तिर्गतिगौरवोद्भावनंनबीजं॥ नचैवंसत्यन्यूनविषयकत्वदलवैय्यर्थ्यशंक्यं॥ तदर्थंधूमादालोकवान्पर्व

तोवह्निमान्धूमादित्यादौ प्रतिज्ञाजन्यबोधीयमुख्यविशेष्यतायाहेतुजन्यबोधसाधारणताद्दृश्याननिरिक्तविषयकबोधत्वव्यापकत्वाभावेनप्रतिज्ञा
ग-अव-
या असंग्रहायलक्षणावश्यकत्वात्॥ननुचैत्रःपचतीत्यादावुपनयस्यदुर्वचत्वेनन्यायाभावाच्चैत्रःपचतीत्यस्यप्रतिज्ञात्वमेवनसंभवतीति-
नवलक्षणसंगमनंदीधितिकृतामफलमेवेत्याशयेनशंकते॥नन्विति॥व्युत्पत्त्यविरुद्धइतयेति॥नत्रोनिषातत्वादितिभावः॥हृदयमिति
॥अनुयोगितायाःसंसर्गतावादिनाअनुयोगितानेतरीयाइदंभेदानुयोगित्वाभाववदितिद्विविधप्रत्यक्षेनतत्राणीतिवाक्यजन्यशाब्दबोधसामग्या
प्रतिबंधकत्वंवाच्यमनुयोगितायाःसंसर्गत्ववादिनात्वनुयोगितासंबंधेनेतरभेदाभाववद्धर्मिकद्विविधप्रत्यक्षंप्रत्येवेतिषष्ठ्यर्थस्वत्वस्यप्रकारत्व
स्यवस्थापनादिशानुयोगितायाःप्रकारत्वेलाघवमस्वरसः॥विवक्ष्यतेति॥यदितथाशब्दस्यप्रकांतंयद्विशेष्यंसएवार्थस्तदोपनयजन्यबुद्धौहेतुम
तएवविशेष्यत्वेनप्रकांतत्वात्तस्माद्धेतुमानित्यर्थःस्याद्धेतुमतिर्हेतौवाहेतुज्ञानस्यात्वेनसंभवत्यननुभवात्॥यदिप्रकारेणप्रकारोऽर्थस्तदो
पनयजन्यबोधविशेष्यस्यसामान्यतोऽन्वयव्याप्तिप्रवेशेनप्रकारतयोक्त एवदोषः॥यदिप्रकांतसाद्दश्यंतदाऽभिधेयंप्रमेयंज्ञेयत्वादित्यादौप्रकांतंयदु
पनयजन्यबोधविशेष्यमभिधेयंतेनदघटिततत्साद्दश्यासिद्धिरितिरीत्यान्वयेनार्थः॥तत्प्रदर्शनमिति॥विप्रतिपत्तौकोटिप्रदर्शनमित्यर्थः॥
२८५

तथाचसाधारणधर्मांशसत्वेपिनक्षतिः॥तस्येत्यादि॥तस्य॥विप्रतिपत्तिकोटित्वस्य॥स्वतइति॥तद्विशिष्टबुद्धे[illegible]विशेष्य[illegible]हेतु
त्वादितिभावः॥निरा कांक्षवाक्यव्युदासइति॥ननुनिराकांक्षवाक्यस्यन्यायांतर्गतत्वमेवनसंभवतीतिकथमेतदितिचेद्[illegible]केचित्तु॥उपनय
घटकवह्निपदसंबंधिपदत्वंपदत्वमेवन्यायांतर्गतत्वंतेचेत्पूर्वश्रमस्याभिप्रेतत्वादित्याहुः॥अवश्यंविवक्षणीयतयेति॥धूमादालो
कवान्पर्वतोवह्निमान्धूमादित्यादौप्रतिज्ञार्थविषयकबोधनिष्ठहेतुविशिष्टहेतुत्वविषयकत्वावच्छिन्नजन्यताप्रतियोगि[illegible]ये हेतुवा-
क्ये[illegible]तिव्याप्तिवारणायेत्यादिः॥निवेशानामंभवेयीति॥पर्वतोवह्निमानितिवाक्यस्यवत्वादिशून्यपर्वतादौवह्निमत्त्वावगाहिबोधत्वावच्छिन्न
जनकत्वानुरोधादितिभावः॥वाक्यपदेनाकांक्षादिमत्त्वलाभेशाब्दपदापेक्षादीधितिरुदुक्तांस्फुटीकरोति॥ज्ञाब्देति॥ज्ञानादेः॥[illegible]ज्ञा
नादेः॥स्वमतेशाब्दवाक्यपदयोरुभयोरेवाकांक्षादिमत्त्वलाभार्थकत्वंयत्तितिमतेचवाक्यपदादाकांक्षादिलाभःशाब्दपदाद्विजातीयशाब्दलाभइत्ये
वंमतयोर्भेदः॥एतदर्थमेवेति॥निगमनातिव्याप्तिवारणायैवेत्यर्थः॥पक्षेति॥तत्रारब्धार्थाश्रयत्वस्यैवविशेष्यत्वादिनरभेदाश्रयत्वमित्ये
वबोधादितिभावः॥पक्षविशेष्यकत्वस्यार्थांतरपरत्वावश्यकतांदर्शयन्नेवनिगमनेऽतिव्याप्तिर्नास्तीत्याह॥वस्तुतस्त्विति॥अथैवमपिगौर्व

समवायसंबंधावच्छिन्नप्रतियोगिताकगोत्वाभाववत्कालिकसंबंधावच्छिन्नप्रतियोगिताकगोत्वाभावादित्वादौयत्रगोत्वंतत्रगोत्वमितिव्यतिरेक्युदाहरणजन्यबोधस्यपक्षतावच्छेदकानवच्छिन्नविशेष्यत्वनिरूपकत्वेनतज्ज्ञानकेतादृशव्यतिरेक्युदाहरणेऽतिव्याप्तिर्दुर्वारैव॥ नच कालिकेनगोत्वाभावस्यगोत्वानधिकरणदेशावच्छेदेनगवित्वात्तत्रसमवायेनगोत्वाभावस्यासत्वान्निरुक्तहेतुर्व्यभिचारी कालिकेनगोत्वाभावस्यस्वाध्यक्षेसमवायेनगोत्वाभावस्यहेतुत्वेचननत्रव्यतिरेकव्याप्तिबोधकोदाहरणसंभवःकालिकेनगोत्वस्यघटेपिसत्वात्तत्रसमवायेनगोत्वाभावादितिवाच्यं॥ तथापिगोत्वंगोभिन्नंसमवायावच्छिन्नाधारतासंबंधेनगोत्वाभाववद्वृत्तिसमवायेनगोत्वाभावादित्वादौयत्रगोत्वंतत्रगोत्वमितिव्यतिरेक्युदाहरणेपरममहत्त्वंपरममहत्त्वावच्छिन्नंसमवायेनपरममहत्वाभावादित्वादौयत्रपरममहत्वंतत्रपरममहत्वमितिव्यतिरेक्युदाहरणेव्याप्तिर्दुर्वारेवेतिचेदत्रकश्चित्समादधाति॥ उक्तोदाहरणवारणायत्वन्निरूपकत्वस्वभिन्नपक्षतावच्छेदकतात्पर्याधिकरणधर्मावच्छिन्नमुख्यविशेष्यतानिरूपकत्वोभयसंबंधेनपक्षतावच्छेदकतात्पर्याधिकरणधर्मावच्छिन्नमुख्यविशेष्यतावदन्यत्वनिष्ठबोधविशेषणदेयंयत्रगोत्वंतत्रगोत्वमितिव्यतिरेक्युदाहरणजन्यबोधस्यतादृशोभयसंबंधेनगोत्वत्वावच्छिन्नविशेष्यतावत्त्वेननतत्रातिव्याप्तिः॥ धूमादालोकवान्यत्रतोवह्नि- २८६

नानितिप्रतिज्ञाजन्यबोधस्यनिरुक्तोभयसंबंधेनालोकप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतावदेतदनुमितिपक्षतावच्छेदकावच्छिन्नविशेष्यतावदन्यत्वमपहायपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविशेष्यतावदन्यत्वनिवेशः॥धूमादालोकेत्यादिप्रतिज्ञाजन्यबोधस्यतादृशविशिष्टपर्वतत्वावच्छिन्नविशेष्यताभिन्नालोकप्रकारतानिरूपितकेवलपर्वतत्वावच्छिन्नविशेष्यतावदेतदनुमितिपक्षतावच्छेदकतापर्याप्तिनिवेशः॥द्वितीयसंबंधेस्वभिन्नत्वानुपादानेतिज्ञामात्रेऽसंभवइतितन्निवेशः॥नचैवमपिप्रमेयगोत्वंगोभिन्नंममवाक्यंनगोत्वाभावाद्गोत्वंतत्रगोत्वमितिव्यतिरेक्युदाहरणजन्यबोधस्यपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविशेष्यताकत्वाभावेननिरुक्तविशेषणवत्त्वात्तदारणमशक्यमितिशंक्यं॥साध्याभावसाध्यकोक्तव्यतिरेक्युदाहरणवारकपक्षतावच्छेदकानवच्छिन्नविशेष्यत्वानिरूपकत्वंलक्षणपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविशेष्यतानवच्छिन्नत्वंतादृशधर्मानवच्छिन्नविशेष्यत्वानिरूपकत्वस्यविवक्षणात्॥धूमादालोकवान्पर्वतोवह्निमानितिलौकिकपर्वतत्वावच्छिन्नविशेष्यताकप्रतिज्ञायामव्याप्तिरतोप्रथमंनवच्छिन्नांतं॥प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतामादायासंभववारणायद्वितीयंनवच्छिन्नांतं॥प्रमेयगोत्वपक्षकदर्शितव्यतिरेक्युदाहरणवारणाय

तत्वपर्याप्तिनिवेशः॥ यत्वेवमपिसंबंधावच्छिन्नत्वादौ निगमनवारणंलिंगाविषयकत्वविशेषणंविनाऽशक्यमेवेति निगमनापेक्षानिर्बीजेति तन्न॥ विधेयांशेऽधिकावगाहिबोधानुपगमपक्षेतादृशन्यायानुपगमइत्यभिप्रायेणाननुषंगपक्षेनिगमनापेक्षाबीजसंभवात्॥ तादात्म्येनघटत्वीहेतुकेति॥ भेदाभावस्यप्रतियोगितावच्छेदकस्वरूपत्ववत्प्रतियोगित्वरूपत्वमभ्युपेत्याभिप्रायेणेदंननघटत्वीभेदाभावस्यघटत्वीत्वरूपत्वात्घटत्वीभेदाभावत्वेनकथंघटत्वाद्याभानमितिशंकानवकाशः॥ बोधासंभवादिति॥ नचनेयंघटत्वीत्यत्रनचघटत्वीनेयमितियोजनातत्रनचघटत्वीत्वस्यनघटत्वीभेदोर्थःप्रथमांतानुयोगिवाचकपदाभावात्॥ नेयमित्यत्रनञोनास्तंताभावोऽर्थःसप्तम्यंतानुयोगिवाचकपदाभावादितिभावः॥ दर्शितव्युत्पत्तीति॥ उद्देश्यतावच्छेदकविधेययोरैक्येऽन्वयानुपपत्तिरितिव्युत्पत्तीत्यर्थः॥ मनुपोनिरर्थकत्वेत्वाह॥ गंधमभानकालीनेति॥ स्वस्यस्वधर्मितानवच्छेदकत्वेनेति॥ स्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्यस्वनिष्ठत्वविरहेणेत्यर्थः॥ अत्रकेचित्तु॥ धर्मितावच्छेदकताप्रकारतयोरैक्यमेवस्वीकृत्यतत्परंतुतस्यैवतद्धर्मितावच्छेदकत्ववारणायतन्निष्ठावच्छेदकतात्वेनैवतद्वच्छिन्नविशेष्यतानिरूपितत्वेननुतन्निष्ठप्रकारतात्वेनैवंचतन्निष्ठप्रकारतात्वावच्छिन्ननिरूपकताकविशेष्यतानिरूपितत्वावच्छेदकतन्निष्ठावच्छेदकतात्वावच्छिन्नतन्निष्ठप्र

कारतारूपस्यतन्निष्ठतद्भितावच्छेदकत्वस्यनापत्तिरितिवदंति॥एतेनेति॥निरवच्छिन्नविशेष्यतांव्यवस्थाप्यपक्षाविशेषणत्वस्यनिरुक्तार्थकत्वकरणेनेत्यर्थः॥पक्षतावच्छेदकेति॥विधेयात्मकेत्यादि॥तथाचपक्षतावच्छेदकनिष्ठप्रकारतेत्यनेनधूमनिष्ठविधेयतायाग्रहणसंभवात्तादृशोपनयजन्यबोध्यनिरुक्तपक्षाविशेषणत्वेनलिंगाविषयकत्वमक्षतमितिभावः॥उपनयार्थघटकव्यापकताघटकसामानाधिकरण्यघटकधूमप्रकारतायाःपक्षतावच्छेदकनिष्ठप्रकारताशब्देनोपादानमाह॥एवमिति॥इदंचप्रकारताविधेयतयोर्नाभेदःकिंतुसाहचर्यमात्रमितिपक्षतायंथोक्तपक्षाभिप्रायेणतेननिरुक्तपक्षाविशेषणत्वघटकपक्षतावच्छेदकनिष्ठप्रकारतायांविधेयतान्यत्वविशेषणेननिरुक्तोपनयातिव्याप्तिवारणेपिनक्षतिः॥तत्रक्षेविधेयनिष्ठप्रकारतायाअपिविधेयतान्यत्वात्॥नचैवमपितादृशप्रकारतान्यत्वस्यविधेयतायामक्षतत्वान्नातिव्याप्तिरितिवाच्यं॥अग्निमप्रकारतायाःपक्षतावच्छेदकनिष्ठप्रकारतानिरूपकविशेष्यतानिरूपकविषयतात्वादिनैवभेदस्यनिवेशेनविधेयतायाप्रकारतयोरेकविशेष्यतानिरूपितत्वेनविधेयतायांतादृशविषयतान्यत्वविरहात्॥पक्षतावच्छेदकहेतुकेति॥गंधवतीतरेभ्योभिद्यतेगंधादित्यादिस्थलीयेत्यर्थः॥एतेनेति॥एवमित्यादिनाऽन्वयिउपनयातिव्याप्तिसंगमनेनेत्यर्थः॥परंपरयासाध्यविशेषणतयेति॥साक्षात्साध्यनिरूपितविशेषणताभिन्नत्वोक्तोवह्नि

कालीनद्रव्यसामान्याभावाद्रित्यादावव्याप्तेः साक्षात्परंपरासाधारणनिरूपितत्वमेवनिवेश्यमितिभावः॥ द्वि[illegible]ध्व्णुकेति॥ इत्यत्वव्याप्यव्याप्यजातेः परमाणावस्वीकाराद्धित्वस्यपरमाण्ववृत्तित्वेनद्वित्वद्व्यणुकविषयकबोधस्यद्वित्वसमवेतद्व्यविषयकत्वमितिभावः॥ यद्यपिनिरुक्तपक्षाविशेषणत्वेननिरुक्तसाध्याविशेषणत्वेनचयलिंगप्रकारत्वंतच्छून्यत्वविवक्षयापिद्वित्वद्रव्यमित्यादिहेतुपक्षकप्रतिज्ञात्रयेपिनाव्याप्तिस्तथापिसिषाधयिषयान्यायप्रयोगोपगमेद्वित्वमद्द्रव्यत्वादीत्यसमवायेनसाध्यसाधनभावेतदनभ्युपगमेपिकालिकसंबंधेनद्वित्वसाध्यकेकालिकसमवायोभयसंबंधेनद्वित्वहेतुकेप्रतिज्ञाजन्यबोधेतादृशप्रकारतासत्वाद्व्याप्तिर्दुर्वारा॥ नन्वनंतःपतितसमव्यापकत्वंतथाचप्रमेयत्वनिष्ठहेतुत्वंप्रमेयंप्रमेयत्वादित्यादौहेतावतिव्याप्तिरतस्तद्व्यावष्टे॥ पक्षतावच्छेदकेति॥ अथेदमनुपपन्नंद्वित्वद्रव्यमित्यादिस्थलत्रयेपिद्वित्वादिप्रकारतानिरूपितसंसर्गतानिरूपकत्वस्यद्वित्वाद्यवच्छिन्नविशेष्यतायामसत्वाद्व्याप्तेरवारणादितिचेदत्रकेचित्॥ द्वित्वनिष्ठ[illegible]त्वप्रकारतयोर्भेदेपितद्भेदेनद्वित्वनिष्ठावच्छिन्नानवच्छिन्नविशेष्यतयोर्भेदेपिवाप्रकारतावच्छेदकतयोर्निरूपकीभूतसंसर्गतान्यतरभेदेनांगीक्रियतेतथाचतादृशसंसर्गतानिरूपकविषयतानिन्नलिंगविषयतानिरूपितत्वंतादृशप्रतिज्ञाजन्यबोधेऽस्तीतिनाव्याप्तिः॥ नन्वेवंसतिस्वस्यस्वधर्मि[illegible]त्वेनज्ञानेऽनुमितेः शंक्या॥ अवच्छिन्न

विशेष्यतायाधर्मि[illegible]च्छेदकविशेषकसंसर्गनिरूपितत्वविधर्मितावच्छेदकनिष्ठप्रकारतानिरूपितत्वाभावात्॥ यद्वा संसर्गनाच्यन्यभेदे
ष्यनवच्छिन्नविशेष्यतानिरूपितत्वेनैवधर्मितावच्छेदकप्रकारतानिरूपकत्वमवच्छिन्नविशेष्यतानिरूपितत्वेनैवधर्मितावच्छेदकतानिरूपकत्वंवीक्षि
यतेनथाचावच्छिन्नविशेष्यतानिरूपितत्वावच्छिन्ननिरूपकताकत्वस्यधर्मितावच्छेदकप्रकारतायामसत्वान्नस्वस्यस्वधर्मितावच्छेदकत्वापत्तिरि
ङ्गः॥ तदनिरूपकत्वादिति॥ पक्षतावच्छेदकप्रकारतायाधर्मितावच्छेदकतानिरूपितत्वादितिभावः॥ क[illegible]विषयतायाविषयरूपनिरूप
रूपत्वनिरूपकविषयतात्वात्॥ धर्मितावच्छेदकत्वप्रकारतयाभेदानुपगमाद्वेत्यर्थः॥ ननुलिंगविषयतेत्यनेनलिंगतावच्छेदकावच्छिन्नविषयतेन
यत्रप्रत्यक्षसंबंधेनावच्छिन्नत्वंप्रकृतप्रतिज्ञाजन्यबोधंप्रतियोगस्यस्वरूपसंबंधेनभानंतस्यसंसर्गतोपलक्षणत्वेनसंसर्गतोपलक्षणत्वेनसंसर्गतोपलक्षणत्वेन

ष्यतायाभूतलत्वनिष्ठप्रकारतानिरूपितत्वेनभूतलत्वनिष्ठप्रकारतानिरूपकत्वानंगीकारान्ननस्यतद्धर्मितावच्छेदकत्वप्रसक्तिरितिभावः॥वस्तु ग॰अव॰
तस्त्वित्यादिकल्पांतरमवतारयति॥[illegible]॥वस्तुतस्त्विति कल्पेबहिर्भूतत्वांतापूरणेनतन्निर्वचनानावश्यकत्वादितिभावः॥
पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्यादि॥अत्रपंचमविषयतायामवच्छेदकत्वंद्विविधं॥कोटिप्रविष्टस्यावच्छेदकत्वमतसिद्धं॥स्वानंत्ये
णविनिगमनाविरहप्रयुक्तंचतत्रप्रथमविषयतानिष्ठावच्छेदकतावच्छेदकोधर्मःव्यापकत्वविषयतानिरूपितत्वसाध्यतावच्छेदकसंबंधावच्छिन्न
साध्यतावच्छेदकावच्छिन्नविषयतात्वंचेत्युभयं॥द्वितीयेचतुर्थविषयतानिरूपितत्वसहितमितिभेदः॥मध्यवर्तिविषयतयोरभेदयथाश्रुतग्रं
थनिरूप्यनिरूपकभावोऽन्यथामुख्यविशेष्यतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितविषयत्वाव
च्छिन्नविषयतानिरूपितविषयत्वांशेऽतिरिक्तत्वावक्तव्यं॥ननुतादृशावच्छेद्यावच्छेदकभावनिवेशेव्यर्थोनिरंकिपरामर्शीयसाध्याभावव्यापकत्वविशिष्ट
हेत्वभावविषयतायानसंग्रहः॥संसर्गतावच्छेदकीयविषयत्वावच्छिन्नविषयतायाअप्रसिद्धेः॥एवंप्रतियोगित्वनिष्ठसांसर्गिकविषयत्वावच्छिन्न
विषयतायाअपीतिवाच्यं॥पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतावैशिष्ट्यविषयतावैशिष्ट्यविषयतावैशिष्ट्य २८९

विषयतांशेइत्यादिरीत्यानिवेशनीयत्वात्॥वैशिष्ट्यंचस्वनिरूपितत्वस्वनिरूपितविशेष्यतानिरूपितविषयत्वावच्छिन्नविषयत्वानिरूपितत्वोभय संबंधावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसंबंधेन॥अत्रचसंसर्गतायाःस्वपदेनोपादानेतन्निरूपितप्रकारतायांस्वनिरूपितत्वासत्वेननिरुक्तोभयसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसंबंधेनप्रकारतायांसंसर्गतासत्वात्॥प्रकारतोपादानेचतदवच्छिन्नविशेष्यतानिरूपितप्रकारतायांस्वनिरूपितत्वसत्वेपिस्वनिरूपितत्वादिद्वितीयसंबंधविरहादेवतदुभयसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसंबंधेनस्वविशिष्टत्वसत्वाद्देत्वभावसाध्यविषयतयानुगमः॥अथवास्वावच्छिन्नविषयतानिरूपितत्वस्वनिरूपितत्वेतदन्यतरसंबंधेनविशिष्टत्वंबोध्यं॥अत्रतादृशविषयतांशेविशेषणविधयाअवच्छेदकतावच्छेदकतेत्यनेनचतुर्थविषयतानिरूपितत्वावच्छिन्नविशेष्यतानिरूपितप्रकारताप्रयोज्यावच्छेदकतासमानाधिकरणधर्मावच्छिन्नस्वप्रतिबध्यतावच्छेदकतायांलभ्यतेतत्रविशेषणविधेयेत्यनुपादानेतादृशविषयतानिष्ठावच्छेदकतावच्छेदकतासमानाधिकरणधर्मावच्छिन्नचतुर्थविषयतानिरूपितत्वसहितमेवेतिनदवच्छिन्नावच्छेदकताकप्रतिबंधकतानसाध्येहेतुव्यापकत्वाभावबुद्धितिज्ञानीयाकिंतुपक्षःसाध्यव्याप्येतभावबुद्धिर्प्रतिबंधकतेवेतितदवच्छेदकविषयताशून्यत्वस्यउदाहरणादिजन्यबोधेसत्वादितिव्याप्तिः॥तदुपादानपक्षे

तुनिरुक्तविषयतानिरूपितत्वावच्छिन्नविशेष्यतानिरूपितप्रकारताप्रयोज्यावच्छेदकतापर्याप्तिः॥केवलव्यापकत्वविषयतानिरूपितत्वविशिष्टवि
षयतात्वेनवक्तव्यत्वेनतदवच्छिन्नावच्छेदकताकप्रतिबंधकतावच्छेदकविषयतायाउदाहरणादिजन्यबोधेसत्त्वान्नातिव्याप्तिः॥पर्वतत्वव्यापकवा
च्यत्ववह्नेयत्वज्ञेयत्वद्रव्यत्ववाच्यर्वतावह्निमानित्यादौपरामर्शीयविशिष्टपक्षतावच्छेदकनिरूपकप्रकारतानिरूपितमुख्यविशेष्यतामादायव्याप्तिवारणाय
क्षतावच्छेदककोटिप्रविष्टपर्वतत्वव्यापकवाच्यत्वविषयतामादायतादृशप्रतिज्ञायामव्याप्तिवारणायमुख्यविशेष्यतायांपक्षतावच्छेदकावच्छि
न्नत्वंविशेषणंपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकत्वंतदर्थः॥न्यूनधर्मविशिष्टपक्षतावच्छेदकनिरूपकप्रकारतानिरूपितवि
शेष्यतानवच्छिन्नदृष्टांतीयसाध्यकस्थलेपरामर्शीयवह्निमानित्यादौदुर्वारइतिवाच्यं॥स्वस्यस्वधर्मितावच्छेदकतावारणायधर्मितावच्छेदकावच्छिन्नविशेष्यत्वं
नवक्तव्यादिप्रकारतानिरूपितत्वस्यत्वाकर्तव्यतयालक्षणेपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतात्वावच्छिन्ननिरूपकताकविषयतानिरूपितत्वं
त्यानिवेशेनपक्षतावच्छेदककोटिप्रविष्टविषयतायाअतथात्वान्नाव्याप्तिः॥निरुक्तधर्मविशिष्टविषयत्वावच्छिन्नत्वमनिवेश्यजन्यतावच्छेदकपर
त्वमविषयत्वावच्छिन्नत्वंनिवेशप्रमेयवद्दृष्टांतीयसाध्यकस्थलेपरामर्शीयवह्निनिष्ठपंचमविषयतास्यधर्मिः॥अन्यत्वाभाववानितिज्ञानीयप्रतिबंध

कतायांप्रमेयत्वनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यतात्वेनावच्छेदकतयातादृशप्रतिबंधकतावच्छेदकविषयताशून्यत्वस्यप्रतिज्ञाजन्यबो
धःसन्नादव्याप्तिरतस्तथानिवेशः॥इदंचहेतुव्यापकत्वनिष्ठप्रकारतानिरूपितप्रमेयत्ववह्नित्वावच्छिन्नविशेष्यत्वप्रमेयत्वनिष्ठप्रकारतानिरूपित
भुद्देश्यतावह्नित्वावच्छिन्नविशेष्यतयोरैक्याभिप्रायेण॥तयोर्भेदेतुव्यापकत्वनिष्ठप्रकारतानिरूपितप्रमेयवह्नित्वावच्छिन्नप्रकारतायाएवपंचमीत्वा
तन्याश्चप्रमेयत्वाभावविषयकज्ञानप्रतिबंधकतानवच्छेदकत्वेनाव्याप्तिर्हादितितुनशंक्यं॥व्यापकत्वस्य साध्यतावच्छेदकरूपत्वेनव्यापकत्व
निष्ठप्रकारतानिरूपितसाध्यतावच्छेदकावच्छिन्नविशेष्यतायामपिव्यापकत्वघटकप्रमेयत्वनिष्ठप्रकारतानिरूपितत्ववह्नित्वावच्छिन्नत्वयोः
सत्वेनतत्तन्त्याअपिनिरुक्तप्रतिबंधकतावच्छेदकत्वेनतादृशप्रतिबंधकतावच्छेदकविषयतामादायाव्याप्तेः॥अथचतुर्थविषयतांशेजनकतावच्
छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वघटितपरिष्कारएवोचितः॥तावतायन्वयपरामर्शीयाधिकरणनिष्ठचतुर्थविषयतांव्यतिरेकि
परामर्शीयसंसर्गविषयतायाघटितहेत्वभावनिष्ठविषयतांचादायतत्तन्निष्ठावच्छेदकतापर्याप्त्यधिकरणीभूतसाध्यतावच्छेदकावच्छिन्नप्रकारतानि
रूपितविषयतात्वसाध्याभावव्यापकत्वविषयतानिरूपितत्वविशिष्टहेत्वभावविशिष्टावच्छिन्नप्रतिबंधकतावच्छेदकविषयतायाअन्व

यव्यतिरेक्युदाहरणजन्यबोधादौ सत्वांनातिव्याप्तिरितिचेन्न॥ एवंसतिवह्निमान्धूमादित्यादौ यत्र धूमस्तत्र वह्निरित्युदाहरणजन्यबोधेपरामर्श्यधि
करणनिष्ठचतुर्थविषयतानिष्ठावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वविशिष्टविषयतात्वविशिष्ट
वच्छिन्नप्रतिबंधकतावच्छेदकविषयताशून्यत्वसत्वेनतादृशोदाहरणेतिव्याप्तेः॥ तादृशोदाहरणजन्यबोधेवह्न्यंशेअधिकरणवृत्तित्वस्यप्रकारतयाऽभा
वेननसाध्यविषयतानिरूपितत्वविशिष्टाधिकरणविषयताशून्यत्वस्यनिरुक्तबोधेऽक्षतत्वात्॥ ननुतादृशविशिष्टविषयत्वावच्छिन्नायामहानसंधूम
व्यापकवन्ध्यभाववद्धितिज्ञानीयप्रतिबंधकतातदवच्छेदिकामहानसवृत्तिवह्निविषयितापिमहानसविशेष्यकविशिष्टवन्ध्यभावबुद्धौमहानस
विशेष्यकविशिष्टवह्निप्रकारकज्ञानस्येवमहानसवृत्तित्वप्रकारकज्ञानस्यापिप्रतिबंधकत्वादितिवाच्यं॥ एकरूपेणप्रतिबंधकत्वाभावेन साध्य
तावच्छेदकावच्छिन्नप्रकारतानिरूपितविषयित्वावच्छिन्नप्रतिबंधकतावच्छेदकस्यमहानसवृत्तित्वविशिष्टवह्निविषयितायामभावेनातिव्या
प्तितादवस्थ्यात्॥ नथापीत्यादिसंग्रहोबोध्य इति॥ अत्रेदमुच्यते॥ निरूप्यनिरूपकभा[illegible]तावच्छिन्नविषयतानिरूपितत्वस्यनतव्य
क्तित्वेननिवेशः ननुगमादपितुतादृशविषयतानिरूपितत्वत्वेनैवंचोदाहरणजन्यबोधीयसाध्यविषयतानिरूपितव्यापकत्वविषयतात्वव्यक्तेरपिसाभा

न्वरूपेणावच्छेदकतावच्छेदकत्वान्नदृष्टिविषयताशून्यत्वस्योदाहरणजन्यबोधेऽसत्वेनातिव्याप्त्यभावान्नादृशधर्मविशिष्टविषयताशून्यत्वमपहायतादृशधर्मवद्विषयतानवच्छिन्नप्रतिबंधकतावच्छेदकविषयताशून्यत्वनिवेशोव्यर्थइतिप्रतिभातितथापितादृशधर्मरूपेणापिनद्यकेरेवावच्छेदकतावच्छेदकत्वमित्यभिप्रायेणेदमिति॥ननुचैवंगोत्वाभावःप्रमेयत्वव्यापकवाच्यत्ववत्त्वान्नाभाववान्गोत्वाभावादित्यादौमुख्यविशेष्यतानिवेशेपिहेतुविशेष्यकपरामर्शीयमुख्यविशेष्यतामारभ्यपंचम्यापप्रमेयत्वव्यापकवाच्यत्वविषयतातामादायोक्तरीत्याऽव्याप्तिरितिवाच्यं॥पक्षमुख्यविशेष्यकपरामर्शीयपंचम्यर्थतावच्छेदकत्वमितिमतोपगमात्॥अथवाहेतुतावच्छेदकसंबंधावच्छिन्नाधेयत्वसंबंधावच्छिन्नपक्षतावच्छेदकपर्याप्तावच्छेदकताकप्रकारतानिरूपकत्वस्यपक्षमुख्यविशेष्यतायांनिवेशात्तत्समवायसंबंधावच्छिन्नाधेयतयादधिविशिष्टदधिपक्षकप्रतिज्ञायामव्याप्तिः॥ननुवह्न्यभावव्यापकाभाववान्यत्रतोवह्निमानित्यादौव्यतिरेकिपरामर्शीयपंचम्यांसाध्याभावव्यापकहेत्वभावविषयतानादायातिव्याप्तेस्तादृशायामव्याप्तिरितिचेन्न॥हेत्वभावस्यसाध्याभावव्यापकत्वेनप्रमेयत्वादिनाऽतिप्रसंगात्॥किंतुहेत्वभावत्वेन॥तथाचसाध्याभावव्यापकतावच्छेदकहेत्वभावत्वरूपव्यापकत्वविषयतानिरूपितत्वविशिष्टविषयतात्वविशिष्टावच्छिन्नप्रतिबंधकतावच्छेदकत्वस्यकेवलसाध्याभावव्यापकत्वविशिष्टाभा

वत्तावच्छिन्नाविषयतायामसत्त्वेननिरुक्तप्रतिज्ञायांलक्षणसमन्वयात्॥ अथपर्वतआलोकव्यापकवह्निमान्धूमादित्यादावव्याप्तिः॥ धूमव्याप्यालो
कव्यापकवह्निमत्तानाधिकरणधूमवान्पर्वतइतिपरामर्शस्यपर्वतत्वावच्छिन्नमुख्यविशेष्यतानिरूपितत्वादिक्रमेणयापंचमीविषयताआलोकव्या
पकत्वविशिष्टवह्निविषयतातदंशेविशेषणविधयाअनुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणंयदालोकव्यापकवह्निविषयतात्वंतद्व
द्विषयताशून्यत्वस्यतज्जन्यशाब्दबोधेःसत्वादितिचेन्न॥ वह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्यधूमव्यापकवह्नित्वावच्छिन्नविषयतायांपंचम्यांव
ह्नित्वावच्छिन्नविषयतात्वंजनकतावच्छेदकतावच्छेदकताश्रयीभूतोधर्मस्तद्द्विषयताशून्यत्वस्यप्रतिज्ञाजन्यबोधेः सत्वात्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्ति
र्नोजनकतावच्छेदकतावच्छेदकतापर्याप्तिरूपान्नासाचहेतुव्यापकत्वविशिष्टप्रकृतसाध्यविषयतात्वंवनतुतदेकदेशेमानाभावाद्दितिपर्वतआलोक
व्यापकवह्निमानितिप्रतिज्ञायांनाव्याप्तिः॥ एतेनपर्वतआलोकव्यापकवह्निमानितिप्रतिज्ञायामव्याप्तिवारणाय॥ अथसाध्यतावच्छेदकावच्छिन्नविशे
ष्यतानिरूपिताधिकरणविषयतानिरूपिताधेयत्वविषयतानिरूपितहेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतावत्त्वेसतिनिश्चयत्वाव्याप्ति
कायानिरुक्तपंचमीविषयतातदंशेविशेषणविधयावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणंयत्तद्द्विषयताशून्यत्वस्यनिवेशनीयत्वेननोक्तप्रतिज्ञा

यामव्याप्तिः॥ आलोकव्यापकत्वविशिष्टवह्निविषयतायास्तादृशनिश्चयत्व[illegible]हेतुव्यापकत्वविशिष्टसाध्यतावच्छेदकावच्छिन्नविषयतायाःसाध्याभावव्यापकत्वविशिष्ट
ह्नित्वाभावविषयतायाश्चतादृशनिश्चयत्वाव्यापकत्वात्तत्वलक्षणसमन्वयः॥ केवलसाध्यसमानाधिकरणहेतुमान्पक्षतावच्छेदकविशिष्टःपक्षइतिज्ञानेपितादृशनिश्चयत्वमतेन
त्रतादृशविशिष्टविषयतायाअसत्वादितिचेन्मैवं॥ तथासतिमुख्यपदोपादानस्यपक्षतावच्छेदकावच्छिन्नेत्यस्यसाध्यतावच्छेदकहेतुतावच्छेदकोपादानस्यदीधितिदुरुक्त्य-
किंचिद्व्यापकत्वविशिष्टनिरूपितत्वस्यचवैय्यर्थ्यापत्तेः॥ तथाहिगोत्वाभावःप्रमेयत्वव्यापकवाच्यत्ववत्त्वाभावावान्गोत्वाभावादित्यादौप्रमेयत्वव्यापकत्वविशिष्टवाच्यत्वविषय
तायाःप्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवानित्यादौतादृशवाच्यत्वविषयतायावह्न्यभावव्यापकप्रमेयत्ववान्पर्वतोवह्निमानित्यादौवह्न्यभावव्यापकत्वविशिष्टप्रमेयत्व
विषयतायाद्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयंनित्यादौसंयोगव्यापकत्वविशिष्टद्रव्यत्वविषयतायागुणव्याप्यरूपवानयंस्पर्शवानित्यादौरूपव्यापकत्वविशिष्टगुणविषयतायाः
श्चतादृशनिश्चयत्वव्यापकत्वात्तादृशनिश्चयत्वाव्यापकोहेतुतावच्छेदकावच्छिन्नव्यापकत्वविशिष्टसाध्यविषयतेवेतितच्छून्यत्वन्यतादृशप्रतिज्ञाजन्यबोधेतुत्वालक्षणसंगम
नाद्॥ एवमपिगोत्वाभावःगोत्वाभावव्यापकवाच्यत्ववत्त्वाभाववान्गोत्वाभावादित्यादिस्थलीयप्रतिज्ञायाअव्याप्तेः॥ तादृशनिश्चयत्वव्यापिकायागोत्वाभावव्यापकत्वविशिष्टसा
ध्यतावच्छेदकावच्छिन्नविषयतातादृशतादृशविषयतात्वंयथावच्छेदकतायाःपर्यवसितंतथागोत्वाभावव्यापकत्वविशिष्टविषयतात्वरूपनाना—

न्यधर्मोऽपितयाविधयावच्छेदकतायाःपर्याप्तयधिकरणंभवतीतितद्दृष्टिषयताभून्यत्वस्यतत्प्रतिज्ञाजन्यशाब्दबोधेऽसत्वात्॥नचतदंशेऽवच्छेदकतापर्याप्तयधिकरणंयोधर्मस्तस्मिन्तादृशनिश्चयत्वाव्याप्यतावच्छेदकत्वं वाच्यं॥गोत्वाभावव्यापकत्वविशिष्टसाध्यतावच्छेदकावच्छिन्नविषयतांशेतादृशसामान्यधर्मस्यावच्छेदकतापर्याप्तयधिकरणत्वेपितस्यतादृशनिश्चयत्वाव्याप्यतावच्छेदकत्वविरहेणतादृशविषयतात्वस्यैवतादृशत्वेनतद्दृष्टिषयताभून्यत्वस्यतत्रसत्वेनाव्याप्तिरितिवाच्यं॥तथापिगोत्वाभावव्यापकवाच्यत्ववत्त्वाभाववानितिप्रतिज्ञायामव्याप्तेर्दुर्वारत्वात्॥यत्रगोत्वाभावव्यापकवाच्यत्वस्यप्रमेयत्वेनभानंतत्रप्रमेयवत्त्वाभावसमानाधिकरणगोत्वाभाववान्गोत्वाभावइतिनिश्चयेसाध्यतावच्छेदकावच्छिन्नेत्वादिकमणतादृशनिश्चयत्वस्यसत्वेनतत्रगोत्वाभावव्यापकत्वविशिष्टवाच्यत्वत्वावच्छिन्नविषयत्वाभावेनगोत्वाभावव्यापकत्वत्वावच्छिन्नप्रकारतानिरूपितवाच्यत्वत्वावच्छिन्नविषयतात्वस्यतादृशनिश्चयत्वाव्यापकतावच्छेदकतयापंचमविषयतांशेऽवच्छेदकतापर्याप्तयधिकरणतयाचानुगतधर्मत्वेनतद्दृष्टिषयताभून्यत्वस्यतत्राभावात्॥एवंगोत्वाभावव्यापकवाच्यत्वसमानाधिकरणधूमवान्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्तिः॥यत्रगोत्वाभावव्यापकवाच्यत्वस्यप्रमेयत्वेनभानंतत्रवह्निसमानाधिकरणधूमवान्हृदसमानाधिकरणधूमवानितिनिश्चयेतादृशनिश्चयत्वस्यसत्वे

नगोत्वाभावव्यापकत्वत्वावच्छिन्नप्रकारतानिरूपितवाच्यत्वत्वावच्छिन्नविशेष्यतायाअसत्त्वेनतादृशविशेष्यतात्वस्योक्तरूपाकांतत्वात्॥ अथसाध्यतावच्छेदकघटकतावच्छेदकातिरिक्तानवच्छिन्नावच्छेदकताकसाध्यविषयतानिरूपिताधिकरणविषयतानिरूपितेत्यादिक्रमेणपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वंनिरुच्यतादृशनिश्चयत्वाव्यापकतावच्छेदकत्वंवाच्यं॥उक्तस्थलेप्रमेयत्वस्यतद्घटकतानवच्छेदकतयानदोषः॥एवंपक्षतावच्छेदकघटकतावच्छेदकातिरिक्तानवच्छिन्नावच्छेदकताकपक्षविशेष्यताशालिनिश्चयत्वंनिर्वाच्यमतोनोक्तद्वितीयादोषइतिचेन्न॥तथापिगोत्वाभावोगोत्वाभावव्यापकप्रमेयत्वात्रासाभाववान्प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधूमवान्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्तेर्वज्रलेपत्वात्॥प्रमेयत्वस्यापिसाध्यतावच्छेदकघटकतावच्छेदकतात्पक्षतावच्छेदकघटकत्वाच्च॥अथयद्रूपावच्छिन्नस्ययस्ययस्यसाध्यतावच्छेदकघटकतानत्तद्रूपातिरिक्तरूपानवच्छिन्नतत्तन्निष्ठावच्छेदकताकसाध्यनिष्ठविषयतानिरूपितेत्यादिक्रमेणतादृशनिश्चयत्वंवाच्यं॥तथाचोक्तस्थलेप्रमेयत्वव्यापकवाच्यत्वत्वेनरूपेणतादृशवाच्यत्वस्यसाध्यतावच्छेदकघटकतयानदोषः॥एवंयद्रूपावच्छिन्नस्ययस्ययस्यपक्षतावच्छेदकघटकत्वंतत्तद्रूपातिरिक्तरूपानवच्छिन्नतत्तन्निष्ठावच्छेदकताकयपक्षनिष्ठविशेष्यताशालिनिश्चयत्वंनिरुच्यतादृश

निश्चयत्वाव्यापकतानवच्छेदकत्वनिर्वच्यमितिनकोपि[illegible]तिचेन्नहिपक्ष[illegible]च्छिन्नमुख्यविशेष्यतात्वनिवेश नापेक्षयाकिंन्तु ग.अव.
घवमिति॥सर्वप्रयासोअनादेयएव॥किंचिद्व्यापकत्वेति॥किंचिद्व्यापकत्वविषयितानिरूपितेत्यर्थः॥वस्तुतस्त्वित्॥अभावनिष्ठविषयतानि-
रूपितत्वमिति॥अभावत्वानवच्छिन्नत्वमित्यर्थः॥तेनाभावपक्षकाभावत्वसाध्यकस्थले ऽन्वयपरामर्शीयाधिकरणनिष्ठचतुर्थविषयतायाअभावमात्रनि
ष्ठत्वेपिनक्षतिः॥नचैवंमुख्यत्वंव्यर्थं॥सान्तभावनिष्ठचतुर्थविषयतायाअभावत्वाच्छिन्नत्वादितिवाच्यं॥एवमपिप्रमेयत्वव्यापकवाच्यत्ववज्ज्ञेय
त्वसाध्यकस्थलेनिरुक्तरीत्याअव्याप्तेस्तत्सार्थक्यात्॥सान्तभावसाध्यकस्थलेप्रयोजनप्रदर्शनंचप्रथमकल्पाभिप्रायेण॥ननुद्वितीयकल्पेधूम
व्यापकप्रमेयत्ववान्द्रव्यंधूमाभाववान्वन्ह्यभावादित्यादौव्यतिरेकिपरामर्शीयहेतुसंसर्गविषयत्वाघटितचतुर्थविषयतायावह्निनिष्ठायाअभा
वत्वानवच्छिन्नत्वेननतद्घटितपंचमविषयतायाधूमव्यापकत्वनिष्ठे त्वव्याप्तिरितिचेन्न॥हेतुभूताभावप्रतियोगितावच्छेदकत्वस्यैवच ग.अव.
तुर्थविषयतायांनिवेशनीयत्वात्॥नच्चतत्रापिहेतौप्रतियोगित्वस्यसंसर्गतयाभानेनपक्षविषयतानिरूपितहेतुनिष्ठतानिरूपिताभावत्वविषयतायानिरुक्तविशेषणकांतायाश्चतुर्थ्याःसत्वेनतद्घटितानवच्छेदकत्वविषयतामादायाव्याप्तिः॥एवंद्वितीय[illegible]व २९४

द्रव्यनष्टध्वंसीत्वाभाववद्दृष्टनित्वादित्यादावपिनिरुक्तरीत्याव्याप्तिरितिवाच्यं॥हेतुभूताभावप्रतियोगितावच्छेदकादृष्टनित्वस्यापिचतुर्थ्यर्थविषयतायांनिवेशनीयत्वात्॥एवंदिशेवाच्यत्वंघटवृत्त्यन्योन्याभावप्रतियोगित्वादित्यत्रापि घटवृत्तित्वाभावस्यात्रप्रतियोगित्वमित्युदाहरणेनातिव्याप्तिः॥तत्रव्यतिरेकिपरामर्शीयायाअपिचतुर्थ्यांविशेषणद्वयाकांक्षायाःपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितहेतुसंसर्गविषयतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतायाःप्रसिद्धत्वेननन्निरूपितहेत्वभावविषयतानिष्ठावच्छेदकतावच्छेदकधर्मावच्छिन्नावच्छेदकतानाकप्रतिबंधकतावच्छेदकविषयतायाःसत्वात्॥यद्यपितादृशसंसर्गतायाअपिहेतुभूताभावप्रतियोगितावच्छेदकप्रतियोगितात्वावच्छिन्नत्वं॥तथापितादृशावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्यैवनिवेशनीयतेनोक्तसंसर्गविषयतायाःप्रतियोगितात्वावच्छिन्नप्रतियोगितालस्यैवावच्छेदकतयातत्पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकत्वाभावात्॥नचैवमपिपर्वतोवह्निमान्जातिमद्द्रव्यसमानाधिकरणधर्मादित्यादौपरामर्शीयहेतुतावच्छेदककोटिप्रविष्टवह्निविशेष्यकज्ञानादयाव्याप्तिरितिवाच्यं॥धर्मितावच्छेदकतानात्मकत्वस्यनिवेशनीयत्वात्॥एवमभावत्वानवच्छिन्नत्वमपिचतुर्थविषयतायांनिवेशनीयं॥तेनधूमव्यापकमेयत्ववानाकाशोनिर्धूमोआधेयत्वाभावादित्यादौधूमव्यापकाधेयत्वाभाववानितिपरामर्शीयमुख्यविशेष्यतामारभ्यपंचमीव्यापकत्वकोटिप्रविष्टप्रतियोगित्वविषयतामा

[illegible]र्शनप्रतिज्ञायांनाव्याप्तिरितिसुधियोविदंत्वंत्रिनाग्रहेणेतिदिक्॥ननुविषयतायायेनरूपेणजनकतावच्छेदकत्वं तेनरूपेणतत्स्याःप्रतिबंधकतावच्छेदकत्वएवसर्वमिदंसंभवति॥तदेवनपरामर्शस्यानुमितिजनकत्वेकल्पनीयेव्याप्तिघटकपदार्थांशेनिश्चयत्वाद्य निवेशप्रयुक्तलाघवानुरोधाद्व्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहिनिश्चयत्वेनैवकारणत्ववाच्यं॥तच्चविशेष्यविशेषणमितिरीत्याज्ञानव्यावृत्तं धूमत्वावच्छिन्नावच्छेदकतानिरूपितव्यापकत्वत्वावच्छिन्नावच्छेदकतानिरूपितवह्नित्वावच्छिन्नावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छे दकतानिरूपिताधेयतात्वावच्छिन्नावच्छेदकतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपि तविशेष्यतानिश्चयत्वं॥तथाचविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नंप्रतिविशेषणतावच्छेदकप्रकारकनिर्णयत्वेनकारणत्वापूर्वव्या प्तिघटकत्वंतुहिशेषणतावच्छेदकप्रकारकनि[illegible]प्रतिबंधकवशादेवतत्तदंशेसंशयात्मकज्ञानासंभवेनतत्तदंशेनिश्चयत्वस्यकारणतावच्छेदककोटावनिवेशात्॥अवच्छेदकत्वंचप्रकारत्वादिविलक्षणंप्रतिबंधकतावच्छेदकंचविशेष्यविशेषणमितिरीत्याज्ञानसाधारणंप्रकारतात्वादिविशिष्टमेव॥नत्ववच्छेदकतात्वादिविशिष्टमित्थंचपंचमविषयतांशेविशेषणविधयाअनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणव्यापकत्व

त्वावच्छिन्नावच्छेदकतानिरूपितवह्नित्वावच्छिन्नावच्छेदकत्वविशिष्टावच्छिन्नप्रतिबंधकतायाअप्रसिद्धत्वेनासंभवः॥ नच तदुपलक्षितवि-
यत्वावच्छिन्नत्वनिवेशानदोषइतिवाच्यं॥ तथासतिजातिविशिष्टवह्निसाध्यकस्थलेपूर्वोक्तरीत्याऽव्याप्तेः॥ नच साध्यतावच्छेदकविशिष्टविषयत्व-
[illegible]तिबंधकतायांविशेषणंदेयमितिवाच्यं॥ तथासतिमुख्यत्वस्यवैय्यर्थ्यादितिचेन्न॥ पंचम्यन्यतांशेजनकतावच्छेदकतावच्छेदकत्वावच्छिन्नाधिकरणस्वानवच्छेदकप्रकारताकंयद्यत्तदवच्छेदकविषयिताशून्यत्वंबोधेविशेषणंदेयं॥ स्वंप्रतिबंधकताजातिविशिष्ट-
वह्निसाध्यकस्थलेवह्निर्जातिमान्नवेतिसंशयप्रतिबंधकताचनस्वपदार्थः॥ तदनवच्छेदकव्यापकत्वविषयिताश्रयावच्छेदकत्वावच्छिन्नाधिकरण
स्वात्॥ किंतुव्यापकत्वसंशयप्रतिबंधकंनवस्वपदार्थः॥ तदनवच्छेदकप्रकारतायाअवच्छेदकतावच्छिन्नानधिकरणत्वादितिनप्रतिज्ञोदाहरणयो
रसंग्रहाविति तद्दयं॥ अथैतादृशानुगमस्यदीधितिकाराभिप्रेतत्वेद्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयंद्रव्यत्ववान्गुणाद्गुणव्याप्यरूपवानयंस्पर्शवान्रू
पादित्यादौप्रतिज्ञासंग्रहायावच्छेदकद्वयोपादानमित्यादिनाप्रकृतहेतुतावच्छेदकावच्छिन्नस्यप्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतोपैकेत्रहे
तुतावच्छेदकसाध्यतावच्छेदकयोर्निवेशव्याप्त्युक्तिकथनासंगतिस्तथाहिप्रथमस्थलेप्रकृतानु[illegible]मितित्वावच्छिन्नजन्यतानिरूपितपरामर्शनिष्ठजनकतायां

मवच्छेदकीभूतायांपंचमीपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुनिष्ठविषयतानिरूपिताधेयत्वनिष्ठविषयतानिरूपिताधिकरणनिष्ठविषयतानि- ग० अव-
रूपितायागुणत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्यत्वविषयतातन्निष्ठ[illegible]छेदकतापर्याप्तयधिकरणतयातादृशविषयतात्वाव
च्छिन्नविषयताशून्यशाब्दबोधजनकत्वस्यतत्प्रतिज्ञायांसत्वेनाव्याप्तभावेनहेतुतावच्छेदकपदंव्यर्थं॥द्वितीयरूपेऽपिपक्षतानुमितित्वावच्छिन्नजन्य
तानिरूपितपरामर्शनिष्ठजनकतायामवच्छेदकीभूतायापक्षमुख्यविशेष्यतानिरूपितविषयतामारभ्यरूपत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टस्य
र्शत्वावच्छिन्ननिष्ठापंचमीविषयतातंनिष्ठविषयतात्वस्यैवावच्छेदकतावच्छेदकतापर्याप्तयधिकरणतयातद्वृत्तिविषयिताशून्यतत्प्रतिज्ञाजन्यशाब्द-
बोधसत्वेनतत्राव्याप्तिर्विरहेणसाध्यतावच्छेदकपदमर्पणीयं॥नचतादृशपरामर्शनिष्ठजनकतायामवच्छेदकीभूताप्रकृतपक्षतावच्छेदकीभूतद्रव्य
त्वव्याप्यसंयोगःसमानाधिकरणधर्मावच्छिन्नमुख्यविशेष्यतानिरूपिततन्निष्ठधर्मनिष्ठविषयतानिरूपिताधेयत्वनिष्ठविषयतानिरूपिताधिकरणनिष्ठवि
षयतातन्निरूपितायापंचमीद्रव्यत्वव्याप्यसंयोगत्वावच्छिन्नविषयता एवंद्वितीयेरूपेव्यापकत्वविशिष्टगुणविषयतातंनिष्ठविषयतात्वस्यानुमिति
जनकतावच्छेदकतावच्छेदकतापर्याप्तयधिकरणत्वेनतद्वृत्तिविषयिताशून्यत्वस्यतादृशप्रतिज्ञाजन्यशाब्दबोधेऽसत्वेनाव्याप्त्युपादानसार्थक्यमितिवा २९६

च्यं ॥ स्वस्यस्वधर्मितावच्छेदकतापत्ताद्द्रव्यत्वव्याप्यसंयोगसमानाधिकरणधर्मावच्छिन्नविशेष्यतानिरूपितप्रकारतायाःसंयोगसमानाधिकरणधर्मानंगीकारात् ॥ अन्यथातदुभयोपादानेपिप्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधूमवान्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्त्यापत्तेः ॥ तादृशपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितधूमनिष्ठविषयतानिरूपिताधिकरणनिष्ठविषयतानिरूपितव्यापकत्वविशिष्टवाच्यत्वनिष्ठविषयतात्वस्यापिप्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेनतद्वृत्तिद्वेषयताशून्यत्वस्यतत्प्रतिज्ञाजन्यशाब्दबोधेऽसत्वात् ॥ नचानुमितौतज्जनकीभूतपरामर्शेवाप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनिवेशप्रयोजनविरहेणेदंत्वावच्छिन्नविशेष्यकद्रव्यत्वविधेयकानुमितिजनकेदंत्वावच्छिन्नविशेष्यकद्रव्यत्वव्याप्यसंयोगत्वावच्छिन्नप्रकारकपरामर्शनिष्ठजनकतायामवच्छेदकीभूतापंचमीसंयोगत्वावच्छिन्नव्यापकत्वविशिष्टद्रव्यत्वविषयतातंनिष्ठविषयतात्वस्यापीदंत्वावच्छिन्नोद्देश्यकद्रव्यत्वविधेयकानुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेनतद्वृत्तिद्वेषयताशून्यत्वस्यतत्राभावादितित्राव्याप्तिवारणायअनुमितौहेतुतावच्छेदकावच्छिन्नहेतुकत्वनिवेशलाभायप्रकृतहेतुतावच्छेदकनिवेशनं ॥ तथाचतादृशानुमितिजनकप्रकृतहेतुतावच्छेदकीभूतगुणत्वावच्छिन्नप्रकारकपरामर्शनिष्ठजनकतायामवच्छेदकीभूतापक्षविशेष्यतानिरूपितगुणत्वावच्छिन्नविषयतातन्निरू

पिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितायापंचमीगुणत्वावच्छिन्नव्यापकत्वविशिष्टविषयतातच्छून्यत्वस्यतत्रसत्वान्नाव्याप्तिः

रवमिदंत्वावच्छिन्नोद्देश्यकोयःगुणत्वावच्छिन्नविधेयताकानुमितिजनकोगुणव्याप्यरूपवानयमितिपरामर्शस्तद्दीयोऽक्रमेणपंचम्यांविषयतायां

रूपव्यापकत्वविशिष्टगुणत्वविषयतात्वंगुणत्वेनस्पर्शविधेयकानुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्तेधिकरणंतद्वृत्तिविषयताशून्यबोध

जनकत्वस्यद्वितीयप्रतिज्ञायामसत्वादव्याप्तिरतःसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्यानुमितौनिवेशलाभायसाध्यतावच्छेदकनिवेशनमिति

वाच्यं॥तथासतिप्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधूमवान्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्तिः॥तादृशपरामर्शीयपर्वतत्वावच्छिन्नविशेष्यता

निरूपितप्रकृतहेतुतावच्छेदकीभूतधूमत्वावच्छिन्नविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितप्रमेयत्वव्यापकत्वविशिष्टवाच्यत्वविषयतात्वस्यतथात्वेनतद्वृत्तिविषयताशून्यत्वस्यतत्राभावात्॥एवंधूमव्यापकालोकसमानाधिकरणधूमवान्पर्वतोवह्निमान्धूमाद्दिहिमत्स्थलीयप्रतिज्ञायामव्याप्तिर्बोध्या॥अनुमितौपरामर्शेचपक्षतावच्छेदकावच्छिन्नविषयकत्वनिवेशेचतादृशपरामर्शीयप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतामारभ्यपंचमीनप्रमेयत्वव्यापकत्वविशिष्टवाच्यत्वविषयतांकिंतुधूमव्यापकत्वविशिष्टवह्निविषयतातच्छून्यत्वस्यतत्रसत्वान्नाव्याप्तिः॥नचैव

मपि संयोगत्वावच्छिन्नहेतुकायागुणत्वावच्छिन्नहेतुकायाद्रव्यत्वव्याप्यसंयोगवद्गुणनिष्ठधर्मवानयंद्रव्यत्ववानित्याद्यनुमितेरेकाकारतयातादृशानुमितिजनकसंयोगत्वावच्छिन्नप्रकारकपरामर्शीयपंचमविषयतामादायाव्याप्तिवारणायावच्छेदकपदोपादानं॥तथाचगुणत्वावच्छिन्नप्रकारकपरामर्शीयपंचमनिष्ठविषयतामादायनाव्याप्तिरितिवाच्यं॥संयोगत्वावच्छिन्नहेतुकतादृशानुमित्यप्रसिद्धेः॥द्रव्यत्वव्याप्यसंयोगवद्गुणनिष्ठधर्मवानयंद्रव्यत्ववान्संयोगादित्यादिन्यायप्रयोगाभावादतएवदीधितिकृतापिवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यादिकन्तुनन्यायप्रयोगःइत्युक्तमेवंचकथंभट्टाचार्याणामनुगमप्रकारःसंभवतीतिचेदत्रोच्यते॥तादृशन्यायप्रयोगाभावेनसंयोगत्वावच्छिन्नहेतुकपरार्थानुमितेरप्रसिद्धेपिअनुमितिपदेनस्वार्थानुमितिपरार्थानुमितिसाधारणानुमितित्वावच्छिन्नस्यैवविवक्षणीयतयासंयोगत्वावच्छिन्नहेतुकतादृशस्वार्थानुमितेःप्रसिद्धतयातांमादायाव्याप्तिवारणायहेतुतावच्छेदकनिवेशः॥तथाचद्रव्यत्वव्याप्यसंयोगवद्गुणनिष्ठधर्मवानयंद्रव्यत्वव्याप्यसंयोगवानितिपरामर्शस्यगुणत्वावच्छिन्नाप्रकारकत्वेपितादृशधर्मवानयंद्रव्यत्वव्याप्यगुणवानितिपरामर्शस्यैवतथात्वेनतादृशपरामर्शीयनिरुक्तपंचमविषयतांशून्यशाब्दबोधजनकत्वस्यतत्रातिव्याप्तिवारणायांसत्यांनाव्याप्तिरेवंगुणव्याप्यरूपवानयंस्पर्शवान्रूपादित्यादौगुणव्याप्यरूपवानयंगुणवानित्यनुमितिजनकपरामर्शमादायाव्याप्तिरतःसाध्यतावच्छेदक

निवेशः॥ वस्तुतस्तुपक्षतावच्छेदकधर्मानधिकरणतायाःपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यत्वानिरूपितत्वमित्येतत्सूचनायतदनुसरणं॥ तथाहिहेतु- ग-अव-
व्यापकत्वविशिष्टसाध्यविषयतासाध्याभावव्यापकत्वविशिष्टहेत्वभावविषयत्वयोनताडूयेणनिवेशः॥ किंतुनिरुक्तपंचमविषयतात्वेनरूपेणसातु
हेतुव्यापकत्वविशिष्टसाध्यविषयतासाध्याभावव्यापकत्वविशिष्टहेत्वभावविषयतापतदन्यावाभवतुपरंतुपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्य
तित्वादिकमेणपंचमविषयतात्रात्यानतुयथाकथंचित्पंचमविषयतेत्येतत्सूचनायतदुपादानं॥ उपात्तेचतस्मिन्नयथापक्षतावच्छेदकावच्छिन्नविशे
ष्यतानिरूपितापंचमीगुणावच्छिन्नसाध्यविषयताभवतितथात्रात्यानतुपक्षतावच्छेदकनिष्ठप्रकारतातस्याःपक्षतावच्छेदकावच्छिन्नविशेष्यता-
निरूपितत्वादितिनिर्व्यूढंभाष्यमतइतिनातिदुरुक्तं॥ वस्तुतस्तुतत्त्वेत्यादिनाविशिष्यान्वयव्यतिरेकव्याप्तिनवगाहित्वनिवेश
कल्येपिगदाधरसंमतदीधितौवाकारामावेपित्त्वयंविशिष्यापितदवगाहित्वस्येत्यभिधानादेवंचतत्कल्पएवव्याप्तिप्रदर्शनिपरोयंग्रंथः॥ नत्वनुगम
पक्षइतित्वं॥ सत्यंतोत्तरेति॥ मूलोक्तप्रतिज्ञालक्षणघटकीभूतसत्संतादुत्तरेत्यर्थः॥ तेनजनकत्वेसतीत्यस्यनत्यागः॥ तिङ्-र्थस्येति॥ स्वर्गकामो
यजेतेत्यादौविध्यर्थकलिङ्प्रत्ययःतिङ्रूपस्तदर्थइष्टसाधनत्वंतस्यधात्वर्थेभानादितिभावः॥ द्वितीयांतनामार्थेति॥ स्तोकंपचतीत्यादावित्यादिः॥ २९८

आधेयत्वकर्मत्वादीति॥ भूतलेघटस्तंडुलंपचतीत्यादावाधारतावद्भूतलवान्यटःकर्मतांतंडुलवान्याकडेवबोधःस्यात्तत्रचदर्शितव्युत्पत्तिविरोधइत्याशयः॥ भूतलेघटइत्यादौतुसप्तम्यर्थेअधिकरणत्वंतत्रघटान्वयोघटान्विताधिकरणत्वस्यभूतलेऽन्वयइतिप्रत्ययार्थस्यविशेषणत्वस्वीकारेणदर्शितव्युत्पत्तिविरोधइत्याशयेनशंकते॥ नचेति॥ नोक्तातिप्रसंगः॥ भूतलंघटइत्यादितोनभूतलवान्घटइतिबोधप्रसंगः॥ शेषप्रतिज्ञाग्रंथेहेत्वग्रंथेचलक्षणंनदृलिखितादधिकलेखनीयाभावान्नदिग्दारस्तत्रैवद्रष्टव्योविस्तरभयान्नात्रलिख्यते॥ ॥इतिमीमांसान्यायपंचाननश्रीमद्राघवाचार्यशिष्यपर्वतेइत्युपनामकरघुनाथकृतौन्यायरत्नाभिधायांगादाधरीपंचवादटिप्पण्यामवयवग्रंथः॥ ७. ॥

अथपक्षतायंथांतर्गतसंशयपक्षतादिविचारः॥ ॥व्याप्यनंतरंपक्षधर्मतानिरूप्यतइतिमूलं॥ तत्र व्याप्तिपदस्यव्याप्तिस्वरूपनिरूपणार्थकतयाव्याप्यनंतरमित्यस्यव्याप्तिस्वरूपनिरूपणध्वंसाधिकरणकालवृत्तीत्यर्थस्तत्रनिरूप्यतइत्युत्तरलक्षणादिप्रकारकधर्मनिरूपणानुकूलव्यापारनिरूपणपूर्वकरूपधात्वर्थनिरूपणेऽपेक्षेनान्वयःकर्मव्यापारवशाद्यमपेक्षतेव्याहार्यतदर्थमत्रसमवेततेजोजन्यतासंबंधेनधात्वर्थनिरूपणेऽन्वयस्तादृशनिरूपणस्यज्ञानार्थविषयत्वेनस्यचपक्षधर्मतापदार्थेऽन्वयस्तथाचात्रसमवेतज्ञातेजन्यंयद्व्याप्तिस्वरूपनिरूपणध्वंसाधिकरणकालीना

भिन्नं निरूपणं तद्विषयताश्रयः पक्षधर्मतेत्यन्वयबोधः॥ गादाधर्यमूलेइति॥ मूलनिष्ठो योऽन्यस्यादिवृत्तिनिरूपकताकसं- क पक्ष-
गत्यप्रदर्शनप्र[illegible]संगत्यज्ञानाधीनोन्मत्तबलपिततत्तदंशकाधीनोपेक्षारूपन्यूनतापरिहारस्तदिच्छावान्व्याप्त्यादिनिष्ठसंगतिप्रदर्शनकर्तादीधितिकारस्तादृशप्रदर्शनसमानकालीनमूलावच्छेदकावच्छिन्नानुकूलकृतिमानित्यर्थोलभ्यः॥ ननु व्याप्त्यनुमितिलक्षणेपोद्घातसंगत्याव्याप्तिपक्षधर्मतयोर्निरूपणं[illegible]
[illegible]धर्मतानिरूपकप्रतिबंधकत्वनिरूपणेच्छायास्तन्निरूपणेननिष्टत्वावश्यवक्तव्यत्वरूपावसरसंगतेःपक्षधर्मतायांज्ञानुंशक्यत्वान्नतयोःसंगत्यप्रदर्शनमिति[illegible]चित्॥ व्याप्तिस्वरूपंनिरूप्येत्युक्तावेवतन्निरूपणेच्छायांतन्निरूपणप्रतिबंधकत्वंज्ञायतेनान्यथेत्यनुभवान्नावसरसंगतिलाभइत्याहुः॥ संगत्यप्रदर्शनेनेत्यस्यसंभ[illegible]त्यपरे॥ तन्मतेसंभवद्यावत्संगतिप्रदर्शनसंप्रदायविरोधएवन्यूनतायाश्चार्थोनानुपूर्वोक्तः॥ अनुमितिलक्षणेतिदीधितावनुमितेर्लक्षणमितिषष्ठीतत्पुरुषभ्रमनिरासायाह॥ अनुमितिलक्षणमनुमितिस्वरूपमिति॥ तदनुकूलसंगत्येत्यत्रतृतीयार्थोज्ञानजन्यजिज्ञासाधीनत्वंतस्याव्याप्तिपक्षधर्मतामितिद्वितीयांतोपस्थाप्यव्याप्तिपक्षधर्मताविषयकत्वान्वितनिरूपविवुमित्यत्रधात्वर्थेनिरूपणेऽन्वयः समभिव्याहृतक्रियान्वितसमानकर्तृकत्वसहितसेच्छाधीनेच्छा २९९

विषयत्वंतुमुन्नत्ययार्थः॥अव्ययकृतोभावइत्यनुशासनेनेवप्रत्ययविधानसामर्थ्यादाहेति मतिजानीते इत्यर्थः॥अथवाहेत्यस्य
कालकर्तव्यत्वप्रकारकबोधानुकूलव्यापाररूपप्रतिज्ञारूपतदर्थेनिरुक्तनुमुन्नत्ययार्थान्वयस्तादृशप्रतिज्ञान्वितास्यातार्थकतेराक्षेपप्रथमं
तार्थकर्तर्यन्वयस्तथाचतादृशसंगतिज्ञानजन्यजिज्ञासाधीनंयद्व्याप्तिपक्षधर्मताविषयकनिरूपणंतदिच्छाविषयोऽनुमानकर्तृकोनिरुक्तप्रति
ज्ञानुकूलकृतिमान्मणिकारइतिविशिष्टदीधितिवाक्यार्थः॥यद्यपीति॥यद्यपिपक्षोवह्निमानित्यादौपक्षतायाःकारणतावच्छेदकघटकत्वसं
भवस्तथापिसर्वत्रनतथेतिभावः॥यद्वाअवच्छेदकावच्छेदेनसंगतिप्रदर्शनसंप्रदायमनुरुध्येदं॥तत्रेकाराभावादिति॥श्रूयमाणाचसंव
लितस्यैवप्रतीकधारणनियमादितिभावः॥ननुकुतोयंनियमइत्यतआह॥प्रत्यक्षेत्यादीति॥अथसाध्यवदन्यावृत्तित्वमित्यस्यसाध्यवदिति
प्रतीकधारणान्मूलाचूसहितस्यैवप्रतीकधारणमितिनियमः॥नचयत्राचूसहितस्यैवप्रतीकधारणंतत्रैवायंनियमःसाध्यवदित्यादौहलंतस्यै
वधारणान्नदोषइतिवाच्यं॥एवमपिनन्वनुमितिहेतुभूतेत्यादेर्नित्यादिप्रतीकधारणंस्यात्तेरवारणादितिचेन्न॥यत्रसमासाघटकस्यानु
सहितस्यप्रतीकधारणंतत्रैवदर्शितनियमस्यात्रोपिदोषः॥नचाग्रिमप्रत्यक्षपदस्यप्रतीकधारणमितिभ्रमनिरासार्थेप्रत्यक्षवितीतिप्रतीकधा

रणंसम्यगेवेतिवाच्यं॥ प्रथमोपात्तस्यैवप्रतीकधारणनियमेनतादृशभ्रमासंभवाद्दर्शितनियमस्यैवदीधितिकृत्संमतत्वमविरुद्धं॥संदिग्धःसाध्य
रूपोधर्मोयत्रेतिव्युत्पत्त्येति॥तादृशव्युत्पत्तौयत्रेतिसप्तम्यंतार्थयद्विशेष्यताकत्वसंसर्गाविषयरूपसंदिग्धपदार्थैकदेशसंशयेऽन्वयस्ता-
दृशसंशयविषयस्यसाध्यरूपधर्मेऽन्वयस्तथाचयद्विशेष्यकसंदेहविषयीभूतोसाध्याभिन्नोधर्मइतिविग्रहवाक्याद्बोधःसमासेनुसाध्या
भिन्नधर्मप्रकारकसंशयविशेष्यो लक्षणयोत्तरपदार्थः पूर्वपदंतादृशलक्षणातात्पर्यग्राहकंसंदिग्धसाध्यधर्मपदोत्तरभावप्रत्ययेनतादृश-
संशयविशेष्यत्वंबोध्यतेनचविशेष्यतासंबंधेनतादृशसंशयपर्यवसितंपक्षत्वमित्यर्थः॥धर्मपदसार्थक्यायेति॥साध्यंधर्मोयत्रसाध्यधर्मी
इतिव्युत्पत्तिस्तुयत्रेतिसप्तम्यंतार्थयन्निरूपितत्वस्याधेयतविशिष्टरूपधर्मपदार्थैकदेशाधेयतायामन्वयस्तादृशधर्मपदार्थस्याभेदेनसा-
ध्येऽन्वयस्तथाचयन्निरूपिताधेयतानविशिष्टंसाध्यमितिविग्रहवाक्यार्थःसमासेनुसाध्यनिष्ठधर्मतानिरूपितधर्मितावान्लक्षणयोत्तरपदा
र्थःपूर्वपदंतादृशलक्षणातात्पर्यग्राहकंसाध्यधर्मपदोत्तरभावप्रत्ययेननादृशधर्मित्वंबोध्यते॥संदिग्धंचतत्साध्यधर्मत्वमितिकर्मधारयेइदो
वह्निमान्धूमादित्यादौपक्षेसंदिग्धसाध्यधर्मित्वरूपपक्षत्वमप्रसिद्धंस्यादितःस्वस्मिन्निति॥तथाचसंदिग्धंसाध्यधर्मित्वंयत्रेतिव्युत्पत्तौव

द्विशेष्यकसंदेहविषयीभूतंसाध्यधर्मित्वमितिविग्रहवाक्यार्थः समासेतुसाध्यधर्मित्व[illegible]संशयविशेष्योलक्षणयोत्तरपदार्थः पूर्वपदंतात्पर्यग्राहकंभावप्रत्ययेनतादृशसंशयविशेष्यत्वंविशेष्यतासंबंधेनसाध्यधर्मित्वप्रकारकसंशयवत्वंपक्षत्वमितिपर्यवसितं॥ साध्येति॥साध्ये संदिग्धंधर्मत्वंयस्येतिव्युत्पत्त्यासमभिव्याहृतार्थसाध्यविशेष्यताकत्वस्यसंशयविषयरूपसंदिग्धपदार्थैकदेशसंशयेऽन्वयोयस्येतिषष्ठ्यंतार्थयन्निरूपितत्वस्याधेयत्वरूपेधर्मत्वेऽन्वयस्तथाचसाध्यविशेष्यकसंदेहविषयीभूतंयन्निरूपितंधर्मत्वमितिविग्रहवाक्याद्बोधःसमासेतुयन्निरूपितधर्मत्वप्रकारकसंशयविशेष्यंलक्षणयोत्तरपदार्थः पूर्वपदंतात्पर्यग्राहकंभावप्रत्ययेनतादृशसंशयविशेष्यत्वंविशेष्यतासंबंधेनयन्निरूपितधर्मत्वप्रकारकसंशयवत्वरूपंपर्यवसितंपक्षत्वमितिलभ्यतइतिज्ञेयं॥पर्यवसितकार्यकारणभावमाहेवंचेति॥पर्वतत्वसामानाधिकरण्येनवह्निसाध्यकस्थलीयकार्यतावच्छेदकस्यनीलपर्वतोवह्निमानित्यनुमितिसाधारणनयातादृशानुमितेश्चतादृशपर्वतोवह्निमान्नवेतिसंशयाभावेपिनीलपर्वतोवह्निमान्नवेतिसंशयादुत्तरव्यतिरेकव्यभिचारइतिकार्यतावच्छेदककोटौपर्वतत्वावच्छिन्नत्वमनिवेश्यशुद्धपर्वतत्वावच्छिन्नेति॥पर्वतत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपितेतिदर्थः॥जातित्वेनपर्वतत्वावगाहित्वेनानुमितिमादायत

द्दोषतादवस्थ्यमतोप्रतियोगिभूतावच्छेदकतायांनिरवच्छिन्नत्वनिवेशः॥ यद्यपिजातिमान्वह्निमानितिनिश्चयसाधारणताद्दशानिश्चयत्वव्याप

कत्वस्यपर्वतोवह्निमान्नवेतिसंशयप्रतिबंधकतायामसत्ताद्दसंभवइतिकारणतावच्छेदकेऽपिभुद्दत्वनिवेशोऽवश्यकइतितन्निवेशाक

थनेनन्यूनतासंभाव्यतेतथापितत्रविशेष्यतायांपर्वतत्वनिष्ठनिरवच्छिन्नावच्छेदकताकत्वनिवेशेनाप्यसंभववारणसंभवात्पर्वतत्वनिष्ठनिर

वच्छिन्नावच्छेदकतानिरूपकत्वरूपभुद्दपर्वतत्वावच्छिन्नत्वनिवेशेप्रयोजनाभावइतितन्निवेशाकथनमितिध्येयं॥ कार्यतावच्छेदककोटौ

भुद्दसंयोगसंबंधावच्छिन्नत्वनिवेशःपर्वतत्वसामानाधिकरण्येनवह्निसाध्यकेऽवच्छेदकावच्छेदेनानुमितेरपिकार्यतावच्छेदकाक्रांततत्ता

त्तस्याश्चताद्दशपर्वतत्वावच्छेदेनवत्त्वभावावगाहिसंशयंविनापिपर्वतत्वसामानाधिकरण्येनवत्त्वभावसंशयादुसत्याव्यतिरेकव्यभिचारइतित

न्निवेशःसंयोगत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वनिरूपकसंयोगनिष्ठसांसर्गिकविषयतावच्छेदकताकत्वंतदर्थः॥ यत्तुसंयोगेनवह्निसाध्य

केसंयुक्तसंयोगेनवत्त्वनुमितेरपिकार्यतावच्छेदकाक्रांततयातस्याश्चताद्दशसंयोगेनवह्निमान्नवेतिसंशयाभावेपुसत्त्वेव्यतिरेकव्यभिचारइ

तिकार्यतावच्छेदकेभुद्दसंयोगावच्छिन्नत्वनिवेशःकिंचिन्निष्ठसांसर्गिकविषयत्वनिरूपितसंयोगनिष्ठसांसर्गिकविषयतानिरूपकत्वंतदर्थइति

तदसत्॥ परंपरासंबंधेनविशिष्टबुद्धौपरंपरा घटकविशेष्यीभूतसंसर्गवि[illegible]वशेष्यतानिरूपितत्वस्यतद्घटकप्रकारीभूतसंसर्गवि
षयतायांप्रकारतानिरूपितत्वस्यैवस्वीकृतत्वाच्छुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपि[illegible]नेष्टसंसर्गतानिरूपिकायाश्शुद्धवह्नित्वाव
च्छिन्नविधेयतातच्छान्त्यनुमितित्वस्यकार्यतावच्छेदकोपगमेनवदर्शितव्यभिचारवारणात्॥ एवंशुद्धवह्नित्वावच्छिन्नविशेषपर्वतःशुद्ध
वह्निमानित्यनुमितेःपर्वतपक्षकवह्निसाध्यकस्थलीयकार्यतावच्छेदकाक्रांततयातस्याश्चतादृशपर्वतोवह्निमान्नवेतिसंशयाभावेपिपर्वत
शुद्धस्वह्निमान्नवेतिसंशयादुत्तत्वाव्यतिरेकव्यभिचारइतितन्निवेशः॥ वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपकत्वंत
दर्थः॥ जातित्वेनवह्नित्वावगात्यनुमितिमादायतद्दोषइतिप्रतियोगिभूतावच्छेदकतायांनिरवच्छिन्नत्वंविशेषणं॥ नतुस्वरूपसंबंधविशे
षइति॥ अवच्छिन्नत्वघटकमवच्छेदकत्वंप्रकारतायांनिरूपणतायांविषयतावच्छेदकत्वादिरूपंमूलाद्यादौप्रतीयमानदैशिकावच्छेदकत्वादि
रूपंचनेत्यर्थः॥ सकलसाधारणवह्नित्वावच्छिन्नवत्तानिश्चयत्वेनैवप्रतिबंधकत्वकल्पनादिति॥ अथपर्वतोवह्निमान्महानसीय
वह्निमान्चत्वरीयवह्निमानित्यादिनिश्चयसाधारणवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेनकुतोहेतुतादृशनिश्चयत्वेनैकमतिबंधक

लेनादृशनिश्चयानां॥तद्धि नवह्निसामान्याभावप्रकारकत्वेसतिवह्नित्वावच्छिन्नप्रकारताकत्वंमहानसीयवह्निमान्वापर्वतइतिसंशयस्यापिव
ह्निनिश्चयत्वापत्तेः॥ननु वह्नित्वव्याप्यधर्मावच्छिन्नप्रतियोगिताकाभावत्वेनवह्नित्वनिरूपिताकप्रतियोगिताकाभावत्वेनवावह्निसामा
न्याभावनद्विशेषाभावाननुगमप्रसक्तादृशाभावत्वविशिष्टाप्रकारकत्वेसतिवह्नित्वावच्छिन्नप्रकारताकत्वमेववह्नितावच्छिन्नवत्तानिश्चयत्वमनुग
तमितिनोक्तदोषइतिवाच्यं॥चत्वरीयवल्यभाववान्महानसीयवह्निमानितिनिश्चयस्यासंग्रहापत्तेरितिचेन्न॥स्वविशिष्टाधि[illegible]स्व
निरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितविशेष्यत्वीयत्वोभयसंबंधेनवह्नित्वावच्छिन्नप्रकारताविशिष्टाधि[illegible]नवह्नित्व
महानसीयवह्नित्वाद्यवच्छिन्नवत्तानिश्चयसाधारणमनुगतं वह्नित्वावच्छिन्नवत्तानिश्चयत्वंसुवचंप्रथमसंबंधघटकमधिकरणतायां-
स्वंविशेष्यंचस्वावच्छेदकधर्मपर्याप्तावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपित-
विशेष्यत्वीयत्वंस्वनिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितविशेष्यत्वीयत्वोभयसंबंधेन॥स्वावच्छेदकेत्यनेनस्वरूपसंबंधेनस्वावच्छेद
ताश्रयस्यैवविवक्षणान्महानसीयवह्निमान्वह्निसामान्याभाववान्वेतिसंशयस्यस्वावच्छेदकवह्नित्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभाव

प्रकारकत्वेनतन्निष्ठाधिकरणतायांनोक्तोभयसंबंधेनवह्नित्वावच्छिन्नप्रकारतावैशिष्ट्यान्यत्वमितिननस्यवह्नित्वावच्छिन्नवत्तानिश्चयत्वं॥महा-
नसीयवह्निमान्नवेतिसंशयस्यमहानसीयवह्नित्वावच्छिन्नप्रकारतारूपस्वपदार्थवह्नित्वावच्छिन्नप्रकारतायामुभयमप्यवच्छेदकंनत्वर्थावच्छे
दकताकप्रतियोगिताकमहानसीयवत्त्वभावप्रकारकत्वात्तन्निष्ठाधिकरणतायांनोक्तोभयसंबंधेनवह्नित्वावच्छिन्नप्रकारतावैशिष्ट्याधिकरणतान्य
त्वमितिनद्युदासः॥महानसीयवह्निमान्नवात्वत्वरीयवह्निमानित्यांशिकनिश्चयेचत्वरीयवह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वीयाधिक
रणत्वेवतादृशीतितत्रतन्निश्चयत्वोपपत्तिः॥जन्यतासंबंधेनेच्छावदन्यत्वमेवानाहार्यत्वमनुगतंसुवचमाहार्यज्ञानेइच्छायाहेतुत्वायगमात्॥ननुच
सर्वस्येवज्ञानस्येश्वरेच्छाजन्यत्वेननदन्यज्ञानाप्रसिद्धिरितिवाच्यं॥जन्यतावच्छेदकज्ञानत्ववत्संबंधेनेच्छाभाववत्त्वस्यविवक्षितत्वादीश्वरे-
च्छायाःकार्यत्वावच्छिन्नंप्रत्येवहेतुतयाज्ञानत्वस्यतज्जन्यतानवच्छेदकत्वेनानुपपत्यभावात्॥वस्तुतस्तुसमवायसंबंधावच्छिन्नेच्छानिष्ठजन
कतानिरूपितजन्यतावत्त्वमेवतत्॥ईश्वरेच्छायाविषयतासंबंधेनैवहेतुत्वान्नतादृशज्ञानाप्रसिद्धिः॥अथैवमप्यप्रमाण्यज्ञानानामननुगतानामेवो
त्पत्तकत्वान्नवह्निमान्महानसीयवह्निमानित्यादिसकलनिश्चयसाधारणमेकंप्रतिबंधकत्वंसंभवतीतिचेन्न॥विशेष्यत्वैकक्षणावच्छिन्नेकात्मवृत्ति-

स्वरूपसामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकतत्तद्प्रामाण्यग्रहाभावविशिष्टवह्निमत्तानिश्चयत्वेनतत्तद्भ्रामकप्रतिबंधकत्वमित्यभि- क पक्ष
प्रायः॥ अथैवमपिमहानसीयवह्निमत्तानिश्चयस्यमहानसीयवह्निसामान्याभाववत्ताबुद्धिप्रतिबंधकत्वेप्रतिबध्यतावच्छेदकंयद्महा
नसीयवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभाववत्ताज्ञानत्वंतदासुंदरमहानसीयवह्न्यभाववत्ताज्ञानस्यापितत्प्रतिबध्यत्वापत्तिः॥ यदि
त्वमहानसीयवह्नित्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभाववत्ताज्ञानत्वंतदाप्येकत्रापर्याप्तस्योभयत्रापर्याप्तत्वमितिन्यायेनसुंदरमहान
सीयवह्न्यभाववत्त्वेपिमहानसीयवह्नित्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभाववत्त्वेनतद्दोषतादवस्थ्यमेवातोमहानसीयत्वनिष्ठावच्छे
दकताभिन्नवह्नित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वनिरूपकप्रतियोगिताकाभाववत्ताज्ञानत्वस्यैवतथात्वंवक्तव्यंतथाचवह्निसामान्याभा
ववत्ताज्ञानस्यापिनिरूपेणमहानसीयवह्निमत्ताज्ञानप्रतिबध्यत्वात्तत्प्रतिबंधकतावच्छेदककोटौमहानसीयत्वविषयितायानिवेशावश्यकत
यावह्निसामान्याभाववुद्धिप्रतिबंधकतावच्छेदककोटौमहानसीयत्वविषयतानंतर्भावोक्तिः कथंसंगच्छतइतिचेन्नदोषाय॥ महानसीय
त्वनिष्ठावच्छेदकताभिन्नवह्नित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वनिरूपकत्वघटितरूपस्यमहानसीयवह्निसामान्याभाववुद्धिप्रतिबंधक ३०३

तावच्छेदकत्वेगौरवान्महानसीयत्ववह्नित्वेतद्वित्वावच्छिन्नपर्याप्तिकावच्छेदकताकप्रतियोगिताकाभाववत्ताज्ञानत्वस्यैवतत्प्रतिबध्यतावच्छेदकतयावह्निसामान्याभाववत्ताज्ञानत्वस्यतदनाकांततयातादृशोक्तिःसंगच्छतइत्याहुः॥प्रतिबंधकतावच्छेदकसाध्यनिवेशेत्वाहनवेति॥ अथसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारकत्वनिष्ठस्वरूपसंबंधरूपावच्छेदकताकत्वस्यप्रतिबंधकतायांविशेषणत्वेनैवोक्तदूषणद्वयस्यापिवारणसंभवादनाहार्यत्वादिगुरुतरविशेषणविशिष्टसाध्यवत्ताज्ञानत्वव्यापकप्रतिबंधकतानिवेशोनयुक्तः॥साध्यतावच्छेदकपर्याप्तत्वंचावच्छेदकतायामुपलक्षणंतेनवह्निसाध्यकस्थलेवह्नित्वनिष्ठप्रकारतावच्छेदकतायांमहानसीयवह्नित्वनिष्ठावच्छेदकतासाधारणवह्नित्वनिष्ठावच्छेदकतात्वेनवह्निसामान्याभावबुद्धिप्रतिबंधकतावच्छेदककोटौप्रवेशेपिनवह्निमान्नवापक्षइतिसंशयासंग्रहः॥महानसीयवह्नित्वपर्याप्तत्वोपलक्षितावच्छेदकताकप्रकारतायावह्नित्वनिष्ठावच्छेदकताकप्रकारतात्वेनवह्निसामान्याभावबुद्धिप्रतिबंधकतावच्छेदककोटौप्रविष्टतयानमहानसीयवह्निसाध्यकेवह्निसामान्याभावकोटिकसंशयासंग्रहोपि॥शुद्धवह्नित्वावच्छिन्नसाध्यकेवह्निनपर्याप्तत्वोपलक्षितावच्छेदकताकप्रकारतायांमहानसीयवह्न्यभावबुद्धिप्रतिबंधकतानवच्छेदकतयानमहानसीयवह्न्यभावकोटिकसंशय

स्व संग्रहः॥ अथ महानसीयवह्नित्वनिष्ठावच्छेदकतायाअपिवह्नित्वपर्याप्तत्वमेकधर्मत्वेनोभयत्रापर्याप्तत्वमितिन्यायेनाक्षतमितिकथंवह्नि ग. पक्ष.
साध्यकेमहानसीयवह्न्यभावकोटिकसंशयस्यपक्षतात्वारणमितिचेदत्रकेचित्तु॥साध्यतावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नावच्छेदकताक
त्वमेवप्रकारतायांतत्पर्याप्तावच्छेदकताकत्वं॥नचमहानसीयवह्निमत्ताज्ञानीयप्रकारतावच्छेदकतापर्याप्त्यवच्छेदकापेक्षाबुद्धिविशेषवि
षयत्वरूपद्वित्वशरीरेवह्नित्वविशेषणवह्नित्वत्वादेरपिप्रविष्टतयातद्दोषतादवस्थ्यंशंक्यं॥साध्यतावच्छेदकतापर्याप्त्यवच्छेदकधर्मपर्याप्ता
वच्छेदकताकत्वस्यपर्याप्तिविशेषणत्वेनसामंजस्यादित्याऊः॥वस्तुतस्तु॥किंचिदविशेषितधर्मावच्छिन्नसाध्यकेसाध्यतावच्छेदकनिष्ठनि
रवच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपकत्वस्यस्वानवच्छेदकसंबंधावच्छिन्नत्वस्वसामानाधिकरण्योभयसंबंधेनसाध्यताविशिष्टा
न्यत्वरूपस्यवाप्रकारतायांसाध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वस्यविवक्षणान्नकोपिदोषइतिध्येयं॥यत्तुप्रकारतायाःप्रकारस्वरूपत्व
मतेमहानसीयवह्नेर्महानसीयवह्नित्वावच्छिन्नप्रकारतारूपतयेवशुद्धवह्नित्वावच्छिन्नप्रकारतारूपतयाशुद्धवह्नित्वावच्छिन्नसाध्यकेमहानसीयवह्निमान्नवापक्षइतिसंशयस्यपक्षतात्वापत्तिवारणायान्यूनवृत्तित्वरूपावच्छिन्नत्वनिवेशआदृतः॥नचैवंमहा ३०४

नसीयवह्निसाध्यकमहानसीयवह्निमान्नवेतिसंशयस्यपक्षतात्वानुपपत्तिः साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपकत्वस्यकेवलवह्निमत्तानिश्चयसाधारणत्वादितिवाच्यं॥ साध्यतावच्छेदकावच्छिन्नप्रकारतात्वावच्छिन्ननिरूपकताकत्वविशिष्टनिश्चयस्यैवसाध्यवत्तानिश्चयपदेनविवक्षणात्॥ नचैवंसतिताद्दशप्रकारतात्वावच्छिन्नावच्छेदकताकप्रतिबंधकतायानिवेशोपिसंभवतीतिनमन्मतेप्यनुपपत्तिरितिवाच्यं॥ एवंसतिमहानसीयवह्निसाध्यकमहानसीयवह्निमान्वह्निसामान्याभाववान्वेतिसंशयासंग्रहप्रसंगादितितन्न॥ प्रकारतात्वावच्छिन्ननिरूपकतायाःप्रकारस्वरूपत्वपक्षेउक्तातिप्रसंगस्यदुर्वारत्वा दतिरिक्तत्वपक्षेतदवच्छिन्नप्रतिबंधकतानिवेशसंभवात्॥ यद्यपिभुद्वह्नित्वावच्छिन्नसाध्यकेवह्नि[illegible]भयत्वावच्छिन्नतदभावकोटिकसंशयस्यपक्षतात्वापत्तिवारणायान्यूनानतिरिक्तत्वरूपावच्छिन्नत्वनिवेशःउभयत्वावच्छिन्नाभाववत्ताज्ञानंप्रत्युभयप्रकारकोयंचनाज्ञानस्यापिप्रतिबंधकतायांग्रंथकारानुमतत्वादितितदपिन॥ साध्यतावच्छेदकावच्छिन्नप्रकारताभिन्नप्रकारतावच्छिन्नत्वस्यापिप्रतिबंधकतायांनिवेशनीयत्वात्॥ एवमप्यनाहार्यत्वादिविशेषणविशिष्टज्ञानत्वव्यापकत्वनिवेशापेक्षयालाघवंनिष्प्रत्यूहमेव॥ नचसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारताभिन्नत्वंनिवेश्यतेउतसाध्यतावच्छेदकावच्छिन्नप्रकारताभिन्नत्वंवा॥ नाद्यस्ताद्दशमह

नसीयवह्नित्वावच्छिन्नप्रकारतायाअपिवह्नित्वावच्छिन्नप्रकारतात्वेनवह्निसामान्याभाववुद्धिप्रतिबंधकतावच्छेदकतयावह्निसाध्यकेवह्नि
न्नवेतिसंशयासंग्रहप्रसंगात्॥ नहितीयः॥महानसीयवह्नित्वावच्छिन्नप्रकारतायावह्नित्वावच्छिन्नप्रकारताभिन्नत्वाभावेनवह्निसाध्यकेम
हानसीयवह्निमान्नवेतिसंशायस्यपक्षतात्वापत्तेरितिवाच्यं॥साध्यतावच्छेदकातिरिक्तधर्मावच्छेद्यत्वावच्छिन्नप्रकारतानिष्ठावच्छे
न्यत्वेनप्रतिबंधकतायाःसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारतान्यायापक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारतातदनि
रूपकत्वेनज्ञानस्यवाविशेषणीयत्वात्॥यद्यप्येवमपिवह्निव्याप्यसाध्यकेवह्निव्याप्यधूमवान्नवेतिसंशयस्यपक्षतात्वप्रसंगोवह्निव्याप्यधूमा
भावज्ञानसंप्रतिवह्निव्याप्यवत्ताज्ञानंमिलद्भावादिविशिष्टभिन्नविषयकानुमितिसामग्रीत्वेनप्रतिबंधकंतत्प्रतिबंधकतायांचवह्निव्या
प्यत्वावच्छिन्नप्रकारतायाअवच्छेदकत्वादेवंपर्वतेवह्निसाधनेदेशोवह्निमत्सर्वतवान्नवेतिसंशयस्यपक्षतात्वप्रसंगस्तादृशसंशयीयदेशोव
ह्निमत्सर्वतवानितिनिश्चयनिष्ठप्रतिबंधकतायांपर्वतांशेवह्नित्वावच्छिन्नप्रकारतायाअवच्छेदकत्वात्॥एवंवह्निमान्पर्वतोवान्नवेतिसंशा
यस्यपर्वतेवह्निसाधनेपक्षतात्वप्रसंगःव्यापकत्वरूपावच्छिन्नत्वनिवेशेचेतरकारणासमवधानकालीनवह्निव्याप्यवत्ताज्ञानसाधारणसाध्य

वत्तानिश्चयत्वव्यापकत्वस्यवह्निव्याप्यधूमवान्नवेतिसंशयप्रतिबंधकतायामसत्वान्नप्रथमदोषःपर्वतोवह्निमानितिनिश्चयसाधारणसाध्य
वत्तानिश्चयत्वव्यापकत्वस्यदेशोवह्निमत्त[illegible]वावह्निमान्पर्वतो[illegible]वान्नवेतिसंशयप्रतिबंधक[illegible]द्वितीयतृतीयावपिदोषौसं
भवतस्तथापिपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठप्रकारतात्वावच्छिन्न[illegible]
कायासाध्यतावच्छेदकावच्छिन्नप्रकारताभिन्नप्रकारत्वानिरूपकज्ञाननिष्ठप्रतिबंधकतातन्निरूपितज्ञानत्वावच्छिन्नप्रतिबध्यताशालि
संशयःपक्षतेतिस्वरूपसंबंधरूपावच्छेदकत्वनिवेशकर्त्तीयस मुदितलक्षणार्थ स्तत्रप्रतिबध्यतायांज्ञानत्वावच्छिन्नत्वनिवेशान्नप्रथ
मदोषःसामग्रीप्रतिबध्यतायाप्रत्यक्षत्वेनावच्छेदात्॥ननुभिन्नविषयकानुमितिसामग्र्याःप्रत्यक्षशाब्दात्मकद्विविधानुभवंप्रतिप्रतिबंध
कतयोभयसाधारणभिन्नविषयकानुभवत्वमेवतत्प्रतिबध्यतावच्छेदकमनुभवत्वंतुदुष्टमितिवह्निव्याप्यवानितिज्ञाननिष्ठ
सामग्रीविधयायाप्रतिबंधकतातन्निरूपितप्रतिबध्यतायाअपिज्ञानत्वावच्छिन्नत्वमक्षतमितिवाच्यं॥अनुमितिसामग्रीकालेशाब्दा
दीच्छायांसत्यांशाब्दाद्युत्पत्तयेशाब्दादीच्छायाउत्तेजकत्वावश्यकतयाशाब्दादीच्छाविरहविशिष्टशाब्दत्वादिरूपाननुगतधर्मस्यैव

तत्प्रतिबध्यतावच्छेदकत्वावश्यकतयाऽनुभवत्वस्यतत्प्रतिबध्यतानवच्छेदकत्वात्॥ **अत्रेदंसमाधानं**॥वह्निसाध्यकेमहानसीयवह्निमान्न वेतिसंशयस्यपक्षतात्वापत्तिर्महानसीयवत्त्वाभावविषयकज्ञानंप्रतिवह्निमान्महानसीयवह्निमानितिनिश्चयविशिष्टवह्निमत्तानिश्चयस्य प्रतिबंधकतयातत्प्रतिबंधकतायांवह्नित्वपर्याप्तावच्छेदकताप्रकारतायाअवच्छेदकत्वादतोव्यापकत्वरूपावच्छिन्नत्वनिवेशः॥ **यत्तु** ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्यापिप्रतिबंधकतायांनिवेशान्नोक्तदोषः॥ **नच** अनुयोगितविशेषसंबंधेनाप्रामाण्यज्ञानादिविशिष्टाभावस्यप्रतिबंधकतावच्छेदककोटौनिवेशाज्ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वासिद्धिरिति **शंक्यं**॥स्वरूपसंबंधावच्छिन्नज्ञानवैशिष्ट्यनिष्ठावच्छेदकत्वनिरूपकत्वस्यतदर्थत्वादिति॥ **तन्न**॥अप्रामाण्यज्ञानाभावादेर्विनिगमनाविरहेणैकविशिष्टापरस्यैव प्रतिबंधकतावच्छेदकत्वेनावच्छेद्यसाक्षाद्यद्विशेषणंतदवच्छेदकंतत्त्वविशेषणंत्वावच्छेदकतावच्छेदकंसमनियतनानाधर्मावच्छिन्नप्रतिबंधकतानांचनाभेदइतिमते उक्तस्थलेप्रकारितावच्छिन्नप्रतिबंधकताविशेषेज्ञानवैशिष्ट्यानवच्छिन्नत्वस्यनिरपवादतयोक्तदोषस्यान्यूनवृत्तित्वरूपावच्छिन्नत्वनिवेशमंतरेणाशक्यसमाधित्वेनमतद्वयसाधारण्येनतन्निवेशोभट्टाचार्याभिप्रेतइति॥ **नच** ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकताशून्यवृत्तित्वमे

वज्ञानवैशिष्ट्यानवच्छिन्नत्वमित्यनेनविवक्षणीयमितिनेषदोषइतिवाच्यं॥तथासतिपर्वतेवह्त्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदकालीनवह्नित्वावच्छिन्नसाधनेज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकताशून्यवृत्तित्वस्यसाध्यवत्तानिश्चयवृत्तिप्रतिबंधकतायामसत्वेनपक्षेतादृशसाध्यसंशयासंग्रहप्रसंगः॥न च प्रकृतज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकताशून्यवृत्तित्वविवक्षणान्नेषदोषइतिवाच्यं॥प्रकृतत्वस्य [illegible] नेतरबोधानर्हत्वात्॥ नन्वप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्याभावत्वावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यनिष्ठस्वरूपसंबंधावच्छिन्नावच्छेदकतानिरूपकप्रतिबंधकताशून्यवृत्तित्वविवक्षणान्नोक्तदोषइतिवाच्यं॥तथापिपर्वतोमहानसीयवह्निमद्वृत्तिवह्निमत्पर्वतकालीनवह्निमानित्यादौपर्वतत्वादृशवह्निमान्नवेतिसंशयासंग्रहप्रसंगस्तत्प्रतिबंधकतायास्तादृशप्रतिबंधकताशून्यवृत्तित्वाभावात्॥यद्वा॰नुमितिग्रंथोक्तविषयितयासाध्यव्याप्यहेतुमत्पक्षवज्ज्ञानस्यस्थलविशेषे॰नुमितिकारणतावच्छादृशस्थलेविषयितयासाध्यविशिष्टपक्षवज्ज्ञानत्वेनैवप्रतिबंधकत्वंनत्वसाध्यवत्ताज्ञाननिष्ठप्रतिबंधकतायांसाध्यविशिष्टपक्षस्यैवावच्छेदकत्वेनसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वावच्छिन्नप्रतिबंधकतानिवेशेसंशयात्यसंशयासंग्रहइतिव्यापकत्वरूपावच्छिन्नत्वनिवेशः॥ननुसाध्यविशिष्टपक्षस्यावच्छेदकतास्थलेऽपिविषयतानिरूपितावच्छेदकतायांविषयि

तात्वेनप्रकारितायाअपिसंबंधविधयाऽवच्छेदकत्वान्नतत्रसंशयान्यसंशयासंग्रहइतिवाच्यं॥पूर्वोक्तसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठप्रकारतात्वावच्छिन्नावच्छेदकताकत्वस्यप्रतिबंधकताविशेषणत्वावश्यकत्वेनतत्रसंशयान्यसंशयासंग्रहतादवस्थ्यात्॥उपनीतभानात्मकेति॥लौकिकसन्निकर्षजन्यस्येत्यर्थःलैंगानुमानिकशाब्दादिबाधनिश्चयस्यापिसाध्यवत्तानिश्चयसामान्यनिवर्त्यत्वेपिनक्षतिः॥लौकिकसन्निकर्षजन्यबाधनिश्चयस्यचनसाध्यवत्तानिश्चयसामान्यनिवर्त्यत्वमितिबाधनिश्चयसामान्योपेक्षा॥भ्रमत्वज्ञानाक्रंदितस्येति॥एतच्चबाधनिश्चयरूपप्रतिबंधकत्वादेवनवक्ष्यमाणानुमित्यापत्तिरितिशंकाव्युदासाय॥तथाविधेति॥भ्रमत्वज्ञानाक्रंदितेत्यर्थः॥अनुमित्यापत्तिरिति॥अनुमित्यनंतरमपीत्यादिः॥संशयस्यपक्षतात्वमतेसिद्धेरप्रतिबंधकत्वादितिभावः॥अनुगतस्यापीति॥पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठप्रकारतात्वावच्छिन्नावच्छेदकताकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयित्वमनुगतंबाधत्वं॥विशेष्यतायांमुख्यत्वस्यावच्छेदकतायांप्रकारतात्वावच्छिन्नत्वस्यनिवेशाच्चनपर्वतेवह्निसाधनेदंशोवह्निमत्सर्वतोवान्नवावह्निमान्पर्वतोघटवान्नवेत्यनयोःसंशययोःपक्षतात्वप्रसंगः॥यथाश्रुतेतादृशपक्षताघटकतादृशबाधत्वे-

चनादृशप्रकारतानिष्ठावच्छेदकताकप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वमपिविशेषणंदेयंतेननवह्निसाध्यकेसाध्यवत्ताज्ञानप्रतिबंधक
तावच्छेदकवत्यभावव्याप्यत्वावच्छिन्नविषयित्वावच्छिंनप्रतिबंधकतानिरूपितप्रतिबध्यताशालिनिवत्यभावव्याप्याभाववान्पर्वतःधर्वतोवत्यभाववां
श्चेतिसमूहालंबनस्यपक्षतात्वापत्तिःसाध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकत्वनिवेशाच्चनवह्निव्याप्यसाध्यकेवह्निमान्वेतिसंशयस्यपक्षतात्वाप
निरपि॥ अथनिरुक्तबाध त्व घटकसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठप्रतिबध्यतावच्छेदकत्वंयदिस्वरूपसंबंधरूपंतदासंयोगेनवह्निसा
ध्यकेसाध्यतावच्छेदकसंयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकदेशिकविशेषणता
संबंधावच्छिन्नवत्यभावत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबंधकताकत्वस्यसामानाधिकरण्येनवह्निकोटिकसंशयेऽसत्वान्नदंसंग्रहइत्यन
निरिक्तवृत्तित्वरूपमेवतद्ग्राह्यंतथाचनीलपर्वतःसुंदरवह्निमानित्यादौपर्वतोनीलोनवावह्निःसुंदरोनवेतिसंशयानामपिपक्षतात्वापत्तिरि
तिचेन्मैवं॥सामानाधिकरण्येनावच्छेदकावच्छेदं नचसाध्यकस्थलीयपक्षताशरीरेभुद्दसंयोगसंबंधावच्छिन्नत्वस्यैवप्रकारतायांनिवेशेनतादृ
शप्रकारतानिरूपितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकव्यापकत्वविशिष्टदेशिकविशेषणतासंबंधावच्छिन्नवत्यभावत्व

वच्छिन्नविषयितावच्छिन्नप्रतिबंधक[illegible]नाधिकरण्येनावच्छेदकावच्छेदेनवह्निकोटिकसंशयादौसत्वेनानुपपत्त्यभावादित्यंच ग·पक्ष·
नीलपर्वतःसुंदरवह्निमानित्यत्रनैल्याभावसौंदर्याभावविषयितयो र्विशिष्टपक्षेविशिष्टसाध्यवत्ताज्ञानीयप्रकारत्वावच्छिन्नप्रतिबध्यतानि
रूपितप्रतिबंधकतावच्छेदकत्वाभावेननिरुक्तसंशययोःपक्षतात्व प्रसक्तिः॥निरुक्तबाधत्वनिरूपितनवच्छिन्नत्वमपिस्वरूपसंबंध
रूपमेवात्र्यं नान्यूनदृत्तित्वरूपंप्रयोजनाभावात्तन्निवेशेऽनाद्यार्यत्वादिनिवेशावश्यकतयागौरवप्रसंगाच्च॥नचैवंसतिसामानाधिकरण्येन
वह्निसाध्यकेपक्षतावच्छेदकव्यापकत्वविशिष्टदैशिकविशेषणतासंबंधावच्छिन्नवह्न्यभावत्वावच्छिन्नविषयित्वरूपबाधत्वावच्छिन्नप्रति
बंधकताकत्वस्यावच्छेदकावच्छेदेनवह्निवह्न्यभावरूपकोटिद्वयावगाहिसंशयेऽसत्वात्तस्यपक्षतात्वानुपपत्तिरितिवाच्यं॥अवच्छेदकाव
च्छेदेनवह्निमत्ताज्ञानीयप्रकारतायाअपिवह्नित्वावच्छिन्नसंयोग संबंधावच्छिन्नप्रकारतात्वेन[illegible]वच्छेदेनवह्न्यभाववत्ताज्ञानप्रतिब
ध्यतावच्छेदकेनतदवच्छिन्नप्रतिबध्यताकत्वस्यतादृशसंशयेऽक्षतत्वात्॥निरुक्तबाधत्वघटकप्रतिबंधकताद्वयंबाधत्वावच्छिन्नप्रति
बंधकत्वंचज्ञानविशेष्यानवच्छिन्नंग्राह्यंतेननावच्छेदकधर्मदर्शन[illegible]:॥अथवाऽन्यूनदृत्तित्वरूपमेवबाधत्वनिरूपितमवच्छि ३०८

न्तत्वं प्राप्तं॥ न च पक्षः साध्याभाववान्साध्यं पक्षनिष्ठाभावप्रतियोगीत्यादिसकलबाधनिश्चयसाधारणनिरुक्तबाधत्वव्यापकप्रतिबंधक
त्वप्रसिद्धिरिति वाच्यं॥ स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताव्याप्यबाधत्वकसाध्यवत्तानिश्चयनिवर्त्यतावच्छेदकविषयिता
कत्वस्यपर्यवसितार्थतयाविवक्षणान्नकोपिदोषइतिदिक्॥ यत्विति॥ पक्षसाध्यवैशिष्ट्यावगाहित्वं॥ पक्षसाध्यविषयतानिरूपित
वैशिष्ट्यविषयिताशालित्वमित्यर्थः॥ तेननपर्वतोवह्न्यभाववान्संयोगश्चेतिबाधसंग्रहः॥ तथात्वादिति॥ साध्यतावच्छेदकसंबंधावच्छि-
न्नाधारतानत्संबंधावच्छिन्नाधेयतान्यतरस्यैववैशिष्ट्यपदेनग्राह्यत्वाद्वह्निमान्नवेत्यादावपितादृशाधारत्वस्यैवसाध्यसंसर्गतेत्यभिप्रायः
तद्विरोधादिति॥ दीधितिकृतामणिकृत्प्रकारएवाहतइतिभावः॥ नन्विदमयुक्तंदीधितिकृतामणिकृत्प्रकारसदृशप्रकारांतरमेवसंगृहीत
मितिमणिकारसंगृहीतसंज्ञायांग्रंथेपिनक्षतिरित्यत आह॥ वस्तुनस्त्विति॥ उभयत्वावच्छिन्नभेदप्रतियोगित्वस्यकेवलान्वयितयातदभाव
रूपकोट्यप्रसिद्धेः॥ साध्यतावच्छेदकावच्छिन्नेतादृशभेदप्रतियोगित्वकोटिकसंशयस्याप्रसिद्धानतस्यपक्षतात्वंसंभवतीत्यतोसंशयांत
रस्यपक्षतात्वंदर्शयति॥ तत्रेति॥ केवलान्वयिसाध्यकानुमानविशेषेतादृशविशेषणास्वंप्रदर्श्यव्यतिरेकिसाध्यकानुमानविशेषेतदप्र

सिद्धिमाह॥ एवमिति॥ सिद्धसाधनस्थलेति॥ सिद्धिदशायामित्यर्थः॥ वह्निव्याप्याभावाभाववानिति॥ वह्निव्याप्यवत्तानिश्चयस्यवह्निव्याप्यवा
ग-पक्ष-
र्वतःपर्वतोवह्निमान्वेतिसंशयंप्रतिकार्यसहभावेनविरोधित्वादेतावदनुधावनं॥ तदुक्तावुद्देतदभावव्याप्यत्वावच्छिन्नप्रकारताकज्ञानस्यैवविशेष
३०९
धर्मदर्शनविधयाविरोधित्वंनतुतदभावव्याप्याभावाभावत्वावच्छिन्नप्रकारताकज्ञानस्यमानाभावादितिभावः॥ यत्विति॥ वह्निव्याप्यसाध्यकेव
ह्नित्वेनवह्निव्याप्यावगाहिवह्निमान्वेतिसंशयनिष्ठप्रतिबध्यतायावह्निव्याप्यरूपसाध्यनिष्ठविषयतायाघटितधर्मावच्छिन्नत्वात्तद्धीप्रतादवस्थ्य
मतोसाध्यविषयताघटितधर्मावच्छिन्नत्वमनिवेश्यसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नत्वनिवेशनं॥ पक्षसाध्यभेदेनपक्षता
याभेदाद्भावसाध्यकस्थलेपक्षतायारीत्यासाध्यतावच्छेदकावच्छिन्नविषयताघटितेत्यादिविशेषणंप्रतिबध्यतायांनदेयंवह्न्यभावसाध्यकेवह्निभा
न्वेवेत्यादिसंशयस्यासंग्रहेइष्टापत्तिर्वह्न्यभाववान्नवावह्न्यभाभावान्नवेत्यादिसंशायानामेवतत्रपक्षतात्वोपगमादित्याशयेनदूषणांतरमाह
॥ यत्रचेति॥ अत्रेदंचिंत्यं॥ यथाश्रुतेतन्मतपरिष्कारेमहानसीयवह्निसाध्यकेमहानसीयवह्निमान्वह्निसामान्याभाववान्वेतिसंशायासंग्रह
स्तन्निष्ठवह्निसामान्याभावविषयकतावच्छिन्नप्रतिबध्यतायासाध्यतावच्छेदकमहानसीयवह्नित्वावच्छिन्नविषयताघटितधर्मानवच्छिन्नत्वात्॥ न ३०९

त्वसाध्यतावच्छेदकतावच्छेदकतावच्छेदक

प्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वयोरप्रवेशनीयतयाबाधप्रतिबध्यतावच्छेदकस्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्र
तिबंधकतानिरूपितायासाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नाप्रतिबध्यतातच्छालिसंशयःपक्षते
तिसमुदितार्थः तत्रस्वनिष्ठविषयितायांबाधप्रतिबध्यतावच्छेदकत्वविशेषणस्योक्तं वह्निव्याप्यसाध्यकेवह्निमान्नवापक्ष इतिसंशयस्यपक्ष
तात्वापनिवारणरूपमेववेदितव्यं॥ बाधप्रतिबध्यतावच्छेदकविषयितायांस्वनिष्ठत्वानुपादानेवह्निसाध्यकेपर्वतोवह्न्यभाववानितिज्ञानंअति
व्याप्तिरतल्लक्षणनिवेशः॥ बाधनिश्चयनिवर्त्यत्वेसतिसाध्यवत्तानिश्चयनिवर्त्यत्वरूपदलद्वयोपादानेवह्निव्याप्यसाध्यकेवह्निव्याप्याभावाभाववान्य
र्वतःपर्वतोवह्निमान्नवेतिसंशयातिव्याप्तिः॥ बाधप्रतिबध्यतावच्छेदकस्वनिष्ठविषयित्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायाशालिसं
सतिसाध्यवत्तानिश्चयनिवर्त्यत्वमितेतावद्दलद्वयोपादानेवह्निसाधनेवह्न्यभाववान्पर्वतःपर्वतोमहानसीयवह्निमान्नवेतिसंशयस्यपक्षतात्वापनिः
॥बाधप्रतिबध्यतावच्छेदकस्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायांसाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतानि
रूपितत्वनिवेशेननिरुक्तसंशयस्यपक्षतात्वनिवारणेपिपर्वतेवह्निसाधनेवह्निःपर्वतइत्तिर्नवेतिसंशयासंग्रहस्तन्निष्ठबाधप्रतिबध्यतावच्छेद

कपर्वतवृत्तित्वविशिष्टवह्नित्वावच्छिन्नविषयिताघटितपर्वतवृत्तित्वविशिष्टवह्निनिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितपर्वतवृत्तित्वाभावविषयकत्वावच्छिन्नप्रतिबध्यतायांसाध्यवत्तानिश्चयत्वव्यापकसाध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितत्वस्यप्रतिबंधकतावच्छेदकभेदेननिरूपकप्रतिबंधकताभेदात्तद्भेदेनच निरूपकप्रतिबध्यताभेदावश्यकतयाअसत्वादनोताद्दशप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशस्तथापर्वतोवह्निमान्पर्वतवृत्तिर्वह्निरितितद्विधनिश्चयप्रतिबध्यतावच्छेदकपर्वतवृत्तित्वाभावविषयकबुद्धित्वस्यैकत्वेनतत्संग्रहः॥ अथात्रकल्पेमहानसीयवह्न्यभावसाध्यकेपर्वतोमहानसीयवह्निमान्वह्निसामान्याभाववान्वेतिसंशयासंग्रहः॥महानसीयवह्निमत्तानिश्चयरूपबाधप्रतिबध्यतावच्छेदकस्वनिष्ठवह्निसामान्याभावत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायासाध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकमहानसीयवह्नित्वावच्छिन्नविषयितायाघटितधर्मानवच्छिन्नत्वादितिचेन्न॥साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमनिवेश्यसाध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकस्वनिष्ठविषयितावच्छिन्नत्वस्यसंशयत्वघटकप्रतिबध्यतायांनिवेशनीयतयातादृशसंशयनि[illegible]सीयवह्नित्वावच्छिन्नविषयितायाएववह्नित्वावच्छिन्नविषयितात्व-

महानसीयवह्नित्वावच्छिन्नविषयितात्वाभ्यांद्विविधप्रतिबध्यतावच्छेदकतयातांमादायनिरुक्तसंशयसंग्रहात्॥स्वनिष्ठस्वनिवेशाच्चतत्रैववह्निमान्नवेति संशयेमहानसीयवह्निमत्तानिश्चयरूपबाधनिश्चयप्रतिबध्यतावच्छेदकवह्निसामान्याभावत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबंधकतानिरूपि तप्रतिबध्यतायावह्निमान्महानसीयवह्निमानित्यादिसकलनिश्चयसाधारणवह्नित्वावच्छिन्नविषयित्वावच्छिन्नायाःसाध्यवत्तानिश्चयप्रतिबध्यता वच्छेदकमहानसीयवह्नित्वावच्छिन्नविषयित्वावच्छिन्नायाःसत्वेपिनतस्यपक्षतात्वापत्तिर्महानसीयवह्नित्वावच्छिन्नविषयितायाःस्वनिष्ठत्वनि रहात्॥यद्वासाध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकविषयितायांसाध्यवत्तानिश्चयप्रतिबंधकतावच्छेदकत्वविवक्षणान्नतस्यतत्स्थलेपक्षतात्वप्रसं गः॥वह्निव्याप्याभावाभावत्वेनव्याप्यस्यपृथक्भानेपीति॥वह्निव्याप्यत्वावच्छिन्नप्रकारताकज्ञानस्यैवविशेषदर्शनविधयावह्त्यभाववत्ताबुद्धिप्र तिबंधकत्वमितिनतादृशसंशयस्यपक्षतात्वप्रसक्तिरितिज्ञेयं॥वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वविरहादिति॥अथैवमपिवह्निव्याप्य-साध्यकेवह्निव्याप्याभावाभावत्ववह्नित्वोभयरूपेण वह्निकोटिकस्यवह्निव्याप्याभावाभावात्मकवह्निमान्वह्निसामान्याभाववान्वेतिसंशयस्यपक्षतात्व प्रसंगःस्वनिष्ठवह्नित्वविषयतायावह्निव्याप्याभावाभावत्वावच्छिन्नविषयितेनवापप्रतिबध्यतावच्छेदकतावह्नित्वावच्छिन्नप्रकारतातेनवह्निसामान्या

भावच्चाज्ञानप्रतिबंधकतावच्छेदकत्वाच्चैवं॥ स्वनिष्ठविषयतादृष्टिनियोगाधप्रतिबध्यतावच्छेदकतावच्छेदकोधर्मस्तद्दिशिष्टविषयित्वपर्याप्तावच्छेदकताकत्वेनसंशयत्वघटकप्रतिबंधकताविवक्षणीयानिरुक्तस्थलीयबाधप्रतिबध्यतावच्छेदकतावच्छेदकवह्निव्याप्याभावाभावत्वावच्छिन्नविषयितात्वविशिष्टपर्याप्तावच्छेदकताकत्वस्यनिरुक्तसंशयीयवह्नित्वावच्छिन्नप्रकारकत्वावच्छिन्नप्रतिबंधकतायामसत्वान्नतस्यपक्षतात्वापत्तिःपर्याप्तिनिवेशाच्चनतादृशविषयतात्वरूपधर्मादायतद्दोषतादवस्थ्यं॥ यद्यप्येवंसतिमहानसीयवह्निसाध्यकेमहानसीयवह्निमान्वह्निःसामान्याभाववान्नेतिसंशयासंग्रहःवह्निसामान्याभावबुद्धिप्रतिबंधकतायास्तादृशमहानसीयवह्नित्वावच्छिन्नविषयितात्वविशिष्टानवच्छिन्नत्वात्तथापि॥ बाधप्रतिबध्यतावच्छेदकतावच्छेदकोधर्मइत्यनेनबाधप्रतिबध्यतावच्छेदकतावच्छेदकनाश्रयधर्मविवक्षणान्महानसीयवह्नित्वावच्छिन्नविषयितादृष्टितादृशवह्नित्वावच्छिन्नविषयितात्वविशिष्टावच्छिन्नत्वस्यवत्यभावबुद्धिप्रतिबंधकतायामक्षतत्वेनतादृशसंशयासंग्रहाभावात्॥ अथैवंसतिसाध्यवत्तानिर्णयनिवर्त्यत्वदललभ्यसंशयत्वघटकप्रतिबध्यतायांसाध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वविशेषणस्यवैय्यर्थ्यापत्तेः॥ महानसीयवह्निमान्नेवेतिसंशयस्यमहानसीयवत्यभावबुद्धिप्रतिबंधकतायांतादृशवह्नित्वावच्छिन्नविषयितात्वरूपधर्मविशिष्टपर्याप्तावच्छेदक-

ताकत्वाभावेनवह्निसाध्यकेपक्षतात्वाप्रसक्तेरितिचेन्न॥ वह्निव्याप्याभावसाध्यकेवत्त्वभाववुद्धिप्रतिबंधकतायावह्निव्याप्यवत्तानिश्चयरूपबाधप्र
निबध्यतावच्छेदकतावच्छेदकवह्नित्वावच्छिन्नविषयितात्वविशिष्टावच्छिन्नत्वेनवह्निमान्नवेतिसंशयस्यपक्षतात्वापनिवारणायतद्विशेषणस्यावश्यकत्वात्
॥ननुबाधनिश्चयत्वव्यापकतावच्छेदकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतात्वकत्वरूपबाधप्रतिबध्यतावच्छेदकत्वविवक्षणान्नवह्नि
व्याप्याभावसाध्यकेवह्निमान्नवेतिसंशयस्यपक्षतात्वापत्तिर्वह्यभावविषयकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतात्वस्यवह्निव्याप्यत्वा
वच्छिन्नप्रकारतानिरूपितविशेषदर्शनानात्मकवह्निव्याप्याभावाभावत्वावच्छिन्नप्रकारतानिश्चयसाधारणबाधनिश्चयत्वाव्यापकतानवच्छेदकत्वा
दितिवाच्यं॥तथासतिमहानसीयवह्निसाध्यकेमहानसीयवत्त्वभाववान्नवेतिसंशयस्यपक्षतात्वानुपपत्तेर्महानसीयवह्नित्वावच्छिन्नप्रकारक
महानसीयवत्त्वभावाभावत्वावच्छिन्नप्रकारकबुद्धिंप्रतिवह्निसामान्याभाववत्ताबुद्धेरप्रतिबंधकतयातन्निष्ठमहानसीयवत्त्वभावाभावत्वावच्छि
न्नविषयकत्वरूपत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतात्वस्यवह्निसामान्याभाववत्तानिश्चयसाधारणबाधनिश्चयत्वव्यापकतानवच्छे
दकत्वादनुगतरूपबाधनिवेशकल्पेस्वरूपसंबंधरूपबाधत्वावच्छिन्नत्वविशेषितप्रतिबंधकतायटितबाधप्रतिबध्यतावच्छेदकत्वस्यव्यापकतासं-

बंधेन बाधनिश्चयत्वविशिष्टत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताकत्वरूपस्यबाधप्रतिबध्यतावच्छेदकत्वस्यस्वनिष्ठविषयितायांविवक्षणीयतयावह्निव्याप्याभावसाध्यकेवत्वभावविषयकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतायांबाधनिश्चयत्वावच्छिन्नत्वस्यव्यापकतासंबंधेनबाधनिश्चयत्वंवैशिष्ट्यस्यवसत्वाद्वह्निसामान्याभाववान्वेतिसंशयस्यपक्षतात्वारणायतद्विशेषणावश्यकत्वात्॥बाधप्रतिबध्यतावच्छेदकत्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायांसाध्यवत्तानिर्णयप्रतिबध्यतावच्छेदकावच्छिन्नत्वस्थानेसाध्यवत्तानिर्णयप्रतिबंधकतावच्छेदकावच्छिन्नत्वविवक्षणान्नवह्निव्याप्यसाध्यकेवह्निव्याप्याभावाभावात्मकवह्निमान्वह्निसामान्याभाववान्वेतिसंशायस्यपक्षतात्वापत्तिर्नवातत्रैववह्निव्याप्यधूमवान्नवेतिसंशयस्यपक्षतात्वापत्तिरित्यपिकेचित्॥अथैवमयंमहानसीयवह्निमत्पर्वतकालीनपर्वतीयवह्निमानित्यनुमितौनादृशपर्वतोवह्निमान्नवेतिसंशायस्यपक्षतात्वापत्तिः॥नचपक्षतावच्छेदककोटौपर्वतत्वावच्छेदेनमहानसीयवह्निमत्त्वनिवेशेतादृशपर्वतत्वविशिष्टमहानसीयवह्निमत्तासंशायस्याहार्यत्वान्नत्र्यवातिप्रसंजकत्वात्॥पर्वतत्वसामानाधिकरण्येनतन्निवेशेचतस्यविशिष्टपक्षसाध्यवत्तानिश्चयनिवर्त्यत्वाभावादितिवाच्यं॥तथापितत्रैवपर्वतत्वावच्छेदेनमहानसीयवह्नेःपक्षतावच्छेदकघटकत्वेपर्वतोमहानसीयवह्निमान्न

वेति संशयस्य प्रसक्तापत्तिस्तस्य पर्वतत्वावच्छेदेन वह्न्यभाववत्ता निश्चयात्मकबाधप्रतिबध्यतावच्छेदकमहानसीयवह्नित्वावच्छिन्नविषयित्वावच्छि
न्नप्रतिबंधकतानिरूपितप्रतिबध्यताशालित्वात्तादृशप्रतिबध्यतायाश्च विशिष्टपक्षेसाध्यवत्तानिश्चयत्वव्यापकपर्वतत्वावच्छिन्नेमहानसीयवह्नि
त्वानिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितत्वात्च ॥ नच साध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतायांपक्षेपक्षतावच्छेदकप्रकारकग्रहत्वाव्या
पकत्वविशेषणान्नायंदोष इतिवाच्यं ॥ तथासतिवह्निमत्पर्वतकालीनपर्वतोवह्निमानित्यादौपर्वतोवह्निमान्नवेतिसंशयासंग्रहप्रसंगः ॥ तत्व
तादृशसंशयस्यालक्ष्यत्वंनशंक्यं ॥ तथासतिनीलपर्वतोवह्निमानित्यादावपितस्यालक्ष्यतापत्तौतत्रातिप्रसंगात् ॥ निरुक्तस्थलेपर्वतत्वावच्छेदनवह्नि
पक्षतावच्छेदकघटकत्वविशिष्टपक्षेसाध्यवत्तासंशयस्यानाहार्यस्यासंभवेनपर्वतोवह्निमान्नवेतिसंशयस्यैवपक्षतात्वोपगमस्यावश्यकत्वात्च
नच पक्षसाध्यभेदेनपक्षताभेदाद्वह्निमत्पर्वतकालीनपर्वतपक्षकस्थलेविशिष्टपक्षग्रहत्वाव्यापकत्वंनदेयमितिवाच्यं ॥ एवमपिघटवह्निमत्प
र्वतकालीनपर्वतोवह्निमानित्यादौतादृशविशेषणोपादानेपर्वतोवह्निमान्नवेतिसंशयासंग्रहः ॥ तदुपादानेपर्वतोघटविशिष्टवह्निमान्नवावह्निघ
टोभयवान्नवेतिसंशययोःसंग्रहापत्तिर्वह्निघटवानितिनिश्चयस्यापिघटविशिष्टवत्त्वाभाववत्ताबुद्धौवह्निघटोभयत्वावच्छिन्नाभाववत्ताबुद्धेःप्रतिबं

यकतयातादृशप्रतिबंधकतायाश्चविशिष्टसाध्यवत्तानिश्चयत्वव्यापकत्वादितिचेन्न॥अगत्यातत्रसाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतायां साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितप्रकारत्वानवच्छिन्नत्वस्यनिवेशनीयत्वात्॥अथैवमपिपर्वतोऽभाववत्सर्वतकालीनवह्निमान्नवेतिसंदेहे पर्वतस्तादृशवत्त्वाभावाभाववानभावसामान्याभाववान्वापर्वतइतिसंशयस्यपक्षतात्वापत्तिः॥नच्चसाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतायां साध्यतावच्छेदकप्रकारकयहत्वाव्यापकत्वविशेषणान्नोक्तदोषइतिवाच्यं॥तथासतिवह्निमत्सर्वतकालीनवह्निसाध्यकेपक्षस्तादृशवह्निमान्वह्निसामान्याभाववान्वेतिसंशायासंग्रहप्रसंगादितिचेन्न॥साध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतायांसाध्यतावच्छेदकप्रकारकग्रहत्वव्यापकत्वसाध्यतावच्छेदकावच्छिन्नप्रकारतानवच्छिन्नोभयाभावनिवेशेनसर्वसामंजस्यादितिदिक्॥बाधप्रतिबध्यत्वमात्रनिवेशत्यागबीजमाह॥तत्रेति॥ननुसंशयत्वघटकस्वनिष्ठविषयितायांबाधप्रतिबध्यतावच्छेदकत्वनिवेशेसंशयत्वघटकप्रतिबध्यतायांसाध्यवत्तानिश्चयनिवर्त्यतावच्छेदकावच्छिन्नत्वनिवेशोव्यर्थःपर्वतोवह्निसाधनेघटविशिष्टपर्वतविषयितायांबाधप्रतिबध्यतावच्छेदकत्वविरहेणैववत्त्वाभाववान्पर्वतोघटवान्नवेतिसंशयस्यपक्षतात्वाप्रसक्तेरतआह॥एवंचेति॥अथवेति

स्वघटितेति॥ स्वप्रकारता॥ अत्रस्वपदार्थप्रकारतायांबाधप्रतिबध्यतावच्छेदकत्वंदेयंतेनवह्निव्याप्यसाध्यकेवह्निमान्नवेतिसंश
यव्युदासः स्वघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायांसाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्य
तावच्छेदकावच्छिन्नत्वमपिदेयंतेनवह्निसाध्यकेमहानसीयवह्निमान्नवेतिसंशयव्युदासः॥ स्वघटितधर्मावच्छिन्नप्रतिबंधक-
तानिरूपितायासाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यतद्वच्छेदकत्वस्वाव-
च्छेदकधर्मावच्छिन्ननिरूपितविरोधिविषयतानिरूपितत्वसामानाधिकरण्येतच्चितयसंबंधेनबाधप्रतिबध्यतावच्छेदकप्रका
रताविशिष्टप्रकारत्वंतादृशविषयताविशिष्टविषयत्वंवासंशयत्वंपक्षतात्वमितिफलितंसामानाधिकरण्यसंबंधनिवेशाच्चनपर्व
तोवह्न्यभाववानितिज्ञानेऽतिव्याप्तिः॥ शेषपक्षतायंथेछण्णंभट्टलिखिताधिकलेखनीविशेषांशाभावाद्विस्तरभयादत्रतद्विचारोन
लिखितस्तदनुसंधेयंदुदयालवोविद्वांसः॥ छ ॥ नित्याण्वादिक्रियातत्कर्योर्जीवेभ्योभिन्नईश्वरः॥ ज्ञानाद्यष्टगुणःसायाद्व्यापात्तत्कर्जा
द्विनः॥१॥ न्यायांभोधिनिमज्जनेक्षणसुखायासोढुताच्छस्फुरन्नर्कलेक्षितरम्यरत्नजलसन्मालार्पितावि ष्णवे॥ श्रीशायापिनिपातितामति

नतांतर्कांधकूपस्खलद्वीवाचामधिकंठमल्पमतिभिर्येदारणीयानहि॥२॥कार्ष्णभट्टादिकक्रोडग्रंथक्रोडीकृतिःकृता॥रघुनाथेनालसा
नांतच्छीप्रोपस्थितीच्छया॥३॥विशोधयंतुमल्लोक्तान्विशेषांस्तर्ककर्कशाः॥आर्यामात्सर्यमुत्सार्यदृष्ट्वैतज्जातदस्मयाः॥४॥न्यायाकूपा
रपारंगतमतितरणीन्यस्तखेदैकशून्यान्मान्यान्विज्ञापयामः सविनयमयन्यायरत्नोपबद्धं॥तत्संशोधंतेतुकृतेविधयेसंप्रदा
यंयत्तत्स्यादेवात्रथार्थान्ननिजधिषणामोदितंदर्शनाय॥५॥शाकेबाणषडब्धींदुसंमितेमासिभाद्रके॥रघुनाथेनन्यायरत्नंकृतंहृत्सरे
करोतु॥६॥ ॥इतिमीमांसान्यायपंचास्यश्रीमद्राघवाचार्यशिष्यरघुनाथविरचितायांन्यायरत्नाभिधायांपक्षतायांग्रंथांतर्गतसंशोधनतासमाप्ता॥ ॥
॥न्यायरत्नाभिधगादाधरीपंचवादटिप्पणी॥ ॥शरतुर्यांदुमितेशाकेवर्षाख्यपत्तनेऽन्यायरत्नाख्यायांटिप्पणीयंशिलाक्षरैः॥

ॐ इतिन्यायरत्नंसमाप्तं॥ ॐ

॥ अथन्यायरत्नग्रंथस्यशुद्धिपत्रं ॥

न्याय-शुद्धि

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१	२	सांक	८ जिज्ञासा	प्रयोजकजिज्ञासा
	२	सांक	८ विशेषण	विशिष्ट
	३	सांक	२ यि	र्या
	३	सांक	२ यत्व	यत्वं
	३	सांक	४ श्वास्या	श्वास्य
	४	सांक	८।९ सामान्यधर्मप्रकारक ज्ञानेच्छा	ज्ञानेच्छा
	५	सांक	५ निरूपणआरब्धानार्थ	निरूपणेतत्पदार्थज्ञाना र्थं
	७	निरंक	९ दृनित्वेज्ञानं	दृत्वंज्ञानं
	८	निरंक	७ त्वेःप्र	त्वेःप्र

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
११	सांक	२	कस्य	कत्व
१३	सांक	३	तादृशजनकतेत्यार	तादृशजनकतावच्छेद
			भ्यविवक्षणीयमित्यंत	कविषयतानाश्रयविषय तायांकिंचिद्वच्छिन्नत्वं दत्य
१४	निरंक	५	कूलं	कुलं
१४	सांक	३	तेजस्वी	तेजस्वि
१४	सांक	५	अतेजस्वी	अतेजस्वि
१७	निरं	८	माहा	महा
१७	सांक	४	तत्रचायमभेत्तदः	तत्रचायंमतभेदः
१९	निरं	५	स्वावच्छेदकावछिन्ना	स्वावच्छिन्ना

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१९	निरंक	६	विषयता	विषयत्वा
२१	सांक	४	त्वभिन्ना	त्वभिन्ना
२२	निरं	४	वह्नि।धूम	धूमवह्नि
२६	सांक	१	सबधाद	संबंधाव
२७	निरं	४	वानात्म	तानात्म
२९	निरं	९	उभयत्रेत्यारभ्यज्ञाना संग्रहादित्यंत	घटोद्रव्यभिन्नोमय त्वादित्याद्दोश्चरूप तादृव्यत्वघटितहे षज्ञानासंग्रहप्रसंगाद
२९	सांक	९	तायां	तायां

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
३१	सांक	३		एवमपीत्युत्तरंदुरो वह्निमानित्यादावभा घत्वत्वभावावगा त्यभावघटितदृष्टिज्ञा नाव्यावृत्तत्वभावव दुदेव्याप्तिःकिंचित्ये तावत् लेख्य
३२	सांक	३	पाव	पवि
३२	सांक	४	कालिकसंबंधेनज्ञल वह्नि कमज्ञलात्वित्वा दा	+ + +
३४	सांक	१	मान्नूपा। रूपे	मानूनदृपा। तद्रूपे
३४	सांक	३	त्सव	व्यव
३५	सांक	१	ज्ञाना	ज्ञान
३९	निरंक	२।३	घटत्वेनत्यारभ्यप्रतिः	
३९	निरंक	९	विषय	विषयता
४०	सांक	७	तथा	तथाच
४३	सांक	५	नपि	मपि
४४	निरंक	८	दोषज्ञाने	
४७	निरंक	१	वत्यभावाभावत्वाच्छि	वत्यभावत्वावच्छिन
४८	निरं	३	केपि	क्येपि
५०	निरंक	३	वैशिष्ट्यावच्छिन्न	वैशिष्ट्यानवच्छिन्न
५१	निरंक	४	विशिष्टविषयकनि श्चयविशिष्ट	विशिष्टविषयक
५१	सांक	६	त्वावच्छिन्न	त्वावच्छिन्न
५२	निरंक	२	ताभि	व्यभि
५४	निरंक	९	त्वत्वात्सं	त्ववान्सं
५५	सांक	५	विशिष्टा	विशिष्टविषयकत्वा
५६	सांक	८	नुयोगितावच्छेदक	नुयोगिताक
५७	निरंक	६	यादृशदोष	यादृशदोषे
५८	सांक	१	ष्टत्वस्वा	ष्टत्वस्यत्वा

३२ + कालिकेनसमवायेनचकांचनमयत्वावच्छिन्नवच्छेदकवह्निसाध्यकस्थलीयबाधज्ञानसंग्रहवारणायकांचनमसद्वोवह्निमानित्यादिस्थलीयदोषसंग्राहकयेनसंबंधेनयद्धर्मविशिष्टेयद्धर्मवैशिष्ट्यावगाहित्वंनिविष्टंतत्सं
३२ + बंधावच्छिन्नत्वरूपनिष्प्रकारकत्वंतत्रविशेषणावश्यकत्वेन +

न्याय-शुद्धि-२

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५८	सांक	१	त्वाव्यापकेत्यारभ्यधि शिष्टत्वेति पुनः	
५९	सांक	१	ज्ञानस्य	ज्ञानस्य
५९	सांक	५	सत्व्	सत्वात्
६३	निरंक	१	अत्र	अथ
६३	निरंक	३	ध्येयं	चेन्नयद्रूपनिष्ठविष यतावच्छेदकतासा मान्यस्वरूपसंबंध रूपावच्छेदकत्वनिवे शेनतत्राव्याप्यभावाद्
६६	सांक	८	ज्ञातयो	ज्ञानयो
६७	निरंक	६	व्यापकं	व्यापकतावच्छेदकं

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
६७	निरंक	७	तासामान्यं। व्यापकं	तात्वसामान्यं। व्यापकतावच्छेदक
६९	निरंक	५	दुनय	दुभय
६९	सांक	२	व्यभिचारि	व्यभिचार
७०	सांक	३	क्ताभय। द्दश	क्तोभय। द्देश
७०	सांक	३	क्ताभ	क्तोभय
७८	निरंक	२	तच्छेदक	तदवच्छेदक
७८	निरंक	४	भावभ्र	भावाभ्र
९०	निरंक	५।६	दोषविषयकलौकिके	लौकिकप्रत्यक्षस्यचे
९१	निरंक	४	वद्भद्र। वद्भद्र	वत्सवंत। वत्सवंत
९४	सांक	७	निर्वक्ष्रिरित्यारभ्यभ्र कारका	अनुमितिलाभवंति

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
९६	निरंक	९	घटित	घटितत्व
९९	सांक	५	व्यभिचारि	व्यभिचार
१००	निरंक	१	नप्रयो	मप्रयो
११४	सांक	६	नेनना	नेना
११४	सांक	९	चार्यक	चायक
११५	निरंक	३	तेद्यु	तेद्त्यु
११९	सांक	७	बोधो	बोधा
१२१	सांक	६	धर्मत्वावच्छिन्न	धर्मावच्छिन्न
१२२	निरं	५	रप्रजकता	रप्रयोजकता

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१२२	निरंक	७	अनादृश	अनादृश
१२२	सांक	९	ग्रहे	ग्रहो
१२३	निरंक	७	कत्व	कत्वे
१२६	निरंक	२	शंकेनी	शंक्ये
१२६	निरंक	५	त्वत्व	त्वत्वस्य
१२६	सांक	६	वे	वे
१२७	सांक	१	अनुयो	अनुपयो
१२७	सांक	२	नति	नति
१२९	सांक	६	स्व	स्य

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१३१	निरंक	७	वैशिष्ट	वैशिष्ट्य
१३१	निरंक	७	घटत्व	घटवत्व
१३७	सांक	१८	कचित्त	केचित्तु
१४०	सांक	७	न्यतथा	न्यथातथा
१४२	निरंक	४	काला	काल
१४२	सांक	३	संयोगा	संयोगाभावा
१४४	निरंक	४	संबधनिष्ठ	संबधिनिष्ठ
१४६	सांक	२	नसमाना धिकरणं	नसमानमधिकरणं
१४७	निरंक	२	नन्वित्याद्यवतरणमा	णवतः

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१४८	सांक	८	मभ्युपेत्य	मभ्युपेत्यैव
१५९	सांक	२	तनोति	तनोति
१६४	निरंक	६	ङ्गः	ङ्गः सहसम्बन्धाभाव। [illegible] शसंबंधेनसंध्यवहृ सिद्धान्तमिङ्गस्थावि वक्षितुनशक्यत्वात्
१६८	सांक	५	घटाभाव	घटाभाव
१७२	निरंक	३	विशेषीतीरभूत	विशेषीभूतवीर
१७४	सांक	२	भेदस्यापि	भिन्नस्यापि
१७५	सांक	९	वत्र	वत्र

न्याय-शुद्धि-
३

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१७६	निरंक	५	मतावलंबनेन	मतावलंबनसंभवात्
१८०	निरंक	५	द्रव्यत्वेनमहानसीय	महानसीय
१८०	सांक	६	ज्ञेयत्वं	ज्ञेयत्वत्वं
१८६	सांक	८	नचैवमित्यारभ्य १७ पत्रे ४ पंक्तौ बोध्यमित्यंतं अशुद्धं	
१८८	सांक	६	द्रव्यत्वादित्यादौ	विशिष्टसत्तावान्ना [illegible]
१९२	निरंक	१	विशिष्टान्य	विशिष्ट
१९६	सांक	७	वदति	वदंति
१९९	सांक	८	स्वाभावत्व	स्वाभावत्वरूप
२०४	सांक	३	तदंतरभावे	तदंतर्भावे
२०७	सांक	२	रूपत्वन	रूपत्वेन
२११	निरंक	७	नावीय	भावीय
२१४	निरंक	५	गदोषः	न्नदोषः
२१७	निरंक	५	नावा	भावा
२१८	सांक	४	भावमादायैव	भावज्ञानमादायैव
२२५	सांक	७	तद्वैय्यर्थ्यं	नतद्वैय्यर्थ्यं
२३०	निरंक	१	एवा	एव
२३०	निरंक	५	ता	त्वा
२३०	सांक	७	व्यभिचारिति	व्यभिचारिणि
२३३	निरंक	१	छति	छत
२३७	निरंक	१	तामा	सामा
२३७	निरंक	२	न्नाप्यदृष्टि	न्नादृष्टि
२३८	निरंक	८	धेऽननु	धेनानु
२४१	निरंक	८	ष्यं	ष्यस्य
२४१	सांक	७	विष्ट	विशिष्ट
२४६	सांक	१	विरोधया	विधया
२४६	सांक	१	दोष	दोषत्वं
२५३	सांक	३	योत्वस्य	यत्वस्य

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२५६	सांक	१	शितावच्छेदकवि शिष्टभिन्ना पुनः	
२५८	सांक	४		कत्वं
२५९	सांक	२	अथवेति	अथवेतीति
२६०	सांक	९	बोधयुपे	बोधउपे
२६९	निरंक	३	मा	स्वा
२७०	सांक	३	नाद्यंत	मनाद्यंत
२७१	निरंक	१	मविशेष	मविशेष
२७५	निरंक	४	मेवाव	मेववाव
२७५	सांक	८	र्वविशिष्टैक	र्वविशिष्टैक
२८१	निरंक	७	कति। बाध्यं	केति। बोध्यं
२८१	सांक	८	धीय	बोधीय
२९२	सांक	१	न्ना	न्न
२९६	निरंक	७	रसंग्रहाविति	रसंग्रहसंग्रहाविति
२९६	निरंक	९	योनि	योर्नि
२९८	निरंक	१	त्वावा	त्ववा
२९८	निरंक	३	त्वा	त्व
२९८	सांक	२	योन	योर्न
२९९	सांक	८	त्वसं	त्वतसं
३०६	सांक	३	ताम्र	ताकम्र
३१२	सांक	५	वह्निःसामान्या	वह्निसामान्या
३१२	सांक	५	त्वाव्यापक	त्वव्यापक
३१३	निरंक	६	नहा	महा
३१४	सांक	४	तद्व	तातद्व
३१४	सांक	७	खनीवि	खनीयवि

ॐ इतिन्यायरत्नग्रंथस्यशुद्धिपत्रं ॐ